## C H A P T E R - 5.

### Contribution of CP to the Commentarial literature:-

### Conclusion:-

So far, I have discussed the salient features of the style and the scholarship of CP. and have shown how his commentary surpasses other three commentaries written by Vidyādhara, Mallinātha and Nārāyaṇa.

The sāhityavidyādharī, as the title shows, brings out the literary beauties of the poem in a simple and lucid style. Thus the purpose of Vidyādhara seems to make a difficult poem intelligible to the readers by high-lighting it especially from the literary point of view.

The title Jīvātu of Mallinātha's comm. is really significant as it restores (the poem) to life. Mallinātha's effort is thus, to infuse life into the poem, which is otherwise ' a hard nut to crack'.

The comm. of Nārāyaṇa called Naisadhīya Prakāśa is intended to throw light on the poem as its title suggests. Among the printed commentaries his is the one, which is most popular and pedantic. But the publication of CP's comm. will show how Nārāyaṇa has borrowed verbatim from the former's comm.

Nārāyaṇa follows the khaṇḍānvaya style of Vidyādhara and CP. and not Mallinātha's daṇḍānvaya style.

CP. is the first commentator, to mark the pedantic nature of the poem, made wantonly difficult by Śrīharṣa himself.[1] CP was therefore thoroughly disappointed by the commentary of Vidyādhara, whose commentary he might have perhaps learnt from Munideva.[2] However he does not run down Vidyādhara but shrewdly suggests his displeasure towards Vidyādhara by saying that the depth of Śrīharṣa's muse has been not properly dived into.[3] He, therefore,

undertakes the work of giving proper justice to the unpedantic poem by writing an equally pedantic and scholarly commentory.[4] Thus CP is the first scholar, who has made the NC an arena to exhibit one's scholarship. It is perhaps after his commentary, that the NC might have been extolled as नैषधं विद्वदौषधम् . In other words it was CP who contributed a lot to bring out the scholarly aspect of the poem to light.

"~~The standard~~ ~~Sukhavabodha Nārāyaṇa's~~ commentary on the Naisadha is the prakāśa ~~most popular.~~ of Nārāyana; at any rate, it is the most popular."[5]

A comparision of CP's comm, with that of Nārāyana, who is so far considered as an ideal commentator in giving hair-splitting explanations to bring out scholarly traits of the poem will show, to what extent he has borrowed from CP. In other words Nārāyana's indebtedness to CP will be clear and the true credit of an ideal commentator on an abstruse poem would now be given to CP.

Thus, it is CP. who has for the first time brought to light the fact ~~thereof~~ that the Nc. is a respository of traditional Sanskrit learning by writing a comm, which is also equally respository of traditional ~~SK.~~ Sanskrit scholarship. His commentary is therefore ~~a~~ unique and most valuable contribution of which Gujarat will be proud for ever. Though dvitiya (second one) chronologically, it is advitiyā (unparalleled) among the comms on the NC.

---

1. ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्मया।
प्राज्ञंमन्यमना हठेन पठिती माऽस्मिन् खलः खेलतु ॥ XXII.152
2. कृत्वा श्रीमुनिदेवसंज्ञविबुधात् काव्यं नवं नैषधम् ॥ canto XXII. colo. 1
3. टीकां यद्यपि सोपपत्तिरचनां विद्याधरो निर्ममे ~~canto XXII. colo.~~
श्रीहर्षस्य तथापि न त्यजति सा गम्भीरतां भारती । CP. intro. 2
4. पारावारमपारमम्बु किमिह स्याज्जानुमात्रं क्वचित् ॥ ~~CP. intro. 2~~ Ibid. 2 ~~CP. intro. 2~~
5. Handiqui K.K.: Nc of Śrīharṣa. intro. p. xxxvi.

lxiv

सर्ग १   ॐ नमः शिवाय   1

श्रीगणेशाय नमः।   ॐ नमश्चिन्तामणये।

(1B) ॐ नमो गणेशाय।[1]

सम्यक्साधूपकरणकलावी[2]रलाकेलियोग्ये
सद्भिस्सारे विलसति सतां निर्मले[3] मानसे यः।
स[4] श्रेयस्ते दिशतु सद्[ो]स[त्]क्षीरनीरान्तरज्ञो
ब्रह्मानन्दी सुगतिरचनाराजहंसो विवेकः[5]॥१॥
टीकां यद्यपि सोपपत्तिरचनां विद्याधरो निर्ममे
श्रीहर्षस्य तथापि न त्यजति सा गंभीरतां भारती।
दिक्कूलंकषतां गतैर्जलधरैरुद्गृह्यमाणं मुहुः
पारा[6]वारमपारमम्बु किमिह स्याज्जानुमात्रं क्वचित्॥२॥
तस्माद्वागधिदेवतां तदनु च श्रीवैद्यनाथं गुरुं
नत्वा भक्तिपुरःसरं कविवरः सम्राट् स्थपत्यग्निचि[7]त्।
चाण्डूपण्डितसंज्ञितो निजधिया टीकां व्यलीकां कवेः
श्रीहर्षस्य कृतौ विशेषमधिकं वक्तुं विधत्ते क्वचित्॥३॥

प्रथमं तावत् कविर्विजिगीषु[8]कथायां स्वपितु[9]:

1 $P_1$ ॐ नमो विनायकाय। $P_2$ श्रीसर्वज्ञाय नमः।; $P_1$ further
वाग्देवता पटुतरां धियमादधातु धातुः सुता भगवती स्ववपुर्मयूखैः।
शोभाहिकुन्दशरदिन्दुकलामरालपीयूषहारहरहासमहःसगर्तैः[8]भैः॥
2 $P_2$ °चारकालेति° 3 $P_1$ मानसे निर्मले 4 $P_2$ सद्वाचस्ते 5 $P_1$ no. 12
6 $P_1$ पारवार° 7 $P_2$ °चित 8 B °जिगीषु: 9 B °शिष्ट°; $P_1$ °पितृ°

परिभावुक[10]मुदयंनं[11] प्रत्यमर्षणतया कटाक्षयन्[12] तद्ग्रन्थग्रन्थी-
न्[13]मुद्ग्रथयितुं खण्डनं प्रारिप्सुश्चतुर्विधपुरुषार्थैरभि[मान]नमव-
धीयमानम्[14] अवधार्य[15] मानसमेकताजतामानिनाय।

तथा च श्रीवाराणस्यां मुक्तिक्षेत्रेऽनुभूतपरब्रह्मस्वरूपो[16]
गङ्गादर्शनादिना धर्मकर्मण्यासीनः दृष्टिपुरःसर स्थितस्वायत्त-[17]
मेरुशिखरतुल्य[18]सौवर्ण[19]निष्कराशिदर्शनेन वशीकृतार्थपुरुषार्थः[20]
षोडशवर्षाभिर्नव[21]यौवनवतीभिरपूर्वलावण्यसम्पन्नाभिः प्रमदाभिः[22]
स्नानोद्वर्तनभोजनाद्युपचारचतुराभिः परिचर्यमाणतया
किङ्करीकृतकामपुरुषार्थः।

एवं चतुर्भिरपि पुरुषार्थैरनाक्षिप्तहृदयतया ग्रन्थं
निर्माय तद्ग्रन्थान्[23] खण्डनयुक्तिभिः[24] खण्डशः खण्डितवान्। तत्र
च कर्कशतर्कोद्रेकत्वात् शृङ्गारादिरसप्रधानानामपरितोषं
संभाव्य तदावर्जनाय रसप्रधानं काव्यमिदं चकार।

ततश्च शास्त्रारम्भे निर्विघ्नेन ग्रन्थसमाप्तये
श्रोतॄणां मङ्गलाचरणाय शिष्टा[25]चारपरिपालनायाऽधिकृता-

10 P₂ °भावक° 11 B °मुदयन्तं; P₁P₂ °यनमत्य° 12 B add. स 13 P₂ °नुद्ग्रन्थ° 14 B P₁ P₂ °धीय° ed₂. °चीय° 15 B P₁ °धीर्य 16 B °रूप-
गङ्गा° 17 P₁ °आयत्त° 18 P₁ °सम° 19 B P₁ P₂ °सौवर्ण्य°; ed₂. °र्ण°
20 B P₁ P₂ add. कृतार्थः 21 P₁ om. °नव° 22 P₁ प्रमदाभिः alt. चतुराभिः
23 P₂ तद्ग्रन्थानु 24 P₁ खण्डयन् युक्तिभिः 25 P₂ विशिष्टा°

[26]भीष्टादिदेवताभ्यो नमस्कारः प्रतिपाद्यः। स च न कृतः। यतो नलस्य पुण्यश्लोकत्वात् तत्संकीर्तनादघौघविघट्टनात् कुतो विघ्ननिघ्नता?। तथा[27] पृथुसहस्रार्जुनभरतनल(२८)प्रभृतीनां स्मरणं परममङ्गलहेतुः, अतो मङ्गलाचरणमप्यस्ति। तथा च शिष्टा[28]चारो[29]ऽपि नलदमयन्ती[30]कीर्तनं कलिनाशन[31]मिति। अतो ग्रन्थकारः प्रथमं[32] नलमेव वर्णयन् मङ्गलाचरणमारचयति—

निपीय यस्य क्षितिरक्षिणः[1] कथास्तथाद्रियन्ते न बुधाः सुधामपि।
नलः सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः॥१॥

[2]निपीयेति। स नलो नाम राजा आसीत्। किंविशिष्टः?। महसां प्रतापानां राशिः। तथा महान् उज्ज्वलश्च कान्त्या। अथवा महैरुत्सवैरुज्ज्वलः। एतदेव मङ्गलसूचनम्। किंभूतः?। सितच्छत्रितं कीर्तिमण्डलं येन स तथा। [निष्ठ][3] एतेन कीर्तिप्रतापकमनीयतानां[4] निधानम्। यस्य कथा उपाख्यानानि[5] निपीय। [6]पीङ् (1216) पानेऽस्य प्रयोगः। बुधा विद्वांसः सुधामपि अमृतं सूक्तं वा तथा तेन प्रकारेण न आद्रियन्ते। किंभूतस्य?। क्षितेः पृथिव्याः रक्षिणः पालयितुः। —

26 P1 om. ०आदि० 27 P1 add. च 28 P1P2 विशिष्टा० 29 B ०चारेऽपि 30 P1 ०दमयन्त्योः; P2 ०दमयन्तीनां 31 P1 ०नाशमिति 32 P1 add. वस्तुनिर्देशेन 33 P1 add. स्म

1 P2 text ०रक्षणः 2 P1 om. निपीयेति। 3 P1 add. अथवा सितच्छत्रिता कीर्तिर्यत्र तत्तथा। सितच्छत्रितकीर्तिमण्डलं स्वराष्ट्रं यस्य। मण्डलं परराष्ट्रं यस्मात् स तथा। 4 B ०संनिधानम् 5 B

किंभूतस्य? ।
अथ च बुधा देवा अमृतं नाद्रियन्ते, तत्कथाश्रवणात् । एतेन चक्रवर्तित्वं मण्डले सूचितम् । अथवा महसां राशिरिव श्री[9] सूर्य इव आसीत् ।[9] महैरुत्सवैर्वा उज्ज्वलः । उज्ज्वलः शृङ्गार-प्रधानो, धीरललितनायकत्वात् नलस्य । अथ वा यस्य कथा[10] निपीय क्षितिरक्षिणो नृपास्तथा सुधां पृथिवीमपि नाद्रियन्ते ॥१॥

रसैः कथा यस्य सुधावधीरणी नलः स भूजानिरभूद् गुणाद्भुतः ।
सुवर्णदण्डैकसितातपत्रितज्वलत्प्रतापावलिकीर्तिमण्डलः ॥२॥

रसैः[1] कथेति । स नलः भूजानिः[2] । जायाया निङ् (पा. ५.४.१३४) इति सूत्रम् । भूभर्ता अभूत्[3] । किंभूतः? गुणैरद्भुतः[4] । यस्य कथा रसैः शृङ्गारादिभिः कृत्वा सुधाया अवधीरणी[5] तिरस्कर्त्री[6] । किंभूतः? सुवर्णदण्डश्च एकः[6] सितातपत्रं च ते कृते संजाते[7] वा सुवर्णदण्डैकसितातपत्रिते ज्वलन्ती प्रतापावलिः कीर्तिमण्डले[8] च[9] स तथा । प्रताप: सुवर्णदण्डो जातः । कीर्तिरेकच्छत्रं संजाता । निष्का[10] । अथवा[11] अर्थे[12] विशेषकथनार्थं

- add. यस्य 6 B P1 P2 पीय ; edn. पीड् ; and P1 पीड्..... प्रयोगः alt. न आद्रियन्ते । 7 B P2 तथा ... प्रकारेण alt. न आद्रियन्ते 8 P1 om. श्री° 9 P1 add. सूर्योऽपि महसा तेजसा ज्वलति शोभते । विजातीयानां संयुक्तानां सजातीयेन युक्तानां केवलानां वा उच्चारणस्याभेदात् । 10 P1 add. वीरचरितानि 11 P1 राजान°
1 P1 रसैरित्यादि । 2 P1 भूभर्ता अभूत् here 3 P1 सूत्रेण निङ् । and add. स च निङ्डिद्भ्योः (पा. I.i.53) त्यन्तस्य अतः आकारस्य भवति । तत्र च लोपो व्योर्वली (पा. VI.i.66) ति यलोपः । 4 P1 गुणैः शौर्यादिभिः सन्धि—

पुनरपि तमेवार्थं स्फुरयति श्लेषेण। यस्य कथा रसैरुपलक्षिता स नलोऽभूत्। किंभूतः? सुधावधीः [13] सुष्ठु रुचिरं धावतीति [14] सुधावा शोभनदर्शिनी [15] धीर्बुद्धिर्यस्य। ~~[रणी] रणोत्साहवान्।~~ [16] एतेन मन्त्रशक्तिमान्। [रणी] रणोत्साहवान्। एतेन उत्साहशक्तिः। अत एव (2b) भूजानिः। एतेन प्रभुशक्ति[र्यो]ता, चक्रवर्तित्वात् [17]॥२॥

विग्रहादिभिर्वा अथवा रत्युपचारैरैः वा ~~चतुरभिः~~ चातुर्यादिभिः। रत्युपचारे – चतुरस्तुङ्गकुलो रूपवानुरु मानी। अग्राम्योज्ज्वलवेषोऽनुल्बणचेष्टः स्थि(ति)रप्रकृतिः॥ (काव्यालं XII) सुभगः कलासु कुशलस्तरुणस्त्यागी प्रियंवदो दक्षः। गम्यासु च विश्रम्भी तत्र स्यान्नायकः ख्यातः॥ (XII 8) इत्याद्युक्तैर्वाणाव्यभरतमुनिप्रमुखोपनिषद्ग्रन्थप्रसिद्धैरन्तुतः। 5 $P_2$ °धीरिणी 6 $P_1$ om. विसर्ग 7 $P_1$ om. संजाते वा 8 $P_2$ कीर्तिमण्डलं च 9 B या; $P_1$ येन 10 $P_1$ add. प्रत्ययो ण्यन्तात्। 11 $P_1$ add. शोभनो वर्णो यस्य दण्डेन उपाय विशेषेण एकं सितमातपत्रं सञ्जातं यस्य। तदस्य सञ्जातं तारकादिभ्य इतच् (पा. V.ii.37)। ज्वलन्ती प्रतापावलिकीर्तिमण्डले यस्य। पश्चात् क्रमेण कर्मधारयः। 12 $P_1$ अत्र च 13 $P_2$ om. विसर्ग 14 $P_2$ धावयति 15 $P_1$ °दर्शनी; $P_2$ °दर्शिनां धीर्बुद्धि° 16 $P_1$ °शक्तियुक्तः 17 B °वर्तिता॥; $P_1$ add. क्वचित् अवधीरिणीति पाठान्तरम्। तदा रसैः शृङ्गारादिभिः सुधामवधीरयतीति व्याख्येयम्। कथा हि शृङ्गारादिनवरसा सुधातु[ल्या] मधुरादिषड्रसा मधुर[र]सैव वा। अत्र रसैरिति भेदको धर्मः पृथगुक्तः – ~~पूर्वत्र तु प्रतीयमाने इति भेदः। शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनो-~~ र्द्वयोः। यत्र तद्भेदकथनं व्यतिरेकः स उच्यते इति (II. 180) दण्डिवचनात् व्यतिरेको यथासंख्यं च॥

सर्ग २ 6

पवित्रमत्रातनुते जगद्युगे स्मृता रसक्षालनयेव तत्कथा ।
कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यते ॥३॥

पवित्रमत्रेति[1] । तस्य नलस्य[2] कथा अत्र युगे कलौ स्मृता सती जगत् ~~पवित्रयिष्यति~~ पवित्रम् आतनुते । उत्प्रेक्षते[3] – रसैः यो * क्षालना तया इव । अथ च रसेन उदकेन क्षालितं पवित्रं भवति । सा कथा आविलामपि मद्गिरं[4] कथं न पवित्रयिष्यति ॥ किंभूताम् ? । स्वसेविनीमेव । स्वम् आत्मानं कथारूपमेव सेवत इत्येवंशीलामेव । अभीक्ष्णं सेवत इति वा तां सेविनीम्[5] । तथा च दमयन्त्या नलस्य च ।... कीर्तनं कलिनाशनमि (वन० ७९/११) – त्युक्तत्वात् ॥ ३ ॥

अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः[1] ।
चतुर्दशत्वं कृतवान् कुतः स्वयं न ~~वेद्मि~~ वेद्मि विद्यासु चतुर्दशस्वयम् ॥४॥

अधीतिबोधेति[2] । अहम् इति न वेद्मि । यत् अयं नलश्चतु[3]र्दशसु विद्यासु विषये चतुर्दशत्वम् औपाधिकं कुतः कारणात्[4] कृतवान् * स्वयम् । किं कुर्वन्[5] ? । अधीतिश्चा[6]ध्ययनं, बोधो वेदार्थ[7]ज्ञानम्[8], आचरणम् अग्निहोत्रादिकरणं, प्रचारणम् अध्यापनम्

1 P1 पवित्रमित्यादि ॥ 2 P1 तदास्य 3 P2 उत्प्रेक्ष्यते 4 B मद्गिरां 5 P1 स्वसेविनीमेव नान्यसेविनीम्]

1 P2 [illegible] व्याकि° 2 P1 व्बोधेत्यादि ॥; P2 ~~अधीतीति~~ अधीतीति ।
3 P1 om. विसर्ग 4 P1P2 om. कारणात् 5 P1 om. किंकुर्वन् 6 P1 om. च 7 P1 वेदार्थावधारणम् ; P2 बोधोऽर्थ° 8 P1 अध्यापनादिप्रवर्तनबाहुल्यम्.

एभिरुपाधिभिः विद्यानां चतस्रो दश[9] अवस्थाः प्रणयन् ।
चतस्रो दश यासां ताश्चतुर्दशाः तासां भावस्तत्त्वम् ॥

अयमर्थः । यत्र स्वाभाविकं जातिमत्त्वं न भवति[10] तत्रौपाधिकं[11] तत्त्वं कर्त्तव्यं यथा दण्डित्वकुण्डलित्वादीनाम् आकाशत्वादीनाम् । तत्र दण्डोपाधियोगात्[12] कुण्डलोपाधि[13]सम्बन्धात् । भावे त्वप्रत्ययः । चतुर्दशलक्षणायां संख्यायां[14] चतुर्दशत्वं नाम जातिः स्वाभाविकी अस्ति । ततः कथं चतस्रभिर्दशाभिरुपाधिभिश्चतुर्दशत्वं कृतवान् तन्न जाने इत्यर्थः[15] ॥ ४ ॥ [घटाकाशपटाकाशमठाकाशादिषूपाधिः]

अमुष्य विद्या रसनाग्रनर्तकी त्रयीव नीताङ्गगुणेन विस्तरम् ।
अगाहताष्टादशतां[1] जिगीषया नवद्वयद्वीपपृथग्[2]जयश्रियाम् ॥ ५ ॥

अमुष्य विद्येति[3] । अमुष्य नलस्य विद्या अष्टादशताम् अगाहत[4] । चत्वारो[5] वेदाः, षट् वेदाङ्गानि, पुराण[6]न्यायमीमांसा धर्मशास्त्रं तथा नाट्यवेदो धनुर्वेदो नीतिशास्त्राणि आयुर्वेदश्चेत्यष्टादशविद्याः । किंभूताः ? ।[7] रसनाया अग्रे नर्तकी[8] स्फुरद्रूपा । कया ?

9 P₁ om. upto यासां 10 B संभवति 11 P₂ °धिकत्वं 12 P₁ योग्य° 13 P₁ °पाधिः । P₂ ~~पाधियोगात्~~ and om. घटाकाश°... सम्बन्धात् 14 P₂ om. संख्यायां 15 P₁ add. यद्यपि क्षत्रियस्याऽध्यापनेऽनधिकारस्तथापि धनुर्वेदादिष्वधिकारो वर्ण्यते । तथा च कालिदासः — त्वचं स मेध्या- मि (रघु° II-30) त्यादि । अनुप्रासः ॥ P₂ Rev. mg. add. अत्रोत्प्रेक्षालङ्कारः ॥
1 P₂ for व्याहत 2 P₂ for °पृथक्° 3 P₁ विद्येत्यादि । 4 P₂ व्याहृत 5 B चतुरो 6 B पुराणन्याय° 7 P₁ add. रसनाग्रनर्तकी 8 P₁ om. नर्तकी

नवद्वयसंख्यानाम् अष्टादशद्वीपा[9]नां पृथक् पृथक् [या] जय-श्रियस्तासां जिगीषया । अष्टादश[10]विधाभिरष्टादशद्वीपानि जितानि। जम्बूद्वीपं[11] नव, खण्डं भारतं, खण्डं[12] च नव[13]।।

का इव (३१) व ? । त्रयीव । यथा वेदत्रयी षण्णामङ्गानां[14] गुणेन विस्तरं[15] नीता गुणिता सती अष्टादशतां गाहते । तथा अमुष्य रसवती[16] त्रिधा अङ्गानां[17] पाकविशेषाणां गुणेनाष्टादशतां प्राप्नोति। सापि जिह्वाग्रे नृत्यति, स्वादुत्वात् । तथा[18] अ(स्य) हृदयत्रिधा अङ्गानां द्विकादीनां गुणेनाऽष्टादशधा । तथा हि चतुरङ्गाद्यूते द्विकत्रिक-चतुष्कपञ्चका[19] एतैर्मिलितैश्चतुर्दश भवन्ति । तथा पोडीयक-चतुष्टयेनाऽष्टादशसंख्या[20] ।।५।।

दिगीशवृन्दांशविभूतिरीशिता दिशां स कामप्रसरावरोधिनीम् ।
बभार शास्त्राणि दृशं द्वयाधिकां निजत्रिनेत्रावतरत्वबोधिकाम् ।।६।।

दिगीशवृन्देति[1] । स नलः शास्त्राण्येव द्वयाधिकां[2] तृतीयां दृशं[3] बभार । किं भूताम् ? । निजस्याऽऽत्मनः त्रिनेत्रावतरत्वस्य

9 P2 °दशानां 10 B °दशभिः 11 P1 द्वीपं च 12 P2 °वर्षं च 13 B add. खण्डम् 14 P2 अङ्गानां षण्णां 15 P1P2 विस्तारं 16 P1 त्रिधा रसवती 17 P2 अङ्गाणां 18 a P1 add. अस्य 19 B P1 पञ्चक एतै° 20 P1 add. उपमा । जिगीषयेत्यध्यवसायस्य सिद्धत्वादति-शयोक्तिः । जिगीषयेवेति प्रतीयमानोत्प्रेक्षा वा ।।५।।

1 P1 दिगीशेत्यादि ।।; P2 दिगीशेति । 2 P2 द्वयाद° 3 P1 दृशं तृतीयां

सर्ग १ 1

श्रीमहादेवावतरत्व[4]स्य बोधिकाम् । यस्त्रिनेत्रः स श्रीरुद्रः ।
किंभूतो नलः ?। दिगीशवृन्दानाम् अंशेभ्यो विभूतिरुत्पत्तिर्यस्य,
दिक्पालां[5]शत्वात् । तथा दिशामीशिता[6] ईश्वरः । किंभूतां शास्त्र-
दशाम् ?। कामप्रसरस्या[7] विरोधि[8]नीं निषेद्ध्रीम् । अथ च
त्रिनेत्रोऽपि । दिक्पालवृन्दमध्ये अंशे[9]न विभूतिर्यस्य, इन्द्रादीनां
मध्ये ईशानो[10] दिक्पालः ।[11] सोऽपि दिशा ईशान्या ईशिता ।
अथवा आदिशन्तीत्यादिशा उपदेष्टारस्तेषामीश्वरः । तस्य
[६]क कन्दर्पप्रसरं रुद्धवती[12] ॥६॥

---

पदैश्चतुर्भिः सुकृते स्थिरीकृते कृतेऽमुना के न तपः प्रपेदिरे ।
भुवं यदेकाङ्घ्रिकनिष्ठया स्पृशन्दधावधर्मोऽपि कृशस्तपस्विताम् ॥
॥७॥

---

पदैश्चतुर्भि[1]रिति । कृते कृतयुगे के पुरुषास्तपो न
प्रपेदिरे ?। क्व सति ?। अमुना नलेन चतुर्भिः पदैः सुकृते स्थिरी-
कृते सति । तथा च मनुः - चतुष्पात् सकलो धर्मः सत्यं चैव
कृते युगे । (I.8 ab) । यत् यस्मात् अधर्मोऽपि तपस्वितां
दधौ । किं कुर्वन् ?। एकस्याङ्घ्रेश्चरणस्य कनिष्ठिकया स्पृशन्[2] ।
अथ च वराकताम् अधर्मो दधौ ।[3] करुणाप्रतिपादने तपस्वी च ।

---

4 P1 P2 °तारत्व° 5 P2 दिक्पाला° 6 P2 ईसिता 7 P1 P2 °लस्य 8 P2
°रोधिनी 9 B अंशं न 10 P1 add. अपि 11 P1 add. अथवा दिगीशवृन्दे
अंशो यस्य, विशिष्या भूतिर्भस्म यस्य, ततः कर्मधारयः । 12 P1 add.
रूपकं श्लेष उपमाऽपि । तथा च दण्डी - यथाकथं चित्सादृश्यं यत्रो-
द्भूतं प्रतीयते । उपमा नाम सा तस्याः प्रपञ्चोऽयं निदर्श्यते ॥(  )॥
P2 sup. mg. add. इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च । इश-
वित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥ अप्राभिश्च सुरेन्द्राणां

Contd.. P.10

कृतयुगे अधर्मस्य वार्त्तामात्रेण स्पर्शः । कृशो दुर्बलः [4] [5] [6] ॥७॥

यदस्य यात्रासु बलोद्धतं रजः स्फुरत्प्रतापानलधूममञ्जिम ।
तदेव गत्वा पतितं सुधाम्बुधौ दधाति पङ्कीभवदङ्कतां विधौ ॥८॥

यदस्य[1] यात्रास्विति । अस्य नलस्य यात्रासु यद् बलै-
रुद्धतं[2] रजोऽभूत् । किंभूतम् ? । स्फुरन् यः प्रतापानलः तस्य
यो धूमस्तद्वन् मञ्जिमा[3] चारुत्वं यस्य तत्तथा । (3b) तदेव रजः
गत्वा विधौ चन्द्रे पतितं सत् अङ्कतां दधाति । किं कुर्वत्[4] ? ।
पङ्कीभवत् । किंविशिष्टे[5] ? । सुधाम्बुधौ अमृतसमुद्रे[6] ॥८॥

स्फुरद्धनुर्निस्वननद्धनाशुगप्रगल्भवृष्टिव्यथितस्य सङ्गरे ।
निजस्य तेजःशिखिनः परःशता वितेनुरिङ्गालमिवायशः परे ॥९॥

स्फुरद्धनुरिति[2] । परे शत्रवः अयशो वितेनुः । किंभूताः ? ।
शतेभ्यः परेभ्यः परे परःशताः[3] । परःशतादिरिति सूत्रे[4] । उक्तोऽसौ

मात्राभिर्निर्मितो नृपः । तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥ (VII.
4,5.) मनुः । नरहरिभट्टमध्ये ।

1 P1 पदैरित्यादि ॥ P2 पदैरिति । 2 P1 अस्पृशन् 3 B add. किं कुर्वन् ? ।
4 P1 स्पर्शः 5 P1 कृतो 6 P1 add. तद्विरुद्धेनस् । अनुप्रास
उपमा विरोधश्च ॥७॥

1 P1 यदस्येत्यादि ॥ P2 यदस्येति । 2 B उद्धृतं, P1 add. उद्धुतमिति
पाठान्तरम् । 3 B मञ्जिष्ठमा 4 P2 किं कुर्वन् ? । पङ्कीभवन् । 5 P1 add.
विधौ 6 P1 add. रूपकमुपमाऽतिशयोक्तिश्च ॥८॥

1 P2 text नरङ्गारं 2 P1 ध्वनुरित्यादि ॥ P2 स्फुरदिति । 3 P1 शताधाः
प्रोक्ता ते परः, संख्याशतादिकान् । 4 P2 सूत्र

निजस्य तेजःशिखिनः [5] ~~शान्तस्य~~ प्रतापस्य इङ्गालमिव अङ्गारमिव [6]। किंभूतस्य? स्फुरन् [8] धनुषो निःस्वनो यस्य स तथा, एवंविधश्चासौ स च नलश्च, स एव घनो मेघस्तस्याऽऽशुगानां बाणानां [9] प्रगल्भतया वृष्ट्या व्यथितस्य शमितस्य। अन्येस्तोयेन शान्तस्याङ्गारः कृष्णवर्णो भवति। अकीर्तिश्च कृष्णा। मेघोऽपि धनुर्भवति, निःस्वनश्च। [10] आशुगेन वायुना सह वृष्टिश्च [11] ॥९॥

अनल्पदग्धारिपुरानलोज्ज्वलैर्निजप्रतापैर्वलयं ज्वलद्भुवः।
प्रदक्षिणीकृत्य जयाय सृष्टया रराज नीराजनया स राजघः ॥१०॥

[1] अनल्पदग्धेति। स राजा नलः निजप्रतापैः सृष्टया नीराजनया आरात्रिकविधानेन रराज। किं कृत्वा [2]? भुवो वलयं प्रदक्षिणीकृत्य। [3] किमर्थम्? जयाय। किंभूतैः? अनल्पानि दग्धानि यान्यरीणां पुराणि तेषाम् अनलैः करणैः तद्वत् वा [4] उज्ज्वलैः बहुलीभूतैः। किंभूतं [वलयम्]? ज्वलत्। तैरेव। किंभूतः? राज्ञो हन्तीति राजघः। अथवा [5] निजप्रतापैः ज्वलद्भूमण्डलं प्रदक्षिणीकृत्य यात्रायां कृतया [6] नीराजनया रराज। अथवा निर्गतान् राज्ञः करोती[7][ति तया] नीराजयति तया। अन्येषां राज्ञाम् अभावकरणेन [8]

5 BP₁P₂ शान्तस्य; ed. प्रतापस्य 6 P₁ अङ्गाल° 7 BP₁P₂ add. प्रतापस्य 8 P₁P₂ स्फुरत् 9 P₁ add. अथवा घनानामाशुगानां प्रगल्भया 10 P₁ add. स्वनाभावो वा निःस्वन इत्यर्थः। तदा स्फुरद्धनुरिति पदम्। ॥ P₁ add. रूपकमुत्प्रेक्षा च ॥

1 P₁ ल्पदग्धारि[रि]पुरेत्यादि॥; P₂ अनल्पेति। 2 P₁ add. सृष्टया 3 P₂ किंभूतैः! 4 P₁ उज्ज्वलैर्वा 5 P₁ om. the line 6 P₂ कृतायां 7 BP₂ om. इति 8 B करणेन

रराज[9] । यतो राजघः[10] ॥२०॥

निवारितास्तेन महीतलेऽखिले निरीतिभावं गमितेऽतिवृष्टयः ।
न तत्यजुर्नूनमनन्यविश्रमाः प्रतीपभूपालमृगीदृशां दृशः ॥२१॥

निवारिता[1] इति । अतिवृष्टयस्तेन नलेन अखिले महीतले निवारिताः सत्यो[2] नूनं प्रतीपानां विपक्ष[भूतानां] भूपालानां मृगीदृशां स्त्रीणां दृशो न तत्यजुः । किंभूते? निरीतिभावम् ईतिरहितता[3] गमिते[4] । किंभूताः? न अन्यत्र ~~विश्राम~~ विश्रमो यासां तास्तथा । विश्रम इति णिज्वद्भावाभावो[5] महाकवीनां प्रायः संमतः । तथा च माघः - विश्रमार्थमुपगूढमि (शिशु० १०।८८ ब)ति । [विपक्षवनिता[6]] निरन्तरं रुदन्तीत्यर्थः । अतिवृष्टिरनावृष्टिर्मूषिकाः[7] शलभाः शुकाः । स्वचक्रं परचक्रं वा[8] ~~षडे~~ सप्तैता ईतयः स्मृताः ॥८ [9]॥२१॥

सितांशुवर्णैर्वयति[1] स्म तद्गुणैर्महासिवेम्नः सहकृत्वरी बहुम् ।
दिगङ्गनास्याऽऽवरणं रणाङ्गणे यशःपटं तद्भटचातुरीतुरी ॥२२॥

9 P2 रराजघः । 10 P1 add. अनुप्रास उपमा च ॥

1 P1 निवारि(त्य)ता इत्यादि ॥ P2 निवारीति । 2 P1 सत्य 3 P1 गमिते ईति०, P2 ०रहितानां 4 P1 add. प्रापिते 5 P2 ज्वद्भावा० 6 BP1 ता निरन्तरं 7 P2 मूषकाः 8 P2 च 9 P1 add. नूनमनन्यविश्रमाः सत्यो दृष्टीर्न तत्यजुः इति उत्प्रेक्षा । विपक्षरमणीरोदनप्रतिपादनेन तेन सर्वेऽपि प्रतीपभूपाः अयं जीता इति पर्यायोक्तम् । यदाह रुय्यकः:- गम्यस्यापि भङ्ग्यन्तरेणाभिधानं पर्यायोक्तम् (अलं० स० ३७) । अतिवृष्टय इत्यतिशयोक्तिश्च ॥२१॥

1 P2 ted om. रेफ ०र्वयति

सितांशुवर्णैरिति[2]। तस्य नलस्य भटानां या [चातुरी][3] चतुरता (५८) सैव तुरी काष्ठविशेषः[4]। रणाङ्गणे यश एव पटस्तं वयति स्म। कैः? [तद्गुणैः] तस्य शौर्यादिभिः[5] गुणैः। किंभूतैः? सितांशुश्चन्द्रः तत्सवर्णैः। किंभूता तुरी? महान् असिरेव वेमा[6] वयनकाष्ठं तस्य सहकृत्वरी[7] सहकारिणी[8]। वनो र च[9] (पा. IV.1.7) इति ङीप्प्रत्ययः, रत्वं च। बहु निबिडम्। तथा दिगङ्गणस्य आवरणम् आच्छादकम्। अन्योऽपि पटस्तुरीवेम-प्रभृतिभिः[10] काष्ठैरसमवायिकारणैर्गुणैः[11] समवायिकारणैः तथा सितानाम् अंशूनां तन्त्ववयवानां वर्णैः[12] क्रियते। सोऽपि अङ्गणीनाम्[13] आवरकः[14]। श्वेतैरंशुभिरारब्धास्तन्तवः[15] श्वेतास्तैरारब्धः पटोऽपि श्वेतः[16]। कारणतन्तुगतं[17] रूपं कार्ये पटे रूपम् आरभते, असमवायिकारणत्वेन[18]॥२२॥

प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेतृतोज्झिता।
अमित्रजिन्मित्रजिदोजसा स यद्विचारदृक् चारदृगप्यवर्तत ॥१३॥

२ P2 सितांशुवेति। 3 B P2 om. चातुरी 4 P2 °विशेषा 5 P1 add. तैः प्रसिद्धैर्वा गुणैः 6 P1 वानकाष्ठं; P2 वान° 7 P1 P2 सहकृतवती 8 P1 वापदण्डः। यदाह–पुंसि वेमा वापदण्डः (अमर° II.X.28)। ~~उच्यते। तन्तो सूत्रं येनेति~~ उच्यते इष्यते तन्तो सूत्रं येनेति वापस्तदर्थो दण्डः वापदण्ड इति तु युक्तम्। 9 P1 °वन् सहे चो[...] III.II.96) इति पाणिनीयम्। 10 P1 P2 °प्रभृतिकाष्ठैः 11 P1 °निमित्त° 12 P1 सवर्णैः 13 P1 add. क्रियते ~~स्त्रीणाम्~~° 14 P1 P2 आवारकः 15 P1 add. अपि 16 P1 P2 सितः 17 P2 om. तन्तु° 18 P1 add. रूपकं, गुणैरिति श्लिष्टमा

प्रतीपभूपैरिति[1]। अयमेव[2] वस्तुनो भेदो[3] भेदहेतुर्वा यद्विरुद्ध-धर्माध्यासः कारणभेदश्च। किं ततो नलात् भिया परस्परं विरुद्धै-[4]रपि धर्मैः भेतृता भेदकारिता उज्झिता[5]। कैरिव? प्रतीपैः प्रतिपक्षै-भूपैरिव। यथा तैर्भयेन भेदकता त्यक्ता, किन्त्वभेदेनैव सेवन्ते। यत् स नलः[6] अमित्रजित् मित्राजिच्च ओजसा अवर्त्तत। यच्च विचारदृक् चारदृगप्यवर्त्तत। [न मित्रं जयति। अथ च अमित्रः शत्रुः मित्रं जयतीति मित्राजित्।] अथ च मित्रमादित्यं जयति। चारत्लक्षणा[7] दृक् यस्य। अथ च विचारे विवेके दृक् यस्य। अमित्रजित्त्वं मित्राजित्त्वं च। विचारदृक्त्वं चारदृक्त्वं च। ~~विरुद्धधर्मा~~ विरुद्धा अपि धर्मास्तस्मिन्[8] वर्त्तन्ते अभेदेन[9]॥ १३॥

तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा।
तनोति भानोः परिवेषकैतवात्तदा विधिः कुण्डलतां विधोरपि॥ १४॥

तदोजस[1] इति। यदा यदा विधिर्ब्रह्मा इति चित्ते कुरुते चिन्तयति। इतीति[2] किम्? यत् तस्य नलस्य ओजसः प्रतापस्य स्थितौ सत्यां तस्य यशसश्च[3] स्थितौ सत्याम् इमौ सूर्याचन्द्रमसौ वृथा[4] मृषा। प्रतापेन यशसा च सूर्यचन्द्रयोः कार्यस्य कृतत्वात्।

1 P. भूपैरित्यादि॥ P2 प्रतीपेति। 2 P2 add. हि 3 P, P2 om. ~~विसर्ग~~ रेफ 4 P2 P. परस्परवि॰ 5 P2 sec. mg. add. विरुद्धधर्मा हि भेदका परस्परं भेदका भवन्ति, नलविषये च तथाभूता नाभवन्नित्यर्थः। 6 P. om. विसर्ग 7 P. add. विगता 8 P. add. अभेदेन 9 P. add. उत्प्रेक्षा विरोधश्च॥
1 P. तदो॥ P2 तदोजेति। 2 P. इति किम्? 3 P2 यशसः श्च
4 P. मृषा वृथा

तदा विधिर्भानोर्विधोरपि परिवेषकैतवात् कुण्डलतां तनोति।
यत्तु किल अधिकं भवति, ततो रेखया कुण्डलीक्रियते।।१४।।

अयं दरिद्रो भवितेति वैधसीं लिपिं ललाटेऽर्थिजनस्य जाग्रतीम्।
मृषा न चक्रेऽल्पितकल्पपादपः प्रणीय दारिद्र्यदरिद्रतां नृपः।।१५।। /पः

अयं दरिद्र इति। स नृपः अर्थिजनस्य ललाटे जाग्रतीम् इति वैधसीं वेधसः सम्बन्धिनीं लिपिम् अक्षरपङ्क्तिं मृषा न चक्रे। इतीति किम्? अयमर्थी दरिद्रो भविता। किं कृत्वा? दरिद्रस्य भावः दारिद्र्यं, दारिद्र्येण दरिद्रो यः स तस्य भावस्तत्तां प्रणीय। यतोऽल्पितकल्पपादपः कल्पवृक्षो येन स तथा। अत एव दारिद्र्यस्याभावो जात इत्यर्थः।।१५।।

विभज्य मेरुर्न यदर्थिसात्कृतो न सिन्धुरुत्सर्गजलव्ययैर्मरुः।
अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराः शिरःस्थितम्।।१६।।

5 P₁P₂ यत् 6 P₁P₂ तद्रेखया 7 P₁ add. यदा यदेति येन केनचिद्रूपेण स्थितः सर्वात्मकः कालः आक्षिप्तः। तथाभूत एव तदेति तच्छब्देन परामृश्यते। यधन्वापं प्रतिजहि जगन्नाथ नमस्य तन्मे (काव्य. 1.5) इतिवत् प्रतीपम्। यदाह- उपमानस्याक्षेपात् उपमेयताकल्पनं वा प्रतीपम् ।(अलं. स. 2.70) परिवेषात् भवति। किन्तु कुण्डलतेत्यपह्नुतिश्च।।

1 P₁ अयं दरिद्रो भ।।; P₂ अयमिति। 2 P₁ इति किम्? 3 P₁ दारिद्र्य° 4 B दरिद्र 5 B P₁ यस्य स तथा तस्य 6 B om. विसर्ग 7 P₁ om. कल्पवृक्षो 8 P₁ add. मधुकृतोऽमरतरुः। 9 P₁ add. अनुप्रासोतिशयोक्तिश्च।। ; P₂ sup. leco. mg. add. अत्रातिशयोक्तिरलङ्कारः।।१५।।

विभज्य[1] मेरुरिति। तेन राज्ञा द्वाभ्यां फालाभ्यां बद्धा — श्रिकुरा: केशा: शिरसि स्थितं तत् निजम् अयशोयुगम् अकीर्ति-द्वयममानि यत् 'मया मेरु: पर्वतो विभज्य खण्डीकृत्य अर्थिसात् न कृत:' इदमेकमयश:। यच्च 'मया सिन्धु: समुद्र: उत्सर्गजलस्य संकल्पोदकस्य व्यर्थैर्मेरुर्न कृत:, निर्जलश्च न कृत:। द्वितीयमिदम[2]-यश:। सीमन्तबद्धा: केशा एवाऽकीर्ति:, कृष्णवर्णत्वात्[3] ॥१६॥

अजस्रमभ्याश[1]मुपेयुषा समं मुदैव देव: कविना बुधेन च।
दधौ पटीयान् समयं नयन्नयं दिनेश्वरश्रीरुदयं दिने दिने ॥१७॥

अजस्रमभ्याश[2]मिति। अयं देवो नल: दिने दिने उदयं दधौ। किं कुर्वन्?। कविना काव्यकर्त्रा बुधेन विदुषा च समं समयं नयन्। किं विशिष्टेन?। अजस्रम् अभ्याशं समीपम् उपेयुषा। किं विशिष्ट:?। दिनेश्वर: श्री[3]सूर्यस्तद्वत् श्री[4]स्तेजो लक्ष्मीर्यस्य [स] तथा। पटीयान् समर्थ:। श्रीसूर्योऽपि प्रतिदिनं पटु: सन् कविना शुक्रेण बुधेन च ग्रहेण समं कालं नयति। मुदैव। सूर्य[5]श्च आशामभि अभ्याशम् उप[6] समीपं[6] आगच्छता ग्रहद्वयेन समम्[7] ॥१७॥

1 P₁ विभज्येत्यादि। P₂ विभज्येति 2 B अयश: इदम्; P₂ om. इदम् 3 P₁ add. अपह्नुतिरलङ्कार: ॥१६॥

1 P₂ text भ्यास° 2 P₁ अजस्र॥ P₂ अजेति। 3 P₁P₂ om. श्री 4 P₂ om. विसर्ग 5 BP₁ सूर्यस्य 6 B समीपम् उप; P₂ om. समीपं 7 P₁ add. अभ्यस्यते वाप्यते अभ्यास: समीपम्। अन्यस्तु पटीयांसमिति पठित्वा पटीयांसं सर्वाङ्गीणमुदयं यन् गच्छन्। अयमनुकूलं दैवं न दधौ, अपि तु दधौ। इति काव्या व्याचष्टे। उपमा सहोक्ति: श्लेषोऽनुप्रासश्च ॥१७॥

अधोविधानात् कमलप्रवालयोः शिरःसु दानादखिलक्ष्माभुजाम् ।
पुरेदमूर्ध्वं भवतीति वेधसा पदं किमस्याऽङ्कितमूर्ध्वरेखया ॥१८॥

अधोविधानादिति[1]। किं वेधसा अस्य नलस्य पदम् इति कारणात् ऊर्ध्वरेखयाऽङ्कितम्[2]। इतीति[3] किम्?। इदं पुरा पश्चात् ऊर्ध्वं भविता[4] भविष्यति, उपरिवर्तित्वात्। कस्मात्?। कमलस्य [प्रवालस्य] पल्लवस्य च अधोविधानात् अधःकरणात्[5]। तथा अखिलानां क्ष्माभुजां[6] राज्ञां शिरःसु दानात्[7] मस्तकेषु दानात्। अतः सर्वोपरि वर्तित्वाच्चरणे सामुद्रिकलक्षणम् ऊर्ध्वरेखा[8]॥१८॥

जगज्जयं तेन च कोशमक्षयं प्रणीतवान् शैशवशेषवानयम् ।
सखा रतीशस्य ऋतुर्यथा वनं वपुस्तथालिङ्गदथास्य यौवनम् ॥१९॥

जगज्जयमिति[1]। अयं नलः शैशवस्य शेषं विद्यते[2] यस्य स तथा[3] एवंविधः सन् यौवनप्रवेशो[4] जगतः पृथिव्या जयं प्रणीतवान्। तेन जयेन [च] अक्षयं कोशं[5] द्रव्यं कृतवान्। अथ अस्य यौवनं कर्तृ वपुः कर्म[6] तथा आलिङ्गत्[7] यथा रतीशस्य सखा मित्रं च ऋतुः वसन्तः स वनम् आश्लिष्यति[8]॥१९॥

1 P1 अधो॥ 2 P2 अङ्कित 3 P1 इति किम्? 4 P2 add. विसर्ग; P1 ऊर्ध्वं भविष्यति 5 P1 तिरस्करणात् 6 B क्ष्माभुजानां 7 P1 पराजयात्। 8 P1 add. उत्प्रेक्षा ॥१८॥

1 P1 om. इति 2 P1 विद्यतेऽस्य 3 P1 तथाविध एव; P2 यस्य तथाविध एव 4 P1 add. एव 5 P1 add. भाण्डागारं; P2 द्रव्यसङ्ग्रहं 6 P2 कर्म 7 P1 add. आश्लिष्यत् 8 P1 add. अनुप्रास उपमा च ॥१९॥

सर्ग १

अधारि पद्मेषु तदङ्घ्रिणा घृणा क्व तच्छयच्छायलवोऽपि पल्लवे । /च्छा
तदास्यदास्येऽपि गतोऽधिकारितां न शारदः पार्वणशर्वरीश्वरः ॥२०॥

अधारि[1] पद्मेष्विति । तस्य नलस्य अङ्घ्रिणा चरणेन पद्मेषु घृणा जुगुप्सा अधारि[2] । ततः पल्लवे तस्य शयो हस्तः तस्य छाया शोभा तस्या लवोऽपि लेशोऽपि क्वाऽस्ति । तथा तस्य[3] आस्यस्य दास्येऽपि शारदः शरत्कालीनः पार्वणः[4] पूर्णः शर्वरीश्वरश्चन्द्रः[5] अधिकारितां न गतः । [6]दासत्वयोग्योऽपि नेत्यर्थः । अथवा[7]* पदश्चरणस्य भा लक्ष्मीर्येषु तानि पद्मानि तेषु । यदा अङ्घ्रिः शरीरस्य निकृष्टोऽवयवः घृणां कुरुते, तदा[8] पदो लवे लेशमात्रे तस्य हस्तस्य प्रधान[9]शरीरावयवस्य छायायां[10] लवोऽपि कुतः । विभाषा सेनासुराच्छायाशालानिशानाम् (पा० II.iv.25) इति छायान्तस्तत्पुरुषो वा नपुंसकलिङ्गो[11] भवति[12] । परिकरप्रतीपौ ॥२०॥

किमस्य लोम्नां कपटेन कोटिभिर्विधिर्न लेखाभिरजीगणद्गुणान् । /ले
न रोमकूपौघमिषाज्जगत्कृता कृताश्च किं दूषणशून्यबिन्दवः ॥२१॥

1 P₁ अधारि; P₂ अधोरीति 2 P₁ lect. mg. add. धृता । तदपेक्षया चरणस्याऽतिसुन्दरत्वात् । अन्योऽपि योऽतिरमणीयो भवति सोऽन्यनिकृष्टं निन्दतीत्यर्थः । 3 B अस्य 4 B पार्विकः ; P₁ add. पार्विकः 5 P₁ om. विसर्ग 6 P₁ add. शारद इति मेघतुहिनादिरहितः । पार्वणः इति पूर्णकलः । शर्वरीश्वर इत्यत्र स ईश्वरः इह तु 7 P₁P₂ च 8 B तथा 9 P₁ शरीरप्रधानाव° 10 P₁ छाया शोभा°; P₂ छायालवो° 11 P₂ add. न 12 P₁ अनुप्रासः परिकरः व्यतिरेकश्च ॥२०॥

सर्ग १ 19

[1] किमस्येत्यादि । [किम्] अस्य नलस्य लोम्नां [2] कपटेन व्याजेन कोटिभिर्लेखाभिर्विधिर्ब्रह्मा गुणान् न अजीगणत् । अपि तु [3] लोमव्याजेन वेधसा गुणानां [4] रेखाः कृताः । किं जगत्कृता ब्रह्मणा [5] रोमकूपौघमिषात् दूषणस्य [6] शून्यबिन्दवः [न कृताश्च] दोषाभावप्रतिपादकाः कोटिभिरुपलक्षिताः । [शरीरमध्ये] अस्मिन् प्रदेशे दूषणं [7] नास्तीत्येवं शून्यबिन्दवः [8] । [9] रोमकूपमिषेण शून्यबिन्दवः रोमकूपौघमिषेण विधिः कृतवान् ॥२१॥

---

अमुष्य दोर्भ्यामरिदुर्गलुण्ठने ध्रुवं गृहीतार्गलदीर्घपीनता ।
उरःश्रिया तत्र च गोपुरस्फुरत्कपाटदुर्धर्षतिरःप्रसारिता ॥२२॥

---

अमुष्य [1] दोर्भ्यामित्यादि । अमुष्य नलस्य दोर्भ्यां बाहुभ्याम् अरीणां दुर्गस्य लुण्ठने क्रियमाणे ध्रुवम् अर्गलस्य दीर्घता पीनता च गृहीता । दुर्गाणां भङ्क्त्वा लोकाः स्वं स्वमभिमतं मुष्णन्ति । तथाऽस्य [3] उरःश्रिया शोभया [4] च तत्रैव दुर्गलुण्ठने गोपुरे प्रतोल्यां स्फुरतोः कपाटयोः [5] दुर्धर्षता तिरःप्रसारिता [6] । सा गृहीता । (5b) हृदयम् अनाकलनीयं विशालं [7] च [8] ॥२२॥

---

1 P₁ किमस्य । P₂ किमस्येति । 2 B रोम्णां, रोमं and add. भुरुहानां किमु 3 B संख्यां कृतवानेव । कोटिभिरुपलक्षिताः । दूषणदोषाः कृताः । 4 P₁ गुणगणनरेखाः 5 P₁ वेधसा 6 P₁ दूषणशून्य° 7 B नास्ति । अत्र दूषणं नास्ति । 8 P₁ add. कोटिसंख्यारोमकूपौघमिषेण कृताः । अनुप्रास उत्प्रेक्षा अपह्नुतिश्च ॥ 9 P₂ रोमकूपमिषेण कृताः ॥

1 P₁ अमुष्य । P₂ अमुष्येति । 2 भादद्दते लुटन्ति । 3 P₁ om. उरः, P₂ उरसः 4 P₂ om. च 5 P₁ add. या 6 P₁ P₂ add. च 7 B विशालत्वं 8 P₁ add. ध्रुवमित्युभयत्रापि सम्बध्यते । इत्युत्प्रेक्षा वा अलङ्कारः । उत्तरार्द्धे उपमा contd.

स्वकेलिलेशस्मितनिन्दितेन्दुनो निजांशदृक्तर्जितपद्मसम्पदः।
अतद्वयीजित्वरसुन्दरान्तरे न तन्मुखस्य प्रतिमा चराचरे ॥२३॥

स्वकेलिलेशेत्यादि[1]। तन्मुखस्य प्रतिमा चराचरे विश्वे नास्ति। किंभूतस्य? स्वकेलेर्[2] निजक्रीडाया [लेशो][3] अवयवं यत् स्मितम् अथवा स्वम्[4] आत्मीयं केल्या क्रीडया यत् लेशरूपं स्मितं तेन निन्दित इन्दुर्येन तस्य तथा। पुनः किंभूतस्य? निजमुखैकदेशभूता[5] अंशरूपा या दृक् दृष्टिस्तया तर्जिता भर्त्सिता[6] पद्मसंपत् येन तस्य[7] तथा। मुखस्योपमानं किल[8] चन्द्रः[9] पद्मं च, तदुभयं यस्यैकदेशेन[10] जितम्। किंभूते विश्वे? न तस्य [द्वयस्य][11] चन्द्रपद्मरूपस्य उभयस्य जित्वरं सुन्दरान्तरं रमणीयपदार्थान्तरं यत्र तस्मिन् तथा। तदुभयं मुक्त्वाऽन्यः पदार्थो रम्यो नास्ति यो मुखेनोपमीयते[12] ॥२३॥

सरोरुहं तस्य दृशैव तर्जितं जिताः स्मितेनैव विधोरपि श्रियः।
कुतः परं भव्यमहो महीयसी तदाननस्योपमितौ दरिद्रता ॥२४॥

प्रतीयमानोत्प्रेक्षा वा ॥२२॥ P2 in l. mg. add. अत्रोत्प्रेक्षोपमालङ्कारः ॥२२॥
1 P1 स्वके। P2 स्वकेलीति। 2 P1 अकेले 3 P2 लेशो अवयवे 4 P2 om. स्वम् 5 P1 निजअंशरूपा मुखैकदेशभूता या 6 P1 add. च 7 B P1 स्त 8 B किं च 9 P1 add. जि(जं)गमेषु स्थावरेषु पद्मं तदुभयं 10 P1 निर्जितम्। 11 B द्वेष्या:; P1 द्वेष्य:; P2 द्विद्वेषा:; edn. द्वयस्य
12 P1 add. अत्र वक्ष्यमाणे च प्रतीपमनुप्रासश्च ॥२३॥

[1]सर इति। अहो तस्य नलस्याऽऽननस्य अमितौ महीयसी[2] महती दरिद्रता। यतः सरोरुहं तस्य दृशा इव तर्जितम्। तथा विधोरपि श्रियः शोभाः स्मितेनैव जिताः[3]।[4] एतस्मादुभयात् परम् अन्यत् विश्वे भव्यं रम्यं वस्तु कुतः।[5] नास्तीत्यर्थः। यदुपमा[6] क्रियते[7] ॥२४॥

स्ववालभारस्य तदुत्तमाङ्गजैः समं चमर्यैव तुलाभिलाषिणः।
वा/अनागसे शंसति बालचापलं पुनः पुनः पुच्छविलोलनच्छलात् ॥२५॥

स्ववालभारेति[1]। चमरी[2] इव स्वकीयस्य ~~बालचाप~~ वालभारस्य[3] केशसमूहस्य वालचापलं[3] वालत्वाच्चपलत्वं शंसति। न तु बुद्धिपूर्वकम्। किमर्थम्? अनागसे अपराधाभावाय। कस्मात्? पुनः पुनः पुच्छस्य विलोलनं चालनं तस्य छलात् व्याजात्। किं विशिष्टस्य? तस्य उत्तमाङ्गजैः केशैः समं तुलां[4] साम्यम् अभिलषतीत्येवंशीलस्य। अथ च बालानां[3] केशानां चपलत्वम्। यो हि निकृष्टः सन् उत्तमैः[5] अङ्गजैः पुत्रैः सह[6] साम्यं कुरुते। स अपराधी भवति। परं बालस्याऽपराधो न गणनीयः[7] ॥२५॥

महीभृतस्तस्य च मन्मथश्रिया निजस्य चित्तस्य च तं प्रतीच्छया।
द्विधा नृपे तत्र जगत्त्रयीभुवां नतभ्रुवां मन्मथविभ्रमोऽभवत् ॥२६॥

1 ~~P₁ सरोरुहम्~~ B om. com.; P₁ सरोरुहम्। 2 edr. add. महीयसी 3 P₂ om. विसर्ग 4 P₁ एतदुभयस्मात् 5 P₁ add. रम्यं वस्त्वन्तरं 6 P₂ तदुपमा 7 P₁ add. अथवा परम् उत्कृष्टं कुतो भविष्यति॥२४॥

1 P₁ स्ववाल।; P₂ स्ववालेति॥ 2 P₁ आसतामन्ये ज्ञानिनः पशु चमरी 3 P₁ बाल० 4 B तुल्यं 5 P₁ उत्तमानाम् 6 P₁ समं 7 P₁ add. प्रतीयमानोत्प्रेक्षाऽपह्नुतिश्च ॥२५॥

सर्ग १ 22

महीभृत[1] इति। तत्र तस्मिन्नृपे जगत्त्रय्यां भुवाम्[2] उत्पन्नानां नतभ्रुवां कामिनीनां द्विधा मन्मथस्य विभ्रमो भ्रान्तिर्विलासश्च[3] अभवत्। कथा?। तस्य [महीभृतो] नलस्य मन्मथश्रिया[4]। कामोऽयमिति भ्रान्तिर्जाता[5]। तथा निजस्य चित्तस्य तं नलं[6] प्रति इच्छया च[7] तासां कामविलासः कटाक्षादिर्जातः[8]॥२६॥

निमीलनभ्रंशजुषा दृशा भृशं निपीय तं यस्त्रिदशीभिरर्जितः। १८
अमूस्तमभ्यासभरं विवृण्वते निमेषनिःस्वैरधुनाऽपि लोचनैः॥२७॥

निमीलनेति[2]। अमूः देवाङ्गना अधुनाऽपि लोचनैः [तम्] अभ्यासस्य[3] भरं विवृण्वते प्रकटयन्ति। किंभूतैः?। निमेषनिःस्वैः निमेषदरिद्रैः। योऽभ्यासस्त्रिदशीभिर्देवाङ्गनाभिः[4] तं नलं[भृशं] दृशा निपीय अर्जितः। किं विशिष्टया दृशा?। निमीलनस्य[5] निमेषस्य भ्रंशम् अभावं जुषते तया तथा। तासां निमेषतया नलविलोकने[6] तादृशोऽभ्यासोऽभूत् यथा अद्यापि निमेषो नाऽस्ति[7]॥२७॥

अदस्तदाकर्णि[1] फलाढ्यजीवितं दृशोर्द्वयं नस्तदवीक्षि चाफलम्।
इति स्म चक्षुःश्रवसां प्रिया नले स्तुवन्ति निन्दन्ति हृदा तदात्मनः॥२८॥

अदस्तदाकर्णीति[2]। चक्षुःश्रवसां नागानां प्रिया[ः] पाताल-

1 P₁ महीभृतः; P₂ महीति 2 P₁ भुवं 3 B विलासभ्रान्तिश्च 4 P₁ मन्मथस्य श्रिया वा मन्मथवत् श्रिया 5 P₂ जाया 6 P₁ om. नलं 7 P₂ om. च 8 P₁ add. अनुप्रासो निदर्शनम् उपमा वा भ्रान्तिमान् श्लेषश्च॥२६॥

1 P₂ text. ~~शत्र्यौ~~ corrected as त्रिदशी° sec. manu. (recto. mg.)
2 P₁ निमी। P₂ निमीलेति। 3 P₁ अभ्यासभरं 4 P₁ om. विशी 5 P₂ निमीलननिमेष° 6 B नविलोकनेन 7 P₁ add प्रतीयमानोत्प्रेक्षा अध्यवसायस्य
contd

ज्ञाना जले नलविषये कृदा मनसा आत्मनः[3] तत् लोचनद्वयम् इति प्रकारेण स्तुवन्ति स्म निन्दन्ति स्म च[(6a) 4]। इतीति किम्?। नोऽस्माकं अदः दृशोर्द्वयं फलाढ्यं सफलं[5] जीवितं यस्य तत्तथा। किंभूतम्?। [तं] नलम् आकर्षयन्तीत्येवंशीलम्। सर्पा हि चक्षुषा शृण्वन्तीति श्रुतिः[6]। तथा नोऽस्माकं दृशोर्द्वयम् अफलं निष्फलं च इति निन्दन्ति [स्म]। यतस्तस्य नलस्य अवीक्षि[7] अनालोकितमिति निन्दा पाताले स्थिता[8]। चक्षुर्भ्यां नलगुणान् शृण्वन्ति, न तु तं पश्यन्ति[9] ॥२८॥

---

विलोकयन्तीभिरजस्रभावनाबलादमुं नेत्रनिमीलनेष्वपि ।
अलम्भि मर्त्याभिरमुष्य दर्शने न विघ्नलेशोऽपि निमेषनिर्मितः ॥२९॥

---

विलोकयन्तीभिरिति[1]। मर्त्याभिर्[2]ज्ञानाभिः अमुष्य[3] नलस्य दर्शने निमेषेण निर्मितः कृतो विघ्नस्य[4] लेशोऽपि न अलम्भि। किं कुर्वन्तीभिः?। अजस्रं निरन्तरं भावनाबलात् [ध्यानबलात्] नेत्रनिमीलनेष्वपि निमेषकालेष्वपि अमुं नलं विलोकयन्तीभिः। [इत्थं] स्वर्गपातालमर्त्य[5]ज्ञानानां त्रिभिः श्लोकैर्मन्मथविभ्रमो द्विधा[6] बभूव[7] ॥२९॥

---

सिद्धत्वादतिशयोक्तिर्वा ॥२७॥

1 P2 text फलाधि° 2 P1 अदः। P2 अद इति। 3 P1 स्तुवन्ति स्म here. 4 P1 इति किम्? 5 P1 om. सफलं 6 P2 प्रसिद्धिः 7 B अनालोकितक° 8 P1 स्थिता: 9 P1 पश्यति। and add क्रियाविरोधः ॥२८॥

1 P1 विलोक। P2 विलोकेति। 2 P1 मनुष्याङ्ग° 3 P2 अस्य 4 P1 विघ्नलेशोऽपि 5 B मानुषीणां मर्त्या° 6 P1 बभूव द्विधा 7 P1 add. उक्तनिमित्ता विशेषोक्तिः ॥२९॥

सर्ग ९ 24

न का निशि स्वप्नगतं ददर्श तं जगाद गोत्रस्खलिते च का न तम्।
तदात्मताध्यातधवा रते च का चकार वा न स्वमनोभवोद्भवम्॥३०॥ /भ

न का¹ निशीति। का² स्त्री सुवासिनी [निशि रात्रौ] तं³ नलं नृपं [स्वप्नगतं] स्वप्नमध्ये न ददर्श। अपितु सर्वा अपि। एतेन मुग्धा⁴ कथिता⁴। तथा का कामिनी तं नलं गोत्रस्खलिते च नामव्यत्यये[च] न जगाद। इति मध्या⁴ कथिता⁴। तथा का नायिका⁵ च सुरते स्वस्याऽऽत्मनो मनोभवस्य कामस्योद्भवं न चकार।⁶ किंभूता?। तदात्मतया नल⁷[स्व]रूपेण ध्यातो धवः स्वभर्ता यया सा⁸ तथा। वा वाच्यालङ्कारे। अयं मम भर्ता न भवति, किन्तु नल एवाऽयमिति [प्रौ⁹ढा।] त्रिविधा¹⁰ नायिका¹¹ कथिता¹²॥ ३०॥

श्रियाऽस्य योग्याऽहमिति स्वमीक्षितुं करे तमालोक्य सुरूपया धृतः।
विहाय भैमीमपदर्पया कया न दर्पणः श्वासमलीमसः कृतः॥३१॥

श्रियाऽस्य¹ योग्येति। कया नायिकया² [दर्पणः] आदर्शः

1 P₁ न का। P₂ न केति। 2 P₁P₂ om. सुवासिनी 3 P₁P₂ om. नलं 4 B add. विसर्ग 5 B नायका; 6 B add. अपि 6 B repeats अयं मम ... न भवति, here also. 7 P₂ नलं 8 B का 9 P₁ प्रौढ° 10 P₁P₂ om. त्रिविधा 11 P₂ नायका 12 P₁ add. अनुप्रासः॥ ३०॥

2 P₁ श्रियाऽस्य योग्याह। P₂ श्रियाऽस्येति। २ P₁ नायकया। ——

श्वासमलीमसो न कृतः।[3] अपि तु कृत एव। किं कृत्वा?। भैमीं दमयन्तीं विहाय त्यक्त्वा। अपगतो दर्पो गर्वो यस्याः[4] तया तथा। [किंभूतया?] सुरूपया अपि। किंभूतः?। तं नलम् आलोक्य[5] करे धृतः। किं कर्तुम्?। इति प्रकारेण स्वम् आत्मानं ईक्षितुम्।[6] ईक्षेति किम्?। अस्य (6b) नलस्याऽहं योग्या। कया?। श्रिया शोभया। अयमर्थः - तया दर्पणे आत्मानम् अयोग्यं दृष्ट्वा दर्पणो निःश्वासेनोपहतः। दमयन्त्या तु आत्मानं[7] योग्यं मत्वा अहं नलस्य कान्ता उचिता इति कृत्वा निश्वासो न[8] मुक्तः। अथ च या दर्पणं न गृह्णाति सा कथं गतदर्पा भवति, इति[9] विरोधाभासः[10]॥३१॥

---

यथोह्यमानः खलु भोगभोजिना प्रसह्य वैरोचनिजस्य पत्तनम्। /पुत्र
विदर्भजाया मदनस्तथा मनो नलावरुद्धं वयसैव वेशितः॥३२॥

---

यथोह्यमान[1] इति। मदनस्तथा विदर्भजाया मनश्चित्तं वयसा एव तारुण्येनैव वेशितः प्रवेशितः। किंभूतं मनः?। नलेन राज्ञा अवरुद्धम्। पूर्वं चित्ते नलोऽस्ति पश्चात् कामः प्रविष्टः। किंभूतः? उह्यमानः यौवनचिह्नैर्वितर्क्यमाणः। किंभूतेन वयसा?। भोगान् विषयान्[2] भुङ्क्ते इत्येवंशीलेन। प्रसह्य[3] बलात्। किं यथा?। वैरोचनि-

---

3 P1 add. ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः (पा॰ V॥2.114) इति निपातः। and om. अपि तु कृत एव। किं कृत्वा?। 4 P1 सा तया 5 B वीक्षितुं 6 P1 इति किम्? 7 P1 आत्मायोग्यं 8 P2 मुक्तो न। 9 P2 om. इति 10 P1 add. अनुप्रासः। गर्वस्य व्यभिचारिभावस्य शान्तिः॥३१॥
1 P1 यथो।; P2 यथेति। 2 P2 om. विषयान् 3 P1 add. हठात् ~~बलात्~~

बलिस्तस्य पुत्रो[4] [बाणस्तस्य] पत्तनं नगरं[5] यथा मदनः प्रद्युम्नो अनलेन वह्निना अवरुद्धं परिक्षिप्तं बाणासुर[पुरं] वयसा पक्षिणा गरुडेन[6] उह्यमानः सन्[7] प्रवेशितः। किंभूतेन[8]? भोगान् सर्पदेहान् भुङ्क्ते तेन तथा। पूर्वम् उषाहरणप्रस्तावे अनिरुद्धे प्रद्युम्नपुत्रे बाणासुरेण बद्धे सति गरुडमारुह्य बलदेवश्रीवासुदेवप्रद्युम्ना[9] वैश्वानरेण परितो दीप्तेन दुःप्रवेशमपि पुरं प्रविश्य तमसुरं छिन्न-भुजसहस्रं, पुराणान्तरेषु छिन्नभुजपञ्चशतं श्रीमहादेवानुरोधेन[10] जीवन्तं मुक्त्वा अनिरुद्धम् उषां स्नुषां चानीतवन्तः इत्यागमः" ॥३२॥

नृपेऽनुरूपे निजरूपसम्पदां दिदेश तस्मिन् बहुशः श्रुतिं गते।
विशिष्य सा भीमनरेन्द्रनन्दनी मनोभवाज्ञैकवशंवदं मनः ॥३३॥

नृपेऽनुरूपे[1] इति। सा भीमनरेन्द्रनन्दनी[2] दमयन्ती तस्मिन्नृपे नले निजरूपसम्पदाम् अनुरूपे विशिष्य विशेषं कृत्वा मनः दिदेश।[3] किं भूते[4]? बहुशः श्रुतिं ~~...~~ कर्णपथं गते[5]। किंभूतमी[6]

4 P₂ तत्पुत्रो 5 P₁ add. शोणितपुरम् 6 P₁ add. श्रीकृष्णवाहनेन 7 P₁ add. प्रसह्य अमित्वा 8 P₂ भूते 9 P₁ ॰श्रीकृष्ण॰ 10 B ॰देवेनानु॰ 11 P₁ add. खलु वाक्यालङ्कारे। प्रसह्येति हठार्थे अव्ययम्। पक्षे, ल्यबन्तम्। भोगिभोगिजिनेति पाठे भोगिनः पुरुषान् भुङ्क्ते विजयीकरोति। पक्षे, भोगिनः सर्पान्। श्लेषोपमा ॥३२॥

1 P₁ नृपे। P₂ नृपेऽनुरूप इति। 2 B ॰नन्दना; P₁ नन्दिनी 3 P₁ add. नन्दिग्रहिपचादिभ्यो ल्युणिन्यच (पा. III.i.134) इति ल्युप्रत्ययः। 4 P₁ om. किंभूते?। 5 P₁ add. गते here 6 P₁ प्राप्ते ———

मनोभवस्य[7] कामस्य आसायाः[8] एकं वशंवदं कामपरतन्त्रम्[9] ॥३३॥

उपासनामेत्य पितुः स्म रज्यते दिने दिने सावसरेषु बन्दिनाम् ।
पठत्सु तेषु प्रतिभूपतीनलं विनिद्ररोमाजनि शृण्वती नलम् ॥३४॥

उपासनामिति[1] । सो[2] पितुः उपासनां सेवाम् एत्य आगत्य दिने दिने बन्दिनाम् अवसरेषु[3] रज्यते स्म । तस्मिन् प्रस्तावे सानुरागा भूते[4] । यतस्तेषु बन्दिषु भीमसमीपे प्रतिभूपतीन् अन्य(?वो)नृपान् पठत्सु [सत्सु] नलं शृण्वती सती[5] विनिद्ररोमा अजनि । नलबिरदावलीपठनसमये रोमाञ्च्यते स्म[6] ॥३४॥

कथानुषङ्गेषु मिथः सखीमुखात्तृणेऽपि तन्व्या नलनामनि श्रुते ।
द्रुतं विधूयाऽन्यदभूयताऽनया मुदा तदाकर्णनसज्जकर्णया ॥३५॥

कथानुषङ्गेष्विति[1] । अनया तन्व्या मिथः कथायां[2] अनु-

7 B कामस्य मनोः 8 P. आसया 9 P. add. अथ श्रावणादनुरागः[illegible]क्रम ॥ त – परकीया तु द्विधा कन्योढा चेति जायेत । ऋतुमदनार्ते नायकमालोच्य कार्यं वा सम्यक् (का. XII. 30) इति । श्रीमनरेन्द्रनन्दिनीति पाठान्तरम् । प्रियवशे वदः खच् (पा. III. ii. 38) । अनुप्रासः समं काव्यलिङ्गं च ॥ ३३ ॥

1 P. उपासनामित्यादि । 2 P2 सो 3 P. अवसरे 4 P. भूता 5 P2 om. सती 6 P. add. अलमतिशयेन 6 P. इति श्रवणकालः प्रतिपादितः । तदुक्तं शृङ्गारतिलके – अन्यदीया द्विधा प्रोक्ता कन्योढा चेति ते प्रिये । दर्शनाच्छ्रवणाच्चापि कामार्ते भवतो यथा ( ) इति ॥ प्रतिपाद्यदेशे काले च भङ्ग्या च श्रवणं चास्य लपयोति । उद्वाहेऽपि देशे काले

contd....

सर्ग १ 28

प्रसङ्गेषु प्रसक्तौ सत्यां सखीनां मुखात् नलनामनि तृणेऽपि श्रुते सति द्रुतं झटिति अन्यत्सर्वं विधूय परित्यज्य मुदा तस्य नल(शब्द)वाच्यतृणस्यापि आकर्णनार्थं सज्जकर्णयाऽभूयत । किं वाच्यं पुनर्यन्नलनृपवर्णनाकर्णनायां सज्जकर्णता ? । नलशब्देन तृणमप्युच्यते[6] ॥३५॥

स्मरात्परासोरनिमेषलोचनाद्बिभेमि तद्भिन्नमुदाहरेति सा ।
जनेन यूनः स्तुवता तदास्पदे निदर्शनं नैषधमभ्यषेचयत् ॥३६॥

स्मरात्परासो[1]रिति । सा यूनस्तरुणान् पुरुषान् स्तुवता जनेन केनापि तस्य[2] कामस्याऽऽस्पदे स्थाने नैषधं[3] नलं निदर्शनं दृष्टान्तम् उपमानभूतम् अभ्यषेचयत्[4] । यो जनः कश्चित्[5] सुन्दरं तरुणं स्तुवन्[6] कामं दृष्टान्तं ददाति । तस्य पार्श्वात् केनापि मिषेण नलमुपमानं दापयति । कथम् ? इति[7] मिषेण । इतीति किम् ? । अहं

भङ्ग्या साधु तदाकर्णनं च स्यात् (K.XII.31) इति भावोदयः अनुप्रासः ॥३४॥
1 P. कथाप्रसङ्गेष्वित्यादि । 2 P. कथानु° 3 BP. °नाम्नि 4 P. °शब्दस्या तृण° 5 P2 °वर्णनायां 6 P. add. मिथोऽन्योऽन्यं रहस्यापि (अमर III.4.256) हर्षौत्सुक्यशबलता । अनुप्रासः ॥ ३५॥
1 P. °परासोरित्यादि । 2 P. add. पूर्वार्द्धप्रक्रान्तस्य 3 P. नैषधं after उपमानभूतम् 4 P2 second. mg. add. see manu. अकारयत् 5 BP2 किञ्चित् 6 P2 add तं स्तुवन्तं 7 P. इति किम् ? ।
.... Contd.

स्मराद् बिभेमि । यतः परासोः मृतात् तथा अनिमेषलोचनात् । यस्य
किल मृतस्य लोचने अनिमीलिते भवतः तस्माद् भयं भवति ।
अथ च अनिमेषलोचनात् देवात् । देवा हि[8] अनिमेषाः । तत् तस्मात्
त्वं[9] भिन्नं[10] कामादन्यमुदाहर । उदाहरणं वद । इति छलेन तस्मादन्यः
सुन्दरो जगति नल एवाऽस्ति । ततः स जनः स्वयमेव ~~नलमुप~~ ।
नलमुपमानं दत्ते । जनेन, अनिनन्ले कर्तरि तृतीया । जनो नैषध-
मभिषिञ्चति । सा[11] जनेन नलम् अभिषेचयति[12] ॥ ३६ ॥

नलस्य पृष्टा निषधागता ~~*~~ गुणान् मिषेण दूतद्विजबन्दिचारणाः ।
निपीय तत्कीर्तिकथामथानया चिराय तस्थे विमनायमानया ॥३७॥

नलस्य पृष्टा[1] इति । अनया निषधदेशादागता दूताः द्विजाश्च[2]
बन्दिनश्चारणाश्च मिषेण[3] नलस्य गुणान् पृष्टाः । दुहादेर्गौणकर्म-
(        ) इति वचनात् चारणा इति गौणं कर्म उक्तम् । गुणानिति
प्रधानेन उक्तम् ।[4] अथाऽनया तस्य नलस्य कीर्तेः कथां निपीय
चिराय विमनायमानया तस्थे, उन्मनीबभूव[5] ॥ ३७ ॥

प्रियं प्रियां च त्रिजगज्जयिश्रियौ लिखाऽधिलीलागृहभित्ति कावपि ।
इति स्म सा कारुवरेण लेखितं नलस्य च स्वस्य च सख्यमीक्षते ॥३८॥

8 P. om. हि  9 P. भिन्नं त्वं  10 B. ऽन्यत् उदाहरणम् उदाहर
11 P. om. सा  12 P. add. अत्र गुणसंकीर्तनलक्षणा स्मर-
दशोक्ता । काव्यलिङ्गम् ॥ ३६ ॥
1 P. नल । 2 P. om. च  3 P. add. केनचित्  4 B.P. add. बभूवेति
तृतीया 5 P. अत्र चिन्ताया उदयः । अनुप्रासः ॥ ३७ ॥

~~अनिबन्तस्य लिखेर्धातो: कर्तरि अनुक्ते तृतीया[12] ॥३०॥~~

[ प्रियं प्रियां[1] चेति । सा इति कारुवरेण चित्रकर[2]मुख्येन लेखितं नलस्य च[3] स्वस्यात्मनश्च सख्यं सादृश्यमीक्षते स्म । इतीति[4] किम् ?। हे चित्रकर![5] त्वं कञ्चित् प्रियं काञ्चित् प्रियां च[6] लीला-गृहस्य [क्रीडावेश्मनो:] भित्तिमधिकृत्य लिख । किंभूतौ प्रियौ ?।[7] त्रिजगज्जयिनी श्रीर्ययोस्तौ[7] तथा अतिरमणीयौ । ततो जगति अन्ययोर्[8] मनोहरयोरनयोश्चित्रकर[9]: अभणितोऽपि नलं दमयन्तीं च लिखितवान् । ततश्च चित्रे[10] आत्मनो नले[11] साम्यं विलोकयति[स्म]। कारुवरेणेति अनिबन्तस्य लिखेर्धातो: कर्तरि अनुक्ते तृतीया[12] ।।३०॥]

मनोरथेन स्वपतीकृतं नलं निशि क्व सा न स्वपती स्म पश्यति ।
अदृष्टमप्यर्थमदृष्टवैभवात् करोति सुप्तिर्जनदर्शनातिथिम् ॥३१॥

[ मनोरथेनेति[1] । सा [क्व[2]] निशि स्वपती शयाना सती नलं न पश्यति स्म । अपि तु सर्वस्यां[3] रात्रौ सर्वत्र च स्वप्ने नलं ददर्श । किंभूतम् ?। मनोरथेन स्वपतीकृतं भर्तृत्वे[न] कृतम् । च्विप्रत्यय: । यत: सुप्ति: स्वप्न: अदृष्टमपि [अर्थं[4]] पदार्थं जनस्य दर्शनातिथिं करोति । कुत: ?। अदृष्टस्य सुकृतदुष्कृतस्वरूपस्य वैभवात् प्रभावात्[5] ।।३१॥]

1 P₁ प्रियं। 2 P₁ चित्रक० 3 P₁ om. च 4 P₁ इति किम् ? 5 P₁ कारुवर ! 6 P₁ om. च 7 P₁ add. त्रिजगज्जयश्रियौ 8 P₁ add. तथाविधयो: 9 P₁ ०कार: 10 P₁ add. एवम् 11 P₁ ~~add.~~ नलेन सह साम्यं 12 P₁ add. अत्र चित्रे वाथदर्शनम् । तथा च रुद्रट: - सा आ चित्रे स्वप्ने स्यादृशनिमेवमिन्द्रजालेऽपि। शृङ्गारतिलके च - सा आ चित्रे तथा स्वप्ने तस्य स्याद्दर्शनं त्रिधा॥(का. XII. 31) समः॥३०॥
1 P₁ मनोरथ।; P₂ मनोरथेति। edn. मनोरथेनेति। 2 P₂ क्व abt. नलं 3 P₂ om. सर्वस्यां रात्रौ 4 edn. add. अर्थं 5 P₁ add. अनुप्रासोऽर्थान्तरन्यास: काव्यलिङ्गं च॥३१॥

युगा
निमीलितादक्षिवेशाच्च निद्रया हृदोऽपि बाह्येन्द्रियमौनमुद्रितात् ।
अदर्शि संगोप्य कदाप्यवीक्षितो रहस्यमस्याः स महन्महीपतिः ॥४०॥

निमीलितादिति[1] । निद्रया अस्या दमयन्त्याः स महीपतिः महत् रहस्यम् अदर्शि । किं कृत्वा ? । अक्षियुगात् संगोप्य[2] । किंभूतात् ? । निमीलितात् निद्रावशात् ।[3] चक्षुषैव रूपज्ञानं तथापि चक्षुषोपलभ्य । तर्हि मनसा ज्ञातो भविष्यतीत्याशङ्क्याह – हृदोऽपि मानसादपि[4] संगोप्य । कथंभूतात् ? । बाह्येन्द्रियाणां चक्षुःश्रोत्रादिकानां मौनेन[5] निमीलनेन मुद्रितात् । किंभूतः ? । कदापि अवीक्षितः । रहस्यं किल पूर्व[म]परिचितं भवति सर्वेभ्य[श्च] गोप्यते । इन्द्रियाणि मनसो द्वाराणि, तानि यदा पिहितानि भवन्ति तदान्तःकरणं किमपि न जानाति । तर्हि कथं दृष्ट इत्यत्रोच्यते[6] – यथा जाग्रदवस्थायामदृष्टवशात् [आत्मा] सुखदुःखभोगं[7] भुङ्क्ते, तथा स्वप्नावस्थायामपि पूर्वकर्मवशात् आत्मा नाडीभिर्निर्गत्य तत्र[8] देशे नवं[9] देहं निर्माय पूर्वशरीरं तत्रैव देशे प्राणवायुना रक्षन् स्वाप्नान् [भोगान्][10] भुक्त्वा पुनरपि पूर्वशरीरे प्रविशति । तथा च[11] स्वप्नविषये शातपथी श्रुतिः – 'प्राणेन रक्षन्नवरं[12] कुलायं बहिष्कुलायादमृतश्चरित्वा[13] । स ईयते अमृतो यत्र कामं हिरण्मयः पौरुष[14] एक[15] हंसः ॥ [इति] (बृ. उ. IV. iii. 12)[16] ॥४०॥

1 P₁ निमीलि । 2 B संमोह्य 3 P₁ add. यद्यपि 4 B/P₂ मनसा° 5 B मानेन 6 P₁ तं अत्रो° 7 B add. भोक्तुं ; P₁ add. वा 8 P₁P₂ तत्र तत्र 9 P₁ नवं नवं 10 BP₁P₂ भोक्तान् ; ed₂. भोगान् 11 P₁ om. च 12 B रक्षं ; P₂ °न्नपरं ~~13 P₁ पूरुष 14~~ 13 P₁ °मृतदवश्च° 14 P₁ पुरुष 15 P₁ एष 16 P₁ add. अनुप्रास[ः] विभावना च ॥

अहो अहोभिर्महिमा हिमागमेऽप्यतिप्रपेदे प्रति तां स्मरार्दिताम् ।
तपर्तुपूर्तावपि मेदसां भरा विभावरीभिर्बिभरांबभूविरे ॥४१॥

अहो[1] अहोभिरिति। अहो [इति] आश्चर्यं। अहोभिः (8a) दिवसैः तां स्मरार्दितां प्रति[2] हिमागमेऽपि महिमा [अति] प्रपेदे। दिनानि विरहिणां किल हेमन्तऋतावपि महान्ति भवन्ति। तत्र किल दक्षिणायनत्वात्[3] लघुता। किं च तां विरहिणीं प्रति विभावरीभिः[4] निशाभिः तपस्य ग्रीष्म[स्य] ऋतोः पूर्तावपि[5] पूरणेऽपि[6] मेदसां भराः बिभरांबभूविरे[7]। लक्षणया[8]। रात्रयो महत्यो जाताः गुरुतरा बभूवुरित्यर्थः]। तत्र किल रात्रयो[9] लघ्व्यो भवन्ति। अथ च स्त्रीणां यदा[10] ऋतोः पूर्तिर्भवति[11] रजस्वलात्वं भवति, तदा मेदो न भवति। तदा रजोनिःसरणेन[12] ऊनत्वं भवति[13]। याश्च विभावर्यो विभात-करणस्वभावास्तासां[14] कथं स्थूलत्वं गुरुत्वं, विभा[तो][15] इव[16] दृश्यन्ते[17]। [18]तदा परं तां प्रति सर्वं विपरीतम्[19] ॥४१॥

स्वकान्तिकीर्तिव्रजमौक्तिकस्रजः श्रयन्तमन्तर्घटनागुणश्रियम् ।
कदाचिदस्या युवधैर्यलोपिनं नलोऽपि लोकादश्रृणोद् गुणोत्करम् ॥ /२१
॥४२॥

स्वकान्तिकीर्तीति[1]। नलोऽपि कदाचित् लोकात् अस्या

1 P. अहो। 2 B प्रविहितागमे° 3 P. दक्षिणा° 4 P. add. बिभरांबुभूविरे 5 B पूर्वा° 6 P/P2 सति 7 P. °बुभुविरे 8 B लक्षणाया 9 P. रात्र्यो 10 P2 ऋतोर्यदा 11 P. स्यात् 12 P. °निरागमनेन 13 P. जायते 14 P. om. विसर्ग 15 B एवं 16 P2 add. हि 17 B दृश्यते 18 B P2 तदा परं 19 P. add. अभूत्। हिमागमे सत्यपि दिनलघुत्वं, ग्रीष्मे सत्यपि रात्रिलघुत्वमनेनोक्तमिति विशेषोक्तिः। दिनरात्रिमहत्त्वे च स्मरार्दितत्वं कारणं तेन विभावनानुप्रासश्च ॥४१॥ 1 P. स्वका। P2 स्व--
contd.

गुणोत्करम्[2] अशृणोत् श्रुतवान्[3]। किंभूतम्?। यूनां धैर्यं लुम्पतीत्येवं-[4]शीलम्। किं कुर्वन्तम्?। स्वस्याः दमयन्तीसम्बन्धिन्याः कान्तेः[5] [कमनीयतायाः कीर्तिः प्रसिद्धिस्तस्याः स्रजः समूह एव मौक्तिकस्रक् हारस्तस्याः[6] अन्तर्घटनार्थं गुणस्य तन्तुदोरकस्य श्रियं शोभां श्रयन्तम्। अथ च तेन गुणोत्करेण] कमनीयता नलहृदये नृपचेतसि[7] घटिता योजिता[8]। अथवा स्वकीया नलसम्बन्धिनी[9] कान्तिकीर्तिस्रज[10] एव मौक्तिकस्रक् तस्या घटनार्थं गुणरूपो गुणोत्करः। नलकान्ति[11]कीर्तेर्दमयन्ती-गुणोत्करस्य च सम्बन्धयोग्यत्वमित्यर्थः[12] ॥४२॥

---

तमेव लब्ध्वाऽवसरं ततः स्मरः शरीरशोभाजयजातमत्सरः।
अमोघशल्यया निजयेव मूर्तया तया विनिर्जेतुमियेष नैषधम् ॥४३॥

---

तमेव लब्ध्वेति। ततः स्मरस्तमेवाऽवसरं लब्ध्वा तया[2] दमयन्त्या नैषधं विनिर्जेतुमियेष। किंभूतया?। उत्प्रेक्ष्यते[3]- निजया[4] मूर्तया अमोघशल्यया इव। किंभूतः?।[5] शरीरशोभाजयेन[6] जातमत्सरः[7] उत्पन्नक्रोधः।[8] उत्प्रेक्षालङ्कारः ॥४३॥

---

अकारि तेन श्रवणातिथिर्गुणः क्ष्माभुजा भीमनृपात्मजाश्रयः।
तदुच्चधैर्यव्ययसंहितेषुणा स्मरेण च स्वात्मशरासनाश्रयः ॥४४॥

---

contd. कान्तीति। 2 P1 add. गुणोदयम् 3 P1 om. श्रुतवान् 4 P1 om. शीलम् 5 B कान्तिः & add. unsystematic lines. 6 P1 दार॰ 7 P1 om. चेतसि 8 P1 om. योजिता 9 P1P2 सम्बन्धी 10 B कान्तिः 11 P1 ॰कान्तिः 12 P1 add. एतेन उभयानुराग उक्तः। रूपकं निदर्शना च ॥४२॥

1 P1 तमेव। 2 P1 om. तया 3 P1P2 om. उत्प्रेक्ष्यते 4 P2 निजा 5 B add. यत् 6 P2 ॰शोभाया 7 P1P2 om. उत्पन्नक्रोधः। 8 P1 काव्यलिङ्गमुत्प्रेक्षा च ॥४३॥

[अकारि[1] तेनेति। तेन अमाभुजा भीमनृपात्मजा आलयो यस्य स तथा गुणः श्रवणातिथिरकारि। तथा स्मरेण कन्दर्पेण च स्वात्मनः शरासनं बाणासनमाश्रयो यस्य गुणस्य स गुणो मौर्वी श्रवणातिथिः कर्णान्ताकृष्टोऽकारि। किंविशिष्टेन ?। तस्य नलस्य उच्चं धैर्यं तस्य व्ययार्थं विनाशार्थं संहित इषुर्येन[2] [तेन] तथा[3]।।४४।।

अमुष्य वीरस्य जयाय साहसी तदा खलु ज्यां विशिखैः सनाथयन्।
निमज्जयामास यशांसि संशये स्मरस्त्रिलोकीविजयार्जितान्यपि।।४५।।

[अमुष्य[1] वीरस्येति। स्मरः त्रिलोकीविजयेन अर्जितान्यपि यशांसि संशये निमज्जयामास। किं कुर्वन्?। तदा [खलु[2]] अमुष्य वीरस्य जयाय ज्यां मौर्वीं विशिखैः सनाथयन्। यतः [साहसी[3]] साहसयुक्तः। यो[4] नलं विजेतुमिच्छति [तस्य] अहं[6] जेष्यामि किं वा न[7] इति संशयः[8]।।४५।।]

अनेन भैमीं घटयिष्यतस्तथा विधेरवन्ध्येच्छतया व्यलासि तत्।
अभेदि तत्ताहगनङ्गमार्गणैर्यदस्य पौष्पैरपि[1] धैर्यकञ्चुकम्।।४६।।

अनेन[2] भैमीमिति। अनेन नलेन तथा तेन[3] प्रकारेण घटयि-

1 P. अकरि। 2 edr. add. तेन 3 P. add. स्वात्मेतिपुनरुक्तवदाभासः। तुल्य-योगिता च ।।४४।। 1 P. अमुष्य वीरस्येत्यादि। 2 edr. add. खलु 3 edr. add. साहसी 4 P. add. वीरं 5 P. जिगीषति 6 P. add. नलं 7 P. add. वा 8 P. add. नलस्य वीरत्वात् विद्वान् ईरति वीरः। धीरस्येति पाठे धिया राजते इति धीरः। अथवा धियं राति ददाति इति धीरः। धीः राधनं यस्येति वा धीरः। अतो धीरं नलं जेतुमिच्छुः साहसी यशः संशये निमज्जयामास। काव्यलिङ्गं विरोधश्च ।।४५।।
1 P2 text पौष्पै० 2 P. अनेन। 3 P. P2 पूर्वोक्तप्रकारेण contd.

[4]ध्यतो विधेर्ब्रह्मण: अवन्ध्या इच्छा यस्य स तथा, तस्य भावस्तत्ता तया। तत् व्यलासि। यत् अस्य नलस्य धैर्यमेव कञ्चुकं [5]पौष्पैरपि अनङ्गमार्गणै: [6][तत्] प्रसिद्धं [7]तादृग्गुणोपेतं च दुर्भेदमप्यभेदि। इयं [10] वेधस: [8]संकल्पेच्छता यत् शरीर[9]हीनस्यापि कामस्य पुष्पमयैरपि शरै- धैर्यसन्नाहो भिन्न:" ॥४६॥

---

किमन्यदद्यापि यदस्त्रतापित: पितामहो वारिजमाश्रयत्यहो।
स्मरं तनुच्छायतया तमात्मन: शशाक शङ्के स न लङ्घितुं नल: ॥४७॥

---

[1]किमन्यदद्येति। किमन्यत् [2]उच्यते। अद्यापि यस्य काम-स्यास्त्रैस्तापित: पितामहो ब्रह्मा वारिज[3]माश्रयति। [अहो आश्चर्ये। अहं शङ्के - स नल: तं स्मरं लङ्घितुं न शशाक। कथा? आत्मन: तनो: शरीरस्य ~~छायया~~ [4]छायातुल्या नलशरीरसादृश्येनार्थ[5]च स्वशरीरस्य छायां न [6]कोऽपि लङ्घितुं शक्नोति। तथा [7]स्मर: नलात् तनुच्छाय: [8]अल्पशोभ:। विभाषा सेनासुराच्छायाशालानिशानाम् (पा. II.iv.25) इति

3/ विभाषया छायान्तस्तत्पुरुषो नपुंसकलिङ्ग: [9]] ॥४७॥

---

उरोभुवा कुम्भयुगेन जृम्भितं नवोपहारेण वय: कृतेन किम्।
त्रपासरिद्दुर्गमपि प्रतीर्य सा नलस्य तन्वी हृदयं विवेश यत् ॥४८॥

---

~~उरोभुवेत्यादि।~~

4 P2 धरयितो 5 BP2 पुष्पै° 6 P1 add. अशरीरशरै: 7 B तादृश°
8 P2 om. सं° 9 B हीनमपि 10 B शरोधैर्य 11 P1 add. अनुमानं विरोधश्च॥
1 P1 किम। P2 किमन्यदिति। 2 B कथ्यसे 3 P1 °माश्रियति 4 P1 छायाया भावस्तत्ता तया 5 P1 om. च 6 P1 लङ्घितुं न कोऽपि 7 P1 अथ च
8 P1 अल्पशोभ: तनुच्छाय: 9 P1 add. अनुप्रासोऽतिशयोक्तिरुत्प्रेक्षा श्लेषश्च॥

[उरोभुवेति[1]। किं तत् उरसो भुवा हृदयोत्पन्नेन] कुम्भयुग्मेन जृम्भितं विलसितम्[2]। किंभूतेन॥ वयःकृतेन नवोपहारेण [इति कर्मधारयः। अथवा नव उपहार आगमनं यस्य तेन तथा] अथ च नवो[3] नूतन[4] उप समीपे हारो यस्य[5]। [तथा च वयसा तारुण्येनैव कुम्भकारेण कृतेन समीपहारेणेति[6] पदं कुचौ लक्षयति। यत् सा तन्वी कृशाऽपि नलस्य हृदयं विवेश। किं कृत्वा॥ त्रपा इव सरित् स इव जलदुर्गस्तमपि प्रतीर्य। दृढकुम्भद्वयेन हि नदी तीर्यते[7]॥४८॥]

---

अपह्नुवानस्य जनाय यन्निजामधीरतामस्य कृतं मनोभुवा।
अबोधि तज्जागरदुःखसाक्षिणी निशा च शय्या च शशाङ्ककोमला॥४९॥

---

अपह्नुवानस्येत्यादि[1]। अस्य नलस्य जनाय निजाम् अधीरताम्[2] अपह्नुवानस्य [यत्] मनोभुवा [कामेन[3] कृतं तत् निशा च शय्या च अबोधि जानाति स्म। किंभूता॥ जागरस्य दुःखं[4] तत्साक्षिणी। किंभूता॥ शशाङ्केन कोमला। मनोज्ञा॥ शय्या शशाङ्कवत्कोमला। दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्(पा. III. i. 61) इति चिण्प्रत्ययः॥][5]४९॥

---

स्मरोपतप्तोऽपि भृशं न स प्रभुर्विदर्भराजं तनुयामयाचत।
त्यजन्त्यसून् शर्म च मानिनो वरं त्यजन्ति न त्वेकमयाचितव्रतम्॥५०॥ /जा

---

1 P₁ उरोभु।; 2 B उल्लसितम् 3 B वा 4 P₁ P₂ om. नूतन 5 B यस्मिन् 6 P₁ add. उरोभुवेति च पदोपकृतं कुम्भयुगेनेति पदमन्तर्निगीर्य 7 P₁ add. अतिशयोक्तिरुत्प्रेक्षा रूपकं श्लेषश्च॥४८॥

1 P₁ अप। P₂ अपह्नुवानस्येति। 2 B add. औत्सुक्यत्वम् 3 P₁ कृतं कामेन विहितम्। and add. श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः (पा. I. iv. 34) इति सम्प्रदानम्। 4 P₁ तद्दुःखं 5 P₁ add. श्लेषः तुल्ययोगिता उपमाऽपि॥४९॥

स्मरोपतप्तो[1]ऽपीति। भृशं[2] भ प्रभुर्नलः स्मरेणोपतप्तोऽपि विदर्भराजं[3] तनुजां[4] न अयाचत। तनयामिति पाठान्तरम्। मानिनः पुरुषाः वरम् असून् शर्म च त्यजन्ति। तु पुनः एकमयाचितव्रतं न त्यजन्ति[5]॥ ५०॥

---

मृषाविषादाभिनयादयं क्वचिज्जुगोप निःश्वासततिं वियोगजाम्।
विलेपनस्याधिकचन्द्रभागताविभावनाच्चापललाप पाण्डुताम्॥ ५१॥

---

मृषाविषादेति[1]। अयं नलः क्वचिद् वियोगजां[2] तां निःश्वासततिं जुगोप। [किस्मात्?] मृषा अविद्यमानस्यापि विषादस्याभिनयात्[3]। अयं निःश्वासोऽस्माकम् अन्यस्मात्कारणाज्जातः[4] न तु वियोगात्। तथा शरीरे विरहजातामपि पाण्डुतां च अपललाप। कस्मात्?। विलेपनस्याऽधिकोऽयं[5] चन्द्रस्य कर्पूरस्य भागस्तस्य भावस्तत्ता तस्या विभावनात् ज्ञापनात्। श्रीखण्डमध्ये[6]ऽङ्गारागे कर्पूराधिक्यात्[7]। पाण्डुत्वमिति लोकमध्ये प्रकटनात्[8][9]॥ ५१॥

---

शशाङ्क निह्नोतुमयं न तत्प्रियामयं बभाषे यदलीकवीक्षिताम्।
समाज एवालपितासु वैणिकैर्मुमूर्च्छ यत्पञ्चममूर्च्छनासु च॥ ५२॥

---

शशाङ्क[1] निह्नोतुमिति। यदा[2] यमौत्लीकेन भ्रान्त्या[3] वीक्षितां प्रियाम्

---

1 P. स्मरोप। 2 P. भृशं after स्मरेण 3 P2 राजतनुजां 4 B P. add. here. तनयामिति पाठान्तरम्, 5 P. add. विरोधोऽर्थान्तरन्यासश्च॥ ५०॥
1 B मृषाविवेदेति। P. मृषा। 2 P. वियोगाज्जातां 3 P. add. नटनात् 4 P. add. इत्यभिनयात् 5 P. व्यश्चन्द्रस्य 6 P. श्रीखण्डस्य 7 P. कर्पूरस्य 8 P2 प्रकटनात् 9 P. add. व्याजोक्तिः॥ ५१॥
1 P. शशाङ्क। 2 P. add. नलः 3 P. om. भ्रान्त्या — contd.

अये इति सम्बोध्य बभाषे। तत्सभामध्ये निह्नोतुं न शशाक। पूर्ववाक्य एवायेपदं वा[4] सम्बोधनम्।[5] तथा समाजे सभायामेव यत् पञ्चम-रागस्य मूर्च्छनासु स्वरसारणासु च[6] [7] मुमूर्च्छ[8] मोहं प्राप। तच्च अपलपितुं न शशाक। किंभूतासु?। वैणिकैः वीणावादनशिल्पिभिः आलपितासु प्रारब्धासु। तत्र[9] किमपि प्रत्यक्षे उत्तरं न शक्य[ते] कर्तुम्॥ ५२॥

---

अवाप सापत्रपतां स भूपतिर्जितेन्द्रियाणां धुरि कीर्तितस्थितिः।
असंवरे शम्बरवैरिविक्रमे क्रमेण तत्र स्फुरतामुपेयुषि॥ ५३॥

---

अवापेति[1]। स भूपतिस्तत्र तस्मिन् शम्बरवैरिणः कामस्य विक्रमे क्रमेण[2] स्फुरताम् उपेयुषि सति सापत्रपतां सलज्जताम् अवाप। किंभूते?। असंवरे संवरितुमशक्ये। किंभूतः?। जितेन्द्रियाणां मध्ये धुरि प्रथमं कीर्तिता स्थितिर्यस्य स तथा। उपेयिवाननाश्वाननूचानश्च (पा. III ii. 109) इति क्वसुः[3]॥ ५३॥

---

अलं नलं रोद्धुममी[1] किलाऽभवन् गुणा विवेकप्रभवा न चापलम्।
स्मरः स रत्यामनिरुद्धमेव यत् सृजत्ययं सर्गनिसर्ग ईदृशः॥ ५४॥

---

अलं नलमिति[2]। [किलेति[3] संभावने।] [अमी] विवेकप्रमुखा गुणा नलमिदं चापलं रोद्धुमलं समर्था न अभवन्[5]। तस्य[6] चापलं न

---

4 B वः 5 P2 add. अथवा अयेन दैवेन निह्नोतुं शशाक। यत् समाज एव सभैव मुमूर्च्छ। तदस्य दैवानुकूल्यमिति वा 6 P1 ०सारिणासु 7 P1 add. here वैणिकैः.....प्रारब्धासु। 8 P2 मूर्च्छा 9 P1 तत्र प्रत्यक्षे उत्तरं किमपि न शक्यते कर्तुम्। and add. एतेन प्रतापमूर्च्छे स्मरदशे उक्ते। अनुप्रासः॥ ५२॥ ‖ 1 P1 अवा। P2 2 P2 om. क्रमेण 3 P1 add. परस्मात्

Contd.-

[नि]वारितवन्तः। यतः (वb) कारणात् स स्मरः रत्या सत्या पुरुषम् अनिरुद्धमेव[7] चपलमेव सृजति। अथमीदृशः सर्गस्य निसर्गः[9] स्वभावः॥ सृष्टिस्वभावः। अथ च स्मरः प्रद्युम्नः[8] रत्यां [पत्न्यां] स्वजायायाम् अनिरुद्धनामानं पुत्रं[10] सृजतीति सृष्टिप्रकरणे पुराणेषु स्वभाव इत्यर्थः। [दुहियाचिरुधि... ... इति द्विकर्मकः]" ॥५४॥

अनङ्गचिह्नं स विना शशाक नो यदासितुं संसदि यत्नवानपि।
क्षणं स्वदाराम विहारकैतवान्निषेवितुं देशमियेष नैषधः॥५५॥

अनङ्गचिह्न[1]मिति। यदा स नैषधो[2] नलः अनङ्गस्य चिह्नं[3] विना क्षणमपि आसितुं[4] स्थातुं न शशाक। [अपीत्यत्र] यत्र सम्बध्यते। संसदि[5] यत्नवानपि आसितुं न शशाक। तदा आराम-विहारकैतवात्[6] उपवनक्रीडाव्याजात्[7] कञ्चिदेव एकान्तं प्रदेशं[8] निषेवितुम् इयेष वाञ्छितवान्[9]॥५५॥

अथ श्रिया भर्त्सितमत्स्यलाञ्छनः समं वयस्यैः स्वरहस्यवेदिभिः।
पुरोपकण्ठं स वनं किलेक्षिता दिदेश यानाय निदेशकारिणः॥५६॥

लज्जावहे जाते अपत्रपा। यदाह - स्यापत्रपा अन्यतः ( )। अनुप्रासः॥५३॥
1 P2 +var रोद्धुमिहभवन्नमी 2 P1 अलं नलं रोद्धु। P2 अलमिति 3 P2 om. किलेति संभावने 4 edn. add. अमी 5 P1P2 अभवत् 6 P1P2 नलस्य 7 P1 add. सृजति 8 P1 कन्दर्पः 9 P1 om. स्वजायायाम् 10 B पुरुषं॥ P1 add. अनुप्रासोऽर्थान्तरन्यासश्च॥५४॥ 1 B नचिह्नमपीति। P1 अनङ्ग। 2 BP2 नैषध at the end 3 P1P2 add. प्रत्लापादिकं 4 B निरासितुं 5 P1 add. सभायां 6 P1P2 नविहारस्य 7 P1P2 om. उपवनक्रीडाव्याजात् 8 B विजनप्रदेशं 9 P1 add. अपह्नुतिः॥५५॥

अथ[1] श्रियेति। अथ स नलः निदेशकारिणः भृत्यान् यानाय अश्वानयनाय दिदेश। किल पुरस्य उपकण्ठं वनम् ईक्षिता [द्रष्टु]-कामः। तृन्प्रत्ययस्य निष्ठादित्वात् षष्ठ्यभावः।[2] किंभूतः? श्रिया शोभया भर्त्सितो मत्स्यलाञ्छनः कामो येन स तथा। कैः समम्? स्वं रहस्यं[3] विदन्ती[4]त्येवंशीलैः वयस्यैः समम्[5]॥५६॥

---

अमी ततस्तस्य विभूषितं सितं जवेऽपि मानेऽपि च पौरुषाधिकम्।
उपाहरन्नश्वमजस्रचञ्चलैः खुराञ्चलैः क्षोभितमन्दुरोदरम्॥५७॥

---

अमी[1] तत इति। ततोऽनन्तरम् अमी भृत्याः तस्य नलस्याऽ-
मु/ श्वमुपाहरन्। किंभूतम्[2]? अजस्रं[3] चञ्चलैः खुराणाम्[4] अञ्चलैः[5]
शफाग्रैः तैः क्षोभितं क्षोदितं मन्दुरा[या] वाजिशालाया उदरं मध्यं येन
तं[6] तथा। किंभूतम्? विशेषेण भूषितम्। तथा सितं शुभ्रम्। [तथा]
जवे वेगेऽपि पौरुषात् पराक्रमादधिकम्[7]। किं च माने प्रमाणेऽपि
पौरुषात् पुरुषप्रमाणादधिकम् उच्चैस्तरम्[8]॥५७॥

---

~~[struck-through line]~~

अथान्तरेणावटुगामिनाध्वना निशीथिनीनाथमहःसहोदरैः।
निगालगाद्देवमणेरिवोत्थितैर्विराजितं केसरकेशरश्मिभिः॥५८॥

---

1 P1 अथ। 2 P1 add. न लोकाव्ययेत्यादि (II.iii.69) पाणिनीयम्।
3 P1 add. गुह्यं 4 P2 विन्दती° 5 P1 add. अनुप्रास उपमा च॥५६॥
1 P1 अमी ततः। 2 P1 om. किंभूतम्? 3 P1 अजस्र° 4 P2 add.
खुरप्रान्तैः 5 P1 add. प्रान्तैः; 6 B स तथा 7 P1 add. पुंभावे
तत्क्रियायां च पौरुषम्। 8 P1 add. ऊर्ध्वविस्तृतदोःपाणिनृमाने
पौरुषं त्रिषु (अमर° II.87)। पौरुषमिति क्लिष्टम्। जातिरनुप्रासश्च॥५७॥

अथान्तरेणेति[1] । स सिन्धुज(I·64)मिति[2] । अथाऽनन्तरं स क्षितिपाक-/भि
शासनः[3] तं[4] हयम् आरुरोह । किंभूतम्? । उच्चैःश्रवसः श्रियं शोभां हरन्तम्[5] ।
किंभूतम्? । [सिन्धुजं] सिन्धुदेशोद्भवम् । तथा शीतमहसश्चन्द्रस्य[6] सहोदरं
सदृशम् । किंभूतो राजा? । जिता अखिलाः क्ष्माभृतो[7] राजानो[8] येन स[9] तथा ।
अनल्पे[10] दीर्घे लोचने यस्य स तथा । इन्द्रोऽप्युच्चैःश्रवसमारोहति । सिन्धौ
समुद्रे[च][11] जातं, चन्द्रस्य सोदरम् । जिता अखिलाः क्ष्माभृतः पर्वता येन ।
अनल्पानि बहूनि लोचनानि यस्य स तथा ॥

किंभूतम्? । केसरस्य स्कन्धस्य ये केशा[12] इव रश्मय-
स्तैर्विराजितम्[13] । उत्प्रेक्षते[14]—[निगाले कण्ठप्रदेशे गतान् स्थितान् देव-
मणेः कण्ठावर्तविशेषात् उत्थितैरिव] निगालस्तु गलोद्देशे[15] (अमर० II·
47) । आवर्तो[16] यो निगाले स्यात् देवमणिः सर्वकामदः सोऽसौ । [केनो-
त्थितैः[17]? । आन्तरेण मध्यवर्तिना] अध्वना मार्गेण । किंभूतेन[18]? । अवटु-
गामिना । [अवटुः कृकाटिका तत्र गच्छतीत्येवंशीलेन । कण्ठात् यो
मार्गः अश्वस्य ग्रीवामध्यप्रदेशेन भूत्वा स्कन्धप्रदेशं गच्छति, तेना(-
ध्वना स्वररश्मयः किम् उपरिगताः? । किंभूतैः? । निशीथिनीनाथस्य
चन्द्रस्य महसां सहोदरैः श्वेतैः । मणेश्च रश्मय उत्तिष्ठन्ति][20] ॥ ५८ ॥

---

1 P1 अथ । 2 P1 ०मित्यादिश्लोकसप्तभिः कुलकम् । 3 B ०शासनात् 4 P2 om. तं 5 P1 add. अपदानम् । हरन्तमिति पाठान्तरम् । P2 श्रयन्तम् 6 P1 चन्द्रमसः 7 P1 क्ष्मावृतो 8 P1 P2 add. नृपा 9 P2 om. स 10 B दीर्घे० 11 P1 स 12 P1 ये रश्मयः 13 B add. कीदृशमश्वम्? । केसरकेशा इव स्कन्धकेशा इव रश्मयः किरणास्तैर्विराजितम् । 14 B add. देवमणेरुत्थितै-रिव । निगाले आवर्ते देवमणिस्तस्मादुत्थितै रश्मिभिर्विराजितम् । कीदृशात्? । निगालगात् गलदेशजातात् । 15 B ०देशः and add. निगलत्यनेन निगालः । गलजस्तु सन्धिः । उन्नोगिरि (का° IV.v.19) इति घञ् । देवमणे-रावर्तस्य स्थानम् । 16 P1 आवर्तस्तु 17 P2 om. उत्थितैः ~~आन्तरेण~~ मध्य— 18 P2

contd.

सर्ग १ 42

अजस्रभूमीतटकुट्टनोद्धतैरुपास्यमानं चरणेषु रेणुभिः।
रयप्रकर्षाध्ययनार्थमागतैर्जनस्य चेतोभिरिवाणिमाङ्कितैः॥ ५९॥

अजस्रभूमीति[1]। किंभूतमश्वम्[2] ? । चरणेषु रेणुभिरुपास्यमानम्। किंभूतैः[3] ? । अजस्रमनवरतं[4] भूमीतटस्य कुट्टनाद्[5] उद्धतैः[6]। [उत्प्रेक्षते –] जनस्य लोकस्य[7] चेतोभिरिव[8]। किंभूतैः[9] ?। अणिम्ना[10] अणुपरिमाणेन अङ्कितैः। [अणुपरिमाणं मन :] किंभूतैः[11] ? । रयप्रकर्षस्या[12]ऽध्ययनार्थम् आगतैः।[13] [मनो हि वेगवद् भवति, परम् अश्वस्य वेगप्रकर्षं शिक्षितुं तदपि चरणोपास्तिं किल कुरुते, गुरुशुश्रूषार्थम्।][14] ॥ ५९॥

चलाचलप्रोथितया महीभृते स्ववेगदर्पानिव वक्तुमुत्सुकम्।
अलं गिरा वेद किलायमाशयं स्वयं हयस्येति च मौनमास्थितम्॥ ६०॥

[चलाचलेति[1]। किंभूतम्[2] ? ।[3] महीभृते नलाय स्वस्य कोऽस्य

contd. गामिना अध्वा मार्गेण 18 B कीदृशेन ? । 19 B add. अनुप्रासोत्प्रेक्षारूपकाणां च सङ्करः॥५८॥ P₁ add. अनुप्रास उपमा उत्प्रेक्षा रूपकं च॥ ५८॥

1 B अजस्रेति। P₁ अजस्र। 2 B कीदृश० 3 B कीदृशैः ? 4 P₁P₂ om. अनवरतं 5 B कुट्टनं ताडनं तेनोद्धतैः 6 P₁ add. उधतैः उत्थितैः 7 P₁ om. लोकस्य 8 B चित्तैरिव 9 B कीदृशैः ?। 10 B अणिमाङ्कितैः अणिमायुक्तैः 11 B कीदृशैः ? 12 B ०रस्याध्ययनपाठस्तदर्थम् 13 B instead अन्योऽपि यः पठति स पादोपासनां करोति। 14 B add. उत्प्रेक्षाजाती॥ P₁ add. जातिरुत्प्रेक्षा च॥ P₂ add. एतेन मनसोऽप्यधिकवेग इत्यर्थः॥ ५९॥

1 B चलाचलेत्यादि। P₁ चला। 2 B ~~कीदृश~~ च पुनः कीदृशम् ?।
3 P₁ add. उत्प्रेक्षते।

दर्पात् प्रकर्षान् वक्तुम् उत्सुकमिव । कया ?। चलाचलः प्रोथो नासिका[4] यस्य स तथा तस्य भावस्तत्ता तया । यो हि किञ्चिद् वदति तस्याधरौ[5] स्फुरतः[6]। किंभूतम् ?। किल [struck] उत्प्रेक्षायाम्[7]। पुनरपि मौनं च[8] स्थि/ आस्थितम् आश्रितम् । कथम् ?। इति कारणात्[9]। गिरा वाण्या अलं पूर्यताम् । अयं नलः किल स्वयं[10] हयस्य आशयं वेद । अश्वहृदयमन्त्र-सत्वात् । तस्माद् वचनेन पूर्यतामिति गृहीतं मौनम्" ॥६०॥]

महारथस्याऽध्वनि चक्रवर्तिनः परानपेक्षोद्वहनाधशःसितम् ।
रदावदातांशुमिषादनीदृशां हसन्तमन्तर्बलमर्वतां रवेः ॥ ६१॥

महारथस्येति[1]। किं कुर्वन्तम् ?। रवेः श्रीसूर्यस्य अर्वताम् - अश्वानां [बलमन्तर्मध्ये हसन्तम् । कस्मात् ?। रदानां दन्तानाम् अवदाताः शुभ्रा ये अंशवः किरणाः तेषां मिषात् । किंभूतानाम् अश्वानाम् ?।] अनीदृशां न ईदृशां[2] नलस्याऽश्वाद्विलक्षणानाम्, अत एवोपहासः। किंभूतम् ?। यशोवत् सितं श्वेतम् । तेन वा श्वेतम् । कुतोऽनीदृशाम् ?। महारथस्य नलस्य चक्रवर्तिनः अध्वनि परेषामन्येषाम् अनपेक्षया उद्वहनात् । श्रीसूर्यस्याश्वाः[3] किल महारथस्य अध्वनि ध्वनिरहिते चक्रे वर्तन्ते इत्येवं नलस्य परापेक्षया उद्वहनं कुर्वन्ति । न त्वेकाकिनः । अत एव वैलक्षण्यं तेषाम्[4] ॥६१॥

4 P. om. नासिका 5 P. तस्योष्ठौ 6 P. स्फुरितः 7 P. उत्प्रेक्षते
8 P. om. च 9 P. प्रकारणात् 10 P. स्वयं after आशयं
1 P. add. सापह्नवोत्प्रेक्षा ॥६०॥
1 P. महारथ ॥ 2 P2 add. अनीदृशां 3 P, P2 श्रीसूर्याश्वा. 4 P. add. अपह्नुतिः व्यतिरेकः श्लेषश्च ॥६१॥

सर्ग १ 44

सितत्विषश्चञ्चलतामुपेयुषो मिषेण पुच्छस्य च केसरस्य च ।
स्फुटं चलच्चामरयुग्मचिह्नैरनिह्नुवानं निजवाजिराजताम् ॥ ६२॥

सितत्विष[1] इति । किं[2] कुर्वाणम् ? । निजां वाजिराजिताम्[3] अनिह्नुवानम् ।[4] किंभूताम् ? । चलत् यत् चामरयुग्मं तस्य चिह्नै[5]-र्लक्षणैः स्फुटां प्रकटाम्[6] । किं वत्[7] चामरयुग्ममित्याह[8] — केन[9] ? । पुच्छस्य [च][10] केसरस्य च मिषेण । किंभूतस्य ? । सितत्विषः श्वेतस्य तथा चञ्चलताम् उपेयुषः गतवन्तः[11] । पुच्छं च[12] केसरश्च चञ्चलम् । चामराण्यपि[13] राज्ञः समीपे चाल्यन्ते । अतश्च अश्वानां मध्ये राजाऽयं नलस्याऽश्वः[14] ॥ ६२ ॥

अपि द्विजिह्वाभ्यवहारपौरुषे मुखानुषक्तायतवल्गुवल्गया ।
उपेयिवांसं प्रतिमल्लतां रयस्मये जितस्य प्रसभं गरुत्मतः ॥ ६३॥

अपि[1] द्विजिह्वेति ।[2] अश्वम् आरुरोह । किंभूतम् ? । गरुत्मतो गरुडस्य द्विजिह्वानां सर्पाणां योऽभ्यवहारो भक्षणं तत्र यत् पौरुषं पराक्रमस्तत्रापि प्रतिमल्लतां उपेयिवांसम् । कया ? । मुखेऽनुषक्ता या[3] आयता दीर्घा वल्गुप्रधाना वल्गा रश्मिः कविका तया ।

1 P1 सिता । 2 P1 om. किंकुर्वाणम् ? । 3 P2 वाजितां 4 P1 add. स्फुटमुत्प्रेक्षायाम् । चैश्चलच्चामरयुग्मचिह्नैः । प्राधान्यात् क्रियाभेदाद् वा बहुवचनम् । स्फुटामिति पाठे । 5 B चिह्नितैः ; P1 चिह्नैः ; 6 P1 om. प्रकटाम् B P2 om. च 7 B P2 किं तत् 8 P2 न्याशयेनाह — । 9 P1 om. केन 10 P1 P2 add. च ॥ 11 P2 om. गतवन्तः । 12 B add. लोलयताम् 13 B चाल्यन्ते here 14 P1 add. सापह्नवोत्प्रेक्षा ॥ ६२॥

1 P1 अपि । P2 अपीति । 2 P1 add here किंभूतम् ? 3 P2 om. या

सर्पभञ्जो सादृश्येन[4] स्पर्द्धमानम्। किंभूतस्य गरुडस्य[5]?। रयस्य वेगस्य समये गर्वे प्रसभं बलात् सर्वप्रत्यक्षं जितस्य अग्रे[6] एकवारं वेगे[न] जितः। इदानीं सर्पभक्षणपौरुषमपि ममास्तीति दर्शयन्तम्[7] ॥६३॥

स सिन्धुजं शीतमहःसहोदरं हरन्तमुच्चैःश्रवसः श्रियं हयम्।
जिताखिलक्ष्माभृदनल्पलोचनस्तमारुरोह क्षितिपाकशासनः॥६४॥

स[1] सिन्धुजमिति। कुलकम्॥६४॥

चलन्नलंकृत्य महारयं हयं स्ववाहवाहोचितवेषपेशलः।
प्रमोदनिष्पन्दतराक्षिपक्ष्मभिर्व्यलोकि लोकैर्नगरालयैर्नलः॥६५॥

चलन्नलमिति[1]। स नलः महारयं हयम् अलङ्कृत्य चलन्नगरालयैर्लोकैर्व्यलोकि। किंभूतः?। [स्व][2]वाहेन अश्वेन यो वाहः गमनं तस्य उचितो यो[3] वेषः[4] तेन पेशलः। किंभूतैः?। प्रमोदेन निष्पन्दतराणि अक्ष्णां पक्ष्माणि[5] येषां तैस्तथा[6]॥ ॥६५॥

क्षणादथैष क्षणदापतिप्रभः प्रभञ्जनाध्येयजवेन वाजिना।
सहैव ताभिर्जनदृष्टिवृष्टिभिर्बहिः पुरोऽभूत् पुरुहूतपौरुषः॥६६॥

4 BP2 सादृश्यं; P2 further अनुकुर्वाणं 5 P1 गरुत्मतः 6 P1 अग्रम् 7 P1 add. अनुप्रास उपमा अपह्नुतिरपि वा प्रतीयमानोत्प्रेक्षाऽपि ॥६३॥
1 BP1P2 com. under I.58। 1 P1 चलन्नलङ्कृत्येत्यादि॥ 2 edn. add. स्व 3 P1 वेशो वेष: 4 B पक्ष्माणि 5 P1 ते तथा 6 P1 add. विशति येन इति वेशः तालव्यं शकारमाहुः। निष्पन्द इति षत्वं चिन्त्यम्। न ह्यस्य षत्व-

सर्ग १ 46

अणादथेति[1]। स नलः[2] अश्व वाजिना अश्वेन[3] ताभिर्जनाना दृष्टिवृष्टिभिः सहैव पुरो नगराद् बहिर्भूत। किंभूतः? पुरुहूतवत् पौरुषं यस्य स तथा। किंभूतः? अणादपतेश्चन्द्रस्येव प्रभा यस्य स तथा। किंभूतेन? प्रभञ्जनेन वायुना अध्येयो जवो यस्य वाजिनः[5] तेन तथा। वायुरश्वस्य वेगं पठतीयेवेत्यर्थः[4]। यः किल सर्वस्य[वेगेन] भङ्गं कुरुते सोऽपि पठति[6]॥६६॥

निजा मयूखा इव तीक्ष्णदीधितिं स्फुटारविन्दाङ्कितपाणिपङ्कजम्।
तमश्ववारा जवनाश्वयायिनं प्रकाशरूपा मनुजेशमन्वयुः॥६७॥

निजा मयूखा इवेति[1]। अश्ववाराः[2] तं जवनाश्वयायिनं[3] [4] मनुजेशं नलम् अन्वयुः। किंभूताः? प्रकाशं रूपं येषां ते तथा। किं-भूतम्? स्फुटं प्रकटं[5] अरविन्दाङ्किते पाणिपङ्कजे[6] यस्य स तं तथा। कमलाङ्किता करतलरेखा[7] यस्य[8] [स तथा]। के इव?[9] [निजा] मयूखा इव[10] यथा तीक्ष्णदीधितिं श्रीसूर्यमनुगच्छन्ति, तेऽपि प्रकाशरूपाः प्रकाशस्वभावाः[11]। सूर्योऽपि जवनैरश्वैर्याति। सोऽपि मनुकुले[जातो] नामरिः। तथा विकसितारविन्दाभ्यामङ्किते पाणिपङ्कजे यस्य। करद्वयेऽपि[12] कमलद्वयमस्ति[13][14]॥६७॥

contd.
– लक्षणमस्ति। कस्कादिपाठेऽपि अस्य न निश्चितः। सुषामादिष्वित्पा-णि-३.९८ इति संज्ञायां मूर्धन्यविधानात्। 7 P. add. अनुप्रासो जातिश्च॥६५॥

1 P. अणादथेत्य इत्यादि। 2 P. अथ स नलः। 3 B अश्वान्। 4 P. पठत्येवेत्यर्थः। 5 P. om. वेगेन 6 P. add. अनुप्रास उपमा सहोक्तिः जातिरपि॥६६॥

1 P. निजा॥ 2 P. add. निजा इता 3 B यवना° 4 P.P2 add. सन्तं 5 P.P2 om. प्रकटं 6 B पाणौ 7 P. करतले 8 P2 यस्याम् 9 P.P2 om. के इव? 10 B add. इव 11 B स्वभावात् 12 P. add. भानोः 13 P. उन्निद्रकमलयुगल° 14 P. add. अस्य

तत: प्रतीच्छ प्रसरेति भाषिणी परस्परोल्लासितशल्यपल्लवे[1]।
मृषा मृधं सादिबले कुतूहलात् नलस्य नासीरगते वितेनतु:॥६८॥

ततः प्रतीच्छेति[2]। ततो नलस्य नासीरेऽग्रे गते सादिनां बले सैन्यद्वये[3] कुतूहलात् मृषा असत्यतया। अलीकं[4] मृधं युद्धं वितेनतु:। किं कुर्वती? इति भाषिणी। इतीति[5] किम्? भो[6] सादिन्! प्रतीच्छ आगच्छ बल्लं[7] प्रतिगृहाण। प्रसर प्रसरं कुरु। पुनः किंभूते बले? परस्परम् उल्लासिता उद्धता: शल्यानां भल्लानां पल्लवा: प्रान्ता याभ्यां ते तथा[8]॥६८॥

प्रयातुमस्माकमियं कियत्पदं धरा तदम्भोधिरपि स्थलायताम्।
इतीव वाहैर्निजवेगदर्पितै: पयोधिरोधक्षमसुद्धतं रज:॥६९॥

प्रयातुमिति[1]। वाहैरश्वैर्निजेन आत्मीयेन[2] वेगेन[3] दर्पितै:[4] उद्धतैः सद्भिः पयोधे:[5] समुद्रस्य रोधः पूरणं तस्य क्षमं रजः रेणुरुद्धतम्। उत्प्रेक्षते - इति कारणादिव। अस्माकमश्वानां प्रयातुमियं धरा पृथिवी[6] कियत्पदं चलिता[7] कित्राणि[8] पदानि प्रभविष्यति[9]। तत्कारणात् अम्भोधिरपि खुरोद्धतेन रजसा पूरितः स्थलम् इव आचरतु[10]। इवादिलोपे क्यङ्[11]। लुप्तोपमा[12]॥६९॥

contd. पूर्वश्लोकद्वयात् पूर्वमेव क्वचित् पाठ:। अनुप्रास उपमा रूपकं श्लेषश्च॥६७॥
1 P2 text °शिल्प° 2 P1 तत: 3 B °द्वये 4 P2 अलीकं 5 P1 इति किम्?। 6 P2 ता: 7 P1 आगच्छ बल्लं; B बल्लं P2 भल्लं 8 P1 add. अथवा उल्लासितानि शल्यानि भल्लवा इव वा। शल्यान्येव पल्लवा याभ्यां ते तथा। पल्लवत्वेनाऽहिंस्रत्वमुक्तम्। अनुप्रास उपमा रूपकमपि॥ P2 recto inf. mg. add. यथा पल्लवेन किञ्चित् पीडादिकं न क्रियते तथा शल्येनेति भाव:॥६८॥
contd.

सर्ग १ 48

हरेर्यदक्रामि पदैककेन खं पदैश्चतुर्भिः क्रमणेऽपि तस्य नः।
त्रपा हरीणामिति नम्रितानवैर्न्यवर्ति तैरर्धनभःकृतक्रमैः ॥७०॥

हरेर्यदिति[1]। तैरश्वैरर्धे नभसि कृतक्रमैः कृतोत्प्लवनैः सद्भिः[2] पुनरपि न्यवर्ति। उत्प्रेक्षते – इति कारणात् नम्रितम् आननं येषां[3] तैस्तथा। इतीति किम्[4]? यत् खम् आकाशं हरेः श्रीकृष्णस्य पदं च तत् ~~एककेन~~ एककं च तेन पदैककेन अक्रामि। त्रिविक्रमक्रमणावसरे क्रान्तम्। तस्य खस्य शून्यस्य नभसः नोऽस्माकमपि[5] हरीणां सतां बहूनां तथा[6] चतुर्भिरपि पदैः क्रमणे अतीव त्रपा लज्जा। वयमपि हरयः सोऽपि हरिः। अतो निवृत्ताः[7] ॥७०॥

चमूचरास्तस्य नृपस्य सादिनो जिनोक्तिषु श्राद्धतयेव सैन्धवाः।
विहारदेशं तमवाप्य मण्डलीमकारयन् भूरितुरङ्गमानपि ॥७१॥

चमूचरा[1] इति। तस्य नृपस्य सादिनो अश्ववारा ये चमूचराः सैनिका[2]स्ते [तं] विहारदेशम् अवाप्य[3] भूरीनपि[4] तुरङ्गमान्

contd. 1 P1 प्रयातु। 2 P1 P2 om. आत्मीयेन 3 P2 om. वेगेन 4 P1 P2 om. उद्धतैः
5 B पाथोधेः 6 B1 P2 कियत्पदं पृथिवी; tr. पृथिवी कियत्पदं 7 P1 P2 चलितानां 8 P1 P2 add. अपि 9 B1 न भवि० 10 P2 इत्यत्र कर्तुः व्यङ्गसत्त्वोपश्ले- (पा० III.i.11) ति क्यङ् ॥६९॥ 11 P1 add. क्यङि। लुप्तोपमोत्प्रेक्षाऽनुप्रासोऽपि॥६९॥
1 P1 हरे। 2 P1 विहितोत्प्लवनैः 3 P1 यैः 4 P1 इति किम्? 5 P1 हरीणामपि 6 B तस्य 7 P1 add. त्र तस्य त्रेति पाठे हरीणां न त्रपा, अपि तु त्रपैवेति काका व्याख्येयम्। उत्प्रेक्षा, हरिशब्दः श्लिष्टः ॥७०॥
1 P1 चमू० P2 चमूचरामिति। 2 P1 P2 om. सैनिकाः 3 P1 add. प्राप्य
4 P1 add. प्रचुरानपि

contd.

मण्डलीम् अकारयन्[5][6] वाह्याली कारितवन्तः[7]। के इव ?। सैन्धवा इव। यथा[8] सिन्धुदेशोद्भवा[9] लोका जिनस्य उक्तिषु श्राद्धतया श्रद्धालुतया[10] विहारदेशं जिनालयं प्राप्य[11] सर्वानपि मण्डलीं कारयन्ति। मण्डलि[12]-सम्बन्धेन गायन्तो भ्रमन्ति[13]। श्रद्धा विद्यते यस्येति 'प्रज्ञाश्राद्धार्चावृत्तिभ्यो णः' इति (पा° V.ii.101) णप्रत्ययः[14][15]॥७१॥

द्विषद्भिरेवास्य विलङ्घिता दिशो यशोभिरेवाब्धिरकारि गोष्पदम्।
इतीव धारामवधीर्य मण्डलीक्रियाश्रियामण्डि तुरङ्गमैः स्थली॥७२॥

द्विषद्भिरेवेति[1]। तुरङ्गमैः धारां[2] दीर्घगमनप्रवाहम् अवधीर्य विहाय मण्डलीक्रियायाः श्रिया शोभया स्थली पृथ्वी अमण्डि अलङ्कृता। कथम् ?। इति[3] कारणादिव। यतोऽस्य नलस्य द्विषद्भिरेव भयेन[4] दिशो विलङ्घिताः। अथ[5] अब्धिः समुद्रो यशोभिरेव गोष्पदमकारि। दिगन्ते वा गच्छामः समुद्रान्ते वा। तदुभयमपि पूर्व[9]-रुद्धम्। ततः स्थानाभावात् [क्व] गच्छाम इत्यर्थः। गोष्पदम्, सेविता-सेवितप्रमाणेषु[10] (पा° VI.i.145) इति सुट्[11]॥७२॥

(Margin, circled: [illegible])

अचीकरच्चारु हयेन या भ्रमीर्निजातपत्रस्य तलस्थले नलः।
मरुत्किमद्यापि न तासु शिक्षते वितत्य वात्यामयचक्रचङ्क्रमान्॥७३॥

5 B आकारयन् 6 P1 add. संभूय मण्डलरूपान् 7 P1 वा कारित° 8 P1 add. सैन्धवाः 9 B °द्भवल्लोका 10 P1 श्रद्धालुत्वेन ; P2 श्राद्धजडतया 11 P1 अवाप्य 12 P1 मण्डलबन्धेन; P2 °बन्धेन 13 P1 add. बुद्धालया बलिं वा 14 B णित्यण् प्रत्ययः 15 P1 add. सादिनोऽपि सैन्धवाः। उत्प्रेक्षा॥७१॥ 1 P1 द्विषद्भिरेवास्येत्यादि। 2 P1 add. पञ्चविधां गतिं 3 P2 om. इति 4 P1 दिशो भयेन 5 P1 P2 तथा 6 P1 प्रयामः 7 P1 om. वा 8 B समुद्रं 9 P2 पूर्वं रुद्धं 10 P1 om. इति ; P2 om. सुट् 11 P1 add. आस्कन्दितं धौरितं रेचितं वल्गितं प्लुतं गतयोऽमूः पञ्च-धाराः। अतिशयोक्तिरूपकोत्प्रेक्षानुप्रासाः॥७२॥

अकारयदिति[1]। नलः निजस्य आतपत्रस्य छत्रस्येव तलकस्य[2] स्थले चारु यथा भवत्येवं हयेनाऽस्वपार्श्वात्[3] या भ्रमीमण्डलीर्वाह्यालीरकारयत्। अतिसंकीर्णगतित्वात् कविरुत्प्रेक्षते[4] — किमद्यापि[5] मरुद्वायुस्तासु भ्रमीषु न शिक्षते[6]। जिज्ञासायां शिक्षतेरात्मनेपदम्। तथा च क्रीडोऽनुसंपरिभ्यश्च (पा° I.iii.21) इति सूत्रे [7]काशिकायां वक्तव्यान्तरान्तर्गतं शिक्षेर्जिज्ञासायामिति वा(२१)क्तव्यमुक्तम्। तत्रोदाहरणद्वयम् विद्यासु शिक्षते [धनुषि शिक्षते]। केचित्तु ताः सुशिक्षित इति पाठं व्याचक्षते। ता भ्रमीर्न सुष्ठु शिक्षते। [न[8] शोभनमभ्यस्यति। [9]शिक्षतेस्तदात्मनेपदं प्राप्नोत्येव, तथापि कवेराकूतं चिन्त्यम्। किं कृत्वा? वात्यामयान् चक्रवत् चङ्क्रमान् [चक्रभ्रमान्] वितत्य।[10] किल वात्यावर्तं[11] कुर्वन् वायुरपि[15] शिक्षते। जिज्ञासते[12], परं न जानाति। [13]हयेनेति अणिजन्तस्य [14]धातोरनुक्तत्वात् कर्तरि तृतीया[16]॥७३॥

विवेश गत्वा स विलासकाननं ततः क्षणात्क्षोणिपतिर्धृतीच्छया। /ती
प्रवालरागच्छुरितं सुषुप्सया हरिर्घनच्छायमिवार्णसां निधिम्॥७४॥ /र्ण

विवेशेति[1]। स नलः विलासकाननं गत्वा क्षणात्[ततः] विवेश। क्षोण्याः पतिः। कया? धृतेः सन्तोषस्य इच्छया[2]। किंभूतम्?

1 B2 अचीकरदिति। P1 अकारयच्चारु। 2 P1 om. तलकस्य 3 P1 add. चारुहयेनेति समस्तं पदं वा। 4 P2 कविनो° 5 P1 om. किम् 6 P1 instead न शक्नुमिच्छति। शिक्षितः प्रवीणो न भवति। शक्रेः सन्नन्ताज्जिज्ञासायामित्यात्मनेपदम्। 7 P2 om. काशिकायां...न्तर्गतं 8 P1 add. साधु 9 P2 om. शिक्षतेः 10 P2 add. ताः 11 B व्यार्वं 12 B जिज्ञासते 13 B अतिनतस्य 14 P1 add. अत्र 15 P1 add. तद् 16 P1 add. तथा च हृक्रोरन्यतरस्यामिति (पा° I.ii.53) इति सूत्रम्। अनुप्रास उत्प्रेक्षा च॥७३॥

1 P1 विवेश॥ 2 P1 add. ततः कदाचिदत्र मम सन्तापो निवर्तत इति वाञ्छया। अथ धृतीच्छया विलासकाननं यत् विवेश। तद्विलासकाननमेव बिले आस्ते बिलासकः:

contd.

प्रवालानां पल्लवानां रागेण छुरितम् । तथा घना निबिडा छाया यस्य तत्तथा । क इव ? हरिरिव । यथा [हरिः][3] श्रीकृष्णः अर्णसां निधिं सुषुप्सया शयनेच्छया विशति । सोऽपि प्रवाल[4]मणीनां रागेण व्याप्तः घनो मेघस्तत्सदृशच्छायश्च, श्यामत्वात्[5] ॥७४॥

वनान्तपर्यन्तमुपेत्य सस्पृहं क्रमेण तस्मिन्नवतीर्णदृक्पथे ।
न्यवर्ति दृष्टिप्रकरैः पुरौकसामनुव्रजद्भिर्बन्धुसमाजबान्धुभिः ॥७५॥

वनान्तपर्यन्त[1]मिति । पुरौकसां नगरनिवासिनां दृष्टिप्रकरैः तस्मिन्नले क्रमेणाऽवतीर्णोऽतिक्रान्तो दृक्पथो दृष्टेः पन्था येन[2] तथाविधे दूरीभूते सति[3] न्यवर्ति[4] । किं कृत्वा[5] ? । सस्पृहं वनान्तस्य पर्यन्तम् ~~मुख्य~~ उपेत्य[6] एत्य । वनान्तो वनैकदेशः ॥ समस्तवस्तुविषयं मालारूपकमुच्यते । यथा (का.सा I.13) इत्यत्र[7] वनान्तदेवतावेण्यः[8] पान्थस्त्रीकालशृङ्खलाः । मारप्रवीरासिलता भृङ्गमालाश्चकासिरे ॥ (Ibid-P.13) इति प्रकारान्तरेण समस्तवस्तुविषयोदाहरणे एकस्मिन् रूप्ये[9] बहूनां रूपाणां समुच्चयेन आक्षिपयिति भट्टेन्दुराजेन स्वालङ्कारे व्याख्यातम् ॥ किंभूतैः ? ।
पु/ अति[10]व्रजन्तो ये बन्धवः स्वजनास्तेषां समाजस्य बन्धुभिः सदृशै[11]स्तेऽपि
ह/ निवृत्ताः । अनुव्रज्य दृष्टयोऽपि विलोकलोकानां निवर्तिता इत्यर्थः ॥ ७५ ॥

cont. सर्पस्तस्य आननं मुख तत्र धृतेरभावात् । 3 P2 om. श्रीहरिः 4 P. प्रवालानां रागेण च्छुरितः 5 P. add. अनुप्रास उपमा श्लेषश्च ॥७४॥
1 P. वनां । 2 P. add. स ~~8~~ P2 तथाविधे 3 P. add. इति 4 P. add. निवृत्तम् 5 B किंभूय ? 6 B P. P2 एत्य उपेत्य ed. उपेत्य एत्य 7 P. om. इत्यत्र 8 B वेण्यापाश° 9 B रूपे 10 B अति° 11 P. instead सहायैः अनुव्रज्य तेऽपि निवृत्ताः । दृष्टयोऽपि विलोककलोकानां निवृत्ता इत्यर्थः । and add. अनुप्रासः सहोक्तिश्च ॥७५॥

ततः प्रसूने च फले च मञ्जुले स संमुखस्थाङ्गुलिना जनाधिपः।
निवेद्यमानं वनपालपाणिना व्यलोकयत् काननकामनीयकम् ॥७६॥

---

[1] ततः प्रसूने च फले चेति। ततः स जनाधिपः वनपालस्य पाणिना उद्यानपालकहस्तेन निवेद्यमानं काननस्य कामनीयकं[2] पा/ सौन्दर्यं व्यलोकयत्। किंभूतेन पाणिना? मञ्जुले प्रधाने प्रसूने[3] पुष्पे च फले च संमुखस्था अङ्गुलिर्यस्य तेन तथा। यद्रमणीयं भवति तदङ्गुल्या दर्श्यते[4]। 'स्वामिन्! इदं पुष्पम् (12 b) अवधार्यताम्। इदं फलं[5] च रुचिरम्[6]॥७६॥

---

फलानि पुष्पाणि च पल्लवे करे वयोतिपातोद्गतवातवेपिते[1]।
स्थितैः समादाय महर्षिवार्द्धकाद् वने तदातिथ्यमशिक्षि शाखिभिः॥७७॥

---

फलानीति[2]। तस्मिन्[3] वने [4]शाखिभिर्वृक्षैः तस्य नलस्य आतिथ्यं [8] महर्षीणां[5] वार्द्धकात्[6] ~~वृद्ध~~[7] [ वृद्धसमूहादशिक्षि। वृद्धसङ्घे तु वार्द्धकम् (अमर II·6·40)। गोत्रोक्षोष्ट्र (पा° IV·ii·39) इत्यादिना वृद्धाच्चेति वक्तव्याद् वुञ्। मनोज्ञादित्वाद् भावात् कर्मणोरपि। यथा वार्द्धके मुनिवृत्तीनामि (रघु° I·8) ति। अथवा महर्षीणां वार्द्धकात् ] वृद्धत्वात् सकाशात् अशिक्षि।[9] ~~किंभूतैः~~ वृद्धा महर्षयस्तत्र तपस्यन्ति। किंभूतैः?

---

1 P1 ततः प्रसूनेऽइत्यादि। 2 B कमनीयकं 3 P1 P2 add. च 4 B दर्शने
5 P1 च फलं 6 P1 add. अनुप्रासो जातिश्च ॥७६॥
1 P2 text °द्धत° 2 P1 फलं। 3 P1 om. तस्मिन् 4 P1 add. स्थितैः
5 P1 ~~महर्षि~~ instead महर्षिवृद्धसमूहाद् 6 B वार्द्धकत्वात् 7 P2 om.
वृद्धसमूहा°.... वार्द्धकात् 8 P1 add. अत्र वार्द्धकादिति वृद्धभावादित्यर्थः।
यदाह – वार्द्धकं स्थाविरं ज्यायान् वर्षीयान् दशमीत्यपि ( ) इति।

सर्ग १ 53

पल्लवे एव करे हस्ते नलातिथ्यार्थं[9] फलानि पुष्पाणि च समादाय स्थितैः। पल्लवोपरि फलं[10] पुष्पं च भवति। किंभूते ?[11] वयसां पक्षिणां अतिपातेन अतिक्रमेण ~~उद्धूत~~ उद्धूत उद्धूतो यो वातस्तेन वेपिते ~~पल्लव~~ पल्लवे। महर्षयोऽपि हस्ते फलं पुष्पं चातिथिं[12] प्रति गृह्णन्ति। सोऽपि हस्तो वयसो वार्द्धक्यस्यातिपातेनाऽतिक्रमेणो- द्धूतेन वातेन वेपितो भवति[13] ॥७७॥

विनिद्रपत्रालिगतालिकैतवान्मृगाङ्कचूडामणिवर्जनार्जितम्।
दधानमाशासु चरिष्णु दुर्यशः स कौतुकी तत्र ददर्श केतकम् ॥७८॥

विनिद्रपत्रेति[1]। स कौतुकी नलस्तत्र वने केतकं ददर्श। उत्प्रेक्ष्यते - विनिद्राणां विकसितानां पत्राणाम् आलिषु पङ्क्तिषु गता उपविष्टा ये अलयो भ्रमरास्तेषां कैतवात् [व्याजात्] दुर्यशोऽ- कीर्तिं दधानम्। किंभूतम् ?। मृगाङ्कचूडामणिना श्रीमहादेवेन यद् वर्जनं [कृतं] तेनाऽर्जितम्[2]। आशासु दिक्षु चरिष्णु गमनशीलम्[3]। [ईश्वरेण केतकीकुसुमं वर्जितमिति सर्वत्र प्रसिद्धिः]। अपह्नुतिः[4] ॥७८॥

वियोगभाजां हृदि कण्टकैः कटुर्निधीयसे कर्णिशरः स्मरेण यत्।
ततो दुराकर्षतया तदन्तकृद्विगीयसे मन्मथदेहदाहिना ॥७९॥

9 B P2 नलातिथ्यार्थं after स्थितैः 10 P2 पुष्पं फलं ॥ B किंभूतेन सा॥ 12 P2 वातिथिं 13 P1 adds रूपकं प्रतीयमानोत्प्रेक्षा श्लेषश्च ॥७७॥
1 P1 विनिद्र॥ 2 B add. दुर्यशो दुष्टमपवादं स्फुटं दधानम्। पुनः कीदृशम्? तथा 3 P1 B om. गमनशीलम् 4 P2 om. अपह्नुतिः।

[वियोगभाजा[1]मिति । तृतीयश्लोके (१.८१) सम्बन्धः । तेन नलेन इति क्रुधा क्रोधेन[2] केतकीकुसुमम् आक्रुश्यत शप्तम् । हे केतक ! त्वं स्मरेण यत् यस्मात् कारणात् वियोगभाजां हृदि कर्णिशरो निधीयसे । पञ्चत्रययुक्तो बाणः कर्णी । यतः कण्टकैः कुत्सितः । ततो मन्मथदेहदाहिना महेश्वरेण कीयसे भिन्द्यसे । किंभूतस्त्वम् । दुराकर्षतया[3] दुःखेन आकृष्यमाणतया तेषां विरहिणाम् अन्तकृत् । कर्णिशरः किल प्रविशति परं न निर्गच्छति, ततो[4] म्रियते[5] ॥७९॥]

त्वदग्रसूचीसचिवेन कामिनोर्मनोभवः सीव्यति दुर्यशःपटौ ।
स्फुटं च पत्रैः करपत्रमूर्तिभिर्वियोगिहृद्दारुणि दारुणायसे ॥८०॥

[त्वदग्रसूचीति[1] । मनोभवस्तवाऽग्रमेव सूची तया सचिवेन सहायेन कामिनोर्द्वयोरपि विरहिणोर्मरण[2]लक्षणं यद्[3] दुर्यशस्तदेव पटौ सीव्यति । निजाच्छादनार्थम् । हे केतक ! त्वं च[4] स्वयं स्फुटं पत्रैर्दलैः करपत्रमूर्तिभिः क्रकचसदृशैः वियोगिनोहृदेव दारु काष्ठं तत्र दारुण इवाऽऽचरसि[5] ॥८०॥]

§ धनुर्मधुस्विन्नकरोऽपि भीमजापरं परागैस्तव धूलिहस्तयन् ।
प्रसूनधन्वा शरसात्करोति मामिति क्रुधाऽऽक्रुश्यत तेन केतकम् ॥८१॥

1 $P_1$ वियोगिनी । 2 $P_1$ om. क्रोधेन 3 edn. add. दुराकर्षतया 4 $P_1$ add. जनस्तेन 5 $P_1$ add. अनुप्रासो रूपकं च ॥७९॥

1 $P_1$ त्वदग्रसूच्येत्यादि । $P_2$ त्वदग्रसूच्येति । edn. त्वदग्रसूचीति ।
2 $P_2$ मरण° 3 $P_2$ यत्तद् 4 $P_1$ om. च 5 $P_2$ °चरति । $P_1$ add. दारुणायत इति पाठे तव पत्रैर्मनोभवो दारुणायते इति कश्चित् । अनुप्रासह्समासोपमाः ॥८०॥

[धनुर्मधुस्विन्नेति[1]। तथा तव परागैर्धूलिहस्तं कुर्वन् प्रसूनधन्वा कामः मां भीमजापरं सन्तं शरसात्करोति बाणाधीनं कुरुते। किंभूतः?। धनुषः पुष्पस्य मधुना स्विन्नकरोऽपि। यदा किल हस्तः स्विद्यति तदा धूल्या संमृज्यते। इत्थमन्वियत[2]॥८१॥]

विदर्भसुभ्रूस्तनतुङ्गताप्तये घटानिवापश्यदलं तपस्यतः।
फलानि धूमस्य धयानधोमुखान् स दाडिमे दोहदधूपिनि द्रुमे॥८२॥

[विदर्भेति[1]। स नलः दाडिमे द्रुमे फलानि अपश्यत्। किंभूते। दोहदस्य धूपो विधते यत्र तस्मिंस्तथा। यदा धूपो दोहदे दीयते तदा दाडिमी फलति। उत्प्रेक्षते - घटानिव। किंभूतान्?। अलं तपस्यतः। किमर्थम्?। विदर्भसुभ्रुवो भैमी तस्याः स्तनयोस्तुङ्गताय। आप्तये। किंभूतान्?। धूमस्य धयान् धूमपान् तथा अधोमुखान्। तापसो ह्यधोमुखो हि धूमपानेन तपः कुरुते। पाघ्राध्माधेट्दृशः [शः] (पा॰ III.i.37) इति[3] शप्रत्ययः[4]॥८२॥]

वियोगिनीमैक्षत दाडिमीमसौ प्रियस्मृतेः स्पष्टमुदीतकण्टकाम्।
फलस्तनस्थानविदीर्णरागिहृद्विशच्छुकास्यस्मरकिंशुकाशुगाम्॥८३॥

1 P. धनुः। 2 P. add. अनुप्रासः॥८१॥
1 P. विदर्भ। 2 P2 om. हि 3 P2 om. इति 4 P. add. दोहदमिति अस्य एकदेशद्वारेण असभ्यार्थस्मारकत्वमाशङ्क्य जुगुप्सादावश्लीलत्वभ्रमो न कार्यः। तस्य लोकसंवीतत्वेनाऽप्रतिभासात्। यदाह - न गुप्तलक्षितसंवृतानीट (   ) ति। इदं हि सूत्रम् असभ्यार्थान्तर असभ्यस्मृतिहेतुश्चाश्लीलमित्यस्यापवादः। तल्लोकसंवीतं संवृतम्। यथा उपस्थानं दोहदमिति (   ) ति। उत्प्रेक्षा॥८२॥

[ धनुर्मधुस्विन्नेति[1] । तथा तव परागैर्धूलिहस्तं कुर्वन् प्रसूनधन्वा कामः मां भीमजापरं सन्तं शरसात्करोति । बाणाधीनं कुरुते । किंभूतः ? । धनुषः पुष्पस्य मधुना स्विन्नकरोऽपि । यदा किल हस्तः स्विद्यति तदा धूल्या संमृज्यते । इत्थमनिन्द्यत[2] ॥८१॥ ]

विदर्भसुभ्रूस्तनतुङ्गताप्तये घटानिवापश्यदलं तपस्यतः ।
फलानि धूमस्य धयानधोमुखान् स दाडिमे दोहदधूपिनि द्रुमे ॥८२॥

[ विदर्भेति[1] । स नलः दाडिमे द्रुमे फलानि अपश्यत् । किंभूते । दोहदस्य धूपो विधते यत्र तस्मिंस्तथा । यदा धूपो दोहदे दीयते तदा दाडिमी फलति । उत्प्रेक्षते - घटानिव । किंभूतान् ? । अलं तपस्यतः । किमर्थम् ? । विदर्भसुभ्रूर्भैमी तस्याः स्तनयोस्तुङ्गताया आप्तये । किंभूतान् ? । धूमस्य धयान् धूमपान् तथा अधोमुखान् । तापसो ह्यधोमुखो हि[2] धूमपानेन तपः कुरुते । पाघ्राध्माधेट्दृशः [शः] (पा° III.i.37) इति[3] शप्रत्ययः[4] ॥८२॥ ]

वियोगिनीमैक्षत दाडिमीमसौ प्रियस्मृतेः स्पष्टमुदीतकण्टकाम् ।
फलस्तनस्थानविदीर्णरागिहृद्विशच्छुकास्यस्मरकिंशुकाशुगाम् ॥८३॥

1 P1 धनुः । 2 P1 add. अनुप्रासः ॥ ८१ ॥
1 P1 विदर्भ । 2 P2 om. हि 3 P2 om. इति 4 P1 add. दोहदमिति अस्य छेकद्वारेण असभ्यार्थस्मारकत्वमाशङ्क्य जुगुप्सादावश्लीलत्वभ्रमो न कार्यः । तस्य लोकसंवीतत्वेनाऽप्रतिभासात् । यदाह - न गुप्तलक्षितसंवृतानीत( ) ति । इदं हि सूत्रम् असभ्यार्थान्तर अमङ्गलस्मृतिहेतुश्चाश्लीलमित्यस्यापवादः । तल्लोकसंवीतं संवृतम् । यथा उपस्थानं दोहदमित्ये( )ति । उत्प्रेक्षा ॥ ८२ ॥

[ वियोगिनी[1]मिति । असौ वियोगिनी दाडिमीम् ऐक्षत । विः पक्षी तेन युक्ताम् । उत्प्रेक्षते – अथ[2] च विरहिणी स्पष्टं प्रियस्य स्मृतेः स्मरणात् उद्गीताः कण्टकाः यस्यां तां तथा । विरहिणी हि रोमाञ्चिता भवति, भर्तृस्मरणात्[3] । किंभूताम् ? । फलान्येव स्तनास्तेषां स्थाने विदीर्णे स्फुरिते रागयुक्तं यत् हृत् तत्र विशन्ति शुकानामा-स्यानि मुखान्येव स्मरस्य किंशुकाशुगाः[4] किंशुकपुष्पबाणाः यस्याः सा तां तथा । दाडिमं रक्तं स्फुरितं च शुकैर्भक्ष्यते[5] । वियोगिन्याश्च हृदयं कामबाणैर्विस्फोट्यते[6] । स्तनस्थानं[7] रागि च भवति[8] ॥ (३॥

स्मरार्द्धचन्द्रेषुनिभे क्रशीयसां स्फुटं पलाशेऽध्वजुषां पलाशनात् ।
स वृन्तमालोकत खण्डमन्वितं वियोगिहृत्खण्डिनि कालखण्डजम् ॥४॥

[ स्मरार्द्धचन्द्रे[1]ति । स पलाशकुसुमे वृन्तं कालखण्डजं खण्डम् अन्वितं सम्बद्धम् आलोकत अमन्यत । किंभूते ? । स्मरस्य अर्द्धचन्द्रनामा यः इषुस्तन्निभे । स्फुटमुत्प्रेक्षते । अध्वजुषां क्रशीयसाम् अति[2]कृशपान्थानां पलस्य मांसस्य अशनात् भक्षणात् चकृत इव[3] लग्नम् । किंभूते[4] ? । वियोगिनां हृदयस्य खण्डिनि । बाणे हि मांसं लगति[5] ॥ (४॥]

नवा लता गन्धवहेन चुम्बिता करम्बिताङ्गी मकरन्दशीकरैः ।
दृशा नृपेण स्मितशोभिकुड्मला दरादराभ्यां दरकम्पिनी पपे ॥ (५॥

1 P. वियो। 2 P. om. अथ च विरहिणी 3 P. ०स्मरणेन 4 P. किंशुकपुष्पा-शुगाः 5 P. add. कीरैः 6 P. स्फोटयते 7 P. om. स्तनः... भवति। 8 P. add. अनुप्रासो रूपकमुत्प्रेक्षा ॥ (३॥
1 P. स्मरार्द्ध। 2 P. om. ~~कृश~~ अति 3 P. om. इव 4 P. om. किंभूते ? । 5 P. add. स्फुटं पलाशनात् पलाशे इत्यपि व्याख्या। अनुप्रास उपमोत्प्रेक्षा रूपकं च ॥४॥

[नवा लता[1] इति । गन्धवहेन वायुना चुम्बिता नवा लता वल्ली नृपेण दृशा पपे । किंभूता? । मकरन्दशीकरैः करम्बिताङ्गी मिश्रिताङ्गी तथा स्मितेन शोभिनः[2] कुड्मलाः यस्याः । [3]उद्भिन्नमुकुलाः । काभ्यां पपे? । दरेण भयेन विरहितत्वात् । तथा आदरेण च तस्या[4]स्तदवस्थत्वात् । किंभूता? । दरम् ईषत्कम्पो यस्याः सा तथा । [5]अथ च या किल नवा तरुणी केनापि गन्धवहेन परिमलयुक्तेन पुरुषेण चुम्ब्यते । सा स्वेदजालैर्मिश्रिता भवति । सस्मिता च भवति[6] तामन्ये आदरेण भयेन च पश्यन्ति[7] ॥ ८५ ॥]

विचिन्वतीः पान्थपतङ्गहिंसनैरपुण्यकर्माण्यलिकज्जलच्छलात् ।
व्यलोकयच्चम्पककोरकावलीः स शम्बरारेर्बलिदीपिका इव ॥ ८६ ॥

[विचिन्वतीरिति[1] । स नलः चम्पकानां कोरकावलीः शम्बरारेः कामस्य बलेः पूजोपहारस्य दीपिका इव व्यलोकयत् । किंकुर्वतीः? । पान्था एव पतङ्गाः शलभास्तेषां हिंसनैरपुण्यकर्माणि पापानि विशेषेण[2] चिन्वतीः । कस्मात्? । अलय एव कज्जलानि तेषां छलात् व्याजात् । चम्पकानि दृष्ट्वा विरहिणो म्रियन्ते । शम्बरारिः किल मायावान्[3] तस्य दीपिका[4]प्रभृतिकं पूजोपहारं भवति[5] ॥ ८६ ॥]

1 P1 नवा लता । 2 P1 शोभिनी कुड्मलानि 3 P2 विकसितकुड्मला 4 P2 om: तस्यास्तदवस्थत्वात् 5 P2 om. अथ च 6 P2 तामन्ये .... पश्यन्ति । सस्मिता च भवति ॥ ८५ ॥ 7 P1 add. पपे इति अगूढमगुणीभूतव्यङ्ग्यम् । अनुप्रासः समासोक्तिश्च ॥ ८५ ॥

1 P1 विचिन्वती । 2 P2 विचिन्वती: 3 P2 मायावी 4 P1 दीवडी° 5 P1 add. रूपकमपह्नुतिरुपमोत्प्रेक्षा च ॥ ८६ ॥

अमन्यतासौ कुसुमेषु गर्भगं परागमन्धंकरणं वियोगिनाम् ।
स्मरेण मुक्तेषु पुरा पुरारये तदङ्गभस्मेव शरेषु सङ्गतम् ॥८७॥

अमन्यतेति ।[1] [असौ] नलः कुसुमेषु गर्भगं मध्यगतं[2] परागम् एवंविधम् अमन्यत । किंभूतम् ? । वियोगिनाम् अन्धंकरणम् । आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् (पा॰ ३.२.५६) इति ख्युन्प्रत्ययः । उत्प्रेक्षते – पुरा पूर्वं पुरारये श्रीमहादेवाय [स्मरेण][3] मुक्तेषु शरेषु[4] सङ्गतं तस्य महेश्वरस्य अङ्गसम्बन्धि भस्म इव[5] ॥८७॥

पिकाद्वने शृण्वति भृङ्गहुङ्कृतैर्दशामुदञ्चत्करुणे वियोगिनाम् ।
अनास्थया सूनकरप्रसारिणीं ददर्श दूनः स्थलपद्मिनीं नलः ॥८८॥

पिकाद्वने[1] [इ]ति ।[2] नलः स्थलपद्मिनीं ददर्श । दूनः सन् । किंभूताम् ? । अनास्थया अनित्यत्वेन सूनानि पुष्पाणि एव करास्तान् प्रसारयतीत्येवंशीलाम्[3] । क्व सति ? । वने[4] कानने पिकात् कोकिलात् सकाशात् वियोगिनां दशां दुरवस्थां शृण्वति सति[5] । कैः ? । भृङ्गाणां हुङ्कृतैः । किंभूते वने ? । उदञ्चत्करुणे[6] गम्भीरे यत्र । यथा कस्माच्चित् कथकात्[7] कश्चिद् दूनः सन् दुष्कृताम्[8] अवस्थां शृणोति हुङ्कारं च ददाति । उत्पन्नदयश्च[9] भवति । तत्तश्च ईदृशोऽयं

1 P₁ अम । 2 P₁ मध्यगं 3 P₂ om. स्मरेण 4 P₂ om. शरेषु 5 P₁ add. अनुप्रासोत्प्रेक्षा ॥८७॥ 1 P₁ पिकाद्वने । B पिकान्वनेति । 2 P₁ add. सः 3 P₁ add. वियोगिनामनास्थया अनवस्थितत्वेन अवलम्बनाय सूनकरप्रसारिणीमित्यन्यः । 4 B येन 5 P₁ om. सति 6 P₂ उदयं चन्करुणे 7 B अधकात 8 P₁ दुःखितानाम् 9 B °दयश्च

संसारो[10]ऽसार इत्यनास्थया तस्य पुरः श्रोता हस्तं प्रसारयति ॥८८॥

रसालसालः समदृश्यतामुना स्फुरद्द्विरेफारवरोषहुङ्कृतिः ।
समीरलोलैर्मुकुलैर्वियोगिने जनाय दित्सन्निव तर्जनाभियम् ॥८९॥

रसालसाल[1] इति । अमुना रसाल आम्र[2]: सालो वृक्षः समदृश्यत । किंभूतः ? । स्फुरन्तो ये द्विरेफा[णामारवा]स्त[3] एव ~~रोष~~हु [रोषहुङ्कृतिः रोष] हुङ्कारो यस्य । उत्प्रेक्षते – समीरे[4]ण लोलै – मुकुलैः वियोगिने जनाय तर्जनया निर्भर्त्सनया[5] भियं दित्सन्निव[6] ॥८९॥

दिने दिने त्वं तनुरेधि रेऽधिकं पुनःपुनर्मूर्च्छ च तापमृच्छ च ।
इतीव पान्थं शपतः पिकान् द्विजान् सखेदमैक्षिष्ट स लोहितेक्षणान् ॥९०॥

दिने दिने[1] इति । स पिकान् द्विजान् पक्षिणः सखेदम् ऐक्षिष्ट । किंभूतान् ? । लोहितेक्षणान् । कोकिला हि स्वभावाद् रक्ताक्षा[2] भवन्ति । उत्प्रेक्षते – इतीव पान्थं पथिकं शपतः । इतीति किम् ?[3] ।[4] रे पथिक ! त्वं दिने दिने[5] तनुः कृश एधि भव । अधिकं [तथा] पुनः पुनः मूर्च्छ च । तथा तापमृच्छ[6] प्राप्नुहि च[7] । द्विजो ब्राह्मणो रोषरक्ताक्षः[8] कश्चित्[9] शपति[10] ॥९०॥

10 P. असारः संसारः ॥ P. add. समासोक्ती रूपकं प्रतीयमानोत्प्रेक्षा ॥८८॥
1 P. रसाल । 2 P. आम्रः 3 P. om. विसर्ग 4 B समीरणेन 5 P. भर्त्सनया 6 P. add. अनुप्रास, उत्प्रेक्षा च ॥ P2 add. दातुकाम इव ॥८९॥
1 P. दिने दिने । 2 B/P2 रक्ताक्षा 3 P. इति किम् ? 4 P. add. हे 5 P. add. अधिकं यथा भवति एवं 6 P2 च here 7 P. om. च 8 P. रोषात् 9 B किञ्चित् 10 P. add. अनुप्रास उत्प्रेक्षा । द्विजानिति श्लेषम् ॥९०॥

अलिस्रजा कुड्मलमुच्चशेखरं निपीय चाम्पेयमधीरया धिया ।
स धूमकेतुं विपदे वियोगिनामुदीतमालङ्कितवानशङ्कत ॥९१॥

[1] अलिस्रजेति । स नलः चाम्पेयं [2] चम्पकसम्बन्धि कुड्मलं निपीय धूमकेतुम् उदीतम् अशङ्कत । किमर्थमुदीतम् ? । वियोगिनां विपदे । किंभूतः ? । आतङ्कितवान् चकितः । कया निपीय ? । अधीरया कातरया धिया बुद्ध्या [3] । किंभूतं चाम्पेयम् ? । अलीनां स्रजा उच्चः शेखरो मुकुटो यत्र [4] तत्तथा । [ धूमकेतुरपि तारकास्थाने पीतो भवति पुच्छं कृष्णवर्णं च भवति ] [5] ॥९१॥

गलत्परागं भ्रमिभङ्गिभिः पतत्प्रसक्तभृङ्गावलि नागकेसरम् ।
स मारनाराचनिघर्षणस्खलज्ज्वलत्कणं शाणमिव व्यलोकयत् ॥९२॥

[1] [ गलत्परागमिति । स नलः नागकेसरं हेमपुष्पं शाणमिव व्यलोकयत् । किंभूतम् ? । गलत्परागं यत्र तत्तथा ] भ्रमीणां भङ्गिभिर्विच्छित्तिभिः पूर्वं पतन्ती पुनरपि प्रसक्ता भृङ्गाणाम् आवलिर्यत्र तत्तथा । किंभूतं शाणम् ? । मारस्य कामस्य (५४) नाराचनिघर्षणेन स्खलन्तः पतन्तः ज्वलन्तः कणाः स्फुलिङ्गा यस्मात्तथा । [3] येन

1 li. अलि । 2 li. add. नागकेसरसम्बन्धि अथवा औ. धिया कातरया ; li बुद्ध्या धिया 4 li. यस्य 5 li. add. चाम्पेयो नागकेसरः । तथा च - चाम्पेयः
ग/ केसरो नागकेसरः काञ्चनाह्वयः । ( II iv. 65 ) इत्यमरसिंहः । आह च - नाग-पुष्पो मतो नागकेसरो नगकेसरः । चाम्पेयो नागकिञ्जल्ककनकं हेम-काञ्चनम् ॥ (   ) अथ च चाम्पेयो चम्पको हेमपुष्पक इति (अमर० II iv. 63) चम्पकोऽपि । आह च - चम्पकः सुकुमारश्च सुरभिः शीतलश्चलः । चाम्पेयो हेमपुष्पश्च काञ्चनः बल्पदातिथिरिति   गति । चम्पादेशे भवः चाम्पेयः । अनुप्रास उत्प्रेक्षा च ॥९१॥ 1 li. गलत्परागम् । 2 li. ०पराणो

Contd —

भ्रमरश्रेणिः पुष्पे लगति, तदा वायुवशाद्भ्रमन्तो नागकेसरान् यः परागः पतति स एव स्फुलिङ्गाः, भ्रमरा एव नाराचाः, कृष्णवर्णत्वात्। शाणेऽपि यदा लोहं लगति[4] तदा ज्वलत्कणा। उच्छलन्ति[5]॥९२॥

तदङ्गमुद्दिश्य सुगन्धि पातुकाः शिलीमुखालीः कुसुमाद्गुणस्पृशः।
स्वचापकुर्निर्गतमार्गणभ्रमात् स्मरः स्वनन्तीरवलोक्य लज्जितः ॥९३॥

तदङ्गमुद्दिश्येति[1]। स्मरः कन्दर्पः शिलीमुखानां भ्रमराणाम् आलीः श्रेणीः स्वनन्तीरवलोक्य[2] लज्जितः। कस्मात्? स्वकीयात् चापात् कुत्वं यथा भवति एवं निर्गता ये मार्गणा[3] बाणास्तेषां भ्रमात् भ्रान्तिस्तानात्[4]। किंविशिष्टा आलीः? कुसुमात् [पुष्पात्] तस्य नलस्याङ्गमुद्दिश्य पातुकाः पतनशीलाः। लषपतपद (पा॰ III ii.154) इत्यादिना उक्तम्। किंविशिष्टमङ्गम्? सुगन्धि। किंविशिष्टात् कुसुमात्? गुणं सौरभं स्पृशतीति तस्मात्तथा[5]। कामस्य शिलीमुखा बाणा अपि कुसुमात् धनुषः[6] सुगन्धि तदङ्गमुद्दिश्य ~~स्पृशन्ति~~ पतन्ति। धनुरपि मौर्वी[7] गुणं स्पृशति। तेन दुर्धौ पतानिप्ता बाणाः शब्दं कुर्वन्ति[8]॥९३॥

मधुल्लकैस्तल्लवकण्टकैः क्षतं समुच्चरच्चन्दनसारसौरभम्।
स वारनारीकुचसंचितोपमं ददर्श मालूरफलं पचेलिमम् ॥९४॥

मधुल्लकैरिति[1]। स नलः पचेलिमं पक्वं मालूरस्य

4 B गलति 5 P₁ add. उच्छैः जातिश्च॥९२॥ 1 P₁ तदं। 2 B P₂ om. विसर्गा 3 P₂ om. बाणाः 4 P₂ om. भ्रान्तिस्तानात् 5 P₁ add. गुणस्पृशः 6 P₁ add. सकाशात् 7 P₁ P₂ गुणं मौर्वी 8 P₁ add. गन्धस्येदुत्पूतिसुसुरभिभ्यः ~~इत्~~ (पा॰ V.iv.135) [इति] इत्। श्लेषः॥९३॥ 1 P₁ मधुल्लकैः।
--- Contd.

~~बिल्व~~ बिल्वस्य[2] फलं ददर्श। कर्मकर्तरि कौलिमर [उपसंख्यानम्।] (वा० on पा० III. i. 96)। किंभूतम्?। मरुता वायुना चलन्तो विलसन्तो ये पल्लवास्तेषां कण्टकैः आततम्। बिल्वे हि कण्टका भवन्ति। तथा समुच्चरत् उच्छलत् चन्दनवत् सारं[3] सौरभं यत्र तत्तथा। किंभूतम्?। वारनारीणां[4] कुचैः संचिता उपमा यस्य[5] तत्तथा। वाराङ्गनाकुच-सदृशम्। तेऽपि विलसतां पल्लवानां विटानां[6] कण्टकैर्नखैः आता भवन्ति। तथा चन्दनसुरभयः[7] [8]॥९४॥

युवद्वयीचित्तनिमज्जनोचितप्रसूनशून्येतरगर्भगह्वरम्।
स्मरेषुधीकृत्य धिया भियान्धया स ~~पाटला~~ पाटलायाः स्तबकं प्रकम्पितः॥९५

युवद्वयीति[1]। स नलः पाटलायाः स्तबकं भिया भयेनान्धया धिया बुद्ध्या स्मरस्य इषुधीकृत्य तूणं मत्वा प्रकम्पितः। [किंभूतम्?।] यूनोर्या द्वयी स्त्रीपुंसौ तयोश्चित्ते ~~बोध्ये~~[3] बोध्ये निमज्जनोचितानि यानि प्रसूनानि[4] तैः शून्येतरोऽशून्यो यो गर्भः मध्यं तेन गह्वरं गहनम्[5]॥९५॥

मुनिद्रुमः कोरकितः सितद्युतिर्वनेऽमुनाऽमन्यत सिंहिकासुतः।
तमिस्रपक्षत्रुटिकूटभक्षितं कलाकलापं किल वैधवं वमन्॥९६॥

मुनिद्रुम इति[1]। अमुना नलेन [वने] मुनिद्रुमः अगस्तिवृक्षः

2 P2 om. बिल्वस्य 3 P1 सारसौरभं 4 B वस्त्रीणां 5 P2 add. येन वा 6 P2 om. विटानां 7 P2 सुरयः 8 P1 add. अनुप्रास उपमा च॥९४॥
1 P1 युव। 2 P1 तस्या० 3 B बोध्ये; P1 विद्धे सति 4 B प्रसूतानि 5 P1 add. शून्येतरं गर्भगह्वरं यस्य मध्यकुहरं वा। अनुप्रासरूपके॥९५॥ 1 P1 मुनि-

सिंहिकासुतो राहुरमन्यत । किंभूतः ? । कोरकितः[2] कुड्मलीभूतः[3] सित-धुतिनीलिवर्णः[5] किल उत्प्रेक्षते - वैधवं विधुसम्बन्धिनं कलानां कलापं समूहं वमन्[6] । किं (14 b) भूतम् ? । तमिस्रपक्षे अन्धकारपक्षे या कला त्रुटिस्तस्याः कूटेन व्याजेन भक्षितम् । अथवा तमिस्र-पक्षस्य त्रुटिः[7] प्रान्तोऽमावास्या तस्यां कूटेन समूहेन सर्वात्मना भक्षितं कलाकलापं वमन्[8] ॥ ८६ ॥

पुरो हठाक्षिप्ततुषारपाण्डुरच्छदा वृतेर्वीरुधि बद्धविभ्रमाः ।
मिलन्निमीलं ससृजुर्विलोकिता नभस्वतस्तं कुसुमेषु केलयः ॥ ८७ ॥

पुरो हठेति । नभस्वतो वायोः कुसुमेषु [विषये][2] केलयस्तं[3] मिलन्ती निमीला यस्य तं तथाविधं ससृजुः[4] । विरहित्वात्[5] चक्षु-[6]र्मीलनम् । किंभूताः ? । विलोकिताः[7] । पुनः कथंभूताः ? । पुरोऽग्रे हठेन आक्षिप्ताः तुषारवत् पाण्डुराः छदाः[8] याभिः तास्तथा । तथा वृतेः[8] कण्टकाद्यावरणस्य[9] वीरुधि वल्ल्यां बद्धविभ्रमाः[9] । वृतौ आरूढासु[10] वीरुत्सु सविलासाः छदा वृतेरिति[11] वायुविशेषणं वा । आक्षिप्ता छदा इव आकृतिरावरणं वस्त्रं येन[12] अथ च कुसुमेषोः कामस्य क्रीडा ॥ ८७ ॥

द्रुमः । 2 P2 कुड्मलितः 3 P add. सञ्जातकोरकः 4 P2 शिति० 5 P1 add. राहुरपि कृष्णवर्णः । 6 P1 add. इव । अत्र गौण्या वृत्त्या प्रयुक्तं वमन्निति अतिसुन्दरम् ॥ 7 P1 प्रान्तः त्रुटिः 8 P1 add. अनुप्रासः श्लेषो रूपकं च अपह्नुतिरुत्प्रेक्षा ॥ ८६ ॥ 1 P1 पुरो । 2 P1 add. अथ च ... क्रीडा here. 3 B निमीलन्ती 4 P2 ससृजुः 5 B विरह० 6 B निमीलनम् 7 P1 विलो-किताः before तं मिलन्ती, and om. पुनः कथंभूताः ? 8 B कण्टकावरण-वीरुधि 9 P1 add. पक्षे कृतभ्रमणाः 10 P1 आरूढायां 11 P1 add. वा 12 P1 add. वृत्तिवीरुद्भ्रमस्वच्छन्दैः कुट्टनी साधारणा स्त्री नायिका उच्यन्ते

contd.

गता यदुत्सङ्गतले विशालतां द्रुमाः शिरोभिः फलगौरवेण ताम् ।
कथं न धात्रीमतिमात्रनामितैः स वन्दमानानभिनन्दति स्म तान् ॥९८॥

गता[1] यदिति । स नलः तान् द्रुमान्[2] फलगौरवेण अतिमात्रं नामितैः शिरोभिः शिखरैः तां[3] धात्रीं पृथ्वीं[4] वन्दमानान् कथं [न] अभिनन्दति स्म । यस्या उत्सङ्गतले विशालतां गता द्रुमाः । वः शालच्छङ्कटच्यौ (पा॰ V. ii. 28) इति शालच् । अथ च धात्री [उप]माता[5] तां सर्वेऽपि नामितैर्मस्तकैर्वन्दते[6] । तदुत्सङ्गे च[7] वर्द्धते[8] ॥९८॥

नृपाय तस्मै हिमितं वनानिलैः सुधीकृतं पुष्परसैरहर्महः ।
विनिर्मितं केतकरेणुभिः सितं वियोगिनेऽदत्त न कौमुदीमुदः ॥९९॥

नृपाय[1] तस्मै इति । अह्नो दिनस्य महस्तेजः तदेव कौमुदी इति रूपकम् । तस्मै मुदो न अदत्त । केचिदेवं व्याचक्षते ॥
तस्मै नृपाय कौमुदीसम्बन्धिनो मुदः हर्षान् [न] अदत्त । किंभूतम् ? । वनानिलैः [हिमितं][2] हिमरूपकृतं, तथा पुष्पाणां रसैः मकरन्दैः सुधारूपं कृतमपि । केतकानां रेणुभिः सितं शुभ्रं विनिर्मितमपि । कौमुद्यपि श्वेताऽमृता[3] शीता च भवति । किंभूताय ? । वियोगिने विरहित्वात् दिवसतेजः कौमुदी तस्य हर्षं न चकार[4] ॥९९॥

इति । समासोक्तिरनुप्रास उपमा च ॥९७॥ 1 P. गता: 2 B P2 अतिमात्रं here 3 P. स्वां 4 P2 पृथिवीं 5 P2 माता 6 P. नतैः शिरोभिः 7 B. वर्द्धते च
8 P. add. समासोक्तिः ॥९८॥

1 P. नृपाय 2 eds. add. हिमितं 3 P. शीतला अमृतरूपा श्वेता
4 P. add. अनुप्रासो रूपकम् उक्तनिमित्ता विशेषोक्तिः ॥९९॥

अयोगभाजोऽपि नृपस्य पश्यता तदेव साक्षादमृतांशुमाननम् ।
पिकेन रोषारुणचक्षुषा मुहुः कुहूरुताहूयत चन्द्रवैरिणी ॥१००॥

अयोगभाज[1] इति । पिकेन कोकिलेन रोषारुणचक्षुषा सता उत इत्युत्प्रेक्षितं[2] — कुहूः अमावास्या मुहुः[3] आहूयत[4] स्थितः[5] चन्द्रस्य वैरिणी । किं कुर्वता ? नृपस्य नलस्य[6] अयोगभाजोऽपि विरहिणोऽपि तदेवाऽऽननं साक्षात् अमृतांशुं चन्द्रं[7] पश्यता ।[8] पिको[9] हि ध्वनिना वियोगिनं म्लानिं[10] कुरुते, स्वभावादारक्ताक्ष[11] कुहूशब्दं च विधत्ते[12] । नलमुखम् अम्लानं वीक्ष्य[13] कोप[14] इव चरितः । चन्द्रोऽपि क्रुद्धो[15] (15a) न दृश्यते[16] ॥१००॥

अशोकमर्थान्वितनामताशया गतान्शरण्यं गृहशोचिनोऽध्वगान् ।
अमन्यतावन्तमिवैष पल्लवैः प्रतीष्टकामं ज्वलदस्त्रजालकम् ॥१०१॥

अशोकमिति[1] । एष नलो गृहशोचिनोऽध्वगान् पान्थान्[2] अवन्तं रक्षन्तमिव अमन्यत[3] अशोकम् । किंभूतान् ? गृहाभावे शोकं गतान् । यतः शरण्यं शरणहितम्[4] । कया ? अर्थान्वितं सार्थकं नाम यस्य तस्य भावस्तत्ता तस्या आशया । न विद्यते शोको यत्र स

1 P1 अयोग । 2 P1 om. इति 3 B मुहुः, P2 कुहूः चन्द्रवैरिणी 4 P2 add. यद्वा पिकेन कुहू रौतीति कुहूरुत् तेन कुहूरुता चन्द्रवैरिणी अमावास्या आहूयत । 5 B वसितः 6 P1 om. नलस्य 7 P1 add. इव 8 P1 add. अथवा प्रत्यक्षं चन्द्रं पश्यता । 9 P1 पिक 10 P1 म्लानि 11 B चक्षुः 12 P2 रौति 13 P1 P2 निरीक्ष्य 14 P1 कोपाविष्ट इव 15 B P1 P2 क्रुद्धा 16 P1 add. प्रत्यक्षसदृशः साक्षात् । (                ) रुताशब्देनेत्यन्ये । कुहूरुता कोकिला नीति वा । उपमा । [illegible]कमुत्प्रेक्षा ॥१००॥ 1 P1 अशोक । 2 P1 om. पान्थान् 3 B अन॰ 4 P1 रहितं

अशोक: त्वम् गतानामस्माकं गृहशोको नास्ति । किंभूतम्? । पल्लवैः प्रतीष्यानि पतदाधृतानि कामस्य ज्वलन्ति अस्त्राणां जालकानि येन तं तथा । पल्लवाः किल रक्ता भवन्ति[5] ॥३०१॥

विलासवापीतटवीचिवादनात् पिकालिगीतेः शिखिलास्यलाघवात् ।
वनेऽपि तौर्यत्रिकमारराध तं क्व भोगमाप्नोति न भाग्यभाग् जनः ॥३०२॥

विलासवापीति[1] । तौर्यत्रिकं[2] गीतवाद्यनृत्यादि कर्तृ वनेऽपि तं नलम् आरराध । कस्मात्? । विलासवापीनां तटेषु वीचीनां वादनात् । इति वाद्यम् । तथा पिकानाम् अलीनां[3] च गीतेः सकाशात् । इति गीतम् । तथा शिखिनां मयूराणां लास्यस्य नृत्यस्य लाघवात् । इति नृत्यम् । युक्तं चैतत् । यतः भाग्यभाग् जनः क्व भोगं न आप्नोति[4] ॥ ॥३०२॥

तदर्थमध्याप्य जनेन तद्वने शुका विमुक्ताः परवस्तमस्तुवन् ।
स्वरामृतेनोपजगुश्च सारिकास्तथैव तत्पौरुषगायनीकृताः ॥३०३॥

तदर्थमिति[2] । जनेन तस्य नलस्यार्थे अध्याप्य तस्य वने विमुक्ताः परवः शुकाः तं नलम् अस्तुवन् । तथैव सारिकाश्च तं स्वरामृतेन उपजगुश्च । किंभूताः? ।[3] तस्य नलस्य पौरुषस्य गायनीकृताः ॥[4] ॥३०३॥

5 P. add. सापह्नवोत्प्रेक्षा ॥३०१॥

1 P. विलास । 2 P. नृत्यगीतवाद्यं नाम्यं 3 B आलीनां 4 P. add. अर्थान्तरन्यासः ॥३०२॥

1 P. for गायिनी° 2 P. तद । 3 P. add. तथैव तदर्थमध्याप्य जनेन तद्वने विमुक्ताः 4 P. add. अनुप्रासो रूपकं च ॥३०३॥

सर्ग १ 67

इलीष्टगन्धाढ्यमरन्नसौ वनं पिकोपगीतोऽपि शुकस्तुतोऽपि । /क
अविन्दतामोदभरं बहिश्चरं विदर्भसुभ्रूविरहेण नान्तरम् ॥ १०४॥

इलीष्टगन्धेति[1]। असौ नलः इलीष्टगन्धेन[2] आढ्यं समृद्धं[3] वनम् अटन् सन् पिकैरुपगीतोऽपि शुकैः स्तुतोऽपि च बहिश्चरम्[4] आमोदभरं परिमलम् अविन्दत । परम्[5] ~~आमोदभरं~~ आन्तरं मानसम् आमोदभरं हर्षं[6] न अविन्दत । केन[7] ?। विदर्भसुभ्रूविरहेण[8] ॥१०४॥

करेण मीनं निजकेतनं दधद् द्रुमालवालाम्बुनिवेशशङ्कया ।
व्यतर्कि सर्वर्तुघने वने[1] मधुं स मित्रमत्रानुसरन्निव स्मरः ॥ १०५॥

करेण[2] मीनमिति। लोकैः स नलः अत्र वने स्मर इव व्यतर्कि । किं कुर्वन् ?। मधुं वसन्तं मित्रम् अनुसरन् । किंभूते ?। सर्वैः[5] ऋतुभिर्घने[3]। किं कुर्वन् ?। करेण मीनं निजकेतनं ध्वजं दधत् । कया ?। द्रुमाणाम् आलवालेषु यद् अम्बु[4] तत्र[7] निवेशः प्रवेशः तस्य[6] शङ्कया। हस्ते किल रेखारूपो मीनोऽस्ति । नलस्य राजलक्षणम्[8] ॥१०५॥

लताबलालास्यकलागुरुस्तरुप्रसूनगन्धोत्करपश्यतोहरः ।
असेवतामुं मधुगन्धवारिणि प्रणीतलीलाप्लवनो वनानिलः ॥१०६॥

~~लता~~ लताबलेति[1] । वनानिलः अमुं नलम् असेवत[2] ।

1 P. इली । 2 P. इष्टेन; R इति प्रकारेण इष्टेन 3 R वनं समृद्धं 4 B बहिश्चरम् 5 B अपरं 6 P. om. हर्षं 7 B किल 8 P. add. उक्तनिमित्ता विशेषोक्तिः ॥१०४॥
1 R text मधुं वने 2 P. करेण । 3 P. add. सर्वर्तुघनमिति संगता वा । 4 R add. जलं 5 B तत्र 6 R तस्य 7 P. मत्स्यो° 8 P. add. अनुप्रासः काव्यलिङ्गमुत्प्रेक्षा च ॥ ॥१०५॥
1 P. लता । 2 R add. ~~सिषेवे~~ सिषेवे ——— contd.

किंभूत:?। लता इव अबलास्तासां लास्यकला नृत्यकला तत्र गुरु:।
एतेन मन्दत्वम्। तथा तरुणां प्रसूनानि पुष्पाणि तेषां गन्धोत्करस्य
प्रशस्यताहरस्तैरि:। एतेन सुरभि:। तथा मधु मकरन्द एव गन्धवारि तत्र
प्रणीतं[3] कीलाप्लवनं स्नानं येन स तथा। एतेन शीत:[4]॥१०६॥

अथ स्वमादाय भयेन मन्थनाच्चिरत्नरत्नाधिकमुच्चितं चिरात्।
निलीय तस्मिन्निवसन्नपांपतिर्वने तडागो ददृशेऽवनीभुजा॥१०७॥

अथ[1] स्वमिति। अथ अवनीभुजा तस्मिन् वने निलीय
अन्तर्धानं कृत्वा नि(ऽ)वसन्। इव सन् इति द्वे वा पदे।
तडाग एवापांपति: समुद्रो ददृशे। केन?। मन्थनात्[2] भयेन। किं कृत्वा
वसन्?। चिरत्नानि जीर्णानि यानि रत्नानि[3] तेभ्योऽधिकं चिराद्
उच्चितं [संचितं] स्वं द्रव्यं रत्नजातम्[4] आदाय। यस्य किल्ताधिकं[5,6]
द्रव्यं भवति[6] स भयेन तद्गृहीत्वाऽन्तर्धाय क्वापि निर्भयप्रदेशे वसति[7]॥
॥१०७॥

पयोनिलीनाभ्रमुकामुकावलीरदाननन्तोरगपुच्छसच्छवीन्।
जलार्द्रकुद्रस्य तटान्तभूभिदो मृणालजालस्य मिषाद्बभार य:॥१०८॥

पयोनिलीनेति। यस्तडाग एव पयोधि: पयसि निलीना
येऽभ्रमुकामुका ऐरावणास्तेषां या आवली श्रेणिस्तस्या रदान्[3]
दन्तान्[2] बभार। कस्मात्?। मृणालजालस्य मिषात्। किंभूतस्य?। जले

3 P. add. कृतं 4 P. add. अनुप्रासो रूपकं च॥१०६॥ 1 P. अथ स्वमादाय।
2 B मन्थन: 3 P. add. समुद्ररत्नानि; P. om. रत्नानि 4 P. add. आत्मानं
वा 5 B ऽधिकं 6 P. संभवति 7 P. add. अनुप्रासो रूपकमुत्प्रेक्षा वा समा-
सोक्ति:॥१०७॥ 1 P. पयोनि। 2 B add. न 3 B जालस्य —— Contd.

अर्द्धं[4] उद्धुरस्य । तथा तटान्तस्य भुवं भिनत्तीति[5] तस्य तथा। किंभूतान् रदान्? । अनन्तोरगस्य पुच्छं[6] तस्य सच्छवीन्[7] श्वेतान्। मृणालं न[8] भवति, किन्तु एते ऐरावणानां बहूनां किमु[9] दन्ताः। तेऽपि तटान्तभुवं भिन्दन्ति[10] ॥३०८॥

---

तटान्तविश्रान्ततुरङ्गमच्छटास्फुटानुबिम्बोदयचुम्बनेन यः।
बभौ चलद्वीचिकशान्तशातनैः सहस्रमुच्चैःश्रवसामिव श्रयन् ॥३०९॥

---

तटान्तेति । यस्तडागोदधिस्तटान्ते विश्रान्ता बद्धा ये तुरङ्गमास्तेषां छटा[2] श्रेणिस्तस्याः स्फुटेन[3] अनुबिम्बोदयस्य चुम्बनेन उच्चैःश्रवसां सहस्रं श्रयन्निव बभौ । किंभूतम्? । वीचय
प्रा/ एव कशान्तः तटप्रान्तैः[4] तस्य शातनैः प्रहारैः [चलत् चञ्चलम्[5]]।
श्री/ जलस्थैः[6] तुरगप्रतिबिम्बैः उच्चैःश्रवसो बहवः[7] सन्तीव[8] ॥३०९॥

---

सिताम्बुजानां निवहस्य यश्छलाद्बभावलिश्यामलितोदरश्रियाम् ।
तमःसमच्छायकलङ्कसंकुलं कुलं सुधांशोर्बहुलं वहन् बहु ॥३१०॥

---

सिताम्बुजानामिति[1] । यस्तडागः समुद्रो[2] बभौ । सिताम्बुजानां [कुमुदानां[3]] निवहस्य छलात् सुधांशोश्चन्द्रस्य बहुलं घनं बहु[4]

---

4 P1 अर्द्धरुद्धस्य 5 P1 om. इति 6 P1 add. तद्वत् शोभनच्छवीन् । सच्छवीनिति पाठे ~~...~~ 7 P1 छवीन् 8 P2 om. न 9 P2 दन्ताः किमु 10 P1 add. अनुप्रासोऽपह्नुतिरुपमा च ॥ ३०८ ॥ 1 P1 तटां । 2 P2 छदा 3 B स्फुरेव 4 P2 om. तटप्रान्तैः 5 P2 om. चञ्चलम् 6 P1 जलतुरग॰ 7 P1 बहुशः 8 P1 add. अनुप्रासोऽपह्नुतिः रूपकमुत्प्रेक्षा च ॥ ३०९ ॥

1 P1 सितां । 2 P1 यः सरोऽम्भोधिः 3 P1 कमलानां 4 P1 add. प्रचुरं

कुलं वहन्निव। किंभूतानाम्?। अलिभिः श्यामलितं उदरस्य मध्यस्य श्रीर्येषां तेषां[5] तथा। किंभूतं कुलम्?। तमसा समच्छायो यः कलङ्क-स्तेन संकुलम्। भ्रमरा एव कलङ्काः। समुद्रे हि एक ऐरावणः, एक[6] उच्चैःश्रवा, एकश्चन्द्रः। अत्र बहवः[7]॥१३०॥

---

रथाङ्गभाजा कमलानुषङ्गिणा शिलीमुखस्तोमसखेन शार्ङ्गिणा।
व/ सरोजिनीस्तम्बकदम्बकैतवान्मृणालशेषाहिभुवान्वयायि यः॥१३१॥

---

रथाङ्गभाजेति[1]। यस्तडागः[2] एवाम्भोधिः सरोजिन्याः यः स्तम्बस्तस्य कदम्बः समूहस्तस्य कैतवात् शार्ङ्गिणा श्रीवासुदेवेना-न्वयायि अनुगतः। तदपि श्यामं श्रीकृष्णोऽपि श्यामः। किंभूतम्[3]?। रथाङ्गं चक्रवाकं भजते[4], देवोऽपि चक्रमायुधं[5], तथा कमलानामनुषङ्गो विद्यते यत्र तेन तथा[6]। पक्षे, कमलायाः लक्ष्म्याः। शिलीमुखानां भ्रमराणां स्तोमः समूहस्तत्सखेन। पक्षे, बाणानाम्[7]। किंभूतेन?। मृणालान्येव धवलत्वात् शेषाहिस्तद्भुवा[8] तदुत्पन्नेन। पक्षे[9], शेषाहिरेव भूः शयन-स्थानं यस्य[10]॥१३१॥

---

शि/ तरङ्गिणीरङ्कजुषः स्ववल्लभास्तरङ्गलेखा बिभरांबभूव यः।
दरोद्गतैः कोकनदौघकोरकैर्धृतप्रवालाङ्कुरसंचयश्च यः॥१३२॥

---

5 P2 om. तेषां 6 B एकम् 7 P1 add. एवमुत्तरत्रापि यथासंभवम्। अनुप्रासोऽपह्नुतिरुपमा च॥१३०॥ 1 P1 रथां। 2 P2 पयोम्भोधिः 3 P1 om. किंभूतम्?। 4 B भजन्ते 5 P1 रथाङ्गमायुधविशेषं 6 P1 om. तेन तथा 7 B बाणः, P2 बाणाः 8 B भुवः; P1 तदुद्भवा 9 P1 om. पक्षे 10 P1 add. श्लेषोपह्नुतिः रूपकं च॥१३१॥

तरङ्गिणीरिति[1]। यः समुद्रस्तरङ्गालेखा एव[2] तरङ्गिणी नदीर्बिभराम्बभूवेव। किंभूताः? स्वस्य वल्लभाः प्रियाः[3]। अत[4] एव अङ्कजुषः। किं च यश्च[5] तटाग्रास्बुधिदरैः[6] ईषदुद्गतैः कोकनदानां[7] रक्तोत्पलौघानां कोरकैर्धृताः प्रवालाङ्कुरमणीनां संचया येन स तथा[8]॥
॥३३२॥

महीयसः पङ्कजमण्डलस्य यच्छलेन गौरस्य च मेचकस्य च।
जलेन मेने सलिले निलीनयोस्त्विषं विमुञ्चन्विधुकालकूटयोः॥३३३॥

महीयस[1] इति। यस्तडागः जलेन सलिले निलीनयोः अन्तर्हितयोः विधुश्चन्द्रः कालकूटं च तयोस्त्विषं कान्तिं विमुञ्चन्निव मेने। केन?। महीयसो महतो गौरस्य धवलस्य ~~मेचकस्य~~ [च][2] पङ्कजमण्डलस्य कमलौघस्य छलेन। तथा मेचकस्य कृष्णस्य पङ्कजमण्डलस्य नीलोत्पलौघस्य[2] च व्याजेन। एकं विधुरपरं कालकूटम्[3] ॥३३३॥

चलीकृता यत्र तरङ्गरिङ्गणैरबालशैवाललतापरम्पराः।
ध्रुवं दधुर्वाडवहव्यवाडवस्थितिप्ररोहत्तमधूमभूमताम्॥३३४॥

चलीकृता[1] इति। यत्राम्बुधौ अबाल[2]~~...~~कठिनायाः ⌐:

1 P. तरं। 2 P. add. स्मरः 3 P. om. प्रियाः 4 P. अत एव 5 P. om. च
6 P. दरम् 7 P. कोकनदौघानां ~~कोकर~~ कोरकैः रक्तोत्पलमुकुलैः 8 P. add.
अनुप्रासो रूपकमपह्नुतिश्च॥३३२॥

1 P. महीयसः। 2 P. P2 नीलोत्पलस्य 3 P. add. अनुप्रासोऽपह्नुति-
र्यथासंख्यं प्रतीयमानोत्प्रेक्षा च॥३३३॥

1 B चलीकृतेति। P. चली। 2 P. P2 अबलो —— contd.

शैवालल्लतास्तासां परम्परा ध्रुवं वाडवहव्यवाड् वडवानलस्तस्य आ- श्रिषित्या प्ररोहत्तमो धूमभूमा यासु तास्तथोक्ताः, तासां भावः प्ररोह- त्तमधूमभूमता दधुः। शैवाल एव धूमः। यत्र धूमस्तत्र वह्नि- रित्यनुमानम्। किंभूताः? तरङ्गाणां रिङ्गाणैश्चालनैः चलीकृताः शैवालल्लताः॥ ३३४॥

---

प्रकाममादित्यमवाप्य कण्टकैः करम्बितामोदभरं विवृण्वती।
धृतस्फुरच्छ्रीगृहविग्रहा दिवा सरोजिनी यत्प्रभवाऽप्सरायिता॥ ३३५॥

---

प्रकाममिति। यस्मात्तडागाब्धेः प्रभवा सरोजिनी अप्स- रायिता अप्सरसं इवाचरिता। दिवा दिवसे धृतं स्फुरं श्रीगृहं काले तस्य विग्रहः शरीरं यया सा तथा॥ किंभूता॥ प्रकामम् आदित्यम् । ता अवाप्य आमोदभरं विवृण्वती। किंभूता? कण्टकैः करम्बिता। अप्सरसोऽपि प्रकामं सकामम् आदित्यं देवम् अवाप्य कण्टकैः रोमाञ्चैः करम्बिताः। यथा दिवा स्वर्गेण धृतः स्फुरः श्रीगृहः शोभागृहं विग्रहो देहो यासाम्॥ ३३५॥

---

यदम्बुपूरप्रतिबिम्बितायतिर्मरुत्तरङ्गैस्तरलैस्तरद्रुमः।
निमज्ज्य मैनाकमहीभृतः सतस्तताम पक्षान् धुवतः सपक्षताम्॥ ३३६॥

---

3 P.P2 शैवाल॰ M.P1 om. तासां परम्परा ध्रुवं 5 P1 भूमा यत्र स त्वाकौ धूमश्च तस्य भावस्तथा शैवाल एव... 6 P1 add. भूमधूम्रतामिति पाठा- न्तरम्। अनुप्रासोत्प्रेक्षा॥ ३३४॥ 1 P1 प्रका। 2 P2 अप्सरा इव 3 B P2 विग्रहं 4 P1 add. अथवा धृतः स्फुरच्छ्रीगृहो विग्रहो यस्याः 5 B विधृतम्॥ 6 P1 add. दिवा 7 B करम्बिताः 8 P1 add. आमोदभरं विवृण्वती 9 P1 स्फुरं । ती। 10 P2 श्रीशोभागृहं 11 P1 om स्थानं 12 P2 om. देहो 13 P1 add. अनुप्रासः श्लेषो- पमा॥ ३३५॥

यदम्बुपूरेति[1]। तरद्द्रुमः[2] मैनाकमहीभृतः सपक्षता सादृश्यं ततान। किंभूतः?[3] यस्य तडागस्य अम्बुपूरे प्रतिबिम्बिता आयतिर्यस्य स तथा। किंभूतः? मरुता तरङ्गैस्तरलः चञ्चलः। किंभूतस्य मैनाकमहीभृतः? पक्षान् धुन्वतः। तथा निमज्ज्य सतः विधेमानस्य। द्रुमे एव प्रतिबिम्बितो मैनाक इव यत्र[4]॥११६॥

---

पयोधिलक्ष्मीमुषि केलिपल्वले रिरंसुहंसीकलनादसादरम्।
स तत्र चित्रं विचरन्तमन्तिके हिरण्मयं हंसमबोधि नैषधः॥११७॥

---

पयोधिलक्ष्मीति[1]। स नैषधः तत्र[2] केलिपल्वले हिरण्मयं हंसमबोधि[3] दृष्टवान्। किंभूते? पयोधेः लक्ष्मीं मुष्णाति[4] यः तस्मिन् तथा। किंभूतम्? अन्तिके विचरन्तम्[5]। तथा चित्रम् आश्चर्यकरम्[6] तथा रिरं(र)सुः रन्तुमिच्छन्ती या हंसी तस्याः कले मधुरे नादे सादरं साभिलाषम्। यथा कश्चित् योगी दुरवगाहत्वात् समुद्रप्राये पल्वले [शरीरे][8] हंसं[9] परमात्मानं बुध्यति पश्यति। तमपि अन्तिके चित्रं विचरन्तं हिरण्मयं, तेजोमयत्वात्। तदुक्तं – सर्व एव[10] सुवर्ण (   ) इति। ~~अथवा~~ अथवा नानावर्णधारित्वात् कदाचित् हिरण्यवर्णो[11] कदाचित् रक्तशुक्लादिः। किंभूतम्? रिरंसुहंसी[12] शक्तिः तस्याः कलनादे सादरम्। यदुक्तं – शान्ता शक्तिस्तदा नादं सृजत्यभ्यागतेन्दुना (    ) इति। श्लेषः। (दीपजन(पा. III.1.61)) – त्यादिना चिण्[13]॥११७॥

---

1 यद। 2 P2 तरः द्रुमः 3 B किंभूतस्य? 4 P1 add. अनुप्रासोपमे॥११६॥
1 B लक्ष्मीमिति। P1 पयोधि। 2 P1 add. पल्वले 3 B समबोधि 4 B मुष्णति P1 पुष्णाति 5 P1 add. विविध भ्रमन्तं मृणालादि भक्षयन्तं वा 6 P1 add. चरन्तमिति क्रियाविशेषणं वा 7 P1 दृष्टवान् 8 B add. हिरण्मयं 9 B add. अबोधि दृष्टवान्। किंभूते? 10 B P2 कदापि 11 P1 हिरण्मयं 12 P1 om. विसर्ग

— contd.

प्रियासु बालासु रतक्षमासु च द्विपत्रितं पल्लवितं च बिभ्रतम् ।
स्मरार्जितं रागमहीरुहाङ्कुरं मिषेण चञ्च्वोश्चरणद्वयस्य च ॥१३८॥

[प्रियास्विति[1] । स हंसम् अद्राक्षीत् । किंभूतम् ? । चञ्च्वोर्मिषेण तथा चरणद्वयस्य च[2] मिषेण स्मरेण अर्जितं रागो[3]ऽङ्कुर एव महीरुहस्तस्याङ्कुरं बिभ्रतम्[4] । किंभूतं रागाङ्कुरम् ? । बालासु प्रियासु हंसीषु चञ्चुपुटद्वयमिषात् द्विपत्रितम् । तथा चरणद्वयाङ्गुलिमिषात् रतक्षमासु प्रियासु पल्लवितं च[5] ॥१३८॥

महीमहेन्द्रस्तमवेक्ष्य स क्षणं शकुन्तमेकान्तमनोविनोदिनम् ।
प्रियावियोगाद्विधुरोऽपि निर्भरं कुतूहलाक्रान्तमना मनाग्भूत् ॥१३९॥

महीमहेन्द्र[1] इति । स महीमहेन्द्रस्तं शकुन्तं पक्षिणम् एकान्तं नियमेन मनसो विनोदिनमवेक्ष्य कुतूहलाक्रान्तमना मनाग्[2]भूत् । किंभूतः ? । निर्भरमत्यन्तं प्रियावियोगाद् विधुरोऽपि[3] ॥१३९॥

अवश्यभव्येष्वनवग्रहग्रहा यया दिशा धावति वेधसः स्पृहा ।
तृणेन वात्येव तयाऽनुगम्यते जनस्य चित्तेन भृशावशात्मना ॥१४०॥

अवश्येति[1] । अवश्यभव्येषु पदार्थेषु विषये यया दिशा वेधसो ब्रह्मणः स्पृहा धावति । किंभूता ? । अनवग्रहीतुमशक्यो ग्रहो

contd. 13 P. add. अनुप्रास उपमा समासोक्तिश्च ॥१३७॥ 1 P. प्रिया । 2 P. om. च 3 B समो० 4 P. add. दधानम् 5 P. add. समुच्चयो यथासंख्यं रूपकमपह्नुतिश्च ॥१३८॥ ‖ 1 P. मही । 2 P. मनाक् ईषत् 3 P. add. अनुप्रासो विशेषोक्तिश्च विभावना ॥१३९॥ 1 P. अव । P. अवश्यभव्येष्विति ।

निर्बन्धो यस्याः साऽनवग्रहग्रहा। जनस्य[2] चित्तेन तया दिशा सा स्पृहा अनुगम्यते। भृशमवशात्मना परतन्त्रेण। यथा यया दिशा वात्या वातमण्डली धावति तया दिशा अवशात्मना तृणेन[3] अनुगम्यते। दमयन्तीनलयोः संयोजनाय धातुरिच्छास्ति। ततश्च[4] हेम-हंसदर्शनं, तत्र च तस्य निद्रा, नलेन धृतस्य हंसस्य वात्या-दमयन्तीत्याथि:। अतो हंसचित्तं निद्रया वेधसः स्पृहामनुजगामे-त्यर्थः[5] ॥१२०॥

अथाऽवलम्ब्य क्षणमेकपादिकां तदा निदद्रावुपपल्वलं खगः।
स तिर्यगावर्जितकन्धरः शिरः पिधाय पक्षेण रतिक्लमालसः ॥१२१॥

अथाऽवलम्ब्येति[1]। अथ स खगो हंसस्तदा उपपल्वलं सरसः[2] समीपे एकपादिकामवलम्ब्य एकेन पादेन जातिस्वभावात् स्थित्वा निदद्रौ। किंभूतः?। तिर्यगावर्जिता नम्रिता कन्धरा येन स तथा। किं कृत्वा?। शिरो मस्तकं पक्षेण पिधाय। तथा रतक्लमेन[3] अलसो मन्दः[4] ॥१२१॥

2 P. add. वृत्तेन 3 B&P add. वात्या 4 P. ततश्च 5 P. add. अत्र विशेषे प्रकृते सामान्यमुदीतम्। यथा हे कृष्णं हि निहत्य नरकासुरवधूनां यदि दुःखं शमयासि तत्त्वमेव श्लाघ्य इति।
सुहृद्वधूबाष्पजलप्रमार्जनं करोति वैरप्रतियातनेन यः।
स एव पूज्यः स पुमान् स नीतिमान् सुजीवितं तस्य स भाजनं श्रियः॥ (का.प्र. X. 51) इति। अनुप्रासोऽप्रस्तुतप्रशंसा उपमा च ॥१२०॥
1 P. अथा। 2 P. सरःसमीपे 3 B रतक्लमेन 4 P. add. जातिः॥ ॥१२१॥

न/ सनालमात्माननिर्जितप्रभं हियानतं काञ्चनमम्बुजन्म किम्।
अबुद्ध तं विद्रुमदण्डमण्डितं स पीतमम्भः प्रभुचामरं नु किम् ॥१२२॥

सनालमिति[1]। स नलस्तं हंसम् इति अबुद्ध। यत् इदं किं सनालं नालयुक्तं काञ्चनम् अम्बुजन्म कमलम्। किंभूतम्? आत्मन आननेन निर्जिता प्रभा यस्य तत्तथा। अत एव ह्रिया नतम्। एकचरणा एव नालः। शिरसः पश्चान्नमादित्वात् नतत्वम्[2]। अथवा, किम् इदं पीतवर्णम् अम्भःप्रभोर्वरुणस्य चामरं च इति अबुद्ध।[3] किंभूतं चामरम्? विद्रुमस्य प्रवालस्य दण्डेन मण्डितम्। चरण-रक्तत्वात् ॥१२२॥

दु/ कृतावरोहस्य हयादुपानहौ ततः पदे रेजतुरस्य बिभ्रती।
तयोः प्रवालैर्वनयोस्तथाम्बुजैर्नियोद्धुकामे किमु बद्धवर्मणी ॥१२३॥

कृतापरोहस्येति[1]। अस्य नलस्य हयात् कृतावरोहस्य अवतीर्णस्य उपानहौ बिभ्रती[सती] पदे चरणौ रेजतुः[2]। ततोऽनन्तरम्। उत्प्रेक्षते— तयोर्द्वयोरपि वनयोः काननस्य जलस्य च उभयोरपि प्रवालैः पल्लवैः सह तथा[3] अम्बुजैश्च सह नियोद्धुकामे सती, एते पदे बद्धवर्मणी इव[4]। एकस्य वनस्य प्रवालैः[5], अपरस्य कमलैः सह। पदयोश्च[6][7] एतदुभयमुपमानम्[8] ॥१२३॥

1 P. सनालं। 2 B नालत्वम् 3 P. चरणस्यालोहितत्वात्। and add. ससन्देहः। अनिश्चयः संशय इति कुरुः ॥१२२॥
1 P. कृतावरोहस्य। 2 P. विरेजतुः 3 P. तथा 4 P. om. इव
5 P. किसलयैः 6 B पदयोगश्च 7 P. om. च 8 P. add. यथा-संख्यमुत्प्रेक्षा च ॥१२३॥

सर्ग ९ 77

विधाय मूर्तिं कपटेन वामनीं स्वयं बलिध्वंसिविडम्बिनीमयम् ।
उपेतपार्श्वश्चरणेन मौनिना नृपः पतङ्गं समधत्त पाणिना ॥१२४॥ ।त

विधाय[1] मूर्तिमिति । सोऽयं नृपः कपटेन वामनीं कुब्जां मूर्तिं विधाय स्वयं तं पतङ्गं हंसं पाणिना अधत्त । किंभूताम्? । बलेर्दानवेन्द्रस्य विध्वंसी श्रीत्रिविक्रमस्तस्य विडम्बिनीमनुकारिणीम् । अथ च बलिनां ध्वंसिनो ये पुरुषास्तदनुकारिणीम् । किंभूतः? । मौनिना मौनयुक्तेन चरणेन गमनेन[2] शनैः शनैरुपेतं प्राप्तं पार्श्वं समीपं येन स तथा । श्रीत्रिविक्रमोऽपि[3] पतङ्गं श्रीसूर्यं पाणिना दधौ । चरणेन पादेन विष्णुक्रमेण आकाशे, मौनिना निःशब्देन समीपगः कपटेन श्रीवामनमूर्तिं विधाय बलेर्विध्वंसकारिणीम्[4] । त्रिविक्रमस्य भूर्भुवःस्वर्लोकत्रयव्यापकत्वात्[6] ॥१२४॥

तदात्तमात्मानमवेत्य संभ्रमात् पुनः पुनः प्रायसदुत्प्लवाय सः ।
गतो विरुत्योड्डयने निराशतां करौ निरोद्धुर्दशति स्म केवलम् ॥१२५॥

तदात्तमिति[1] । स हंसः प्रथमं तेन नलेन आत्तं गृहीतम् आत्मानमवेत्य (17b) मत्वा संभ्रमात् आदरात् उत्प्लवाय उड्डयनाय पुनः पुनः प्रायसत् प्रयासं चक्रे । तदनु केवलं[2] निरोद्धुर्नलस्य करौ दशति स्म । किंभूतः? । विरुत्य आक्रन्दं कृत्वा उड्डयने निराशतां गतः[3] ॥१२५॥

1 P. विधाय मूर्तिम् । 2 P. add. पदेन वा 3 P. om. अपि 4 P. reads बलेर्ध्वंस॰ 5 P. त्रयस्य 6 P. add. मौलिनेति पठित्वा मुकुटेनोपलक्षित इति व्याचष्टे अन्यः । उपमा च ॥ १२४॥

1 P. तदात्त । 2 P. केवलं after करौ 3 P. add. प्रायसदिति लुङ् । जातिः ॥१२५॥

ससम्भ्रमोत्पाति पतत्कुलाकुलं सरः प्रपद्योत्कतयानुकम्प्रताम् ।
तमूर्मिलोलैः पतगग्रहान्नृपं न्यवारयद्वारिरुहैः करैरिव ॥१२६॥

ससम्भ्रमेति[1] । तत्सरः कर्तृ तं नृपं [2]पतङ्ग पतगस्य हंसस्य ग्रहात् न्यवारयत् । कैः? । ऊर्मिभिर्लोलैः वारिरुहैः । उत्प्रेक्षते - करैरिव[3] । किं कृत्वा? । उद्गतं कं पानीयं यस्य तद् उत्कम् । उत्कस्य भाव उत्कता, तया अनुकम्प्रतां सकम्पत्वं प्रपद्य[4] । किंभूतम्? । ससम्भ्रमं यथा भवति [5]त्वम् उत्पाति उत्पतनशीलं यत् पतत्तां पक्षिणां कुलं तेनाकुलम् । अथ उत्कतया उत्कण्ठितत्वेन[6] अनुकम्प्रतां दयालुत्वं प्राप्य, ससम्भ्रमं कोलाहल[7]पूर्वं चलैः[8] करैरकृत्यकारी निषिध्यते[9] । अत्रोपमासमासोक्ती ॥१२६॥

पतत्रिणा तद्रुचिरेण वञ्चितं श्रियः प्रयान्त्याः प्रविहाय पल्वलम् ।
चलत्पदाम्भोरुहनूपुरोपमा चुकूज कूले कलहंसमण्डली ॥१२७॥

पतत्रिणेति[1] । कूले तटे कलहंसानां[2] मण्डली चुकूज । किंभूता? । [तं]त् पल्वलं प्रविहाय[3] प्रयान्त्याः श्रियो लक्ष्म्याः चलतः पदाम्भोरुहस्य यन्नूपुरं तस्य उपमा यस्याः सा तथा । उत्प्रेक्षते[4] - लक्ष्म्या नूपुरध्वनिरिव । कथं लक्ष्मीः सरस्त्यजती[5]त्याह - किंभूतं सरः? । रुचि(१४१)रेण पतत्रिणा वञ्चितं रहितम् । अत्रा[6]ऽनुप्रास~~...~~[7] उपमा समासो- क्तिश्च ॥१२७॥

1 P. ससं । 2 P. add. नलं 3 P. add. उपमा वा करैरिव 4 P. प्रतिपद्य 5 P. om. त्वं 6 P. उन्मनस्त्वेन 7 P.P2 पूर्वकं 8 B चलैः 9 B निषिध्यते; 10 P. add. उत्क उन्मना । येनान्तर्जलचारिभिर्जलचरैरप्युत्कमुत्कूजित( )मिति । अत्र धर्ममात्रेऽपि प्रयोगो दृश्यते । सोत्कण्ठश्चान्यत्र । अनुप्रासोत्प्रेक्षोपमाः समासोक्तिश्च ॥१२६॥ ‖ 1 B पतत्रिणेत्यादि । P. पतत्रि । 2 B कलहंसीनां 3 P. विहाय 4 P. om. उत्प्रेक्षते 5 P. सरो विहाय निर्गच्छतीत्याह 6 P. om. अत्र; P2 om. अत्रानुप्रास--समासोक्तिश्च । 7 B P. ऽनुप्रासोपमा

श/ न वासयोग्या वसुधेयमीदृशस्त्वमङ्ग ! यस्याः पतिरुज्झितस्थितिः ।
इति प्रहाय क्षितिमाश्रिता नभः खगास्तमाचुक्रुशुरारवैः खलु ॥१२८॥

न वासयोग्येति[1] । खलु इति मन्ये । खगाः जलपक्षिणः[2] आरवैः
व/ स्तं नलम् आचुक्रुशुरिति[3] किम्भूताः ?। इति कारणात् क्षितिं प्रहाय नभः
आश्रिताः । जातिस्वभावात् । इतीति[4] किम् ?। अङ्ग इति सम्बोधने । इयं वसुधा
न वासयोग्या । यस्याः त्वमीदृशः उज्झिता स्थितिर्मर्यादा[5] येन [स] तथा-
विधः पतिः पालयिता ।[6] उत्प्रेक्षालङ्कारः ॥१२८॥

न जातरूपच्छदजातरूपता द्विजस्य दृष्टेयमिति स्तुवन्मुहुः[1] ।
अवादि तेनाथ स मानसौकसा जनाधिनाथः करपञ्जरस्पृशा ॥१२९॥

न जातरूपेति[2] । अथ तेन[3] मानसौकसा हंसेन सः जनाधिनाथः[4]
अवादि । किम्भूतेन ?। करपञ्जरं[5] स्पृशतीति तेन तथा । किं कुर्वन् ?। इति मुहुः
स्तुवन् । इतीति[6] किम् ?। द्विजस्य पक्षिणो जातरूपस्य सुवर्णस्य छदैः
पक्षैः जातं रूपं यस्य स तथा तस्य भावस्तत्ता । इयं क्वापि न दृष्टा[7] ॥१२९॥

धिगस्तु तृष्णातरलं भवन्मनः समीक्ष्य पक्षान्मम हेमजन्मनः ।
तवार्णवस्येव तुषारशीकरैर्भवेदमीभिः कमलोदयः कियान् ॥१३०॥

धिगस्तु[1] इति । हे राजन् ! भवतो मनः मम हेमजन्मनः पक्षान्

1 P1 न वास । 2 P1 पक्षिणः 3 P1 इति किम् ? 4 P1 add. ~~[illegible]~~ येन 5 P1 ~~[illegible]~~
जातिः पर्यायः उत्प्रेक्षा च ॥ P2 om. उत्प्रेक्षालङ्कारः ॥१२८॥ 1 P1 [illegible] मुहुः 2 P1
न जात । 3 P2 om. तेन 4 B जनाधिपः 5 B करपङ्कजं; P1 करमेव पञ्जरं
6 P1 इति किम् ? 7 P1 add. अनुप्रासो रूपकं च ॥१२९॥ 1 P1 धिग । P2 धिगस्तु
तृष्णेति ।

मन्नीडिय तृष्णातरलं धिगस्तु निन्द्यमस्तु। यतस्तावद्भिर्मीभिः सौवर्णपक्षैः कियान् कमलाया उदयो भवेत्। अथार्णवस्य तुषारस्य[2] नीहारस्य शीकरैर्बिन्दुभिः[3] कियान्[4] कमलस्य पानीयस्य[5] उदयो वृद्धिर्भवेत्[6][7]। अपि तु न कोऽपीत्यर्थः।[8] उपमालङ्कारः[9]॥१२०॥

न केवलं प्राणिवधो वधो मम त्वदीक्षणाद्विश्वसितान्तरात्मनः।
विगर्हितं धर्मधनैर्निबर्हणं विशिष्य विश्वासजुषां द्विषामपि॥१२१॥

न केवलमिति[1]। हे नल! मम[2] वधः [नो] केवलं प्राणिमात्रवधः, किन्तु विश्वस्तवधः। किम्भूतस्य[3]? त्वदीक्षणात् विश्वसितः अन्तरात्मा यस्य तस्य[4] तथा। यतो धर्मधनैः स्मृतिकारैर्विश्वासजुषां द्विषामपि शत्रूणामपि निर्बर्हणं[5] हिंसनं विशिष्य विशेषेण[6] विगर्हितं निन्दितम्। गुरुप्रायश्चित्तप्रतिपादनात्[7]। अत्र विदर्भानुप्रासः। काव्यलिङ्गालङ्कारः॥१२१॥

पदे पदे सन्ति भटा रणोद्भटा न तेषु हिंसारस एष पूर्यते।
धिगीदृशं ते नृपते! कुविक्रमं कृपाश्रये यः कृपणे पतत्त्रिणि॥१२२॥

पदे पदे इति[1]। रणेषु उद्भटा उत्कटा भटा योधाः[2] पदे पदे स्थाने स्थाने सन्ति तेषु विषये[3] एष हिंसारसो न पूर्यते। हे नृपते! ते तव ईदृशं कुविक्रमं धिक्, यः कृपायां दयायां आश्रये कृपणे दीने

---

2 P₁ तुषारनीहार° 3 P₁ बहुभिः 4 P₁ om. कियान् 5 P₁ जलस्य 6 P₂ om. वृद्धि. 7 P₁ भवति 8 P₁P₂ om. अपि तु 9 P₁ उपमा। कमलोदय इति श्लेषः॥ P₂ om. उपमालङ्कारः॥१२०॥ 1 P₁ न के। 2 P₂ add. मे 3 P₁ किम्भूतः 4 B P₁ स तथा 5 P₂ निर्बर्हणं 6 B P₂ विगर्हितं विशेषेण 7 P₁ अनुप्रासोऽर्थान्तरन्यासश्च॥ P₂ om. अत्र... ...मलङ्कारः॥१२१॥ 1 P₁ पदे पदे। 2 P₁P₂ om. योधाः 3 P₂ विषयेषु

[4]पतत्रिणि विक्रमः[5] ॥१३२॥

---

फलेन मूलेन च वारिभूरुहां मुनेरिवेत्थं मम यस्य वृत्तयः।
त्वयाद्य तस्मिन्नपि दण्डधारिणा कथं न पत्या धरणी हृणीयते ॥१३३॥

---

[1]फलेनेति। यस्य मम मुनेरिव वारिभूरुहां कमलिनीप्रभृतीनां/भू फलेन मूलेन च [2]इत्थं ईदृक्प्रकारेण वृत्तयः जीविका तस्मिन्नपि मयि दण्डधारिणा हिंसापरेण त्वया पत्या [अद्य][3] धरणी[4] पृथ्वी कथं न या/ हृणीयते, न लज्जते, आत्मानं न[5] जुगुप्सते[6] ॥१३३॥

---

इतीदृशैस्तं विरचय्य वाङ्मयैः सचित्रवैलक्ष्यकृपं नृपं खगः।
दयासमुद्रे स तदाशयेऽतिथीचकार कारुण्यरसापगा गिरः ॥१३४॥

---

इतीदृशै[1]रिति। स खगो हंसः दयासमुद्रे तस्य नलस्याऽऽशये हृदये गिरो वाणीः अतिथीचकार[2]। किंभूताः? कारुण्यरसस्य आपगा नदीः। किं कृत्वा? तं नृपं सह चित्रेणाश्चर्येण वैलक्ष्येण कृपया[3] च वर्तते यस्तथाविधं विरचय्य। कैः? इति प्रकारेण ईदृशैः पूर्वोक्तैर्वाङ्मयैर्वाग्विलासैः। मनुष्यवाक्त्वात् चित्रम्। निन्दितत्वात् वैलक्ष्यम्। दैन्योक्तेश्च कृपा। आपगाश्च समुद्रस्याऽतिथीभवन्ति[4] ॥१३४॥

---

4 B पतत्रिणि 5 P1 add. अनुप्रासः ॥१३२॥ 1 P1 फलेन। P2 फलेन मूलेनेति। 2 P2 add. अथवा वारिरुहां फलेन भूरुहां मूलेन च 3 edn. add. अद्य 4 P1, P2 धरिणी 5 B om. न 6 P1 add. हृणीङ् (२।३४) कण्ड्वादिः घृणार्थो, कण्ड्वादिभ्यो यक् (पा. III.i.27) इति यक्। अनुप्रास उपमा यथासंख्यमपि ॥१३३॥ 1 P1 इती। 2 P1 add. कृतवान् 3 P2 च कृपया 4 P1 add. अनुप्रासो रूपकं च ॥१३४॥

मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी ।
न्व/ गतिस्तयोरेष जनस्तमर्दयन्नहो विधे! त्वां करुणा रुणद्धि न ॥१३५॥

[1]मदेकेति । मम जननी माता जरया आतुरा वृद्धा । तथाऽहम् एकपुत्रो यस्या[2]: सा तथा । मम वरटा हंसीभार्या तपस्विनी अनुकम्प्या नवप्रसूतिर्वर्तते[3] । तयोरुभयोरपि मातृभार्ययोरेष मल्लक्षणो जनः अहमेव गतिः शरणं तं माम् एवंविधम् अर्दयन् पीडयन् हे विधे ! हे देव ! त्वां करुणा दया न रुणद्धि । [4]वर्तमाने शतृङनप्रथमैकाधिकरणामन्त्रितयोः (का० IV·iv·2) रित्यामन्त्रिते शतृङ् प्रत्ययः । तथा[5] अप्रथमा समानाधिकरणे इति [प्र]तिषिद्धोऽपि, सम्बोधने च (पा० III·iii·47) ति सूत्रेण अर्दयन्निति शतृप्रत्ययः[6]॥
॥१३५॥

मुहूर्तमात्रं भवनिन्दया दयासखाः सखायः स्रवदश्रवो मम ।
निवृत्तिमेष्यन्ति परं दुरुत्तरस्त्वयैव मातः! सुतशोकसागरः ॥१३६॥

[1]मुहूर्तमात्रमिति । हे मातः ! परं केवलं (१९)वलं सुतस्य शोकसागरः त्वयैव दुरुत्तरः उत्तरितुमशक्यः[2] । यतो मम सखायः निवृत्तिमेष्यन्ति स्वस्थाने यास्यन्ति । किंभूताः ? । मुहूर्तमात्रं भवस्य संसारस्य निन्दया उपलक्षिताः 'संसारो असार इत्यादिकया । तथा दयासखाः[3] मत्रि दयापराः । तथा स्रवन्ति अश्रूणि येषां ते [तथा । स्रवदश्रवः[4] रोदनपराः[5]॥
॥१३६॥

1 P₁ मदे । P₂ मदेकपुत्रेति 2 P₁ अस्याः 3 P₁ add. ध्रियते इति वरटा । स्त्रीविषयत्वात् जाते(तौ) ङीप् नास्ति । 4 P₂ om. वर्तमाने .... शतृङ्प्रत्ययः । 5 P₂ अथ 6 B P₁ शतृङ्° 7 P₁ add. अन्यस्तु गतिस्तयोरेष इति वाक्यच्छेदं कृत्वा जनो मल्लक्षणस्तमर्दयन् वर्तते इति व्याचष्टे । परिकरोऽनुप्रासश्च ॥१३५॥ 1 P₁ मुहूर्त । 2 P₁ add. न लोकाव्यये (पा० II·iii·69) त्यादिना कर्तरि षष्ठीप्रतिषेधः । 3 P₁ मयि दयापराः दयासखाः 4 P₁ add. ते तथा 5 P₁ add. अनुप्रासो रूपकं च ॥१३६॥

मदर्थसन्देशमृणालमन्थरः प्रियः कियद्दूर इति त्वयोदिते ।
विलोकयन्त्या रुदतोऽथ पक्षिणः प्रिये! स कीदृग् भविता तव क्षणः ॥१३७॥

---

मदर्थेति[1]। हे प्रिये! स तव क्षणः ~~...~~ कालः कीदृक् भविता दारुणो भविष्यति। किंभूतायास्तव?। त्वया इति उदिते [पृष्टे] सति अथाऽनन्तरं[2] सर्वान् पक्षिणो रुदतो विलोकयन्त्याः सत्याः। इतीति[3] किम्?। मम प्रियो भर्ता कियति दूरे आगच्छति[4]। किंभूतः?। मदर्थं[5] सन्देशो अर्पणं येषां मृणालानां तैः मृणालैर्मन्थरः[6] भारेण मन्दगतिः[7] ॥१३७॥

---

कथं विधातर्मयि पाणिपङ्कजात् तव प्रियाशैत्यमृदुत्वशिल्पिनः ।
वियोक्ष्यसे वल्लभयेति निर्गता लिपिर्ललाटंतपनिष्ठुराक्षरा ॥१३८॥

---

कथं[1] विधातरिति। हे विधातः! हे विधे[2]! तव पाणिपङ्कजात् शीतलात् कोमलात् [मयि[3]] मम विषये इति ईदृशी लिपिरक्षरमाला कथं निर्गता[4]। किंभूता[5]?। ललाटंतपानि[6] निष्ठुराण्यक्षराणि यस्याः[7] सा तथा। इतीति[8] किम्?। हे हंस! त्वं स्वकीयया वल्लभया वियोक्ष्यसे वियोगम्[9] अवाप्स्यसि[10] किंभूतात्पाणेः?। मत्प्रियायाः[11] शैत्यस्य शीतत्वस्य[12] मृदुत्वस्य च शिल्पिनः स्रष्टुः। यादृग् गुणं कारणं तादृग् गुणं किल[13] कार्यं भवति।

---

1 B मदर्थमिति। P1 मदर्थ। 2 P1 add. वान् 3 B इति इति किम्?; P1 इति किम्? 4 B ग्रामं गच्छति 5 B समर्थं; P1 मदर्थः नवकालवर्पणं 6 P1 मृणालैः मदर्थं सन्देशेन आहृतानि वा मृणालानि तैर्मन्थरः। 7 P1 add. भावोदयोऽनुप्रासश्च॥१३७॥

1 P1 कथं। 2 P1, P2 om. हे 3 edn. add. मयि 4 [B निर्गता 5] P1 कथंभूता। 6 B तप्यति 7 P2 यस्या 8 B P1 इति किम्?। 9 B विरहं पश्यसि; P2 प्राप्स्यति। 10 P1 add. प्रोपाभ्यां युजे (पा० I.iii.64) रित्यत्र स्वराद्यन्तोपसृष्टात् इति वक्तव्यबलात्। अथवा कर्मकर्तरि आत्मनेपदम्। 11 P1 प्रियाः 12 P2 om. शीतत्वस्य 13 B किल

contd.

[14] शीतात् कोमलाच्च [15] रसात् कथं तापकारिणी कठोरा लिपिरुत्पन्ना ॥ [16] १३८॥

अयि ! स्वयूथ्यैरशनिक्षतोपमं ममाद्य वृत्तान्तमिमं वतोदिता [1] ।
मुखानि लोलाक्षि ! दिशामसंशयं दशापि शून्यानि विलोकयिष्यसि ॥ १३९॥

अयि स्वयू[2]थ्यैरिति । (१९६) अयि प्रिये ! हे लोलाक्षि [3] ! बत खेदे । त्वं स्वयूथ्यैर्मम यूथसहचरैः पक्षिभिः [4] मम इमं मरणलक्षणं वृत्तान्तं वार्ताम् उदिता [उक्ता] सती असंशयं दशापि दिशां [5] मुखानि शून्यानि विलोकयिष्यसि । किंभूतम् ? । अशनिक्षतस्य वज्रप्रहारस्य उपमा यस्य तं तथा । अनुप्रासः [6] ॥ १३९॥

ममैव शोकेन विदीर्णवक्षसा त्वयापि [1] चित्राङ्गि ! विपद्यते यदि ।
तदस्मि दैवेन हतोऽपि हा [2] हतः स्फुटं यतस्ते शिशवः परासवः ॥ १४०॥

ममैवेति [3] । हे चित्राङ्गि [4] ! त्वयापि यदि ममैव [5] शोकेन विपद्यते विपत्तिः [6] प्राप्यते । किंभूतया ? । विदीर्णं स्फुटितं वक्षो यस्याः तया तथा [7] । तत् तदा हा इति खेदे । अहं हतोऽपि दैवेन पुनरपि हतः । यतस्ते मम शिशवो बालपुत्राः [8] स्फुटं परासवः मृता एव तव [9] मरणे सति [10] ॥ १४०॥

before लाङ्गूलं 14 P. add. शैत्यमृदुत्वशालित्वेन 15 P. om. च 16 P. add. रूपकं विषमं च ॥ १३८॥ 1 P2 text °दीता 2 P. अयि 3 B P2 हे लोलाक्षि at the end. 4 B परिक्षिभिः 5 B दिशा° 6 P. add. उपमा च ॥ ~~१३९॥~~ P2 om. अनुप्रासः ॥ १३९॥
1 P2 text विचित्रा° 2 P2 text ex हा ही 3 P. ममैव । 4 P. add. विचित्राङ्गि । 5 B शोकेन एव 6 P2 विपत्तिं 8 P. बालकाः पुत्राः 9 P. तवापि 10 P. add. काव्यलिङ्गम् ॥ १४०॥

तवापि हा हा विरहात् क्षुधाकुला: कुलायकूलेषु विलुठ्य तेषु ते ।
ग/ चिरेण लब्धा बहुभिर्मनोरथैर्गता: क्षणेनाऽस्फुरितेक्षणा मम ॥१४१॥

तवापीति[1] । हा हा इति खेदे । हे[2] प्रिये ! मम ते बालकास्तवापि विरहात् क्षणेन गता गमिष्यन्ति । विनष्टा इत्यर्थः । भविष्यत्कालस्यापि अतीतविवक्षा, कुतो मरणस्य विवक्षितत्वात् । किं कृत्वा ? । तेषु कुलायकूलेषु विलुठ्य नीड[3]तटेषु लुठित्वा । किंभूता: ? । क्षुधा आकुला: । तथा जातमात्रत्वात् अस्फुरितानि अनुद्घटितानि ईक्षणानि लोचनानि येषां ते तथा । किंभूता: ? । चिरेण बहुभिर्मनोरथैः लब्धा: । कार्यकारणयो: पौर्वा[5]पर्यविपर्ययादतिशयोक्तिरलङ्कार:[6] ॥१४१॥

सुता: ! कमाहूय चिराय चूङ्कृतैर्विधाय कम्प्राणि मुखानि कं प्रति ।
कथासु शिष्यध्वमिति प्रमील्य स स्रुतस्य सेकाद् बुबुधे नृपाश्रुण: ॥१४२॥

सुता:[1] कमिति[2] । हे सुता: ! यूयं[3] चिराय चूङ्कृतै: चूङ्कारै: कम् आहूय आकार्य भक्ष्यं प्रार्थयिष्यथ[4] इति शेष: । अर्धोक्ते (२०१) एव गद्गदकण्ठत्वात् । तथा[5] हे सुता: ! कं प्रति कम्प्राणि[6] प्रसारितानि मुखानि विधाय नीडमुखात् संमुखा[7] भविष्यथ इति वाक्यशेष: । [8]अर्धोक्ते एव सन्नकण्ठत्वात् । अत्र न्यूने[9]पदं गुण: । यथा[10] — गाढा — लिङ्गनवामनीकृतकुचप्रोद्भूतरोमोद्गमा सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा" । मा मा मा नद मानि मामलमिति क्षामा —

1 P. तवापि॥ P2 तवापि हाहेति । 2 P. om. हे प्रिये । 3 B नीडतटेषु 4 B लक्षण° 5 BP. पूर्वा° 6 P. add. अनुप्रासो विरोधोऽपि ॥१४१॥ 1 P. सुता: । P2 सुता: कमाहूय इति । 2 B किमिति 3 P. कमाहूय here 4 B प्रार्थयिष्यत 5 P. om. तथा 6 P. कम्प्राणि मुखानि प्रसारितानि वदनानि 7 P2 संमुखानि 8 B P2 अर्धोक्ते ... °कण्ठत्वात् alt. न्यूनार्थे गुण: । 9 P. न्यूनपदं 10 P. add. अमरुक: ॥ B add.

ईषोल्लापिनी सुप्ता किं नु मृता नु[12] किं मनसि मे लीना विलीना नु किम् ॥(अमरु° ४०) अत्र स्पृश कदर्थय[13] इत्यर्थे न्यूनत्वे गुणः ।
द्वितीयवारं तस्मात्[14] पितृमातृविरहात् कथासु वार्तासु शिष्यधुर्यम् कथाशेषा भविष्यथ इत्युक्त्वा प्रतीत्य प्रकर्षं[15] मीलनं मोहं प्राप्य स[16] हंसः नलस्य क्षणमेव बुबुधे प्रबोधं प्राप। कस्मात्?। सुतस्य नयनतो गलितस्य नृपास्तुणः नलबाष्पस्य सेकात्[17] सेचनात्। हंसस्य[18] कृपणवचनेन दयालोर्नलस्य अश्रुपातेन[19] मोहापगमेनेत्यर्थः[20] ॥ ॥१४२॥

इत्थममुं विलपन्तममुञ्चद्दीनदयालुतयाऽवनिपालः ।
रूपमदर्शि धृतोऽसि यदर्थं गच्छ यथेच्छमथेत्यभिधाय ॥१४३॥

इत्थमिति[1]। अवनिपालो नलः इत्थं विलपन्तममुं हंसममुञ्चत्। कथा?। दीनेषु दयालुतया। किं कृत्वा?। [इ]त्यभिधाय। इतीति[2] किम्?। हे हंस! मया यदर्थं त्वं धृतोऽसि तत् रूपमदर्शि दृष्टम्। [अथ] त्वं यथेच्छं गच्छ[3] ॥१४३॥

आनन्दजाश्रुभिरनुस्रियमाणमार्गान्
प्राक्शोकनिर्गमितनेत्रपयःप्रवाहान् ।

contd. विसर्ग 12 P₁ गता 13 P₁P₂ इत्यादि 14 P₁ ततः 15 B प्रनष्टं 16 P₂ सहसा 17 B सकाशात् 18 P₁P₂ हंसकृपण° 19 P₁ °पातसेकेन 20 P₁ add. शिष्यधुर्यमिति पाठे क्रमाह्वय के प्रति कम्प्राणि मुखानि कृत्वा कथासु शिष्यधुर्यं चतुरा भविष्यथ इति व्याख्या। भावोदयोऽनुप्रासो जातिश्च। सर्वत्र वंशस्थं वृत्तम् ॥१४२॥
1 P₁ इत्थ। P₂ इत्थममुमिति 2 BP₁ इति किम्?। 3 P₁ add. इति।
दोधकवृत्तम्। अनुप्रासः काव्यलिङ्गं च ॥१४३॥

चक्रे स चक्रनिभचङ्क्रमणच्छलेन
नीराजनां जनयतां निजबान्धवानाम् ॥१४४॥

आनन्देति[1]। स हंसः निजबान्धवानां प्राक् पूर्वं शोकेन निर्मितान् नेत्रपयसाम् अश्रूणां प्रवाहान् आनन्दजैरश्रुभिः[2] अनुस्रियमाणमार्गान् अनुगम्यमानान् चक्रे। प्रथमं धृतत्वात्[3] शोकाश्रूणां[4] तदनु विमुक्तत्वात्[5] हर्षाश्रूणाम्[6]। किं कुर्वतां बान्धवानाम्? चक्रनिभं यच्चङ्क्रमणं परिमण्डलभ्रमणं तस्य छलेन नीराजनाम् आरात्रिकविधिं जनयताम्। पक्षिणः सर्वेऽपि मुक्तस्वजातीयस्य परितो[7] भ्रमन्ति। तत उत्प्रेक्षा[8]। आनन्दाङ्कता[9]। अत्रानुप्रासापह्नुति-जातीनां सङ्करः ॥१४४॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महा-
काव्ये चारुणि नैषधीयचरिते[1] सर्गोऽयमादिर्गतः ॥१४५॥

श्रीहर्षमिति[2]। यं[3] श्रीहर्षं नाम सुतं श्रीहीरनामा पिता मामल्लदेवी च माता सुषुवे। किंभूतः पिता? कविराजानां राजिः[5] श्रेणिः सैव मुकुटः तस्याऽलङ्कारार्थं हीरः माणिक्यभूतः। किंभूतं पुत्रम्?

1 P₁ आनन्दजा। P₂ आनन्दजाश्रुभिरिति। 2 P₂ ०रस्त्रैः; 3 B add. स्खलित० 4 B ०शोकाश्रूणि 5 P₁ add. अनवच्छिन्नमेव 6 P₁ add. प्रवाहान् 7 P₂ add. विमुक्तस्य 8 P₁ add. रुद्रटमतेन; P₂ om. आनन्दाङ्कता... सङ्करः। 9 P₁ add. वसन्ततिलका वृत्तम्। and read अनुप्रासो जातिरपह्नुतिश्च। मुम्मुटालकमतेन ॥१४४॥ 1 P₂ text. नैषधीय० 2 P₁ श्रीहर्षम् 3 P₂ contd.

सर्ग १ 88

जित इन्द्रियाणां चयो येन तस्य श्रीहर्षस्य चिन्तामणिमन्त्रस्य चिन्तनं यत् तस्य फले महाकाव्ये शृङ्गारभङ्ग्य। चारुणि वैरसेने[6]-नलस्य चरिते आनन्दाङ्के (यमादि: प्रथम: सर्गो [गत:][7] ॥१४५॥

---

श्रीमानाल्लिगपण्डित: स्वसमयाविर्भूतसर्वाश्रम-
श्राण्डुपण्डितसंस्तितं प्रसुषुवे श्रीगौरिदेवी च यम् ।
[1]तेन [2]श्रीरवटावट[3]ङ्कमहिते जातेन गोत्रे सता
टीका नैषधवर्णने विरचिता [4]सर्गे शुभा त्वादिजे ॥१॥

---

contd. श्रीहर्ष यं M P2 मणि: 5 P2 मणि° 6 P1 वैरसेनस्य 7 P1 add. शार्दूलविक्रीडितं वृत्तम् । अनुप्रास: ॥; P2 add. महाकाव्यत्वं चास्य सर्गसम्बन्धादि-लक्षणयोगात् । तथा हि प्रथमश्लोके वस्तुनिर्देश: कृत: । सर्गनिबन्धोऽपि विद्यते । प्रथमसर्गे स्फुरद्(9)त्यादिना सङ्ग्रामवर्णनं, फलानि पुष्पाणी(77)त्यादिना वनवर्णनं सूचितम् । [व्यतर्कि] सर्वर्तुघने वने(105) इत्यनेन ऋतुवर्णनसूचनम् । अथ स्वभावाधे (107)त्यादिना (ब्धिवर्णन-सूचनम् । द्वितीयसर्गे नगरवर्णनं दूतप्रयाणं च कथितम् । षष्ठ(से) ~~नवम~~ चतुर्थनवमसर्गेषु विप्रलम्भवर्णनम् । षोडशे विवाह: । अष्टादशे नैकान्त-वर्णनं सूचितं मधुपानरतोत्सववर्णनं च कृतम् । एकोनविंशे सूर्योदय-वर्णनम् । विंशे वनकेलौ स्मराश्वत्थदल(१७)मित्यनेन वनक्रीडा सूचिता । एकविंशे देवतास्तुति: । द्वाविंशे चन्द्रोदयवर्णनम् । नायकोदयस्तु समस्तेनापि । सलिलक्रीडाद्यवर्णनेऽपि महाकाव्यत्वभङ्गप्रसङ्ग: - न्यूनमप्यत्र यै: कैश्चिदङ्गै: काव्यं न दुष्यती (काव्यादर्श: I. 20 ab.)त्युक्तत्वात् । नैषध-सम्बन्धि नैषधीयम् । वृद्धाच्छ: (पा° IV.ii.14) ॥१४५॥

1 P2 cd. आचार्यान्मुनिदेवसूरिविबुधत: श्रुत्वा पुरा नैषधं
टीकां स प्रथमे नलीयचरिते सर्गो ततो निर्ममे ॥ 2 B top mg.— " पंक्ति 6 श्लोक: अर्द्धगलितोऽस्ति, though complete. 3 B वटङ्क° 4 P1 पूर्वत्र सर्गे शुभा ॥ शार्दूलविक्रीडितम् ॥

सर्ग १ 89

ह/ [किमपि मुकुरत्नं नागरश्रोत्रियाणां प्रतिनिधिरिव तेजःसद्मनः पद्मयोनेः।
विधुरुपशमसि[5]न्धोरा<u>ल्लिगो</u> नाम धीमानिह समजनि पत्नी <u>गौरिदेवी</u>ति[6]
चास्य[7]॥२॥
न/ कृत्वेव चन्दनविलेपमहीनभांसि
यैर्निर्मितानि दिगुपान्तमहीनभांसि।
एतद्यशांसि सुरमानवमानितानि
को न स्तुते नवसुधानवमानितानि ॥२॥
तदात्मजस्<u>त्वाल्हण</u>नामधेयो विशारदः शारदचन्द्रकीर्तिः।
महाक्रतौ ज्योतिषि कर्मकाण्डे क्रमाच्चतुःसंस्थतया प्रयोक्ता ॥४॥
सम्राट्स्थपत्यग्निचिदग्रजन्मा ऽग्रगण्यचाण्डूविदुषोऽनुजन्मा।
श्रौतविधबृद्धार्चितसर्वदेवबुधाग्रजन्मा महनीयजन्मा ॥५॥
श्रीवैद्यनाथाभिधसूक्तदेवीपदप्रसादोपचितप्रसा[8]दैः।
[9]पदैरुदाराकृतिभिः प्रक्लृप्तां क्वचित् क्वचिच्छोधयति स्म टीकाम् ॥६॥

---

[10]इति [11]नैषधदीपिकायां[हंसगमनो नाम] प्रथमः सर्गः॥

---

5 P₁ सिधा 6 P₂ om. इति 7 P₁ verse nos 1–5 8 P₁ प्रसादा 9 P₁ inst.
म्लेच्छोपलिङ्गाकुलितप्रतीकां टीकामिमां पूरयति स्म सम्यक् ॥५॥
10 P₁ add. इति धवल्लक्कवास्तव्य–नागरश्रोत्रियावतंस–पण्डित–
श्रीवैद्यनाथशिष्य–ऋग्भाष्यकृत्–लक्षहोमचतुष्टयकृत्–सम्राट्–
स्थपति–सोमसंस्थायाजि–द्वादशाहाग्निविरचि(चि)द्–दीक्षित–श्री–
चाण्डूविरचितायां नैषधदीपिकायां टीकायां हंसगमनो नाम प्रथमः
सर्गः॥छ॥छ॥छ॥ 11 P₂ श्रीनैषध०

सर्ग २ 1

[पूर्वसर्गे नलस्य वर्णनपुरःसरं दमयन्त्याः समा-
वर्णनं राज्ञोऽपि तद्गुणश्रवणारणरणकजनितपूर्वकम् उपवनतडाग-
वर्णनं च कृत्वा हंसदर्शनग्रहणलञ्चननिरूपणमोचनान्यभिधाय
इदानीं प्रत्युपकर्तुं हंसस्य भैमीवर्णनपूर्वं गमनद्वारेण नगरीं
विवर्णयिषुः कविर्द्वितीयं सर्गमारभते ॥]

अधिगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्ततः।
वचसामपि गोचरो न यः स तमानन्दमविन्दत द्विजः॥१॥

अधिगत्येति। अथ स द्विजो हंसः तमानन्दमविन्दत
य आनन्दः वचसामपि न गोचरः अविषयः। किं कृत्वा?। ततस्तस्मात् पुरुषोत्तमान्नलात् मुक्तिं मोचनमधिगत्य प्राप्य। किंभूतात्?। जगत्या अधीश्वरात्। अथ च स द्विजो ब्राह्मणः ब्रह्मनिष्ठः कश्चित् तमानन्दमविन्दत यो वचसामपि न गोचरः। अपिशब्दान्मनसोऽप्यविषयः। तथा च श्रुतिः- यतो वाचो निवर्तन्ते अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन॥ (तै. उ. II. 4)॥ किं कृत्वा?। पुरुषोत्तमाद् अधिकाधीश्वरात् (रा व) मुक्तिं बन्धात् संसारात् मोक्षमधिगत्य। ननु मुक्तिं

1 °श्रवणजनितरणकपूर्वम् 2 P1 °उपवर्णनं 3 P1 add. °काञ्चन°
1 P1 अधिगत्येत्यादि। 2 P1 om. नलात् 3 P2 विमोचनम् 4 B मनसा°
5 P1 add. पुरुषेषु उत्तमाद् 6 BP2 मुक्तिः 7 P2 मुक्तिं बन्धात् 8 P1 om.
ननु ——— contd.

सर्ग २ 2

प्राप्य आनन्दम् [अ]विन्दतेति कथं घटते, यतो मुक्तिरेवाऽऽनन्दः॥ सत्यम्। यदि स[9] ईश्वरात् मुक्तिमविन्दतेत्युच्यते, तदा आत्यन्तिकी दुःखनिवृत्तिर्मोक्ष इति तार्किकाणां मोक्षः[10] शेषगुणोच्छेदो मोक्षः स्यात्। वेदान्तसिद्धान्ते तु दुःखोच्छेदपुरःसरं[11] निरतिशयानन्दप्राप्तिर्मोक्ष इति। तदर्थं मुक्तिं प्राप्याऽऽनन्दमविन्दत आनन्द~~स्वं~~ [स्व]रूपं लब्धवानित्यर्थः। लौकिकदृष्ट्या इदमुक्तं यद् आनन्दमविन्दत परमार्थ[तो]स्त्वानन्द एव जातः[12] ॥१॥

अधुनीत खगः स नैकधा तनुमुत्फुल्लतनूरुहीकृताम्।
करयन्त्रणदन्तुरान्तरे व्यलिखच्चञ्चुपुटेन[1] पक्षती ॥२॥

अधुनीत[2] इति। स खगो हंसः तनुं शरीरं नैकधा अनेकधा अधुनीत। किंभूताम्?। उत्फुल्लानि तनूरुहाणि रोमाणि यस्याः तां तथाविधीकृताम्[3]। [तथा] पक्षती चञ्चुपुटेन व्यलिखत् समीचकार[4]। किंभूते?। करयन्त्रणेन[5] हस्तग्रहणेन दन्तुरं विषमम्[6] अन्तरं ययोः[7] ते तथा। दन्त उन्नत उरच् (पा० V.ii.66)[8] [इति उरच्]। स्वभावोक्तिः[9] ॥२॥

अयमेकतमेन पक्षतेरधिमध्योर्ध्वगजङ्घमङ्घ्रिणा।
स्खलनक्षण एव शिश्रिये द्रुतकण्डूयितमौलिरालयम् ॥३॥

9. P2 ईश्वरात् स 10 B तविशेष० 11 P1 add. नित्य० 12 P1 add. इत्यर्थः। वैतालीयं वृत्तम्। अनुप्रासः श्लेषश्च॥१॥ 1 P2 ~~read~~ चञ्चूपटेन 2 P1 अधु। P2 अधुनीत खग इति। 3 B तविधीयतां; P2 तविधाकृतां 4 P1P2 om. समीचकार 5 B कार० 6 P1 विषमोन्नतं; P2 विततम् 7 B यस्याः; 8 P1 ~~इति उरच्~~ उन्नत उ इति 9 and add. अनुप्रासः समासोक्तिश्च ॥२॥ 9 P1P2 om. स्वभावोक्तिः

सर्ग २ 1 3

अयमेकेति। अयं हंसः स्खलनक्षण एव मोचनकाल एव आलयं नीडं शिश्रिये। किंभूतः?। एकतमेन अङ्घ्रिणा द्रुतं कण्डूयितो[2] मौलिर्मस्तकं येन स तथा। कथम्?। यथा भवति। पक्षतेर्मध्यम् अधि लक्षीकृत्य पक्षमध्येन[3] स्थिता। ऊर्ध्वगा जङ्घा यत्र कण्डूयते तत्तथा। अथवा यदेकेन[4] चरणेन द्रुतकण्डूयितमौलिः[5] जातः, तदेकेनैव चरणेन भूमौ स्थितत्वात् स्खलितः[6]। तलस्थ स्खलनक्षण एव खगत्वात्[7] पतनक्षण एव आलयमाकाशं ~~शिश्रिये~~ / शिश्रिये उड्डीन इत्यर्थः। पक्षिणामयं जातिस्वभावो वर्णितः॥३॥

स गुरुद्रुमदुर्गदुर्ग्रहान् कटु कीटान् दशतः सतः क्वचित्।
नुनुदे तनुकण्डुपण्डितः पटुचञ्चूपुटकोटिकुट्टनैः॥४॥

स गुरुद्रुमेति[1]। स हंसः क्वचि(2.6)त् कटु तीव्रं यथा भवति ~~कीटान्~~ दशतः सतः [कीटान्] दंशमशकादीन्[2] नुनुदे प्रेरयामास। कैः?। पटुनश्चञ्चूपुटस्य या कोटिरग्रं तस्याः कुट्टनैः। [किं]भूतः?। तन्वाः शरीरस्य कण्डुः कण्डूयनं तत्र पण्डितो दक्षः। किंभूता[न्] कीटान्?। गरुतां पक्षाणां[3] वनमेव दुर्गस्तत्र[4] दुर्ग्रहान्[5]॥४॥

अयमेत्य तडागनीडजैर्लघु पर्यव्रियताथ शङ्कितैः।
उदडीयत वैकृतात्करग्रहजादस्य विकस्वरस्वरैः॥५॥

1 P1 अयमेकतमेन। P2 अयमेकतमेनेति। 2 B कण्डूयमा; P1 कण्डूयितं 3 P1 पक्षति॰ 4 P1 एकतमेन 5 P1 द्रुतं 6 P2 स्खलिताः 7 P2 खगत्वात्

§ 1 P1 सग। P2 स गुरुद्रुमदुर्गेति। 2 P2 पतङ्गान् दंशकादीन् 3 P1 पक्षानां 4 P2 दुर्गं 5 P1 add- अन्योऽपि काननदुर्गेण जलदुर्गेण वा दुर्ग्रहान्। अतिशयेनोपद्रवं कुर्वतो दुष्टान् कुट्टनैर्मारणैर्नुदति। अनुप्रासः ~~स्वभावोक्ती रूपकं समासोक्तिश्च॥४॥~~

सर्ग २ 4

अयमेत्येति[1]। अयं हंसः प्रथमं तडागस्य नीडजैः पक्षिभिरेत्य आगत्य लघु शीघ्रं पर्यव्रियत। अथ तैः करग्रहात् जातात् वैकृतात्[2] शरीरविकारात्[3] शङ्कितैः सद्भिः उदडीयत। किंभूतैः?। विकस्वराः स्वराः येषां तैः[4] तथा[5]॥५॥

वहतो बहु शैवलक्ष्मतां धृततुङ्गाक्षमधुव्रतं खगः।
स नलस्य ययौ[1] करं पुनः सरसः कोकनदभ्रमादिव ॥६॥

वहत[2] इति। स खगो हंसः पुनरपि नलस्य करं हस्तं ययौ। उत्प्रेक्षते– सरसः सरोवरस्य[3] कोकनदस्य रक्तोत्पलस्य भ्रमादिव[4]। किंभूतस्य सरसः?। बहुशैवला क्ष्मा[5] पृथिवी यत्र तस्य भावस्तत्ता तां वहतः। किंभूतं करम्?। धृता तुङ्गाक्षा एव मधुव्रता येन तं तथा।[6] नलोऽपि बहूनि शैवानि शिवभक्तस्य लक्ष्माणि चिह्नानि भस्मपुण्ड्रादिकानि यस्य भावस्तत्ता तां वहति[7]। कोकनदं[8] तु धृतमधु[9]व्रतम्[10]॥६॥

पतगाश्चिरकाललालनादतिविस्र[1]म्भमवापितो नु सः।
अतुलं विदधे कुतूहलं भुजमेतस्य भजन्महीभुजः[2] ॥७॥

1 P. अथ। 2 P. विकारात् वैकृतात् शङ्कितैः 3 B add. जात० 4 P. ते 5 P. add. अनुप्रासो जातिश्च ॥५॥ 1 P2 text करं ययौ 2 P. वह।; P2 वहतो बहुशैवलेति। 3 P. add. कोकनदभ्रमादिव 4 P. किंभूतस्य नलस्य?। बहूनि शैवस्य शिवभक्तस्य लक्षणानि चिह्नानि यस्य तस्य भावस्तत्ता तां वहतः बिभ्रतः। 5 BP. क्ष्मा 6 P. add. सरसोऽपि बहु शैवलक्ष्मा पृथ्वी यत्र तस्य भावः तत्ता तां वहति। 7 P. वहतः 8 P. add. अपि 9 P2 ०व्रतः 10 P. add. श्लेषो भ्रान्तिमान् रूपकमुत्प्रेक्षा च ॥६॥
1 P2 text ०विस्रंस० 2 P2 text ०पतेः — contd.

सर्ग २ 5

पतग[3] इति। स पतत्रः पक्षी भुजं भजन् सन् एतस्य[4] महीभुजः नलस्य[5] अतुलं कुतूहलं विदधे। नु इति वितर्के। चिरकाललालनात् अतिशयेन विश्रम्भं विश्वासम् [अवापितः][6] प्रापित इव[7]। अत्रानुप्रासः[8]॥७॥

म/ नृपमानसमिष्टमानसः स निमज्जत्कुतुकामृतोर्मिषु।
अवलम्बितकर्णशष्कुलीकलसीकं रचयन्नवोचत ॥८॥

नृपमानसम्[1] [इ]ति। इष्टं मानसं सरो यस्य स हंसः[2] अवोचत। किं कुर्वन्? नृपस्य मानसं मनः अवलम्बिते विधृते कर्णशष्कुल्यौ एव कलस्यौ[3] येन तत्तथाविधं रचयन्। इन्द्रियान्तरपरित्यागेन कर्णदेशे अवहितं मनो जातम्[4]। किं कुर्वन्मनः? कुतुकं[5] कौतुकं तदेव अमृतं तस्योर्मिषु निमज्जत्। यः कश्चित् तरणायो[6]र्मिषु निमज्जति स कलशद्वयं[7] गृह्णाति[8]। अथ च इष्टमानसं नलमनो यस्य। यः किल एवंभूतः स कथं मानसं ब्रुडन् मुञ्चति। यः किल ब्रुडति स तरणार्थं धरावलम्बनं कुरुते। अवलम्बिते कर्णकुपिके एव कलसी ब्रुडकुम्भौ येन। इष्टमानसत्वात्।
स्य/ ऊर्मिषु[9] मज्जतो मानसस्य कलश्य[10]वलम्बनं हेतुत्वयुक्तम्[11]॥८॥

3 P. पतगः। P2 पतगश्चिरेति। 4 P. तस्य 5 P.P2 om. नलस्य 6 edr. add. अवापितः 7 P. add. अन्यस्तु चिरकाललालनादित्यवापितेन इति /पा पाठे व्याचष्टे चिरं रक्षणात् तेन नलेन पतत्रः अतिविश्रम्भमवापितेन कारणेन स कुतूहलं विदधे चक्रे इति। अनुप्रास उत्प्रेक्षा च 8 P.P2 om. अत्रानुप्रासः॥ 1 P. नृप। 2 P2 om. विसर्ग 3 P2 कलसौ 4 P. add. इत्यर्थः 5 P. कुतकं 6 P. अन्योऽपि ऊर्मिषु; P2 कश्चिदूर्मिषु मज्जति 7 P. add. तरणार्थं 8 P.P2 add. तरणार्थं 9 P.P2 om. अथ च ... कुम्भौ येन 10 P. निमज्जतो 11 P. कलसावº 12 P. add. अनुप्रासो रूपकं च॥८॥

सर्ग २ 6

मृगया न विगीयते नृपैरपि धर्मागममर्मपारगैः।
स्मरसुन्दर! मां यदत्यजस्तव धर्मः स दयोदयोज्ज्वलः॥९॥

मृगया[1] नेति। नृपैर्धर्मागमो धर्मशास्त्रं स्मृतिः[2] तस्य मर्म[3] रहस्यं तत्र पारगैरपि मृगया आखेटकं न विगीयते[4] [न निन्द्यते]। हे स्मरसुन्दर! यन्मां त्वम्[5] अत्यजः स तव धर्मो दयाया[6] उदयेनोज्ज्वलः। काव्यलिङ्गम्[7] ॥९॥

अबलस्वकुलाशिनो झषान्निजनीडद्रुमपीडिनः खगान्।
अनवद्यतृणार्दिनो मृगान् मृगयाऽघाय न भूभृतां घ्नताम्॥१०॥

अबलेति[1]। भूभृतां राज्ञां झषान् मत्स्यान् घ्नतां मृगया अघाय[2] पापाय न भवति। कथंभूतान्? अबलं स्वं निजं कुलम् अश्नन्तीत्येवंशीलान्। अबली[3] बलिभिर्भक्ष्यन्त इति मात्स्यो न्यायः।[4] तथा राज्ञां निजं नीडद्रुमं सर्वप्रकारैः[5] पीडयन्तीत्येवंशीलान् खगान्[6] पक्षिणो घ्नतां [मृगया अघाय[7] न]। तथा अनवद्यानीति[8] तद्विरुद्धं /न नत्र। प्रशस्यानि तृणान्यर्दयन्तीत्येवंशीलान् मृगान् घ्नताम्। यतो[9] राज्ञा अन्यायिनो दण्ड्याः॥१०॥

1 P₁ मृग। 2 P₁ मन्वादिस्मृतिः तत्र 3 B धर्म 4 B विशीयते 5 P₁P₂ त्वं माम् 6 P₁ add. एव 7 P₁P₂ om. काव्यलिङ्गम्; P₁ add. अनुप्रासो विरोधः उपमा हेतुश्च ॥९॥

1 P₁ अबल।; P₂ अबलस्वेति। 2 P₁ add. पापाई; 3 P₁P₂ बलिभिः— दुर्बला 4 B मत्स्योऽन्यो न्यायः।; P₂ मत्स्यो न्यायः। 5 P₁ om. सर्वप्रकारैः 6 B स्वभावान् 7 P₂ न पापाय 8 P₂ अनवद्यानि तृणानि अर्दयन्ती० 9 P₁P₂ om. यतो.....दण्ड्याः।; P₁ add. अनुप्रासः काव्यलिङ्गं दीपकम्॥१०॥

सर्ग २ 7

यदवादिषमप्रियं तव प्रियमाधाय नुनुत्सुरस्मि तत् ।
कृतमातपसंज्वरं तरोरभिवृष्यामृतमंशुमानिव ॥११॥

यदवादिषमिति[1] । यदहं तवाऽप्रियमवादिषं तत्[2] प्रियमाधाय नुनुत्सुरस्मि[3] अपनेष्यामि । क इव ? । अंशुमानिव । यथा श्रीसूर्यः तरोर्वृक्षस्य[4] कृतम् आतपसंज्वरं तापममृतम्[5] अभिवृष्य नुदति । अत्र[6] बिम्बप्रतिबिम्बभावेन दृष्टान्तोत्प्रेक्षोपमालङ्कारः ॥११॥

उपनम्रमयाचितं हितं परिहर्तुं न तवापि साम्प्रतम् ।
करकल्पजनान्तराद्विधेः शुचिनः प्रापि स हि प्रतिग्रहः ॥१२॥

उपनम्रमिति[1] । हे राजन् ! तवाप्ययाचितं हितं[2] रुचिरं उपनम्रं स्वयं[3] ढौकितं श्रियं परिहर्तुं न साम्प्रतं न युक्तम् । हि यस्मात् स प्रतिग्रहः विधेर्दैवात्[4] प्रापि प्राप्तः । किंभूतात् ? । शुचिनः[5] पवित्रात्[6] । तथा (२२b) करकल्पं विधिहस्ततुल्यं जनान्तरं मल्लक्षणं यस्य तस्मात्[7] तथा । अहं ब्रह्मणो हस्ततुल्यः । मया यद्दत्तं तद्विधिनैव दत्तम्[8] । तत्त्वं गृहाण । तथा[9] च – अयाचिताऽऽहृतं ग्राह्यमपि दुष्कृतकर्मणः (याज्ञ० आचारा० ~~२१५~~ २१५) इत्यादिभिर्विहितोऽयं प्रतिग्रहः । अत्र काव्यलिङ्गमलङ्कारः ॥१२॥

1 P1 यद । 2 P1 तदप्रिय० 3 P1 add. किं कृत्वा ? । प्रियमाधाय अपनेष्यामीत्यर्थः । 4 P1P2 वृक्षं कृतं 5 P1P2 add. दृष्ट्वा सिक्त्वा 6 P1 बिम्बप्रतिबिम्बभावेनोपमा ॥११॥ P2 om. अत्र ......०मालङ्कारः ॥
1 P1 उपनम्र । 2 P1 here श्रियं 3 P1 स्वयमुप० 4 P1 अदृष्टात् 5 P1 शुचितः 6 P1P2 om. पवित्रात् 7 B तस्य 8 P1 add. तस्मात् 9 P1P2 om. तथा च ......०मलङ्कारः ॥ P1 add. युक्ते द्वे साम्प्रतं स्थाने । आर्थी उपमा । पूर्ववाक्यस्य उत्तरवाक्यहेतुत्वेन काव्यलिङ्गम् । सामान्येन वा समर्थने अर्थान्तरन्यासः ॥१२॥

सर्ग २ 8

पतगेन मया जगत्पतेरुपकृत्यै तव किं प्रभूयते ।
इति वेद्मि न तु त्यजन्ति मां तदपि प्रत्युपकर्तुमर्तयः ॥१३॥

पतगेनेति[1] । मया पतगेन पक्षिणा तव जगत्पतेः[2] उपकृत्यै उपकाराय किं प्रभूयते[3] किं समर्थेन भूयते ?। अपि तु न । अहमिति वेद्मि [जानाम्येव]।[तु] पुनस्तदपि त्वां[4] प्रत्युपकर्तुम् अर्तयः[5] आधयो मां न त्यजन्ति । आधिभिरहं[6] जानन्नपि व्याकुलितोऽस्मि ॥१३॥

अचिरादुपकर्तुराचरेदथ वात्मौपयिकीमुपक्रियाम् ।
पृथुरित्थमथाणुरस्तु सा न विशेषे विदुषामिह ग्रहः ॥१४॥

अचिरादिति[1] । अथ वा[2] शब्दः पूर्वोक्तमा[2]भिपाति । अथवा [3] उपकर्तुः पुरुषस्य अचिरात् [] तत्क्षणमेव आत्मौपयिकी सोपाय-स्वाध्यामुपक्रियां[4] पुरुष आचरेत् । इत्थम् अनेन प्रकारेण स्वसाध्यो[5]-पायप्रकारेण अचिरलक्षणेन[6] सा[7] उपक्रिया पृथुर्महत्यस्तु अथवा अणुः स्वल्पाऽप्यस्तु[8] । इहाऽस्मिन् ~~विषये~~ विशेषे[9] अल्पोऽहं मत्लक्षणो विदुषां जानतां [नृणां] न ग्रहः[10] न निर्बन्धः[11] ॥१४॥

1 P1 पतगेन । 2 B जगतःपतेः 3 P2 भूयते 4 P2 add. प्रति 5 B अर्त्तयो ; P2 आर्तय 6 P1 जानन्नप्याधिभिराकुलितोऽस्मि । and add. अनुप्रासो विशेषोक्तिश्च ॥१३॥ ‖ 1 P1 अचि । P2 अचिरादुपकर्तुरिति । 2 P2 om. अथ... आभिपाति । 3 P1 add. अर्थम् 4 P1 add. युक्तां स्वलभ्यां 5 B ससाध्यो° 6 B °लक्षणेन 7 P1 add. आत्मोचिता 8 P1 अल्पा अस्तु 9 P1 add. पृथुत्वाणुत्वलक्षणे ; P2 अल्पमत्लक्षणे 10 B ग्रहणे 11 P1 add. उपाय एव औपयिकं विनयादित्वात्, उपायात्, ह्रस्वत्वं च (पा° V. iv. 34) इति ठक्प्रत्ययः । युक्तमौपयिकं लभ्यम् (अमर° II. IX. ) । आक्षेपोऽनुप्रासश्च ॥१४॥

सर्ग २ 9

भविता न विचारचारु चेत्तदपि श्रव्यमिदं मदीरितम् ।
खगवाग्रियमित्यतोऽपि किं न मुदं धास्यति कीरगीरिव ॥१५॥

भविता[1] भेति । चेत् यदि मम [इदम्][2] ईरितं चारु[3] न भविता[4] भविष्यति । तदपि त्वया श्रा[व्यं] श्रोतव्यम् । अतोऽपि कारणात् [इति] म[मि] वचनं तव किं मुदं न धास्यति । अपि तु करिष्यति । इतीति किम्[5]! इयं[6] खगस्य मानुषी वाक् कीरस्य शुकस्य गीर्[वाक्] यथा । मुदं कुरुते । [7]शुकभाषिता कदापि न गुणः, परं पक्षी मनुष्यतागेव गुणः अनुप्रासः[8] ॥१५॥

स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः ।
यमवाप्य विदर्भभूः प्रभुं हसति द्यामपि शक्रभर्तृकाम् ॥१६॥

स [जो][1]यतीति । किलेति श्रूयते । स भीमभूपतिर्जयति । किं-भूतः ! । अरिसार्थे[2] सार्थकीकृतं (२३१) नाम येन स तथा । [भीमत्वाद्भय-प्रभु] ङ्करः । यं भीमं [प्र]वाप्य विदर्भदेशस्य भूः द्यामपि हसति । किंभूताम् ! । शक्र इन्द्रो भर्ता यस्याः तां तथा[ं] । अत्र[3] च शक्यते इति शक्रः । अथवा शङ्कते इति शक्रः । शङ्कायां[4] रप्रत्ययः । [अत एव नद्युतश्च[5] (पा° V. i. 153)-यां ति विहितोऽपि कुत्सायां[6] कप् प्रत्ययः] । अत्र तु भीमो भर्ता । अनुप्रासोपमे[7] ॥ ॥१६॥

1 P1 भवि । 2 P2 om. इदम 3 P1 P2 विचारे 4 P1 इति aft. किं ; P2 om. इति 5 P1 इति किम् ! 6 P1 add. ईदृशी 7 P2 om. शुकभाषिता ..... अनुप्रासः । 8 P1 add. उपमा च ॥१५॥ 1 P1 स जा P2 स जयत्यरीति । 2 B add. सार्थे 3 P1 अथवा शङ्कते इति शक्रः । शक्यते इति शक्रः । 4 P1 P2 om. शङ्कायां रप्रत्ययः । 5 P2 om. नद्युतश्च ..... विहितोऽपि 6 P2 add. च 7 B अनुप्रासोपमः ॥ 8 P1 अनुप्रास उपमा च ॥ P2 om. अनुप्रासोपमे ॥

दमनादमनाक्प्रसेदुषस्तनयां[1] तथ्यगिरस्तपोधनात् ।
वरमाप स दिष्टविष्टपत्रितयानन्यसदृग्गुणोदयाम् ॥१७॥

दमनादिति[2] । स भीमो दमनान्नाम्नः[3] तपोधनात् तथ्यगिरः सत्यवाचः[4] तनयां पुत्रीं[5] वरमाप । किंभूतात् ? । अमनाक्[6] अधिकं[7] प्रसेदुषः तुष्टात्[8] प्रसन्नात् भक्त्यादिना[9] । किंभूताम् ? । दिष्टत्रये[10] [कालत्रये] विष्टपत्रितयेऽपि[11] [अ]नन्यसदृग्[12]साधारणो गुणोदयो यस्याः तां तथा । [13]अथवा दिष्टः[14] कथितो विष्टपत्रितयेऽनन्यसदृक् गुणोदयो यस्याः [तां तथा] ॥१७॥

भुवनत्रयसुभ्रुवामसौ दमयन्ती कमनीयतामदम् ।
उदियाय यतस्तनुश्रिया दमयन्तीति ततोऽभिधां दधौ ॥१८॥

भुवनत्रयेति[1] । इयं तनया भुवनत्रयस्य सुभ्रुवां स्त्रीणां कमनीयताया मदं गर्वं तनुश्रिया शरीरशोभया कृत्वा[2] दमयन्ती सती अप[ग]नयन्ती यतः[3] उदियाय ततो दमयन्तीति अभिधां [नाम] [5]दधौ[6] ॥१८॥

1 P₂ text तनया 2 P₁ दम । P₂ दमनादमनाक्विति । 3 P₁ add. दमन°; P₂ add. P₂ सत्यगिरः 4 B °वाद: 5 P₁ स्वपुत्री 6 B अमराक् 7 B प्रसेदुषः अधिकं 8 P₁ P₂ om. तुष्टात् 9 P₂ recto in l. mg. add. पुनः किंभूतस्य? तपो दर्भ इव धुनं यस्य तस्मात् । 10 B दिष्टः कथितः then विष्टत्रये etc. 11 P₁ P₂ त्रये च 12 P₂ om. असाधारणो 13 P₁ अनुप्रासोऽतिशयोक्तिश्च ॥ 14 B कथितो etc. °त्रितये — ॥ 1 P₁ भुवनत्रय । P₂ भुवनत्रयसुभ्रुवामिति । 2 P₁ P₂ om. कृत्वा 3 P₁ add. कारणात् 4 P₁ add. कारणात् 5 P₂ add. इयं contd 6 P₁ add. अतिशयोक्तिः ॥

सर्ग २ 11

श्रियमेव परं धराधिपाद्गुणसिन्धोरुदितामवेहि ताम् ।
व्यवधावपि वा विधोः कलां मृडचूडानिलयां न वेद कः ॥१९॥

[1]श्रियमेवेति । [त्वं तां] दमयन्तीं श्रियमेव [2]लक्ष्मीमेव [3]अवेहि जानीहि । किंभूताम् ? । परं धराधिपात् राज्ञः सकाशात् गुणानां सिन्धोः समुद्रात् उदिताम् [4]उत्पन्नाम् । वा अथवा [5]विधोश्चन्द्रस्य कलां व्यवधावन्तर्धानेऽपि सति दूरेऽपि [6]मृडस्य [7]श्रीमहादेवस्य चूडानिलयां [8]को न वेद । सर्वोऽपि जानाति । अत्र विधोरिति विधेयम्, अतः [त्वा]-समासः । यथा नागरिकाणां पतीन् हरामि[9] । रूपकमाक्षेपश्च ॥१९॥

चिकुरप्रकरा जयन्ति ते विदुषी मूर्धनि साऽऽबिभर्ति यान् ।
पशुनाप्यपुरस्कृतेन तत्तुलनामिच्छतु चामरेण कः ॥२०॥

[1][चिकुरप्रकरा इति] ते चिकुराणां [2]प्रकराः केशसमूहाः जयन्ति । सा विदुषी विशेषज्ञा यान् मूर्धनि [3]आबिभर्ति आभरणरूपान् (?) न करोति । साऽऽबिभर्ति इति आकारप्रश्लेषः कार्यः । तेषां [4]केशानां [5]चामरेण सह तुलनां साम्यं क इच्छतु । किंभूतेन[6] ? । [7]पशुनापि चमरीलक्षणेनापि अपुरस्कृतेन[8] पश्चात् पुच्छभागे[9] कृतेन । अथ च अपूजितेन । केशान् सा विदुषी मूर्धनि[10] पुरस्करोति । चामरं तु ।[11] मूर्खेणाऽपि पशुना[पि] न पुरस्कृतम् । तत्तोऽनेन सह किं साम्यम् ।[12] अतिशयोक्तिः ॥२०॥

1 P₁ श्रियं । 2 P₁ परं here 3 B P₁ P₂ अवेहि ed. अवेहि । 4 P₁ उत्पन्नाम् उदिताम् P₁ / 5 P₁ व्यवधानेऽपि अन्त° here 6 B/ add. सति 7 B रुद्रस्य 8 P₁ add. विधोश्चन्द्रस्य कलां 9 P₁ om. इति, add. केचित् मृडचूडानिलयामेतां विधोः P₁ / माहुः ; P₂ om. रूपकमाक्षेपश्च । 1 P₁ चिकुरप्र । 2 B प्रकाराः 3 P₁ बिभर्तीति ; / P₂ बिभर्ति 4 B केशानां 5 B P₂ तुलनां here, too. 6 P₁ add. चामरेण 7 P₂ om. पशुनापि 8 P₁ add. गवापि 9 B भागेन 10 P₂ P₂ add. निज 11 P₁ पशुनापि contd.

सर्ग २ 12

स्वदृशोर्जनयन्ति[1] सान्त्वनां खुरकण्डूयनकैतवान्मृगाः ।
जितयोरुदयत्प्रमीलयोस्तदसर्वेक्षणशोभया भयात् ॥२१॥

[स्वदृशो[2]र्जनयन्तीति । मृगाः खुरैः यत्[3]यत् चक्षुषां कण्डूयनं तस्य कैतवात् स्वयोर्दृशोः सान्त्वनां प्रियवाक्यस्तुतिं जनयन्ति ॥ किंभूतयोः ॥ भयात्] उदयन्ती उत्पद्यमाना प्रकृष्टा मीला[4] [प्र]मीलनं ययोस्तयोस्तथा ॥ [illegible] यतस्तस्याः [अ]सर्वा[5] महती या ईक्षणयोर्लोचनयोः शोभा तया जितयोः[6] । अन्योऽपि यः जितः स निमीलिताक्षः स्यात्तस्याः] सान्त्वनत्वं युक्तम् । जितत्वाद्[7]भयं तस्मान्निमेषणम् । अथ च मृगा[8] यदा खुरैश्चक्षुः कण्डूयन्ति[9] तदा निमीलनं स्वभावः । [10][समासोक्ति]रपह्नुतिश्च ॥२१॥

अपि लोकयुगं दृशावपि श्रुतदृष्टं रमणीगुणा अपि ।
श्रुतिगामितया दमस्वसुर्व्यतिभाते सुतरां धरापते ! ॥२२॥

[अपि[1] लोकयुगमिति] हे धरापते ! नल ! लोकयुगं पृथ्वीस्वर्लोक[2]लक्षणमपि व्यतिभाते । व्यतिहारे आत्मनेपदम् । [द्विवचन-प्रयोगः] विनिमयेन शोभते । दमस्वसुर्दमयन्त्याः श्रुतिगामितया । स्वर्गो[3]

contd. मूर्खेणाऽपि । 2 P. अनुप्रासोऽतिशयोक्तिश्च । अपुनरुक्ततेनेति श्लिष्टम् ॥ P2 om. अतिशयोक्तिः ॥२०॥ 1 B text व्यन्तु 2 P. स्वदृशोरित्यादि । 3 P2 यत् 4 B निमीला 5 P2 निमीलनं 6 P. P2 जितत्वाद्... निमेषणम् loc. 7 B यद० 8 P2 यदा मृगाः 9 P. कण्डूयनं कुर्वन्ति 10 P. add. अनुप्रासः [illegible] ; P2 om. समासोक्तिरपह्नुतिश्च ॥२१॥

1 P. अपि । 2 P. स्वर्गलोक० 3 B स्वर्गश्रुति:

contd. next p.

पृथिव्यां श्रुतिगामिता[4] तथा । अथवा पातालो लोकः[5] स्वर्गो लोकः द्वयम्
उभयस्यैवात्र श्रुतिगामिता, न तु दमयन्तीदर्शनम् । अतो विनिमयेन
भा/ [सदृशौ] शोभेते । तथा दमस्वसुः[6] दृशावपि व्यतिभाते । द्विवचनप्रयोगः ।
विनिमयेन शोभेते । कया? । श्रुतिगामितया कर्णान्तगामितया । लोचन-
द्वयमपि कर्णान्तविश्रान्तम् । तथा श्रुताः सामुद्रिक[7]शास्त्रे दृष्टाश्च
दमयन्त्यां[8] रमणी[9][गुणाः] स्त्रीगुणा अपि सुतरां व्यतिभाते । [10]विनिमयेन
शोभन्ते । बहुवचनप्रयोगः । कया? । श्रुतौ वेदे गामितया । स्त्रीगुणा यादृशाः
श्रुतौ अनुगताः[11] त एव दमयन्त्यां दृश्यते । न्ते

व्यतिभाते - व्यतिभाते - व्यतिभाते - ते आते अते[12] ।
आत्मने चानकारात् (का॰ III.v.39) इति बहुवचने नकारलोपः । अथवा,
छा/ [13]श्रुतदृष्टा गुणा व्यतिभाते व्यतिक्रमेण शोभन्ते, श्रुतदृष्टा इव दृ
शोभन्ते । श्रुता दृष्टा इवेति । यतो हि लोके श्रूयन्ते बहवः, दृश्यन्ते
अल्पाः । दमयन्त्यास्तु विपर्ययः श्रूयन्ते अल्पाः, दृश्यन्ते बहवः ।
किंतु गुणाः वाचसामगोचराः अनुभवैकगम्या एव । अथ च[14] लोक-
युगं स्वर्गपृथिवी[15]लक्षणं दमस्वसुः [16]श्रुत्या गामितया उत्कृष्टा[17]
व्यतिभाते । पूर्वं स्वर्गः उत्कृष्टः प्रसिद्धः[18] । पृथिवी[19] निकृष्टा । इदानीं
श्रुत्या स्वर्गो निकृष्टः, पृथिवी[20] [च] गामितया उत्कृष्टा । दृशावपि कर्ण-
गामितया व्यतिभाते । यदा दक्षिणं चक्षुर्दृश्यते, [तदा] तदुत्कृष्टम् । वामं

4 P2 प्रसिद्धतया 5 P1 ॰स्वर्लोक॰ 6 P1 add. दमयन्त्याः 7 P1P2 om. सामुद्रिक॰ 8 P1 om. दमयन्त्या 9 P2 रमणीयाः 10 P1 om. विनिमयेन शोभन्ते 11 B अवगता 12 P1P2 आन्ते 13 P1P2 om. अथवा ..... अनुभवैकगम्या एव 14 P1P2 लोकयुगं ..... वैपरीत्यम् in the beginning of the verse. 15 P1P2 पृथ्वी॰ 16 P1 add. श्रुत्या श्रुतिगामितया, P2 श्रुतिगामितया 17 P1 P2 om. उत्कृष्टा; P1 add. वैपरीत्यं : 18 P2 om. प्रसिद्धः 19 B पृथिव्यां, P1P2 पृथ्वी 20 P1P2 पृथ्वी

तथा[21] न भविष्यतीति कृत्वा निकृष्टमिति व्यतिभाते । वामे तु दृश्यमाने तद्वैपरीत्यम् । पूर्वदृष्टं दक्षिणं निकृष्टमिति प्रतीतिः[22] वेदगामितया रमणीगुणा अपि व्यतिभाते[23] । पूर्व (24b) किल श्रुता उत्कृष्टाः दृष्टा निकृष्टाः । एतस्यां तु[24] दृष्टा उत्कृष्टा । वेदश्रुतास्तदपेक्षया निकृष्टा इति वैपरीत्यम् ॥२२॥

नलिनं मलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे ।
अपि खञ्जनमञ्जनाञ्चिते विदधाते रुचिगर्वदुर्विधम् ॥२३॥

[नलिनं मलिनमिति[1]] तस्या ईक्षणे लोचने खञ्जनमपि खञ्जरीटमपि रुचिः शोभा तस्या गर्वस्तेन[2] दुर्विधं दरिद्रं[3] गर्वरहितं विदधाते । किंभूते ? । अञ्जनाञ्चिते[4] अञ्जनेनाऽञ्चिते व्याप्ते पूजिते[5] । किं कुर्वती ? । नलिनं मलिनं विवृण्वती । तथा पृषतीं मृगीम् अस्पृशती ।
[6] छेकानुप्रासातिशयोक्ती ॥२३॥

अधरं किल बिम्बनामकं फलमाभ्यामिति भव्यमन्वयम् ।
लभतेऽधरबिम्ब इत्यदः पदमस्या रदनच्छदे वदत् ॥२४॥

अधरमिति[1] । अधरबिम्ब[2] इत्यदः पदम् अस्या रदनच्छदे ओष्ठे[3] वदत् सत् भव्यम्[4] अन्वयम्[5] अर्थं लभते । किल यस्मात् बिम्ब-

21 Pi Pi2 न तथा 22 B प्रतीतिर्वेद० 23 B प्रतिभासते 24 B तुष्टा
1 Pi नलिनं । 2 B गर्वेण 3 B दुःस्थं 4 Pi Pi2 om. अञ्जनाञ्चिते 5 B add. अञ्चिते 6 Pi add. विलासानभिसत्वात् । अनुप्रासोऽतिशयोक्तिश्च ॥ ; Pi2 om. छेकानुप्रासातिशयोक्ती ॥ २३॥ ‖ 1 Pi अधर । Pi2 अधरं किलेति ।
B/2 अधरं 3 Pi वदत् ओष्ठो and add. भाषमाणे 4 Pi add. रमणीयं 5 Pi2 [illegible] अन्वयं

नामकं फलम् आभ्याम् ओष्ठाभ्यां सकाशात् अधरं हीनम् । अधरं [हीनं] बिम्बं बिम्बीफलम् उपमानरूपं यस्मात् स[7] अधरबिम्ब: । अध च अधर[8] ओष्ठ इव बिम्ब: ।[9] अत्रोत्प्रेक्षालङ्कार: । रदनच्छदस्य नपुंसकत्वं । तथा च प्रलापमार्तण्ड: - अथ पक्षो गरुड्[10] पिच्छं पत्रं छदो/जा स्त्रियाम्[11] ( ) ॥२४॥

कृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा ।
कृतमध्यबिलं विलोक्यते धृतगम्भीरखनीखनीलिम ॥२५॥

हृतसारमिति[1] । वेधसा दमयन्तीवदनसृष्टये[2] इन्दुमण्डलं हृतसारं[3] हृतं सारं यस्मात्तथाविधमिव । यत: सारोद्धारात्[5] कृतं मध्ये बिलं छिद्रं यस्य [तत्] तथा विलोक्यते[4] । किंभूतम् ! धृतो गाम्भीर्याया:[6] खन्या गर्तस्य [यत्] खम् आकाशं तस्य नीलिमा येन प:/ तत्तथा । आकाशं नील[7]मित्यारोप । अनुप्रासोत्प्रेक्षे[8] ॥२५॥

धृतलाञ्छनगोमयाञ्चनं विधुमालेपनपाण्डुरं विधि: ।
भ्रमयत्युचितं विदर्भजाननर्नीराजनवर्द्धमानकम् ॥२६॥

धृतलाञ्छनेति[1] । विधिर्विधुं विदर्भजाया आननस्य

6 P1 om. हीनं 7 B साध० P2 om. स 8 P1 add. इव 9 P1 add. अधः इत्यर्थि [इति] अधर: । यदाह धनुष्काचार्य: - अधरो अधो अरोधोनं धावति इत्यूर्ध्वगति: प्रतिषिद्धा । (त्रि.प्र.) । रदनयो: छदे इव वाससी इव । नपुंसकत्वं छदस्य प्रलापमार्तण्डे; 10 B वाजिस्थि० 11 P1 add. तथा गरुत्पक्षच्छदा: स्त्रियाम् ( ) । उत्प्रेक्षा ॥२४॥ 1 P1 हृत । 2 P1 निर्मितये 3 P1,P2 om. हृतसारं 4 P1 विलोक्यते here. 5 B सारोपहारात् 6 B गाम्भीर्या 7 B नीलिमा 8 B अपेक्षा उत्प्रेक्षा ॥; P2 om. अनुप्रासोत्प्रेक्षे ॥२५॥ 1 P1 धृत- Contd.

सर्ग 2 16

नीराजनार्थम् उत्तारणाय[2] य(स्व)र्द्धमानकं शरावपात्रम्[3] उचित भ्रमयति अवतारणकं कुरुते। किंभूतम्?। धूनं[4] आच्छादनमेव गोमयाञ्चनं पूर्णं येन तत्तथा। किंभूतं [विधूम]?। आलेपनवत् ~~विधुर~~ पाण्डुरम्। वर्द्धमानं [हि] श्रीखण्डेन[5] पाण्डु गोमयाञ्चितं च[6] रूप[कं] सम चालङ्कार:॥२६॥

सुषमाविषये परीक्षणे निखिलं पद्ममभाजि तन्मुखात्।
अधुनापि न भङ्गलक्षणं सलिलोन्मज्जनमुज्झति स्फुटम्॥२७॥

सुषमेति[1]। सुषमाया: शोभाया:[2] विषये[3] परीक्षणे सति मुखं रुचिरं किं वा पद्ममिति परीक्षायां जलादिव्ये कृते निखिलं [पद्मं] तस्या: मुखाद् भाजि भञ्जनम्। स्फुटमिति मन्ये। अधुनापि कमलं कर्तृ सलिले उन्मज्जनं[4] भङ्गलक्षणं यत्तन्नोज्झति। यदा जलदिव्यं भवति तदा एको धनुर्धर:[5] नाभिकाप्रमाणादनन्तरं शरं मुञ्चति। अपरो बोध्यस्थानगतो[6] वेगवान् पुमान्[7] पतितं शरमादाय[8] धनुर्धरस्य समीपमायाति। शरमोक्षणसमये दिव्यकर्ता[9] नाभिदघ्नोदकस्थस्य ऊरू गृहीत्वा निमज्जति। यदि शरानयनकालं यावत् मग्नस्तिष्ठति[10] तदा शुद्ध:। यदुक्तम्[11] - चिरकालमिषुं मुच्य-मानस्तोयोत्तली नर:। पश्येयैनं निमज्जन्तं तस्य शुद्धिं समादिशेत् (याज्ञ॰ व्यव॰ १०)॥ यदुन्मज्जति तदा भग्नोऽशुद्ध:॥२७॥

contd. आच्छादन। 2 Pi P2 om. उत्तारणाय 3 Pi P2 ॰भाजनम् 4 Pi add. गोमय॰ 5 Pi add. सुधाया वा 6 Pi add. अस्त्री शरावो वर्द्धमान: (अमर॰ २.९.३२)। अनुप्रासो रूपकानुपमा सम च॥ P2 om. रूपकं … चालङ्कार:॥२६॥ 1 Pi सुष; P2 सुषमाविषये इति। 2 Pi add. सुषमाया: 3 B विशेषये 4 Pi P2 यत् here 5 Pi P2 शरं here. 6 Pi P2 ॰स्थानस्थ: पुरुष: 7 Pi P2 om. पुमान् 8 Pi P2 शरं धनुर्धरसमीपे समानयति। 9 Pi दिव्यकर्ता before निमज्जति; P2 om. नाभि॰ … गृहीत्वा 10 Pi निमज्ज॰ 11 Pi P2 om. यदुक्तम् & the verse … ऽशुद्ध:॥ but Pi add. शुद्ध …

contd.

सर्ग २ 17

धनुषी [रति]पञ्चबाणयोरुदिते विश्वजयाय तद्भ्रुवौ ।
नलिके न तदुच्चनासिके त्वयि नालीकविमुक्तिकामयोः ॥२८॥

---

[धनुषीति[1]] । तस्या भ्रुवौ रतेः [पञ्चबाणस्य च] कामस्य[2] धनुषी चापद्वयमुदिते उत्पन्ने । किमर्थम्? । विश्वस्य जयाय । तस्या उच्चे[3] नासिके[4] नासाछिद्रद्वयं तयोरेव नलिके द्वे । किंभूतयोः? । त्वयि नालीकस्य[5] विमुक्तिकामयोः[6] । नलिकया ये विमुच्यन्ते ते नालीका बाणाः । रूपकालङ्कारः[7] ॥२८॥

---

सदृशी तव शूर ! सा परं जलदुर्गस्थमृणालजिद्भुजा ।
अपि मित्रजुषां सरोरुहां गृह्यालुः[1] करलीलया श्रियः ॥२९॥

---

[सदृशी[2] तवेति] । हे शूर ! सा दमयन्ती [परं] केवलं[3] तवैव सदृशी त्वत्तुल्या[4] एव । किंभूता ? [जलदुर्गस्थानि] मृणालानि जयत एवंविधौ भुजौ यस्याः[5] । त्वमपि शूरत्वात् दुर्गस्थान् शत्रून्[6] जयसि । तथा[7] सा दमयन्ती सरोरुहां श्रियो लक्ष्मीः[8] करलीलया[9] हस्तशोभया

---

contd. समा इति । सुषामादिषु च (पा॰ VIII. iii. 98) इति षत्वम्(?) । अनुमानमुत्प्रेक्षा अतिशयोक्तिश्च ॥२९॥

1 धनुषी; P2 धनुषी रतीति । 2 P1P2 om. कामस्य 3 P1 उच्चा नासिका; P2 उच्चके 4 B ~~..........~~ here too त्वयि ... नासिके; P1 P2 add. नासा नासिके [इति पठित्वा] तस्य उच्चे नासिके नासा॰ 5 P1 नालीकविमुक्ति॰ 6 P1 om. नलिकया ... रूपालङ्कारः ॥ 7 P1 om. अलङ्कारः; P2 add. उदिते इति नासिके इति च द्विवचनान्तपदे ॥२८॥ 1 P2 text. गृह्यालुः 2 P1 सदृशी तव शूर सा परमित्यादि । 3 B केवलं abt. सदृशी 4 P1P2 om. त्वत्तुल्या एव 5 B यस्य 6 P1 अरीन् 7 B तदा; P1 तथा सरोरुहां etc. 8 P1 लक्ष्मीशोभाः 9 P1 गृह्यालुः hou

गृहयालु: ग्रहणशीला। किम्भूतानाम्? [10]मित्राम् आदित्यं जुषन्ति[11] सेवन्ते। अथ च [12]मित्राश्रितानामपि शत्रूणां[13] त्वमपि करस्य दण्डस्य लोलुप्या श्रियो लक्ष्म्या गृहयालु: ग्रहणशील:। [14]समश्लेषयो: सङ्कर:॥२९॥

वयसी शिशुतातदुत्तरे सुदृशो स्वाभिविधिं विधित्सुनी।
विधिनापि न रोमरेखया कृतसीम्नि प्रविभज्य रज्यत:॥३०॥

[वयसी[1] शिशुतेति]। शिशुता च [2]तस्या: उत्तरं वय: यौवनं [3]चेति शिशुता तदुत्तरे वयसी बाल्ययौवने तस्या: सुदृश: दमयन्त्या: प्रकर्षेण[4] विभज्य शरीरविभागं[5] कृत्वा [नो] रज्यत:[6] स्वातिभागमर्यादया तिष्ठत:, न रागं प्राप्नुत:। किम्भूतायाम्? विधिना[7] दैवेन रोमरेखया कृतसीम्न्यपि। रोमरेखैव[8] सीमा तस्यां कृतायामपि न मिलित्वा भुक्तिं कुरुत:। किंविशिष्टे वयसी? स्वमभिविधिम् अभिव्याप्तिं विधित्सुनी। [9]शिशुता शरीरमभिव्याप्नुमिच्छति। यौवनं च[10] जित्वा स्वयं व्याप्तिं चिकीर्षति, वय:सन्धित्वात्। [11]अत्रोक्तनिमित्ता विशेषोक्तिरलङ्कार:॥३०॥

(२६७)
अपि तद्वपुषि प्रसर्पतोर्गमिते कान्तिझरैरगाधताम्।
स्मरयौवनयो: खलु द्वयो: प्लवकुम्भौ भवत: कुचावुभौ॥३१॥

10 Pi add. मित्रजुषामपि। मित्रे जुषन्ते प्रीतानि भवन्ति। सूर्योदये ~~विक~~ विकसितानि भवन्ति तेषामपि। अथवा; 11 Pi जुषन्ते 12 Pi त्वमपि here 13 Pi रिपूणां श्रियो लक्ष्मी: 14 Pi समश्लेषौ; Pi2 om. समश्... सङ्कर:॥२९॥
1 Pi वयसी 2 Pi add. तदुत्तरे 3 BPi2 च ते 4 Pi विभज्य प्रकर्षेण 5 Pi2 विभागं 6 Pi Pi2 om. स्वा... तिष्ठत: 7 Pi add. विधात्रा अथ च शास्त्रोक्तेन प्रकारेण। 8 Pi Pi2 रोमरेखा 9 Pi Pi2 व्याप्तुम् 10 Pi add. ता 11 Pi add. स्वाभिविधिं विधित्सुनी इति उक्तनिमित्ता विशेषोक्ति:। Pi2 om. अत्रोक्त... ०रलङ्कार:॥३०॥

[अपि[1] तद्वपुषीति]। अपि[2] सम्भावने। खलु मन्ये। स्मरयौवनयो-र्द्वयोः[3] कुम्भौ कुचौ प्लवनार्थं[4] तरणार्थं कुम्भौ भवतः। किंभूतयोः? कान्ति-[5]रसैः प्रवाहैः अगाधतां गमितेऽपि तस्या वपुषि प्रसर्पतोः।[6] अत्र कुचयोः कुम्भसम्भावनोत्प्रेक्षा, न रूपकम्। तथा च काव्यप्रकाशः - सम्भावन-मथोत्प्रेक्षा प्रकृतस्य परेण यत् (X.137)॥ खलूत्प्रेक्षाव्यञ्जकः। अतिशयोक्तिरपि॥३२॥

---

कलशे[1] निजहेतुदण्डजः किमु चक्रभ्रमकारिता गुणः।
स तदुच्चकुचौ भवन् प्रभाझरचक्रभ्रममातनोति यत्॥३२॥

---

[कलशे[2] इति]। किमु कथं कलशे कुम्भे चक्रभ्रमं करोती-त्येवंशीलः चक्रभ्रमकारिताल्लक्षणो गुणः। कथं विद्यते इति प्रश्नः। किं-भूतः?[3] निजस्य कलशस्य हेतुरसमवायिकारणं यो दण्डः तस्माज्जातः। स कलशः तस्या उच्चकुचौ[4] भवन् यत्[5] प्रभाझरे चक्रभ्रमं चक्रवाक-भ्रमम् आतनोति।

अयमर्थः। कार्यं यदुत्पद्यते तत्र जायमाने कारणत्रयं ~~भवि~~ भवति। एकं समवायिकारणं मृत्तिका, उपादानकारणमपि तदेवो-च्यते। द्वितीयमसमवायिकारणं दण्डचीवरादि, सहकारिकारणमपि तदेव[6]। तृतीयं निमित्तकारणं कुलालादि अदृष्टादिकं च। तत्रोपादान-कारणस्य मृत्तिकादेः गुणाः श्यामत्वादिकार्ये कार्ये सङ्क्रमति[7]। [तो]तो ।ई

---

1 P1 आपि तद्वपुषी। 2 P1 om. अपि सम्भावने; P2 at the end. 3 P2 om. द्विकर्तोः 4 B P2 प्लवनार्थं 5 P2 कान्तैः 6 P1 add. खलुशब्दः सम्भावने। उत्प्रेक्षातिशयोक्तिश्च॥ P2 om. अत्र... अतिशयोक्तिरपि॥३१॥ ‖ 1 P2 text कलशे 2 P1 कलशे; P2 कलशेति। 3 P1 यत् ; P2 om. स 4 P1 P2 उच्चौ 5 P1 om. यत् 6 P1 add. उच्यते 7 P1 सङ्क्रमति ।ऽ

घटोऽपि श्यामो भवति। परमसमवायिनः सह[8]कारिकारणस्य[9] दण्डचीवरादेः
गुणो घटे[10] न समवैति[11]। निमित्तकारणस्य[12] कुलालादेश्च गुणो (26b) न
13/ कार्ये समवैति[13]। गौरेण कुलालेन[14] कृतो घटो गौरो न भवति। श्वेतेन
दण्डकाष्ठेन कृतः, श्वेत[15]दोरकेण च उत्तारितो घटः[16] श्वेतो न भवति।
निमित्तकारणस्य च[17] सहकारिकारणस्य द्वयस्याप्यसमवायित्वात्।
अत्र घटे चक्रभ्रमकारितात्वे(?)ऽणो गुणो दृश्यते। स चाऽसमवायिकारणात्
दण्डाज्जातः। न हि दृष्टे अनुपपन्नं नाम। ततः कविरुत्प्रेक्षां कुरुते-
त/ यद् चक्रभ्रमकारि[18]ता नाम गुणः किं कलशे विद्यते? यतः[19] तस्याः
कुचौ द्वौ कलशा एव। चक्रे आरोप्य एकं वस्तु यदा भ्राम्यते तदा
भ्रान्त्या द्वयमिव भवति[20]। अथ च प्रेमाप्रवाहे चक्रवाकभ्रमं करोति।
स कलशः कुचाकृत्या सम्पन्न इति शब्दश्लेषः। अन्यत्र किल
श्वेतेभ्यस्तन्तुभ्यः श्वेतः पटः। ननु तत्रापि सहकारिणां ~~तन्तु~~
श्रु/ तुरीवेमतन्तुवाय[21]प्रभृतीनां गुणाः पटे [न] भवन्ति[22]। अत्र कुचरूपे घटे
वैपरीत्यं दृश्यते। ततः प्रश्नोऽयमिति[23]। अत्रानुमानमलङ्कारः। तथा च
काव्यप्रकाशे - अनुमानं तदुक्तं यत्साध्यसाधनयोर्वचः। (X.117)
स * तद्(?)श्चक्रकुचौ भवाविति रूपकम्। कुचकलशदर्शनाच्चक्रवाक-
[भ्रान्तिजननात्] भ्रान्तिमान्। यथा कपोले मार्जारः (का.प्र.X.179)।
॥३२॥

8 P2 सहकारिणः 9 P1 चक्रदण्ड° 10 P1,P2 न घटे 11 P1 समवैति 12 P1 °कारणकुलालादे° 13 P1 समवैति 14 P1,P2 कुम्भकारेण 15 P1,P2 श्वेतेन 16 P1 श्वेतो घटो 17 P1,P2 om. च 18 P1 °भ्रमको नाम; P2 °कारिता-लक्षणो नाम 19 P1 यत् 20 P2 भाति 21 P1,P2 °वायादीनां 22 P1 om. न 23 B प्रश्नोपपत्तिरिति; ~~24~~ P1 only अनुमानरूपकभ्रान्तिमन्तः॥; P2 om. अत्रा° .... मार्जारः॥ ३२॥

भजते खलु षण्मुखं शिखी चिकुरैर्निर्मितबर्हगर्हणः।
अपि जम्भरिपुं दमस्वसुर्जितकुम्भः कुचशोभयेभराट् ॥२३॥

भजते[1] इति। शिखी मयूरस्तस्याः[2] चिकुरैः केशैः[4] निर्मिता बर्हाणां पिच्छानां गर्हणा[3] निन्दा यस्य एवंविधः सन्। खल्विति शङ्के। षण्मुखं कार्त्तिकेयं भजते। तस्य किल षण्मुखानि[4] सन्ति, दमयन्त्या एकम् एव मुखम्। तथा दमस्वसुः कुचशोभया जितकुम्भस्थलः सन् [इभानां [हस्तिनां] राट् राजाऽपि[5] ऐरावणः जम्भारिपुमिन्द्रं भजते। जभी[6] (415) गात्रविनामे। (279) यो गात्राणां [वि]नामयिता[7] जम्भस्तस्य रिपुरिन्द्रः तं भजते। अन्योऽपि[8] जितो भवति स ~~शत्रो~~ तद्विजिगीषया कमप्याश्रयति। उत्प्रेक्षा रूपकं चालङ्कारः। (२३)

उदरं नतमध्यपृष्ठतास्फुरदङ्गुष्ठपदेन मुष्टिना।
चतुरङ्गुलिमध्यनिर्गतत्रिवलिभ्राजि कृतं दमस्वसुः ॥२४॥

उदरमिति[1]। दमस्वसुः[2] उदरं मुष्टिना कृतम्। किंभूतेन[3]!। नतं मध्यं यस्याः[4] तच्च पृष्ठं च तस्य भावस्तत्ता तत्र[6] स्फुरदङ्गुष्ठस्य पदं[7] स्थानं प्रतिबिम्बं यस्य तेन तथा। यदा मुष्टिना उदरं कृतं तदा अङ्गुष्ठः उदरस्य पश्चाद्भागे दत्तः। ततो वेदीनाम पृष्ठभागो नम्रो[8]

1 P₁ भज। P₂ भजते खल्विति। 2 P₁ add. दमस्वसुः 3 P₁P₂ om. निन्दा 4 P₁ षण्मुखानि 5 P₁P₂ राजा ऐरावणोऽपि 6 P₁P₂ जभि 7 P₂ नामयिता 8 P₁ अनुप्रास उत्प्रेक्षा दीपकान्यपि। भजते इति एकस्य पदस्य वाक्यदीपनात् ॥३३॥ P₂ om. अन्योऽपि ...... चालङ्कारः॥ 1 P₁ उदरं। P₂ उदरं नतमध्येति। 2 P₁ add. विधात्रा 3 P₁ add. मुष्टिना 4 B यस्या 5 P₂ om. च 6 P₁ तदेव 7 P₂ स्थानं पदं 8 B नम्रा; P₂ नाम्ना ——— contd.

बभूव। किंभूतम्? चतसृणाम् अङ्गुलीनां मध्यात् अन्तरमयात् निर्गता यास्तिस्रो वलयस्ताभिः भ्राजते इत्येवंशीलम्।[1] काव्यलिङ्गम्॥३४॥

उदरं परिमाति मुष्टिना कुतुकी कोऽपि दमस्वसुः किमु।
धृतत्र्यङ्गुलचतुरङ्गुलीव यद्वलिभिर्भाति सहेमकाञ्चिभिः॥३५॥

उदरं[1] परिमातीति। किमु कोऽपि कुतुकी[2] कौतुकवान् पुरुषः दमस्वसुरुदरं मुष्टिना परिमाति। यद्वलिभिः कृत्वा धृतास्तस्य[3] मुष्टेश्चतस्रोऽङ्गुलयो येन तत्तथा एवंविधमिव भाति। किंभूताभिर्वलिभिः? सह[4] हेमकाञ्च्या मेखलया[5] वर्तन्ते यास्ताभिस्तथा। मेखलया सह वलीनां चतुष्टयत्वम्[6]॥३५॥

पृथुवर्तुलतन्नितम्बकृन्मिहिरस्यन्दनशिल्पशिक्षया[1]।
विधिरेकचक्रचारिणं किमु निर्मित्सति मान्मथं रथम्॥३६॥

पृथुवर्तुलेति[2]। विधिर्ब्रह्मा किं [मान्मथं][3] मन्मथसम्बन्धिनं रथम् एककेन चक्रेण चरतीत्येवंशीलं निर्मातुमिच्छति। कया? मिहिरस्य श्रीसूर्यस्य स्यन्दनो रथस्तस्य शिल्पं विज्ञानपूर्वकं[4]

१ P. अनुप्रासोऽनुमानं च॥ P2 om. काव्यलिङ्गम्॥ ~~३४॥~~
1 P. उदरं। 2 P. कुतकी 3 P2 om. तस्य मुष्टेः 4 P2 सहेम० 5 P2 मेखलाया 6 P. add. एवेन मुष्टिग्राह्यमध्यत्वात् कृशोदरीत्यर्थः। अनुमानमुपमोत्प्रेक्षा॥ ३५॥
1 P2 text. शिक्षया 2 P. पृथु। B पृथुवर्तुलमिति। 3 edr. add. मान्मथं 4 P. ०पूर्वं ; P2 om. विज्ञानपूर्वकं

करणं तेन या शिक्षा अभ्यासस्तया। एको रविरथ एकचक्रो विधिना कृतः तेनाभ्यासेन[6] कामरथं तथाविधं किमु चिकीर्षति। किंभूतो विधिः?। पृथुं वर्तुलं च तन्नितम्बं[7] करोतीति। नितम्ब एव कामरथचक्रमिति[8] ॥३६॥

तरुमूरुयुगेन सुन्दरी किमु रम्भां परिणाहिना परम्।
तरुणीमपि जिष्णुरेव तां धनदापत्यतपःफलस्तनीम् ॥३७॥

तरुमूरु[1] इति। सा सुन्दरी ऊरुयुगेन परं केवलं किमु[2] रम्भामेव[3] [वा] कदली तरुमेव जिष्णुः। किंभूतेन?। परिणाहिना विशालेन[4] सा सुन्दरी तां रम्भां तरुणीमपि देवाङ्गनां जयनशीला एव। किंभूताम्?। धनदापत्यस्य [नलकूबरस्य][5] तपसः फलं स्तनौ यस्याः सा[6] तां तथा। तदुपभोग्यत्वात्। एका तरुरपरा तरुणी।[7] तरुरपि धनदो धनवान् तस्याऽपत्यस्य तपसा[8] फलं[9] यस्य वृक्षस्य कदली फलानि धनवतोऽपत्यैरुपभुज्यन्ते[10] ॥३७॥

जलजे रविसेवयेव ये पदमेतत्पदतामवापतुः।
ध्रुवमेत्य रुतः सहंसकीकुरुतस्ते विधिपत्रदम्पती ॥३८॥

जलजे[1] इति। ये जलजे द्वे कमले एतस्याः पदतां चरणतां

5 P1 ~~...~~ [निर्मितः] 6 P1 अभ्यासेनापरमेकचक्रं मन्मथरथं किमु विधिर्विधित्सति। 7 P1 P2 तस्या नितम्बं 8 P1 add. अनुमानमुत्प्रेक्षा च ॥३६॥
1 P1 तरु। P2 तरुमूरुयुगेति। 2 P1 किमु 6ol. जिष्णुः 3 P2 om. एव 4 P1 add. किन्तु 5 P2 नकुबरस्य 6 P1 P2 om. सा 7 P1 add. रम्भां 8 P1 फलं तपसां 9 P2 फलानि 10 P1 add. उत्प्रेक्षा व्यतिरेकौ। रम्भाफलशब्दौ श्लिष्टौ ॥३७॥
1 P1 जलजे। P2 जलजेति।

पदं स्थानमवापतुः। उत्प्रेक्ष्यते — रवेः सूर्यस्य सेवया इव। ध्रुवमिति शङ्के। विधेः ब्रह्मणः पत्रे वाहने दम्पती ते जलजे चरणात्मके एत्य आगत्य रुतः शब्दं कुरुतः। तथा ते[2] पादपद्मे [सो]हंसकीकुरुतश्च। हंसकं नूपुरम्। अत्र च सह[3] हंसकैर्वर्तेते[4][5] ॥३८॥

---

श्रितपुण्यसरःसरित्कथं न समाधिक्षपिताखिलक्षपम् ।
जलजं गतिमेतु मञ्जुलां दमयन्तीपदनाम्नि जन्मनि ॥३९॥

---

श्रितपुण्येति[1]। जलजं कमलं दमयन्तीपदनाम्नि जन्मनि वर्तमानं कथं [न] मञ्जुलां गतिं[2] गमनम् उत्तमलोकप्राप्तिं च एतु।
म/ अपि तु सद्गतिं प्राप्नोतु[3]। किं भूतम्? श्रितानि[4] पुण्यानि सरांसि सरितश्च येन तत् तथा। तथा समाधिना एकाग्रनिमीलनेन क्षपिता अखिलाः[5] क्षपाः रात्रयो येन तत्तथा[6]। अन्योऽपि यः पुण्यतीर्थान्याश्रयति, योगेन रात्रिं क्षपयति, स उत्तमगतिं लभते। समासोक्तिरलङ्कारः। पूर्वश्लोके चरणौ वर्णितौ। अत्र गतिर्वर्णिता ॥३९॥

---

सरसीः परिशीलितुं मया गमिकर्मीकृतनैकनीवृता[6] ।
अतिथित्वमनायि सा दृशोः सदसत्संशयगोचरोदरी ॥४०॥

---

सरसीरिति[1]। मया सा दमयन्ती दृशोरतिथित्वम् अनायि

---

2 P, P2 om. ते पादपद्मे 3 P, add. हंसा एव हंसकाः 4 P2 सहंसकैः 5 P, add. अत्र हंसशब्दसाम्यात् रुतिसम्भवान्चोत्प्रेक्षा। पूर्वार्द्धे तु हेतूत्प्रेक्षा ॥३८॥
1 P, श्रित। 2 P2 गमनं.... प्राप्तिं च om. प्राप्नोतु 3 P, प्राप्नोत्येव 4 P2 श्रिताः पुण्याः 5 P, om. क्षपाः 6 P, श्रितपुण्यतीर्थस्य समाधिमानः सद्गतिर्भवितेति) समासोक्तिः ॥ P2 om. अन्योऽपि.... गतिर्वर्णिता ॥३९॥ | 1 B सरसीति। P, सरसीः।

दृष्टा। किंभूता?। सन्ना उदरमसन्ना उदरम्[2] विकल्पो यः संशयः तद्विषयमुदरं यस्याः सा तथा। अस्ति चेत्, कथं न दृश्यते?। नास्ति चेत्, कथं खानपानादि कुरुते?। कृशोदरी[3]। किंभूतेन मया?। ग्रामेधातोः कर्मकारकं कृत्वा नैके[4] नोकृता देशा येन तेन (२४०) तथा। किंकर्तुम्?। सारोस्ती: महान्ति सरांसि परिशीलितुं विगाहितुम्[5]। अनेकदेशा मया गताः। ततः सा मया[6] दृष्टा[7]। अत्र कृशोदरीति वक्तव्ये सदसत्संशयोनिताख्यार्थे ओजो गुणः। यदुक्तम् - अर्थस्य प्रौढिरोजः (काव्या. III-2-2)। यथा पभार्के (काव्य) वाच्यवचनं वाच्यार्थं (थे) च। पञ्चोऽभिधा (p.141) इत्यादि। यथा - अथ नयनसमुत्थं ज्योति (रघु० II-75) रित्यादि॥४०॥

अवधृत्य दिवोऽपि यौवतैर्न सहाधीतवतीमिमामहम्।
कतमस्तु विधातुराशये पतिरस्या वसतीत्यचिन्तयम्॥४१॥

अवधृत्येति[1]। अहमिति अचिन्तयम्। इतीति[2] किम्?। विधातुर्ब्रह्मणः आशये हृदये कतमः [तु][3] पुनरस्याः पतिर्वसति। किं कृत्वा चिन्तितवान्?। इमां दमयन्तीं दिवोऽपि यौवतैः अप्सरोभिः सह न अधीतवतीं लक्षणया[4] न सदृशीम् अवधृत्य ज्ञात्वा[5]। स्वर्गाङ्गनानामपि असहाध्यायिनी[6]। ताभ्योऽपि सुन्दरीति निश्चित्यैव॥४१॥

2 B विवशीलकल्पो 3 P1 here कृशोति वक्तव्ये इयमर्थस्य प्रौढिरोजः। वक्रोक्तिजीवितकारो चैव वक्रताप्रकारः कथ्यते। यथा - तामुना - वक्रोक्तेवक्राक्ते ( )ति।; P2 om. कृशोदरी 4 P1 add. अनेके 5 P1P2 om. विगाहितु 6 P1P2 om. मया 7 P1 add. कालेऽधिकम्॥४०॥; P2 om. अत्र ...... रित्यादि॥ 1 P1 अव। 2 P1 इति किम्। 3 edt. add. तु 4 P1P2 om. लक्षणया न सदृशीम् 5 P1P2 om. ज्ञात्वा। 6 B °ध्यायिनी 7 P1 add. प्रतीपं च॥४१॥

सर्ग २ 26

अनुरूपमिमं निरूपयन्नथ सर्वेष्वपि पूर्वपक्षताम् ।
युवसु व्यपनेतुमक्षमस्त्वयि सिद्धान्तधियं न्यवेशयम् ॥४२॥ ।१।

[1]अनुरूपमिति । अथाऽनन्तरम् अहं त्वयि विषये सिद्धान्तधियं न्यवेशयम् ॥ किंभूतोऽहम्[2] ? । सर्वेष्वपि युवसु तरुणेषु पूर्वपक्षतां [3]व्यपनेतुमक्षमः । किं कुर्वन्[4] ? । इमं [पतिं] युवानम् अनुरूपं दमयन्त्या योग्यं निरूपयन् । असौ योग्यो अयं योग्यो वर इत्यवलोकयतो
ब/ मम सर्वेषु दोषत्वात् पूर्वपक्षत्वं पश्यतः त्वयि नले सिद्धान्तबुद्धिर्बभूव – त्वं योग्य[5] इति[6] ॥४२॥

अनया तव रूपसीमया कृतसंस्कारविबोधनस्य मे ।
चिरमप्यवलोकिताद्य सा स्मृतिमारूढवती शुचिस्मिता ॥४३॥

[1]अनयेति । अद्य सा [2]शुचिस्मिता [3][मे] मम स्मृतिमारूढवती पूर्वं चिरमवलोकिताऽपि[4] । किंभूतस्य मम ? । अनया[5] तव रूपसीमया कृत्वा कृतसंस्कारस्य विबोधनम् उद्बोधो यस्य तस्य[6] तथा ।
स्का/ अनुभवात् संस्कारः, संस्कारात् स्मृतिः ।[7] अवलोकनं चिरकालेन विस्मृतं, परं[8] त्वद्दर्शनात्स्मृतम्[9] । स्मरणालङ्कारः ॥४३॥

~~टिप्पणी~~ 1 P1 अनु । 2 B हंस: 3 P2 अपनेतुम् 4 P1 om. किं कुर्वन् । 5 B योग्यमिति 6 P1 add. समम् ॥४२॥
1 P1 अन । P2 अनया तवेति । 2 B मम here; P2 मम सा 3 P2 lecto. inf. mg. add. शुचि निर्मलं स्मितम् ईषद्धास्यो यस्याः सा 4 P1 add. यद्यपि दृष्टायाः बहुकालो गत इत्यर्थः । 5 P1 add. त्वल्लिधया 6 P2 om. तस्य 7 P1 add. तस्या 8 P1 परमेष स्मृतिप्रबोधोऽधापि तत्स्मरणस्य 9 P1 स्मरणम् ॥ P2 om. स्मरणालङ्कारः ॥४३॥

त्वयि वीर! [1]विराजते परं दमयन्तीकिलकिञ्चितं किल।
तरुणीस्तन इव दीप्यते मणिहारावलिरामणीयकम् ॥४४॥

---

त्वयि[1] वीरेति। हे वीर![3] परं केवलं दमयन्त्याः किलकिञ्चितं भावः[2] त्वयि[4] विराजते। ना(२४७)न्यत्र। यतो मणीनां हारावल्या[5] रामणीयकं तरुण्याः स्तन[5] इव दीप्यते। शृङ्गार[6]भावहानादेः संकरः किलकिञ्चितम् (  )। [[7]क्रोधाश्रुहर्षभीत्यादेः संकरः किलकिञ्चितम् (द.रू. II.३९) [8]इत्यालङ्कारिकाः।] किलेति शङ्के[9] ॥४४॥

---

तव रूपमिदं तया विना विफलं पुष्पमिवावकेशिनः।
इयमृद्धधना वृथाऽवनी स्ववनी सम्प्रवदत्पिकापि का ॥४५॥

---

तव[1] रूपमिति। हे नल! तव[2] इदं रूपं तया विना विफलम्। यथा अवकेशिनो वन्ध्य[3]वृक्षस्य पुष्पं विफलं फलरहितम्[4] तथा तया विना इयमवनी पृथ्वी ऋद्धधना समृद्धा वृथा। इयं स्वकीया वनी नि/उद्यानवनी काऽपि का कीदृशी? न किञ्चित्, तया रहिता। किंभूता[4]? सम्प्रवदन्तः[5] पिकाः कोकिला यस्यां सा तथाविधाऽपि। व्यक्तवाचां समुच्चारणे (पा॰ I.iii.48) इत्यनेन व्यक्तवाक्त्वा[6]भावादात्मनेपदाभावः। तथा च काशिकायां [7]-[नन्] वद(1078) व्यक्तायां वाचि इत्येव पठ्यते।

---

1 P2 text: वरं 2 P1 त्वयि। 3 P1 add. त्वयि 4 P1 P2 add. इव 5 P1 हार॰ 6 P1 ॰हावभावा॰; P2 हारभावा॰ 7 P1 add. दशरूपकेऽपि; P2 क्रोधा॰ ॰किञ्चितम् alt. शङ्के 8 P1 om. इत्यालङ्कारिकाः 9 P1 add. सम्भावयामीत्यर्थः। प्रतिवस्तूपमा ॥ P2 add. शृङ्गारचेष्टाविशेषः। हर्षादुदितगीतादिव्यामृष्टं किलकिञ्चितम् (  )॥४४॥ || 1 P1 तव। 2 P1 P2 इदं तव 3 P1 P2 वन्ध्यस्य 4 P1 add. विसर्गः 5 P2 ॰प्रवदन्ती 6 P2 वक्त्वोभावा॰ 7 add. in [ ] P2. ed.

तत्र [किं] व्यक्तवाचामिति [विशेषणेन] । प्रसिद्ध्युपसङ्ग्रहार्थम् [एतत्] । व्यक्तवाच इति[8] हि मनुष्याः प्रसिद्धाः ।[9] ~~अन्यत्र~~ [तेषां समुच्चारणे यथा स्यात्] (P.54) । अन्यत्र परस्मैपदमेव[9] ॥४५[10]॥

---

मा/ अनया सुरकाम्यमानया सह योगः सुलभस्तु न त्वया ।
घनसंवृतयाम्बुदागमे कुमुदेनेव निशाकरत्विषा ॥४६॥

---

अनयेति[1] । तु पुनरनया सुरैः[2] काम्यमानया सह योगः त्वया न सुलभः[3] । यथा अम्बुदानामागमे[4] घनैर्मेघैः संवृतया तिरोहितया[5] निशाकरस्य त्विषा सह कुमुदेन योगो न सुलभः । न लोकाव्ययनिष्ठाखलर्थतृनाम् (पा° II iii.69) इति त्वयेति ~~षष्ठीप्र~~ षष्ठीप्रतिषेधः[6] ॥ ६॥

---

तदहं ~~विधे~~ विदधे तथा तथा दमयन्त्याः सविधे तव स्तवम् ।
हृदये निहितस्तया भवानपि नेन्द्रेण यथापनीयते ॥४७॥

---

तदहमिति[1] । तदहं तथा तथा दमयन्त्याः सविधे[2] तव स्तवं[3] विदधे करोमि यथा तया [देव्या] हृदये निहितो भवान् इन्द्रेणापि[4] नापनीयते । तथा तथेति तेन तेन प्रकारेण[5] [6. स्थित्या] । सर्वात्मकं वस्तु आक्षिप्तं, तथा भूतमेव यच्छब्देन परामृश्यते । यथा - यथेत्थापं प्रतिजहि जगन्नाथ । नम्रस्य तन्मे (मा° मा° I.8) इत्यत्र यथादित्याक्षिप्तं तच्छब्देन परामृश्यते ।

---

व/ 8 B इति प्रसिद्धैर्मनुष्यैः । 9 P1 add. विनोक्तिरुपमा । तथा विनेति दीपकम् । 10 B no. 44 ॥ 1 P1 अनया । P2 अनया सुरेति । 2 P1 add. अमरैः 3 P2 यदा 4 P1 add. तेनात्यन्तदुर्लभत्वम् । 5 P2 add. तथा 6 P2 प्रतिषेधेति । P1 add. बिम्बप्रतिबिम्बभावेनोपमा । यदाह रुचकः - उपमानोपमेययोः साधर्म्ये भेदाभेदतुल्यत्वे उपमा । (अलं.स. II.12) ॥ ४६ ॥ 1 P1 तद । P2 तदहं विदधे[इ]ति । 2 P1 add. समीपे 3 P1, P2 add. स्तुतिं 4 P2 यथा here 5 P1 P2 रूपेण 6 P1 स्थितिं —— contd

P. 63.

एवमन्यत्रापि। तथा तथेति अभिधाय यथेति[9] सकृदुपादानमविरुद्धम्[10]॥४७॥

तव सम्मतिमेव केवलामधिगन्तुं धिगिदं निवेदितम्।
ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम्॥४८॥

तव[1] सम्मतिमिति। ममेदं निवेदितं कथनं[2] धिक् निन्दन्तु जनाः। किं कर्तुं कथितम्[3]? केवलां[4] तव सम्मतिमेवाऽभिलाषमेवाऽ[5]धिगन्तुं [ज्ञातुम्]। हि यतः साधवो निजामुपयोगितामुपकारं फलेनैव[6] ब्रुवते, न तु कण्ठेन[7]। कार्यं कृत्वैव[8] दर्शयन्ति।[9] अर्थान्तरन्यासः[10]॥४८॥

तदिदं विशदं वचोऽमृतं परिपीयाभ्युदितं द्विजाधिपात्।
र/ अतितृप्ततया विनिर्ममे स तदुद्गारमिव स्मितं सितम्॥४९॥

तदिदमिति[1]। स नलो द्विजानां पक्षिणामधिपात् हंसात्[2] तत् इदं [विशदं] वच एवामृतम् अभ्युदितं परिपीय सितं शुभ्रं स्मितं [वि]निर्ममे।
त/ उत्प्रेक्षते। अत्यन्ततृप्ततया तस्य वचोऽमृतस्य[3] उद्गारमिव निर्मितवान्। यः किल द्विजाधिपात् चन्द्रात् उत्पन्नम् अमृतमतितृप्त्या पिबति, स तस्योद्गारं वमति[4] निर्मिमीते।[5] उत्प्रेक्षा रूपकमलङ्कारः॥४९॥

8 P1 P2 add. यथा 9 P1 P2 एवमत्रापि। 10 P1 add. अतिशयोक्तिः॥४७॥
1 P1 तव। 2 P1 om. कथनं 3 P1 निवेदितम् 4 B केवलां 5 P1 add. अनुमतिमेव 6 P1 add. एवं 7 P1 P2 add. वदन्ति 8 B कृतमेव 9 P1 add. साधूनां फलेन वचनं प्रमाणान्तरावगतमपि शाब्देन प्रतिपादितं, प्रयोजनान्तराभावात्। व्यपोह्यमानस्य वाच्यस्य कण्ठेन वचनस्य व्यवच्छेदाय पर्यवस्यति। वैधर्म्येण; P2 om. अर्थान्तरन्यासः॥ P1 add. परिसंख्या च॥४८॥
1 P1 तदिदं विशदं वचोऽमृतमित्यादि। 2 P1 अभ्युदितं here 3 P1 वाचो° 4 P1 P2 विनिर्मिमीते। 5 P1 रूपकमुत्प्रेक्षा च॥ P2 om. उत्प्रेक्षा... मलङ्कारः॥४९॥

सर्ग २ 30

परिमृज्य भुजाग्रजन्मना पतगं कोकनदेन नैषधः।
मृदु तस्य मुदेऽकिरद्गिरः प्रियवादामृतकूप[1]कण्ठजाः ॥५०॥

परिमृज्येति[2]। नैषधो भुजाग्रे जन्म यस्य तेन कोकनदेन रक्तोत्पलेन हस्ताग्रेण[3] पतगं हंसं परिमृज्य तस्य मुदे हर्षाय मृदु यथा भवति तथा[4] एवं गिरो वाणीरकिरत्[5] उवाच। किंभूताः? प्रियवाद[6] एवामृतं तस्य कूपो यः[7] कण्ठः तस्माज्जाताः।[8] अत्र भुजाग्रजन्मना कोकनदेनेति अतिशयोक्तिरलङ्कारः ॥५०॥

न तुलाविषये तवाकृतिर्न वचोवर्त्मनि ते सुशीलता।
त्वदुदाहरणाकृतौ गुणा इति सामुद्रिकसारमुद्रणा ॥५१॥

न तुलाविषय[1] इति। हे हंस! तवेयमाकृतिर्न[2] तुलाया उपमायाः[3] विषये गोचरे वर्तते[4]। ते तव सुशीलता[5] सद्वृत्तता[6] न वचसो वर्त्मनि मार्गे। तथा[7] आकृतौ[8] प्रधाने आकारे गुणाः शौर्यौदार्यादयो[9] भवन्ति इति या सामुद्रिकशास्त्रस्य[10] शरीरलक्षणपरीक्षाशास्त्रस्य सारमुद्रणा रहस्यकथनं सा त्वदुदाहरणा त्वमुदाहरणं दृष्टान्तो यस्याः सा तथा। तथा च सामुद्रिकशास्त्रे प्रत्येकमङ्गलक्षणानि उपदिश्य[11] (२१७)
सर्वमुक्तम्[12]। यत्राकृतिस्तत्र गुणा वसन्ति (        ) तस्य त्वमुदाहरणम्[13] ॥५१॥

1 P2 tool कण्ठकूपजाः 2 B परिमृज्येति। P1 परि। 3 P1/P2 हस्तेन 4 P1/P2 om. तथा 5 P2 om. विसर्गः 6 P2 प्रिया वाच 7 P2 om. यः 8 P1 उपमानेन निगीर्य हंसस्याध्यवसानम् इत्यतिशयोक्तिः। परम्परितरूपकं च। P2 om. अत्र ... ऽलङ्कारः ॥ ५०॥
1 P1 तुल्ला। P2 न तुलाविषये इत्येति। 2 P1/P2 इयं तव 3 P1 om. उपमाया 4 P1 प्रवर्तते। 5 P1 शीलता। 6 P1/P2 om. सद्वृत्तता 7 P1/P2 om. तथा 8 B आकृते 9 P1 शौर्यादयो; P2 सौन्दर्यौ॰ 10 P1/P2 ग्रन्थस्य 11 P2 उद्दिश्य 12 P1/P2 सर्वस्य॰ 13 P1 adds मान्यः। पूर्वोर्द्धस्य हेतुत्वेन वा त्वदुदाहरणेत्यादि योज्यम्। अतिशयोक्तिर्व्याख्यानान्तरे

न स्तुवर्णमयी तनुः परं ननु किं वागपि तावकी तथा।
न परं पथि पक्षपातिताऽनवलम्बे किमु मादृशेऽपि सा॥५२॥

न[1] सुवर्णेति। हे हंस! तव तनुः शरीरमेव परं केवलं न[2] [3] सुवर्णमयी। ननु किं तावकी वागपि वाण्यपि तथा सुवर्णमयी शोभना वर्णा यस्यां [सा] तथा। तथा अनवलम्बे निरालम्बे [पथि] आकाशे पक्षपातिता पक्षैः पतनशीलत्वं परं केवलं न। किन्तु मादृशे अनवलम्बेऽपि पुरुषे सा पक्षपातोऽङ्गीकारो[5] विधते यस्य स पक्षपाती[6] तस्य भावस्तत्ता][7] ॥५२॥

भृशतापभृता मया भवान् मरुदासादि तुषारसारवान्।
धनिनामितरः सतां पुनर्गुणवत्संनिधिरेव सन्निधिः॥५३॥

भृशतापेति[1]। हे हंस! मया भवान् मरुत् (वायुः) आसादि। किंभूतेन?।
भ/ भृशेन तापं बिभर्तीति तेन तथा। किंभूतो वायुः?। तुषारं शैत्यं तस्य सारं[2] विधते यस्य। थतः[3] धनिनामितरोऽन्यः सन् प्रधानो निधिः धन-लक्षणो निधानं सतां महात्मनां पुनर्गुणवतो संनिधिरेव सामीप्यमेव सन्निधिः।[6] रूपकमर्थान्तरन्यासोऽलङ्कारः॥५३॥

contd काव्यलिङ्गं चानेनव्ययश्च ध्वन्यते॥५१॥
1 l, न सु। l2 न स्तुवर्णमयीति। 2 l2 om. केवलं 3 l1.l2 om. न 4 l. यस्यां
5 l2 त्वङ्गीकरोति 6 l2 पातः 7 l1 add. श्लेष उत्प्रेक्षा च॥५२॥
धा/ 1 l. भृश। 2 l2 विधते यस्य सारं 3 B add. यथा अतः 4 l. स प्रधानो-न्या व्यवहृतः श्रेष्ठोऽयमिति। तैरभ्युपगतः। अथवा इतरो नीचो निकृष्टो निर्धनलक्षणो निधानं 5 l2 सन् विधिः 6 l. इतरस्त्वन्यनीचयोरि(अ। 3.172 त्यमरसिंहः। तथा इतरस्यामरेति अन्यस्मिन्। रूपकमर्थान्तरन्यासश्च॥
l2 om. रूपक०...... ०लङ्कारः॥५३॥

सर्ग २ 32

शतशः श्रुतिमागतैव सा त्रिजगन्मोहमहौषधिर्मम।
अमुना तव शंसितेन तु स्वदृशैवाधिगतामवैमि ताम् ॥५४॥

[1]शतश इति। सा दमयन्ती त्रिजगतो मोहार्थं महौषधिः [2]शतशोऽनेकशः मम श्रुतिमागता एव श्रुता[2]। तु पुनस्तवामुना शंसितेन कथितेन तां स्वदृशा एव[3] अधिगतां दृष्टाम् अवैमि।[4] रूपकभाविका-लङ्कारौ ॥५४॥

अखिलं विदुषामनाविलं सुहृदा च स्वहृदा च पश्यताम्।
सविधेऽपि न सूक्ष्मसाक्षिणी वदनालङ्कृतिमात्रमक्षिणी ॥५५॥

[1]अखिलमिति। विदुषां पुरुषाणाम् अखिलं[2] सुहृदा मित्रेण स्वकीयेन [हृदा] हृदयेन [च[3]] पश्यतां सताम् अक्षिणी चर्मचक्षुषी वदन-स्याऽलङ्कृतिमात्रं सविधेऽपि सान्निध्येऽपि। न सूक्ष्मस्य परमाण्वादेः[5] वस्तुनः साक्षिणी। तस्मात्त्वया सुहृदा दृष्टा, सा तत्तो मया दृष्टा।[6] अति-शयोक्तिः ॥५५॥

अमितं मधु तत्कथा मम श्रवणप्राघुणकीकृता जनैः।
मदनानलबोधने भवेत् खग! धाय्या धिगधैर्यधारिणः ॥५६॥

1 P. शतशः। 2 Bl. add. विसर्गः; P. तु श्रुताः 3 P. स्वदृशो 4 P. रूपकं, भाविदर्शनं प्रत्यक्षमिवेति भाविकम् ॥ P2 om. रूपकभाविकालङ्कारौ ॥१॥
1 P. अखिलं। P2 अखिलं विदुषामिति। 2 P2 ecto. in l. mg. & mid. sup. mg. add. समस्तम[redacted]नाविलम् अकलुषं निःसन्दिग्धमित्यर्थः। कीदृशानाम्?। चक्षुषोऽपि स कान्तिमूर्त्स्य (कचित) आधिक्यमाह। अखिलम् अतिदूरादतिसामीप्यादिन्द्रि-यघातान्मनोऽनवस्थानात् सौक्ष्म्याद्व्यवधानात् अभिभवात् समानाभिहारा-द्योति स्वहृदयपेक्षयापि मित्रप्राधान्यद्योतनार्थं प्राथम्येनोपादानम्। 3 P2 om. हृदा 4 P. om. च 5 P. P2 वस्तुनः परमाण्वादेः 6 P. अप्रस्तुतप्रशंसा। contd.

[1] अमितमिति । तस्याः कथा वार्ता जनैः श्रवणयोः प्राघुणकीकृता अतिथीकृ(30a)ता कथिता सती मम मदनानलस्य बोधने दीपने [हे] खग ![2] हंस ! धाय्या सामिधेनी भवेत् ।[3] किंभूतस्य ! (अधैर्यं धारयतीत्येवंशीलस्य[4] । यथा समिदाधानमन्त्रेणाऽग्निर्बोध्यते, तथा मम मदनाग्निं तत्कथा दीपयति । किंभूता ! (अमितं[5] प्रचुरं मधु अतिमधुरा)
[[6] पाय्यसांनाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु (पा० III.1.129) [7] इत्यादिना धाय्याशब्दः साधुः ।] अथ धाय्याऽग्निसंदीपनकारी भवति ।[8] अत्रातिशयोक्तिरूपकार्थान्तरन्यासानां सङ्करः ॥ ५६ ॥

विषमो मलयाहिमण्डलीविषफूत्कारमयो मयोहितः ।
खग ! कालकलत्रदिग्भवः पवनस्त्वद्विरहानलैधसा ॥ ५७ ॥

[1] विषम इति । हे खग ! मया कालस्य यमस्य कलत्रं या दिक् तस्याः भवः उत्पन्नः पवनः दक्षिणानिलो विषमः[2] ऊहितः विचारितः । कीदृक् वितर्कित इत्याह – मलयपर्वतस्य या अहीनां सर्पाणां मण्डली तस्याः विषयुक्ता ये फूत्काराः तन्मयोऽयमिति ऊहितः । अन्यथा एवंविधस्तापो न भवति ।[3] किंभूतेन मया ? तस्या विरहानल[स्य] एधसा [4] इन्धनभूतेन । यः कालस्य कलत्रादुत्पद्यते, स मारयत्येव[5] ॥ ५७ ॥

1 P. अमित मधु । 2 P. add. हे 3 P. add. अधैर्यधारिणः पुरुषान् धिक् । अथवा धिगिति पूर्वेण सम्बद्धं एकं वाक्यम् । 4 B add. कं धिक् ? । 5 P. प्रचुरम् अमितं ~~मधुरम्~~ अमलं 6 B add. मम कष्टम् ; P2 पाय्यसांनाय्येत्यादिना 7 P. om. इत्यादिना ... साधुः । add. अतिशयोक्तिः रूपकमर्थान्तरन्यासश्च ॥ [8] P2 om. अत्रा० ... सङ्करः । add. [sup. to P.] ऋक् सामिधेनी धाय्या च या स्यादग्निसमिन्धने (II 7.22) इत्यमरः । अग्निसंधुक्षणो ऋक् । भवेदित्यर्हार्थे लिङ् ॥ ५६ ॥ 1 P. विषमो । 2 P2 विषमय 3 P. add. विषमत्वे वा हेतुरयम् 4 P. P2 इन्धनेन भूतेन
5 P. add. ओजोगुणः । रूपकमनुप्रासः काव्यलिङ्गं च ॥ ५७ ॥

सर्ग २ 34

प्रतिमासमसौ निशापतिः खग ! संगच्छति यद्दिनाधिपम् ।
किमु तीव्रतरैस्ततः करैर्मम दाहाय स धैर्यतस्करैः ॥५८॥

प्रतिमासमिति[1] ।[हे खग !] यदसौ निशापतिश्चन्द्रः प्रतिमासममावास्यायां दिनाधिपे श्रीसूर्यं संगच्छति[2] ।सकर्मकत्वात् समो गम्यृच्छिप्रच्छी(पा॰ I.iii.29) त्यादिना आत्मनेपदं न भवति ।[3]स किमु चन्द्रो मम दाहाय मिलति ।कैः ?।करैः किरणैः ।किंभूतैः[4] ?। ततः श्रीसूर्यस्य सम्पर्कात्[5] तीव्रतरैः ।विरहिणो[6] हि चन्द्रकिरणाः दुःसहाः[7] । किंभूतैः ?। धैर्यस्य[8] तस्करैः ।[9] अत्रानुमानम् ॥५८॥

कुसुमानि यदि स्मरेषवो न तु वज्रं विषवल्लिजानि तत् ।
हृदयं यदमूमुहन्नमूर्मम यच्चातितरामतीतपन् ॥५९॥

कुसुमानीति[1] ।यदि स्मरस्य इषवः कुसुमानि [तु] पुनः वज्रं लोहमयानि न[2] भवन्ति ।तत्तर्हि[3] विषवल्लिजानि[4] पुष्पाणि तानि[5] भविष्यन्ति ।यदमूः इषवः मम हृदयम् अमूमुहत् ।यच्चातितराम् अतीतपन् तापितवत्यश्च । इषुशब्दः स्त्रीलिङ्गः पुंल्लिङ्गश्च ।[6]विषवल्लिजानि मोहं तापं च कुर्वन्ति[7] ॥५९॥

1 P1 ~~प्रतिमास~~ प्रति । 2 P1 अधिगच्छति । 3 P1 add. ततः 4 P2 om. किंभूतैः ?। 5 P1 P2 संसर्गात् 6 P1 विरहिणा 7 P1 om. विसर्गः 8 P1 धैर्यतस्करैः 9 P1 ~~add.~~ अनुप्रासः अनुमानं, सङ्गमस्य कारकत्वस्यापि सम्भवात् काव्यलिङ्गमपि। रूपकं च ।साध्यसाधनयोर्निर्देशोऽनुमानम् ॥ P2 om. अत्रानुमानम् ॥५८॥
1 P1 कुसु । 2 P2 भवन्ति न 3 B तत्र तर्हि 4 P1 °जातानि 5 P1 om. तानि भविष्यन्ति; P2 om. भविष्यन्ति । 6 P2 विषजानि 7 P1 add. अनुमानम् ॥५९॥

तदिहानवधौ निमज्जतो मम कन्दर्पशराधिनीरधौ ।
भव पोत इवावलम्बनं विधिनाऽऽकस्मिकसृष्टसंनिधिः ॥६०॥ /धि

[1]तदिहेति । [तत्] इहानवधौ निर्मर्यादे कन्दर्पशराणामाधिः मानसी पीडा स एव नीरधिः तत्र निमज्जतो[2] मम त्वं[3] हे हंस ! पोत इव प्रवहणमिव [नौरिव] अवलम्बनं भव । किंभूतस्त्वम्[4] ? । विधिना आकस्मिकः सृष्टः संनिधिर्यस्य स तथा[5] ॥६०॥

अथवा भवतः प्रवर्तना न कथं पिष्टमियं पिनष्टि नः ।
स्वत एव सतां परार्थता ग्रहणानां हि यथा यथार्थता ॥६१॥

[1]अथवेति । अथवा इयं भवतः नोऽस्माकं प्रवर्तना । प्रेरणा[2] कथं [पिष्टं] न पिनष्टि । यदहं भवन्तं स्वकार्ये[3] प्रवर्तयामि प्रेरयामि[4] । तत् वृथा पिष्टपेषणमेव करोमि[5] । हि यस्मात् सतां महात्मनां स्वत एव परप्रेरणं विनापि[6] परार्थता परकार्यकर्तृत्वम् । यथा ग्रहणानां[7] प्रमाणानां [यथार्थता][8] सत्यता प्रामाण्यं[9] स्वत एव । [10]यदाह- स्वतः सर्वप्रमाणानां प्रामाण्यमिति[11] गृह्यताम् ।
न हि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते ॥( ? )
इति । अनुमानं च - सर्वे प्रत्यया यथार्थाः । प्रत्ययत्वात् । घटप्रत्ययवत् ॥

1 P1 तदि । 2 P1P2 मज्जतो 3 P1 हे हंस ! त्वं 4 P1 add. पोतश्च 5 P1 add. रूपकमुपमा च । रूपकेण त्वभेदे प्रतिपादिते अनवधाविति भेदप्रतिपादनादतिशयोक्तिश्च । व्यतिरेकोऽपि घटते । तेनात्र सन्देहसङ्करः ॥ ६०॥
1 P1 अथवा । 2 P1P2 om. प्रेरणा 3 P1P2 om. स्वकार्ये 4 P1P2 om. प्रेरयामि 5 P1P2 om. करोमि 6 P1 विना 7 P2 add. ज्ञानानां 8 D सत्यार्थता 9 P2 om. प्रामाण्यं 10 P2 add. यथा च अनुमानम् । and सर्वे प्रत्यया.... प्रत्ययवत् here; and add. अत्र भट्टवार्तिकमपि

२१/ अथवा, गृह्यन्ते घटपटादयः पदार्था एभिरिति ग्रहणानि इन्द्रियाणि तेषां च[12] स्वत एव यथार्थता विषयग्रहणं, न तु परप्रेरणया। अथवा, ग्रहणानां ज्ञानानां यथा यथार्थता स्वत एव स्वप्रकाशत्वम्[13] ज्ञानानां यथेत्यर्थः॥

अथवा, ग्रहणानां शब्दानां[14] यथार्थता वाचकत्वं यथा स्वत एवेति[15]। [16]यथा इन्द्रियाणां यथार्थता स्वविषयता परार्था ओत्रसार्थैव। इन्द्रियैर्यथाऽऽत्मार्थविषयाः परिच्छिद्यन्ते, न हि विषयपरिच्छेदे इन्द्रियाणां फलमस्तीत्यर्थः। अत्र निदर्शनकाव्यलिङ्गदृष्टान्तालङ्काराः॥६१॥ /घ

तव वर्त्मनि वर्ततां शिवं पुनरस्तु त्वरितं समागमः।
अयि! साधय साधयेप्सितं स्मरणीयाः समये वयं वयः!॥६२॥

तव[1] वर्त्मनीति। हे हंस! तव वर्त्मनि[2] शिवं[3] (31a) कल्याणं वर्तताम्। पुनरपि त्वया सह ~~त्वरितं~~ समागमः त्वरितमस्तु। अयीत्यामन्त्रणे। हे हंस[4]! त्वं साधय[5] सिद्धिं गच्छ। तथा साधय

12 P1 P2 om. च 13 P2 om. स्व° 14 P1 add. यथा। 15 P1 एव प्रवृत्तत्वात्। अनुप्रासो निदर्शना काव्यलिङ्गम् उपमा॥ 16 P2 om. यथा....ऽलङ्काराः॥६१॥

1 P1 तव वर्त्मनि। 2 P1 add. मार्गे 3 P1 add. वर्तताम् 4 P2 त्वं हे हंस! 5 P1 add. गत्वा अत्राऽऽगच्छेति पुरुषे वक्तव्ये साधयेति सौकुमार्यं नाम गुणः। तदुक्तं - अपारुष्यं सौकुमार्यमिति (काव्यालं. सू. III.2.12) इति। यथाऽमृतं यशः शेष इत्याहुः। एकाकिनं देवताद्वितीय इति। तथा ईप्सितं साधय कुरु। अथवा एकमेव वाच्यम् ईप्सितं साधय साधय इति। द्विरुक्त्या सम्भ्रमो गम्यते। हे वयः

सर्ग २ 37

ईप्सितं कुरु ॥ [हे] वय: ! पक्षिन् ! वय समये स्मरणीया:[6] ॥ वियति स्वेच्छया गच्छतीति वय: । ईप्सितमभिलषितं [redacted] साधय साधय कुरु कुरु ।[7] आशीर्नामालङ्कार: ॥ ६२॥

इति तं स विसृज्य धैर्यवान्नृपति: सूनृतवाग्बृहस्पति: । /बृ
अविशद्वनवेश्म विस्मित: स्मृतिलग्नै: कलहंसशंसितै: ॥६३॥

इति[1] समिति । स नलस्तं हंसमिति विसृज्य[2] वनस्य वेश्म [अविशद्] विवेश । धैर्यवान् । तथा सूनृता सत्या [या] वाक् वचनं तत्र, बृहस्पतितुल्य: । किंभूत: ? । स्मृतौ लग्नै: कलहंसशंसितै:[3] विस्मित: साश्चर्य:[4] ॥ ६३॥

अथ भीमसुतावलोकनै: सफलीकर्तुमहस्तदेव स: । //ह
ना/ क्षितिमण्डलमण्डनायितं नगरं कुण्डिनमण्डजो ययौ ॥६४॥

अथ[1] भीमेति । अथ अण्डज: पक्षी क्षितिमण्डलस्य मण्डनायितं कुण्डिनं नगरं ययौ । किं कर्तुम् ? । भीमसुताया: अवलोकनै: तदेवाऽह: सफलीकर्तुम्[2] ॥ ६४॥

6 P. add. व्यन्तो वा । यथोपकारिप्रकरणे भवन्तमेव स्मराम: । तथा यतितव्यमित्यर्थ: । दमयन्ती यथा समयेऽस्मानेव स्मरति तथा प्रयतितव्यम् ।
के/ इति केचित् । आशीरलङ्कार: । यदुक्तं - आशीर्नामाभिलषिते वस्तुन्याशंसनं यथा (काद II 357) । अनुप्रासश्च ॥ 7 P2 om. आशीर्नामालङ्कार: ॥६२॥
1 P. इति तम् । 2 P. add. वनमेव वेश्म अथवा 3 G. °संशितै:; P. P2 कलहंसस्य 4 P. P2 om. साश्चर्य:; 5 P. Pr. रूपकमतिशयोक्तिश्च ॥६३॥
1 P. अथ भीम । P2 अथ भीमसुतेति । 2 P. add. अनुप्रासोपमा ॥६४॥

सर्ग २ 38

प्रथमं पथि लोचनातिथिं पथिकप्रार्थितसिद्धिशंसिनम्
कलशं जलसंभृतं पुरः कलहंसः कलयांबभूव[1] सः ॥६५॥

प्रथममिति[2]। स कलहंसः प्रथमं पथि जलसंभृतं कलशं पुरः[3] कलयांबभूव ददर्श। किंभूतम्? लोचनयोरतिथिम्[4]। तथा पथिकानां प्रार्थितस्य सिद्धिं शंसतीत्येवंशीलम्। एतेन शकुनेन कार्यसिद्धिः[5]। अनुप्रासः ॥६५॥

अवलम्ब्य दिदृक्षयाम्बरे क्षणमाश्चर्यरसालसं गतम्। /ङ्गं
भू/ स विलासवनेऽवनीभृतः फलमैक्षिष्ट रसालसंगतम् ॥६६॥ /ङ्गं

अवलम्ब्येति[1]। स पक्षी अवनीभृतो नलस्य विलासवने उद्याने रसालेनाऽऽम्रेण संगतं लग्नं[2] फलमैक्षिष्ट[3]। किं कृत्वा? क्षणमम्बरे[4] आश्चर्यरसेन[5] अलसं मन्दं गतं गमनम् अवलम्ब्य। कया? दिदृक्षया उद्यानदर्शनेच्छया।[6] अत्राऽन्त्यसंदष्टयमकमलङ्कारः ॥६६॥

नभसः कलभैरुपासितं जलदैर्भूरितरङ्गपन्नगम्।
स ददर्श पतङ्गपुङ्गवो विरपच्छन्नतरङ्गपन्नगम् ॥६७॥

नभसेति[1]। स पतङ्गपुङ्गवः नगं क्रीडापर्वतं ददर्श।

1 I2 स्थल ०चकार 2 I1 प्रथमं। I2 प्रथमं पथीति। 3 I1 add. पुरोवर्तिनि देशे— ग्रतः कलयांचकार। 4 I2 लोचनयोतिथिम् 5 I1 add. कलसमिति पाठः। I2 om. अनुप्रासः ॥६५॥ / 1 I1 अव। 2 I1 I2 om. लग्नं 3 I1 add. एतेन शकुन— कथनमिदमपि। 4 I1 add. विलासवनस्य 5 B अनलसं 6 I1 अन्त्यसंदष्टके यमकम्। I2 om. अत्रा०...मलङ्कारः ॥६६॥ / 1 I1 नभसः। I2 ~~नभसः~~ नभसः कलभैरिति।

किंभूतम्? । जलदैः उपासितम् । किंभूतैः? । नभसः आकाशस्य कलभैः [2] हस्तिबालकैः । किंभूतम्? । भूरयस्तरक्षवो मृगविशेषाः पन्नगाश्च यत्र तं [3] तथा । [तथा] (3b) [विटपैः शाखाभिः छन्नतराः छादिताः [4] क्षुपाः ह्रस्ववृक्षाः यत्र तं तथा । व्याघ्राच्चित्रिकायां जातः तरक्षुः । ह्रस्वशाखा-शिफः क्षुपः (अमर° II.iv.8)[5] । [6] अत्रातिशयोक्तिरन्त्यसंदष्टयमकं च ॥६७॥

स ययौ धुतपक्षतिः क्षणं क्षणमूर्ध्वायनदुर्विभावनः ।
विततीकृतनिश्चलच्छदः क्षणमालोककदत्तकौतुकः ॥६८॥

स [1] ययाविति । स पक्षी [क्षणं] क्षणमात्रं धुतपक्षतिः सन् ययौ । क्षणम् ऊर्ध्वायनेन उच्चैर्गमनेन दुर्विभावनो दुर्लक्ष्यः । तथा क्षणं विततीकृता निश्चलाः छदाः [2] पक्षा येन स तथा । अत एवाऽऽलोककानां दत्तं कौतुकं येन स [3] तथा । [4] अत्र दीपकजात्योः सङ्करः ॥६८॥

तनुदीधितिधारया रयाद्द्रुतया लोकविलोकनामसौ ।
छदहेम कषन्निवाऽलसत् कषपाषाणनिभे नभस्तले ॥६९॥

[1] तनुदीधितीति । असौ हंसो नभस्तलेऽलसत् शुशुभे । [2] किंभूते? । कषपाषाणः [3] सुवर्णनिकषोपलस्तन्निभे । कया? । तनोः शरीरस्य दीधितीनां

2 B हस्तिभिः बालकरिभिः 3 B add. तस्मात् 4 B ह्रस्वशाखाशिफः क्षुपः at the end. 5 P add. तरक्षुस्तु मृगादनः (अमर° II.v.1) । 6 P रूपकमतिशयोक्तिर्वा । अन्त्यसंदष्टकं च ॥ P2 om. अत्रा°...°यमकं च ॥६७॥
1 P स य । P2 स ययौ धुतेति । 2 P om. विसर्गः; P2 om. पक्षा 3 P2 om. स 4 P दीपकं जातिश्च ॥ P2 om. अत्र ... सङ्करः ॥६८॥
1 B °दीधितिरिति । P तनुदीधिति । 2 P P2 किंविशिष्टे? । 3 B add. निभे

किरणानां धारया[4] रेखया। किंभूतया?। रयात्[5] लोकानां विलोकनं गतया। उत्प्रेक्ष्यते- छदानां [पक्षाणां] हेम सुवर्णं कषन्निव घर्षन्निव। निकषे हि सुवर्णस्य[6] रेखा भवति।[7]अत्रोत्प्रेक्षोपमा ॥ ६९॥

---

विनमद्भिरधःस्थितैः खगैर्झगिति श्येननिपातशङ्किभिः।
स निरैक्षि दृशैकयोपरि स्यदझङ्कारितपत्रपद्धतिः ॥७०॥ /झ

---

विन[मो]द्भिरिति[1]। स हंसोऽधःस्थितैः खगैः पक्षिभिरुपरि स्थित एकया दृशा दृष्ट्या निरैक्षि। किंभूतः?। स्यदेन वेगेन झङ्कारिता[2] सशब्दा, पत्राणां पक्षाणां पद्धतिर्मार्गो यस्य[स तथा।][3]। किंभूतैः?। झगिति श्येननिपातं शङ्कन्ते इत्येवंशीलैः[4]।श्येनभ्रान्त्या भीतैः।अत एव[5] विशेषेण नमद्भिः[6]॥७०॥

६६/

---

ददृशे न जनेन यन्नसौ भुवि तच्छायमवेक्ष्य तत्क्षणात्।
दिवि दिक्षु वितीर्णचक्षुषा पृथुवेग[1]द्रुतमुक्तहस्पथः ॥७१॥

---

[2]ददृशे नेति। असौ पक्षी जनेन यन् गच्छन् सन् न ददृशे। किंभूतेन?। भुवि भूमौ[3] तस्य छायां[4] [अवेक्ष्य] दृष्ट्वा दिवि आकाशे दिक्षु च वितीर्णं[5] चक्षुर्येन[6] तेन तथा।[7]किमिदं छायारूपमिति। अमनु-

---

4 P.P2 धारा रेखा तया 5 P2 om. रयात् 6 P2 सुवर्णरेखा 7 P. अनुप्रास उत्प्रेक्षा उपमा च ॥ P2 om. अत्रोत्प्रेक्षोपमा ॥ ६९॥ || 1 P. विनमद्भिरध: 2 P. add. शब्दिता 3 edr. add. स तथा 4 P.P2 श्येनस्य 5 P. add. झगिति 6 P. add. आतिः काव्यलिङ्गं च ॥७०॥ 1 P2 ~~वेगो~~ 2 P. ददृशे न जनेन ॥ P2 ददृशे न जनेनेति। 3 P.P2 पृथिव्यां 4 P.P2 add. हंसच्छायां 5 P2 विस्तीर्णं 6 P. येन स तथा तेन 7 P. om. किमिदं छायारूपमिति।

ब्यात् छायाशब्दो[8] नपुंसकलिङ्गः। [छायान्तस्तत्पुरुषो वा नपुंसकलिङ्गः। पूर्वपदार्थधर्मे तु, छाया बाहुल्ये (पा० II.iv.22) इति नित्यम्। यथा शलभच्छायम्]। किंभूतः? पृथुना वेगेन[9] द्रुतं [गमनं येन] मुक्तो दृशः प(उप)न्था येन स तथा। ऋक्पूरब्धूः पथामानक्षे (पा० V.iv.74) इति [redacted] अ[10] ॥७१॥

न वनं पथि शिश्रियेऽमुना क्वचिदप्युच्चतरद्रुचारुतम्।
न स गोत्रजमन्ववादि वा गतिवेगप्रसरद्रुचा रुतम् ॥७२॥

न[1] वनमिति। अमुना हंसेन पथि गच्छता वनं क्वचिदपि न शिश्रिये। किंभूतम्? उच्चतराणां द्रूणां द्रुमाणां चारुता यस्य तत्तथा। वा[2] अथवा अनेन सगोत्राज्जातं रुतं शब्दो नान्ववादि अनूदितम्[3]। किंभूतेन? गतिवेगेन प्रसरन्ती रुक् दीप्तिर्यस्य तेन तथा।[4] यमकम् ॥७२॥

अथ भीमभुजेन पालिता नगरी मञ्जुरसौ धराजिता।
पतगस्य जगाम दृक्पथं हरशैलोपमसौधराजिता ॥७३॥

अथ[1] भीमेति। अथ भीमनृपस्य भुजेन पालिता [असौ][2] नगरी पतगस्य पक्षिणः दृशः पन्थानं जगाम। किंभूता? मञ्जुर्मनोज्ञा।

8 P. add. वा। परस्वराच्छायाशालानिशामामिति(पा० II.iv.25) ति। 9 P. add. यत् 10 B R अच्; P. उच्, edn. अ। P. fur. काव्यलिङ्गं च। पुनरुक्तवदाभासश्च। वेगद्रुतशब्दयोरेकार्थावभासनात् ॥७१॥ १८

1 P. न वनं। R न वनं पथीति। 2 P. R समुच्चये 3 R add. इति गमनविषये सादरता प्रतिपादिता। 4 R om. यमकम् ॥७२॥

1 P. अथ भीम। R अथ भीमभुजेनेति। 2 P. R असौ om. किंभूता?

सर्ग २ 42

किंभूतेन? । धरां पृथ्वीं भयतीति भुजः तेन तथा । किंभूता? । हरशैलः [कैलासः] स्तदुपमैः सौधैः धवलगृहैः राजिता । अत्र समासोपमा यमकं च ॥७३॥

त्र/ दयितं प्रति यत्र संतता रतिहासा इव रेजिरे भुवः ।
स्फटिकोपलविग्रहा गृहाः शशभृद्भित्तनिरङ्कभित्तयः ॥७४॥

दयितं[1] प्रति[इति] । यत्र पुरि स्फटिकोपलानां विग्रहाः देहा येषां ते तथाविधा गृहाः हर्म्याणि रेजिरे । किंभूताः? । शशभृतः चन्द्रस्य भित्तं खण्डं तद्वन्निरङ्का निष्कलङ्का भित्तयो येषां ते तथा। शुभ्राः[2] । भित्तं शकलमि(पा० VIII । ॥ 59)ति । भित्तर्ण[3] भित्ता (IV vi 114) /ति इति कात्यायनः । उत्प्रेक्षते- भुवो[4] भूमेर्दयितं भर्तारं भीमं प्रति संतता रतिहासा इव क्रीडानर्माणीव[5] । उत्प्रेक्षा लुप्तोपमा[6] ॥७४॥

नृपनीलमणीगृहत्विषामुपधेर्यत्र भयेन भास्वतः ।
शरणार्थमुवास वासरेऽप्यसदावृत्त्युदयत्तमं तमः ॥७५॥

नृपनीलेति[1] । यत्र पुरि[2] वासरेऽपि तमोऽन्धकारमुवास[3] शरणार्थम् । केन? । भास्वतः[4] सूर्याद् भयेन । किंभूतं तमः? । असती अविद्यमाना या आवृत्तिः पुनःपुनरुत्पत्तिः तथा उदयत्तमम्[5] अतिवर्द्धमानम् । अन्यत्र[6] तमो भवति न भवति च । अत्र[7] तु स्थिरमेव[8] । कस्मात्? ।

अ। यमकमुपमा च ॥ R om. अत्र .... यमकं च ॥७३॥ 1 P दयितं । R दयितं प्रतीति । 2 R शुभ्राः adds कात्यायनः 3 R भित्तेर्न 4 P R पृथिव्याः 5 B नर्माणि 6 P अनुप्रासोत्प्रेक्षोपमा[:] ॥७४॥ 1 P नृप । 2 P R नगर्यां 3 P शरणार्थमुवास । 4 R add भयेन 5 P R om. अतिवर्द्धमानम् 6 B add. अथोत्प्रेक्षति- [वि]भावनासङ्करो 7 R om. तु 8 P add असती आवृत्तिः आवरणं तथा इति वा । न सदा नित्यमावृत्तिर्यस्य तत्तथा । उदयत्तमं इति व्यस्तं समस्तं वा ।

नृपस्य भीमस्य नीलमणिगृहाणाम् इन्द्रनीलवेश्मनां उपधेः छलात् ॥७५॥

सितदीप्रमणिप्रकल्पिते यदगारे हसदङ्करोदसि ।
निखिलान्निशि पूर्णिमा तिथीनुपतस्थेऽतिथिरेकिका तिथिः ॥७६॥

सितदीप्रेति[1] । यस्याः पुरो अगारे धवलगृहे एकिका पूर्णि(उरु)मा तिथिः निशि निखिलान् अन्यान् तिथीन् प्रति अतिथिरुपतस्थे[3] प्राघुणिकी सर्वासु[4] तिथिषु पूर्णिमा[5] आगच्छति । किंभूते[6]? । सिता[ः] शुभ्रा दीप्रा ये मणयः स्फटिकास्तैः प्रकल्पिते । पुनः किंभूते? । हसन् हास्ययुक्तोऽङ्को मध्यं यस्य तत् [रोदो][8] हसदङ्करोदो यत्र[9]। हसन्ती अङ्के रोदसी यत्र अगारे तस्मिन् तथा । तेन शुभ्रेणाऽऽलयेन[10] द्यावापृथिव्यौ हसत इव[11] ॥७६॥

सुपतीजनमज्जनार्पितैर्घुसृणैर्यत्र कषायिताशया ।
न निशासिलयापि वापिका प्रससाद गृहिलेव मानिनी ॥७७॥

1 l. add. अपह्नुतिर्विभावना उदात्तं च । वासरे सत्यपि तमोनाशाभावः । इन्द्रनीलमणीनां गृहाः सन्तीत्युदात्तम् ॥७५॥ 1 l. सित । 2 l. add. तिथयोर्द्वयोः अतिथिर्न गृहागतो, नास्ति तिथिरस्याऽतिथिः । अतति सततं गच्छति वा । उपाद्देवकरणपूजासङ्गतिकरणमित्रकरणपथिष्विति वक्तव्यमि(वा॰ ५१५)ति सङ्गतकरणे आत्मनेपदम् । सङ्गतकरणमुपाश्लेषो यथा गङ्गां यमुना उपतिष्ठते । वा लिप्सायामि(वा॰ ६२४)ति वा आत्मनेपदम् । 3 l. प्राघुणकी 4 l. l2 सर्वेषु 5 l. om. पूर्णिमा 6 l2 किंभूतैः? 7 l. add. यो 8 edz. add. रोदो 9 l. अथवा 10 l. l2 गृहेण 11 l. add. अनुप्रासः । सर्वासु तिथिषु पूर्णिमासम्बन्धप्रतिपादनात् असम्बन्धे सम्बन्धरूपातिशयोक्तिः । उदात्तम् । तिथीनां गृहस्थव्यवहारसमारोपात्समासोक्तिः । पूर्णिमा अतिथिरिति रूपकं च ॥७६॥

सर्ग २ 44

सुदतीजनेति । यत्र पुरि वापिका [दीर्घिका] अखिलयापि समग्रया निशापि [रात्र्या] न प्रससाद न निर्मला बभूव। किंभूता?। सुदतीजनस्य कान्ताजनस्य मज्जनेन स्नानेन अर्पितैः घृसृणैः कुङ्कुमैः कषायिता गडुलिता [सुरभिता] आशयो मध्यं यस्याः सा तथा। [का इव?] ग्रहिला आग्रहपरा मानिनीव। यथा [सा] सकलयापि रात्र्या मान्यमाना सती पतिं प्रति न प्रसीदति। साऽपि कषायितः कुपित आशयो मनो यस्याः तथाविधा भवति ॥७७॥

अणनीरवया यथा निशि श्रितवप्रावलियोगपट्टया ।
मणिवेश्ममयं स्म निर्मलं किमपि ज्योतिरबाह्यमिज्यते ॥७८॥

अणनीरवया इति। यया नगर्या मणिमयानां वेश्मनां सम्बन्धि सावयवभूतं किमप्यबाह्यमाभ्यन्तरं ज्योतिर्निर्मलमिज्यते स्म प्राप्यते स्म। यज (१०७१) देवपूजायां सङ्गतौ च वर्तते। किंभूतया? [अण] नीरवया निःशब्दया। निशि रात्रौ लोके सुप्ते सति निःशब्दं भवति। तथा श्रितो वप्रस्य प्राकारस्य आवलिरेव योगपट्टो यया तया तथा। यथा काचिद्योगिनी रात्रौ निःशब्दा सती योगपट्टमाश्रित्य निरतिशयं हृदये ज्योतिः परमात्मविज्ञानमवाप्नोति ॥७८॥

1 I. सुदतीजनमज्जनार्पितैरित्यादि । 2 I2 यस्यां नगर्यां 3 I. निशा सकलया 4 I. निर्मला न 5 I. लोकस्य 6 I. I2 अनुनीयमाना 7 I. add. सपत्नीजने सुदतीजने यन्मज्जनमत्यासक्तिः प्रियस्येति शेषस्तेनाऽर्पितैः प्रियं सङ्क्रान्तैः घृसृणैः 8 I. I2 चित्तं 9 I. add. उदात्तोपमे विरोधोऽपि ॥७७॥ 1 I. अण। I2 अणनीरवयेति। 2 B वेशानां 3 I. I2 अवयव॰ 4 B ॰मिष्यते 5 I2 यजि 6 I. देवपूजासङ्गतौ 7 I2 om. च 8 B जने 9 I. om. तथा 10 I. वप्रावलिः 11 I. om. रात्रौ 12 I. I2 श्रित्वा 13 I. I2 प्राप्नोति I. Iv2. रूपकमुदात्तम्। वेश्ममयमित्यपह्नुतिरपि ॥७८॥

विलल्लास जलाशयोदरे क्वचन द्यौरिव नुबिम्बितेव या।
स्र/ परिखाकपटस्फुरत्स्फुरत्प्रतिबिम्बानवलम्बिताम्बुनि ॥७९॥

विलल्लासेति[1]। या नगरी विलल्लास शुशुभे। उत्प्रेक्ष्यते-क्वचन कस्मिन्नपि जलाशयस्योदरे मध्ये अनुबिम्बि(त इ)वेता द्यौरिव स्वर्ग इव। किंभूते उदरे?। परिखायाः कपटेन व्याजेन स्फुरं स्फुरन् उल्लसन् प्रतिबिम्बस्तेन अनवलम्बितम् अम्बु[2] यत्र तत्र[3] तथा। अयमर्थः [ ] मध्ये नगरी पर्यन्ते च जलपूर्णा परिखा। यदा च किञ्चिद्वस्तु जले प्रतिबिम्ब्यते तदा मध्ये प्रतिबिम्बं[4] भवति। परितश्च केवलं जलम्। अत्र च यावति प्रदेशे नगरी तत्र द्यौः प्रतिबिम्बिता। यत्र परिखा तत्र केवलं जलमिव[5] प्रतिबिम्बेन अनवलम्बितं प्रतिभाति[6] ॥७९॥

व्रजते दिवि यद्गृहावलीचलचेलाञ्चलदण्डताडनाः।
व्यतरन्नरुणाय विश्रमं सृजते हेलिहयालिचालनाम् ॥८०॥

व्रजते[1] दिवीति। यस्या[2] गृहावल्यां चलाश्चेलाञ्चलाः ध्वजाञ्चला (एव) दण्डाः कशास्तेषां ताडना[3]: प्रहारा दिवि व्रजतेऽरुणाय (श्री)सूर्यसारथये विश्रममिव[4] व्यतरन्[5]। किंभूताय[6]?। हेलेः श्रीसूर्यस्य हयानामाल्याः पङ्क्तेः चालनां[7] प्रेरणां सृजते। यदा अरुणो नगर्या उपर्यागच्छति[8] तदा ध्वजपटा एव स्वयमश्वान् खेटयन्ति। तदा सारथेर्विश्रामः[9] ॥८०॥

1 P. विलल्लास। 2 P. पानीयं 3 P. तत्तथा 4 P2 add. च 5 P. P2 जलमिव abt. अनवलम्बितं 6 P. add. उत्प्रेक्षा अपह्नुतिश्च ॥७९॥ 1 P. व्रजते दिवि। 2 P2 यस्यां 3 P. P2 om. विसर्गः 4 P. om. इव 5 P. add. अ(रु)णः 6 B हरेः 7 P2 चालनां 8 P. समागच्छति 9 P. P2 add. भवति। ~~[illegible]~~ अनुप्रासो रूपकं, ताडनानामरुणकार्यसम्बन्धप्रतिपादनादसम्बन्धरूपातिशयोक्तिः ॥८०॥

क्षितिगर्भधराम्बरालयैस्तलमध्योपरिपूरिणां पृथक्।
जगतां खलु याऽखिलाद्भुताऽजनि सारैर्निजचिह्नधारिभिः॥८१॥

[1]क्षितिगर्भेति। या [2]पुरी खलूत्प्रेक्षते – जगतां त्रयाणां सारै-
रजनि। किंभूतानाम्?। तलं पातालं मध्यं [3]पृथिवी उपरि [4]स्वर्लोकः एतानि
पूरयन्तीत्येवंशीलानां [5]जगताम्। कथम्?। पृथक् [6]पृथक् पूरयताम्।
यतोऽखिलाप्यद्भुतरूपा। किंभूतैः [सारैः]?। क्षितिगर्भे पाताले धराया-
मम्बरे अन्तरिक्षे [7]च आलयो येषां साराणां तैस्तथा। क्षितिगर्भो भूगृहं,
धरा [10]भूमिरेव, [*]अम्बर[8]मुपरितनभूमिस्तदालयै[9]रित्यपि व्याख्या। अत एव
निजानि स्वानि चिह्नानि धारयन्तीत्येवंशीलैः। तस्यां पुरि[11] सर्वाणि
वस्तूनि लोकत्रयसम्बन्धीनि [12]तल्लक्षणलक्षितानि दृश्यन्ते [13]इत्यर्थः।
यथासंख्यमलङ्कारः। त्रैलोक्यवस्तूनां तत्र संभवादुदात्तमपि॥८१॥

दधदम्बुदनीलकण्ठतां वहदत्यच्छसुधोज्ज्वलं वपुः।
कथमृच्छतु नाम यत्र न क्षितिभृन्मन्दिरमिन्दुमौलिताम्॥८२॥

[1]दधदम्बुदेति। यत्र [2]पुरि [3]क्षितिभृतो राज्ञो मन्दिरं न कथं
नाम इन्दुमौलितामृच्छतु[5]। अपि तु [6]इन्दुमौलौ यस्य तस्य भावस्तत्ता
ता(३३b)माप्नोतु[7], उच्चैस्तरत्वात्। अथ च महेश्वरत्वम्। किं कुर्वन्?

1 P. क्षिति। 2 P.R नगरी 3 B भूमिः 4 P. स्वर्गलोकः 5 P. add. भूतानां 6 P.R om. पृथक् 7 R °रिक्षलोके 8 P. om. °तन° 9 P. °रित्यत्र यथासंख्यतोऽपि व्याख्या। 10 P. निजानि B स्वानि R स्वानि निजानि 11 P.R नगर्यां 12 R add. तत् 13 B अत्रार्थः P. अनुप्रासो यथासंख्यमुत्प्रेक्षा उदात्तं च। R om. यथासंख्य°...°दुदात्तमपि। K3
1 P. दधदं। 2 P.R नगर्यां 3 R °पते 4 P. add. कथं न; R add. न hue. 5 R recto. sup. mg. add. न गच्छतु गच्छत्वेव 6 R recto. sup. mg. add. अत्युच्चत्वात् 7 P.R प्राप्नोतु।

अम्बुदेन नील: कण्ठ: उपरिभागो यस्य तस्य भावस्तत्ता तां दधत् उच्च[8]त्वादेव । ईश्वरोऽपि मेघवन्नीलकण्ठ: । तथा अत्यच्छतया सुधया

त/ चूर्णविशेषेण उज्ज्वलं वपुर्वह[9]ति । श्रीमहादेवोऽपि सुधावत् [10]निर्मलपीयूष-वत् श्वेतं वपुर्बिभर्तीति । इन्दुमौलिश्च । [11]श्लेषालङ्कार: ॥८२॥

बहुरूपकशालभञ्जिकामुखचन्द्रेषु कलङ्करङ्कव: ।
यदनेककसौधकन्धराहरिभि: कुक्षिगतीकृता इव ॥८३॥

[1]बहुरूपकेति । [बहु]रूपका[2] नानारूपा या: शालभञ्जिका:[3] पुत्तलिका: तासां मुखचन्द्रेषु कलङ्करङ्कव: लाञ्छनमृगा यस्या नगर्या: अने[का]कै: सौधकन्धराणां हरिभि: सिंहै: कुक्षिगतीकृता इव [भक्षिता इव] । [4]अत एव न दृश्यन्ते ॥८३॥

बलिसद्मदिवं स तथ्यवागुपरि स्माऽऽह दिवोऽपि नारद: ।
अधराऽथ ~~कृतेव~~ कृता ययेव सा विपरीताऽजनि भूविभूषया ॥८४॥

[1]बलिसद्मेति । स नारद: बले: सद्म पातालल[क्ष]णं दिवं श्री[विष्णु]पुराणे दिवोऽपि स्वर्गादपि उपरि आह स्म[2] रमणीयमुक्तवान् । [3]किंभूतो नारद: ? । तथ्यवाक् सत्य[4]गी: । सा पातालद्यौ: यया नगर्या भुवो विभूषया[5] अधरा[6] कृता[7] । अथ पश्चाद्विपरीता अधोभागस्थिता अजनीव[8] ॥ता॥

[8] B सुधया [9] P2 ०र्वर्तते [10] P1P2 om. निर्मलपीयूषवत् [11] P1 श्लेषो रूपकं च ॥ P2 om. श्लेषालङ्कार: ॥८२॥ [1] P1 बहु [2] P1 नानारूपका:; P2 बहुरूपा नानारूपा [3] P1P2 om. विसर्ग: [4] P1 रूपकमुत्प्रेक्षा ॥ P2 om. अत... दृश्यन्ते ॥८३॥ [1] P1 बलि-सद्मदिवं । [2] P1 add. अथ च ऊर्ध्वम् [3] BP2 किंभूतो... सत्यगी: at the end. [4] P1 om. सत्यगी: [5] P1 भूषया [6] P2 अधरीकृता [7] B add. इव; P1P2 add. अध:-कृता ॥ P1 for. अधोभागे कृता तिरस्कृता च ॥८४॥

सर्ग २ 48

[1] प्रतिहट्टपथे घरट्टजात् पथिकाह्वानदसक्तुसौरभैः।
ना/ कलहान्न घनान्त्यदुत्थिताद् अधुनाप्युज्झति घर्घरस्वरः ॥८५॥

[2] प्रतिहट्टेति। यस्या नगर्याः सकाशात् उत्थितात्[3] पथिकानाम् आह्वानदैः[4] सक्तूनां सौरभैः परिमलैः सह कलहात् अधुनापि घर्घर[5]-स्वरः घनान् मेघान् [न] उज्झति। व्वा। प्रतिहट्टपथे। वा तृतीया-सप्तम्योः (पा॰ II.iv.84) इति विकल्पेनाऽम्भावः। किंभूतात्[6]?। घरट्ट-जातात्[7]। सक्तुसौरभाणि आत्माभिमुखं पथिकमाकारयन्ति। मेघाश्च स्वगृहं प्रति प्रस्थापयन्ति। अतः कलह इति[8] ॥८५॥

वरणः कनकस्य मानिनीं दिवमङ्कादमराद्रिरागताम्।
घनरत्नकपाटपक्षतिः परिरभ्याऽनुनयन्नुवास याम् ॥८६॥

[1] वरणः [कनक]स्येति। कनकस्य वरणः प्राकारः एव-मराद्रिर्मेरुर्यां नगरीमेव दिवं स्वर्गं परिरभ्य अनुनयन् सन् उवास[2]। किं-भूताम्?। दिवं मानिनीम्। तथा अङ्कादुत्सङ्गादागताम्। किंभूतः?। [3] घनानि रत्नमयानि कपाटान्येव] पक्षती[4] यस्य स तथा।[5] अपक्षच्छेद-त्वात् पक्षतिः पक्षमूलम् ॥८६॥

अनलैः परिवेषमेत्य या ज्वलदर्कोपलवप्रजन्मभिः।

1 l₂ +ww प्रतिहट्टपथं 2 l₁ प्रतिहट्ट। l₂ प्रतिहट्टपथेति। 3 l₂ उत्थितान् 4 l₂ कलहान् 5 l₁ add. विसर्गः 6 B l₂ किंभूतान्! 7 B जातान्; l₂ घरट्टजातान् 8 l₁ add. अध्यवसायस्य सिद्धत्वादतिशयोक्तिः ॥८५॥ 2 l₁ वरणः। l₂ वरणः कनकेति। 2 l₁ add. वृणोति वरणः। प्राकारो वरणः शालः (अमर॰ II ...)
3) 3 l₁ घनरत्ने घने रत्नमये कपाट एव पक्षती 4 B अपति 5 l₁ add. रूपकम्। व्यवहारप्रतीतिस्तु रूपकादेव। तेनात्र समासोक्तिः ॥८६॥

सर्ग २ 49

उदयं लयमन्तरा स्वैरवहद्बाणपुरीपरार्ध्यताम् ॥८७॥

अनलैरिति[1]। या पुरी[2] रवे[श्री]सूर्यस्य उदयं लयाल्लयमस्तं चाऽन्तरा मध्ये बाणासुरस्य पुरीवत् परार्ध्यतां रम्यत्वमवहत्। किं कृत्वा? अनलैर्वह्निभिः[3] परिवेषमेत्य प्राप्य। किंभूतैः?[4] ज्वलन्तो येऽर्कोपला[5] तेषां वप्रान्तरात् जन्म[6] येषां तैस्तथा। बाणपुरे[7] श्रीमहादेवप्रसादात् परितो वह्निर्ज्वलितवान्[8][9]॥८७॥

बहुकम्बुमणिर्वराटिकागणनाटत्करकर्करोत्करः।
हिमवालुकयाच्छवालुकः पटु दध्वान यदापणार्णवः॥८८॥

बहुकम्बुमणिरिति[1]। यस्या आपणो हट्[ट्]श्रोणिरेवाऽर्णवः[2] पटुतरं दध्वान। किंभूतः? बहवः [कम्बवः] शङ्खा मणयः[3] [च] यत्र। समुद्रोऽपि[4] तथा। वराटिकानां गणनया अटन्तो[5] ये वणिजां करा[हस्ता]स्त[6] एव [कर्]कराः कच्छपास्तेषामुत्करः समूहो यत्र स तथा। करोऽपि पञ्चाऽङ्गुलित्वात् कच्छपवत्[7] कपर्दिकागणनायां चलति[8][9]। पुनः[10] किंभूतः? हिमवालुकया कर्पूरेण अच्छा वालुका यत्र स तथा[10]॥८८॥

द्वि/ यदगारघराट्टकुट्टिमस्रवदिन्दूपललुन्दितलापया।

1 P1 अनलैः। P2 अनलैः परिवेषमिति। 2 P1, P2 नगरी 3 P1 अग्निभिः; P2 अग्निभिः om. ल्य 4 P2 तरा 5 P1 ते तथा 6 P1, P2 ॰नगरे 7 B रुद्र॰ 8 P1, P2 वैश्वानरो 9 P1 add. अनुप्रासोदात्तनिदर्शनाः॥८७॥ 1 P1 बहुकम्बु। P2 ॰मणिमिति। 2 P2 ॰श्रोणिरिव 3 P1 om. च 4 P2 समुद्रोऽपि 5 P1, P2 ये अटन्तो; P1 add. गच्छन्तो 6 B ॰स्तत 7 P1 कलीरा॰ 8 P1 कलीरवत् 9 P1 add. अर्णवश्च बहुत्वात् वराटिका नाम गणनो भवति। अटत्कर्करकश्च। 10 P2 किंभूतः पुनः? 11 P1 add. अनुप्रासो रूपकं च॥८८॥

मुमुचे न पतिव्रतौचिती प्रतिचन्द्रोदयमभ्रगङ्गया ॥८९॥

यदगारेति[1]। अभ्रगङ्गया[2] प्रतिचन्द्रोदयं पतिव्रताया औचिती योग्यता न मुमुचे। किंभूतया?। यस्या[3] अगाराणां धरासु यान्यट्टकुट्टिमानि उपरि[भाग]बद्धभूमिकानि तेषु[4] स्रवन्तो ये इन्दूपला: चन्द्रकान्तमणय:[5] तैस्तुन्दिला: प्रचुरा आपो[6] यस्यास्तया[7] तथा। तुन्दादिभ्य इलच्च (पा॰ V. ii. 117) [इति] इलच् प्रत्यय:]। चन्द्रोदये हि समुद्रो वर्धते[8] एव। तथा सौधानामुच्चत्वात् आकाशगङ्गाऽपि[9] चन्द्रकान्तजलै:[10] नित्यं वर्द्धते। अत्र[11][12] ( ) इति अत्। ऋक्पूरब्धू:-पथामानक्षे (पा॰ V. iv. 74) इति पाणिनीयम्[13]॥ ८९॥

रुचयोऽस्तमितस्य भास्वत: स्खलिता यत्र निरालया: खलु।
अनुसायमभुर्विलेपनापणकश्मीरजपण्यवीथय: ॥९०॥

रुचय इति[1]। यत्र[2] विलेपनापणे[3] सौरभिहट्टिकायां[4] कश्मीरजपण्य[स्य] कुङ्कुमस्य वीथयो[5] अनुसायम् अभु:। खल्विति मन्ये। अस्तमितस्य भास्वत: स्खलिता: पतिता: रुचय: कान्तय इव किंभूता:?। निरालया: निराश्रया:[6]॥ ९०॥

1 I. यदगारधरा। 2 I2 अभ्रगङ्गया 3 B तस्या:, I. यस्य 4 I. तेन 5 B कान्ता 6 B तस्या: 7 B तुन्दिलादि॰ 8 I I2 om. एव 9 I. गङ्गापि इन्दुकान्तजलप्रवाहैर्नित्यं वर्धत एवा; 10 I2 जलैर्वर्द्धत एव नित्यम्। 11 I, I2 om. अत्र 12 B पथिन् लुट् इति अच् 13 I. add. अतिशयोक्ति काव्यलिङ्ग-मुदात्तं च ॥८९॥

1 I. रुचा I2 रुचयोऽस्तमितमिति। 2 B यस्या: 3 B विलापनाप्सुरभिहट्टि॰ 4 I2 add. या 5 I. add. पङ्क्तयो 6 I. add. अनुप्रास उत्प्रेक्षा विशेषश्च ॥९०॥

विततं वणिजापणेऽखिलं पणितुं यत्र जनेन वीक्ष्यते।
मुनिनेव मृकण्डुसूनुना जगतीवस्तु पुरोदरे हरेः ॥९१॥

[1]विततमिति। यत्र पुरि वणिजापणे हट्टे[2] पणितुं[3] विक्रेतुं विततं प्रसारितमखिलं जगत्या[4] वस्तु जनेन[5] वीक्ष्यते[6]। केनेव? मृकण्डुसूनुना मुनिनेव। यथा मार्कण्डेयेन[7] ऋषिणा पुरा कल्पान्ते हरेः [श्री]कृष्णस्योदरे प्रविष्टेन जगतीवस्तु त्रिभुवन[भव]मीक्ष्यते[8]। [यावत्पुरानिपातयोर्लट् (पा० III।iii।4)[9] ॥९१॥

सममेणमदैर्यदापणे तुलयन्सौरभलोभनिश्चलम्।
पणिता न जनारवैरवैदपि गुञ्जन्तमलिं मलीमसम् ॥९२॥

[1]सममेणेत्यादि। यत्र पणिता विसाधयिता जनो यस्याः [2]य आपणे एणमदैः कस्तूरिकाभिः समम् अलिं भ्रमरं मलीमसं मलिनं तुलयन् सन् नावैत्[3] नाज्ञासीत्। इण् (II।20) गतौ। लङ्। इयस्तानी (का० III।i।27)। किंभूतम्? गुञ्जन्तमपि शब्दं कुर्वन्तम्। कैर्न ज्ञातवान्? जनानामारवैः कोलाहलैः। पुनः किंभूतम्? सौरभलोभेन निश्चलम्[4] ॥९२॥

1 P1 विततम्। 2 P1 आपणे हट्टे abt. विक्रेतुं 3 BP2 विततं here 4 P1 add. पृथिव्याः 5 P1 add. पुरा 6 P1 add. दृष्टम् 7 P1 मुनिना; P2 मार्कण्डेय० 8 P1 add. दृष्टम् 9 P1 add. अनुप्रास उपमा उदात्तं च ॥९१॥
1 P1 सममेणमदैर्यदापणेत्यादि। P2 सममेणमदेति। 2 P1P2 om. मलिनं 3 P1P2 न अजानात् 4 P1 add. अनुप्रासः सामान्यं च ॥९२॥

सर्ग २ 52

रविकान्तमयेन सेतुना सकलाहर्ज्वलनाहितोष्मणा।
शिशिरे निशि गच्छतां पुरा चरणौ यत्र दुनोति नो हिमम् ॥९३॥

रविकान्तेति[1]। यत्र हिमं शिशिरेऽपि निशि गच्छतां[2] चरणौ[3] पुरा पश्चात् न दुनोति न दहति। पुरायोगे वर्तमानाल्लिट्[4]। केन गच्छताम्[5]? रविकान्तमयेन सूर्यकान्तमणिमयेन सेतुना मार्गेण। किंभूतेन? सकलमपि अहर्ज्वलनेन आहित ऊष्मा तापो यत्र तेन तथा[6]॥९३॥

विधुदीधितिजेन यत्पथं पयसा नैषधशीलशीतलम्।
शशिकान्तमयं तपागमे कलितीव्रस्तपति स्म नातपः॥९४॥

विधुदीधितीति[1]। यस्याः पन्थानं कलिवत् तीव्रोऽप्यातपो न तपति स्म। किंभूतम्[2]? शशिकान्तमयम्। क्व? तपागमे[3] ग्रीष्मे। पुनः किंभूतम्? विधुदीधितिभ्यो जातेन पयसा चन्द्रकान्तमणिजलेन[4] नैषधशीलवत्[5] शीतलम्। [6]किल नलचरितेन कलिर्नश्यति[7]॥९४॥

परिखावलयच्छलेन या न परेषां ग्रहणस्य गोचरः।
फणिभाषितभाष्यफक्किकाविषमा कुण्डलनामवापिता॥९५॥

1 P1 रविकान्तमयेन। 2 P1 add. सतां 3 P2 पुरा चरणौ 4 P1/P2 om. वर्तमाना 5 P2 om. केन गच्छताम्? 6 P1 add. उक्तनिमित्ता विशेषोक्तिः। अस्ते च॥९३॥
1 P1 विधुदीधितिरिति। P1 विधुदीधितिजेन। 2 P1 om. किंभूतम्? 3 P2 तापागमे 4 P1 चन्द्रकान्ते 5 P2 ०शीलशीतलम् 6 P1 कलिः here
7 P1 add. अनुप्रास उपमा उक्तनिमित्ता विशेषोक्तिरुपात्ते च॥९४॥

परिखावलयेति [1]। या पुरी परिखायाः [3] वलयस्य छलेन कुण्डलनामवापिता। यत् किंभूता?। परेषां शत्रूणां ग्रहणस्य न गोचरः अविषया। किंभूता?। फणिना शेषेण [4] नागेन भाषिता या महाभाष्यस्य फक्किका [5] तद्वद्विषमा। पाणिनेरुपरि महाभाष्यस्य फक्किका [6] विषम- त्वात् [विरुचिन] कुण्डलीकृताः सन्ति। ता अपि [परेषाम्] अन्येषां न ग्रहणविषया, शानाय [7] [न] भवन्ति, व्याख्यातुमशक्यत्वात् [8]॥ ९५॥ (काः/ ... /ः)

मुखपाणिपदाक्षिण पङ्कजै रचिताऽऽप्यपरेषु चम्पकैः। /ङ्
स्वयमादित यत्र भीमजा स्मरपूजाकुसुमस्रजः श्रियम् ॥९६॥

मुखपाणीति [1]। (35 a) यत्र भीमजा स्मरपूजार्थं [2] या कुसुम- स्रक् तस्याः श्रियं स्वयमात्मना आदित [3] जग्राह। दमयन्त्येव स्मरपूजा- [कुसुमस्रक्] [4] जाता। किंभूता?। मुखं [च] पाणी च पदे च अक्षिणी च मुखपाणिपदाक्षि[णि] तत्र मुखपाणिपदाक्षिण [5]। समाहारद्वन्द्वः। द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् (पा॰ II. iv. 2) इत्येकवचनम्। तेषु स्थानेषु मुखा- दिषु [6] पङ्कजै रचिता [7]। अपरेषु अङ्गेषु चम्पकै [8] रचिता। किल [9] मुखादीनि चत्वार्यङ्गानि कमलनिभानि, अन्यानि चम्पकनिभानि। पुष्पमालायां [य] चत्वारः स्तबका [10] भवन्ति॥ ९६॥

1 P1 परिखावलय। 2 P1P2 नगरी 3 P1P2 परिखा॰ 4 P1P2 शेषनागेन 5 B P1 om. विसर्ग: 6 B P1 om. विसर्ग: 7 P1 शानगोचरा 8 P1 add. अनु- प्रास उपमा अपह्नुतिश्च ॥९५॥

1 P1 मुखपाणिपदाक्षिण पङ्कजैरित्यादि। 2 P2 स्मरस्य 3 P2 अदित 4 P2 om. ॰कुसुम॰ 5 B ॰पदाक्षीणि 6 P1 मुखादिपङ्कजैः 7 P2 रचितः 8 B ॰रिति। 9 P1 मुखादीनि कोमलकमलसदृशानि, चत्वारि अङ्गानि, अन्यानि अङ्गानि चम्पकसदृशानि। 10 P2 सूचकाः ॥ P1 add. अति- शयोक्तिर्निदर्शना च ॥९६॥

सर्ग २ 54

जघनस्तनभारगौरवात् वियदालम्ब्य विहर्तुमक्षमाः।
ध्रुवमप्सरसोऽवतीर्य यां शतमध्यासत तत्सखीजनः॥९७॥

जघनस्तनेति[1]। ध्रुवं निश्चितं यां पुरीमवतीर्य[2] तस्याः[3] सखीजन एवाऽप्सरसः[4] शतमध्यासत आश्रयन्ति स्म[5]। किंभूताः[6]? जघनानां स्तनानां च भारगौरवात् वियदाकाशमालम्ब्य विहर्तुमक्षमाः। अत एव भूमौ[8] तत्सखीजनव्याजेनाऽप्सरसोऽवतीर्णा इव[9]॥९७॥

स्थितिशालिसमस्तवर्णतां न कथं चित्रमयी बिभर्ति या।
स्वरभेदमुपैतु या कथं कलितानल्पमुखारवा न वा॥९८॥

स्थितिशालीति[1]। या पुरी[2] चित्रमयी आश्चर्यमयी[3] स्थितिशालिनः समस्तवर्णा ब्राह्मणादयः यस्यां तस्या भावस्तत्तां कथं न बिभर्तु[4]। या किल[5] चित्रमयी आलेख्यमयी[6] तत्र स्थितिशालिनः समस्तवर्णा नीलपीतादयो[7]ऽपि[8] लिख्यन्ते[9]। या च कथं[10] स्वराणां भेदं नोपैतु। यतः कलितो धृतोऽनल्पानां मुखानाम् आरवो यस्यां सा तथा। लोकानां बाहुल्यात्। अथ च स्वः स्वर्गस्तेन सहाऽभेदं कथं नोपैतु। किंभूता[11]? कलितो धृतोऽनल्पमुखश्चतुर्मुखो ब्रह्मा तस्याऽऽरवो[12] वेदानां ध्वनिर्यस्याम्॥९८॥ तो/

1 P1 जघनस्तन। 2 P1P2 नगरीम् 3 P1 om. विसर्गः 4 B अप्सरोगणः; P1P2 शतम् here 5 P1 add. कर्मभूताधारत्वम्। 6 P1P2 किंविशिष्टा अप्सरसः॥ 7 P2 भारात् गौरवात् 8 P1P2 पृथिव्यां 9 P1 add. काव्यलिङ्गं च सापह्नवोत्प्रेक्षा॥९७॥ ‖ 1 P1 स्थितिशालिसमस्तवर्णतामित्यादि। 2 P1P2 नगरी 3 B ...रूपा 4 P2 बिभर्ति 5 P1P2 om. किल 6 P1P2 om. आलेख्यमयी 7 B पीतो॰ 8 P1P2 om. अपि 9 P1P2 आलिख्यन्ते 10 P1P2 कथं वा स्वरभेदं॥ 11 P1 स्वर्गोऽपि 12 P1 यत्र। अथ च कलितो ब्रह्मण आरवो वेदध्वनिर्यया। सा स्वराणामुदात्तादीनां भेदमुपैति इति श्लेषः॥ P2 om. वेदानां ध्वनिः

लिलिहे स्वरुचा पताकया निशि जिह्वानिभया सुधाकरम् ।
स्थितमर्ककरैः पिपासु यन्नृपसद्मामलपद्मरागजम् ॥९९॥

[1] लिलिहे इति । अमलेभ्यः पद्मरागेभ्यो जातं [2] यस्या नगर्या नृपसद्म राजभवनं निशि पताकया सुधाकरं लिलिहे आस्वादयामास ।
(35b) किंभूतया पताकया ? [4] स्वया आत्मीयया रुचा कान्त्या कृत्वा जिह्वानिभया रक्तीभूतया [5] । स्वरुचेति पताकाविशेषणं बहुव्रीहिर्वा । किंभूतं सद्म ? अर्कस्य करैः कृत्वा पिपासु स्थितं तृषार्तम् [6] ॥९९॥

स्वरुचाऽरुणया पताकया दिनमर्केण समीयुषोत्तृषः ।
लिलिहुर्बहुधा सुधाकरं निशि माणिक्यमया यदालयाः ॥१००॥

[1] स्वरुचेति । [2] यस्या आलयाः आवासाः माणिक्यमयाः निशि पताकया सुधाकरं बहुधा लिलिहुः । किंभूतया ? स्वरुचा अरुणया । किंभूता आलयाः [3] ? अर्केण कृत्वा उत्कृष्टा तृट् येषां ते उत्तृषः । किंभूतेन अर्केण ? दिनं समग्रमपि समीयुषा मिलितेन । कालाध्वनोरत्यन्तसंयोगे (पा० II।iii।5) द्वितीया [4] ॥१००॥

अमृतद्युतिलक्ष्म पीतया मिलितं यद्वलभीपताकया ।

1 P. लिलिहे स्वरुचा । 2 B जातं 3 P तस्या 4 B स्वरुचा 5 P, P2 रक्तीभूतया abt. बहुव्रीहिर्वा 6 P. add. समासोक्तिः अतिशयोक्तिः तद्गुणोदात्तोपमा-काव्यलिङ्गानि विशेषणसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः । पताका-याश्च सम्बन्धप्रतिपादनादसम्बन्धे सम्बन्धः । स्वगुणत्यागादत्युत्कृष्ट-गुण(गुण)स्वीकारः । तद्गुणः ॥९९॥ 1 P. स्वरुचाऽरुणया । P2 स्वरुचारुणेति । 2 P. यस्याः 3 P2 om. विसर्गः 4 P. add. उपमावर्जिताः पूर्ववदलङ्काराः ॥१००॥

वलयायितशेषशायिनः सखितामादित पीतवाससः ॥१०१॥

अमृतधुतीति। अमृतधुतेश्चन्द्रस्य लक्ष्म लाञ्छनं पीतवर्णया यस्या नगर्या वलभीनां पताकया मिलितं सत् पीतवाससः श्रीकृष्णस्य सखितामादित सादृश्यं भेजे। कीदृशस्य? वलयायिते शेषे शेते इत्येवंशीलस्य। चन्द्रः शेषः तत्र लाञ्छनं श्रीकृष्णस्य पीता पताका वासः ॥१०१॥

अश्रान्तश्रुतिपाठपूतरसनाविर्भूतभूरिस्तवा-
जिह्मब्रह्ममुखौघविघ्नितनवस्वर्गक्रियाकेलिना।
पूर्वं गाधिसुतेन सामिघटिता मुक्ता नु मन्दाकिनी
यत्प्रासाददुकूलवल्लिरनिलान्दोलैरखेलद्दिवि ॥१०२॥

अश्रान्तश्रुतीति। यस्याः प्रासादानां दुकूलानां वल्लिः श्रेणी अनिलस्यान्दोलैः कम्पनैः दिवि अखेलत् चिक्रीड। नु इति वितर्के। पूर्वं पुरा गाधिसुतेन विश्वामित्रेण सामिघटिताऽर्धसृष्टा मुक्ता त्यक्ता मन्दाकिनी गङ्गा इव। सामीत्येतदव्ययम् अर्धशब्दपर्याय: तस्याऽसत्त्ववाचित्वात् [द्वितीयया नास्ति] सम्बन्धः तत् सुबन्तं क्तान्तेन [सह] समस्यते, तत्पुरुषश्च समासः [भवति] (का० वृ० on पा० II.1.27)।

1 P. अमृतधुतिल्क्ष्म। 2 P. add. सेलक्ष्मं 3 P. B सादृश्यमादित 4 P. B om. भेजे 5 P. add. उपमा ॥१०१॥

2 B अश्रान्तमिति। P. अश्रान्तश्रुतिपाठ। 2 P. om. विसर्गः 3 B om. त्यक्ता 4 B om. सामीत्... न गण्यते। 5 B. P. add. विसर्गः 6 add. ... in [ ]

१२. 021.

एकपदेऽमेकस्वर्ग तु वेदवत् काव्ये [न] गण्यते। किंभूतेन?। अश्रान्त श्रुतीनां पाठेन पूताभ्यो रसनाभ्यो जिह्वाभ्यः आविर्भूतैर्गीर्भिः स्तवैः स्तुतिभिः अजिह्मः ब्रह्ममुखानामोघः तेन विघ्नितां नवा स्वर्गक्रियाकेलिर्यस्य तेन तथा। तदा नूतनगङ्गापि सृष्टा। ततश्च ब्रह्मणा चतुर्भिर्मुखैः संस्तुतः, तदा सर्वा सृष्टिस्त्यक्ता। ततोऽर्द्ध-घटिता गङ्गापि आकाशे त्यक्ता। ततः किमियं ध्वजानां (36a) दुकूल-श्रेणिः सा गङ्गा" ॥१०२॥

यदतिविमलनीलवेश्मरश्मिभ्रमरितभाः शुचिसौधवस्त्रवल्लिः।
अलभत शमनस्वसुः शिशुत्वं दिवसकराङ्कतले चला लुठन्ती ॥१०३॥

यदतिविमलेति। शुचीनां श्वेतानां सौधवस्त्राणां वल्लिः यस्या नगर्या अतिविमलानाम् इन्द्रनीलवेश्मनां रश्मिभिर्भ्रमरिता श्यामीभूता भा कान्तिर्यस्याः सा तथाविधा सती शमनस्य यमस्य स्वसुर्यमुनायाः शिशुत्वं बाल्यम् अलभत तत्सदृशी जाता। किं कुर्वन्ती वस्त्र-पङ्क्तिः?। दिवसकरस्य श्रीसूर्यस्य अङ्कतले लुठन्ती [चला वायु-वशात्]। बालत्वे यमुना चला चपला पितुरुत्सङ्गे श्रीसूर्यस्य उत्सङ्गे लुठितवती। शिशुरपि पितुरुत्सङ्गे चञ्चलः सन् लुठति। यमुना च श्यामला" ॥१०३॥

7 P. add. च 8 B/2 om. भूतै॰ 9 B ब्रह्मा 10 B किमयं 11 P. add. शार्दूल-विक्रीडितम्। गौडीया रीतिः। अनुप्रासोत्प्रेक्षा ॥१०२॥

1 P. यदतिविमल। P2 यदतिविपुलेति। 2 P. add. पताका 3 P2 भ्रमिरिव M.P2 ०कृता 5 P.P2 कुर्वती? 6 P. दिवाकरस्य 7 P. पितुः alt. श्रीसूर्यस्य 8 P2 om. उत्सङ्गे 9 P.P2 om. शिशुरपि.... लुण्ठति। 10 P.P2 अपि 11 P. श्यामा and add. पुष्पिताग्रा वृत्तम्। अनुप्रासोऽतिशयोक्तिर्वा। तद्गुणो दृष्टान्तनिदर्शना:॥ ॥१०३॥

म्र्य/ स्वप्राणेश्वरनर्महर्म्यकरकातिथ्यग्रहायोत्सुकं
पाथोदं निजकेलिसौधशिखरादारुह्य यत्कामिनी।
साक्षादप्सरसो विमानकलिताव्योमान एवाभव-
धन्न प्राप निमेषमभ्रलरसा यान्ती रसादध्वनि ॥१०४॥

[1] स्वप्राणेश्वरेति। यस्याः नगर्याः कामिनी निजस्य केलि-
सौधस्य] शिखरात् पाथोदं मेघम् आरुह्य अप्सरसः[2] साक्षा[3]देव
अभवत्] बभूव। साक्षाच्छब्द इवार्थे।[4] [किंभूतं पाथोदम्?] स्वप्राणेश्वरस्य
क/ यत् नर्महर्म्यं क्रीडासौधं तस्य करके आतिथ्यग्रहायोत्सुकम्। भर्तृसौधं
प्रति जिगमिषुम्। किंभूता अप्सरसः?[5] विमानेन कलितमाश्रितं व्योम
सः/ याभिस्ताः[6]स्तथा[7]। बहुवचनान्तोऽप्सरः[8]शब्दः आविष्टलिङ्गः। [9] यत्
यस्मात्[10] सप्तभूमिकसौधमार्गेणैव सा[11] यान्ती अध्वनि अभ्राणां तरसा
बलेन वेगेन रसादनुरागात् कौतुकवशात् निमेषं न प्राप। अप्सरसोऽ-
पि अनिमेषाः आकाशेन[12] गच्छन्ति। अभ्रै[13]राच्छादितत्वात् सा कामिनी
[14] निरालम्बा इव दृश्यते[15] ॥१०४॥

वैदर्भीकेलिशैले मरकतशिखरादुत्थितैरंशुदर्भै-
र्ब्रह्माण्डाघातभग्नस्यदजमदतया ह्रीधृतावाङ्मुखत्वैः।

1 Pl स्वप्राणेश्वर। 2 P2 साक्षादेव अप्सरसः 3 Bl °देव 4 Pl add. तदुक्तम्-
प्रत्यक्षसदृशाः साक्षात् ( ? ) इति। यथा इयं लक्ष्मीः साक्षादियममृतवर्ति-
र्नयनयो(उत्तर॰ I.38)रित्यादि। 5 B कवि॰ 6 B °स्ताथा 7 Pl add. °भूता एवा°एवे-
त्याश्चर्यो। 8 Pl,P2 °प्सरः° 9 B यत्र; Pl तत्र 10 Pl अभ्राणां तरसा बलेन वेगेन
रसादनुरागात् कौतुकवशात् अध्वनि सप्तभूमिकसौधमार्गेणैव यान्ती
निमेषं लघ्वक्षरोच्चारणमात्रं कालम्, अथच निमीलनं चक्षुषोर्न प्राप।
11 Pl,P2 om. सा 12 B आकाशे च 13 Pl,P2 अभ्राच्छादितत्वात् 14 Pl,P2 add. विमानस्था
15 Pl add. शार्दूलविक्रीडितं वृत्तम्। मेघानामवष्टम्भकत्वमिति कविसमयः।
contd.

कस्या नोत्तानगाया दिवि सुरसुरभेरास्यदेशं गताग्रै-
र्यद्गोग्रासप्रदानव्रतसुकृतमविश्रान्तमुज्जृम्भते स्म॥१०५॥

वैदर्भीति[1]। यस्या नगर्या गवां ग्रासप्रदानव्रतेन यत् सुकृतं[2] तदविश्रान्तम् उज्जृम्भते स्म प्रचुरं बभूव। कै:?। वैदर्भ्या[3]: दमयन्त्या: केलिशैले मरकतमयात् शिखरात् उत्थितैरुत्पन्नै: अंशुभि: किरणैरेव दर्भै: हरिततृणै:। किंभूतै:?। ब्र(३६b)ह्माण्डकटाहे[4]थ ~~आघात~~ आघात: आस्फालनं तेन भग्न: स्यदात् वेगात् जातो मदो गर्वो येषां ते तथा तेषां भावस्तत्ता[5] तया कृत्वा ह्रिया लज्जया धृतमवाङ्मुखत्वमधोमुखत्वं यै:। पुन: किंभूतै:?। दिवि आकाशे कस्या: सुरसुरभे: कामधेनो: आस्यदेशं मुखमध्यं न गताग्रै: प्राप्तमग्रं येषां तैस्तथा[6]। किंभूताया:?। उत्तानमूर्ध्वं मुखं यथा भवति एवं गच्छतीति सा तथा। तस्या: स्वर्गे कामधेनवो हि उत्ताना गच्छन्ति। तथा च श्रुति:-उत्ताना* वै देवगावश्चरन्ति (आप० श्रौ० सू० XI.7.6)। तत्रत्य मरकत[] किरणा: प्रथममूर्ध्वं गता:। ततो ब्रह्माण्डकटाहे स्खलिता: [पश्चात्स्खलिता:] सन्त: स्वर्गगवीनां मुखेषु प्रविष्टा दर्भधूलिका[7] इव विभान्ति[8]॥१०५॥

विधुकरपरिरम्भादात्मनिष्यन्दपूर्णै:
शशिदृषदुपक्लृप्तैरालवालैस्तरूणाम्।

~~यथा~~ यथा कान्तानां गृहचरितान्यथो रथानामि[9] इति। उत्प्रेक्षोत्प्रेक्षा— । ~~उत्प्रेक्षा~~ त्यन्य:। अनुप्रासश्च॥१०४॥

1 P. वैदर्भीकेलिशैले। 2 B सुकृत तं; P2 तत् विश्रान्तम 3 B भैद० 4 P2 ०कटाहैर्य 5 B भावस्त्वथा 6 P1 यथा 7 B ०पुत्तलिका; P2 चूलिका 8 P1/P2 भान्ति। 9 P1 aaa. स्रग्धरा वृत्तम्। इति द्वात्रिंशता श्लोकैर्नगरीवर्णनमभिहितम्। अनुप्रासो रूपकमपह्नुतिश्च॥१०५॥

* ०ध्यं० उत्ताना हि देवगवा वहन्ति।

विफलितजलसेकप्रक्रियागौरवेण
व्यरचि स हृतचित्तस्तत्र भैमीवनेन ॥१०६॥

विधु[1]करेति। स हंसः तत्र भैम्याः वनेन हृतचित्तो[2] व्यरचि। किंभूतेन॥[3]विफलितं व्यर्थीकृतं जलसेकस्य प्रक्रियायाः प्रकारस्य गौरवं येन तेन तथा[4]। कैः॥ तरुणामालवालैः। किंभूतैः॥ शशिदृषद्भिः चन्द्रकान्तमणिभिरुपक्लृप्तैः रचितैः। अत एव विधोः चन्द्रस्य कराणां परिरम्भात् आत्मनो निष्यन्देन स्नुतजलैनैव[5] पूर्णैः। स्थानकानि चन्द्रकान्तजलेन पूर्णान्येव सन्ति[6] ॥१०६॥

अथ कनकपतत्रस्तत्र तां राजपुत्रीं
सदसि सदृशभासां विस्फुरन्तीं सखीनाम्।
उडुपरिषदि मध्यस्थायिशीतांशुलेखा-
नुकरणपटुलक्ष्मीमक्षिलक्षीचकार ॥१०७॥

अथ कनकेति[1]। अथ कनकपतत्रो हंसः तत्र वने तां राजपुत्रीम् अक्ष्णोर्लक्षीचकार। किंभूताम्॥ सदृशभासां सरूपाणां[2] सखीनां सदसि विस्फुरन्तीम्। पुनः किंभूताम्॥ उडूनां नक्षत्राणां परिषदि मध्यस्थायिनी या शीतांशोश्चन्द्रस्य[3] लेखा तस्या अनुकरणे[4] पटुलक्ष्मीर्यस्याः तां तथा। चन्द्रकलासदृशीम्[5] ॥१०७॥

1 P. विधु। 2 P. हृदि 3 B विफलितं ... किंभूतैः! om. पूर्णैः 4 P. add. इति तृतीया। अन्यपदार्थे आलवालैरिति करणे तृतीया। कर्तरि चेत्तदा यस्य यत्र वा तेन तथा। M P. om. इव 5 P. add. अतिशयोक्तिदृष्टान्तं च ॥१०६॥
1 P. अथ कनकपतत्र। 2 P. सखीनां सरूपाणां 3 B add. कला 4 P. ०करणे
5 P. शशाङ्ककलेखासदृशी। and add. अनुप्रासोपमे ॥१०७॥

सर्ग २ 61

भ्रमणरयविकीर्णस्वर्णभासा खगेन
क्वचन पतनयोग्यं देशमन्विष्यताऽधः ।
मुखविधुमदसीयं सेवितुं लम्बमानः
शशिपरिधिरिवोर्ध्वं मण्डलस्तेन तेने ॥१०८॥

भ्रमणरयेति[1] । तेन खगेन अधो भागे क्वचन पतन(379)-योग्यं देशमन्विष्यता गवेषयता सता ऊर्ध्वं मण्डलः[3] वर्तुलता कुण्डलता तेने विस्तारिता । किंभूतेन ? । भ्रमणस्य[4] रयेण वेगेन विकीर्णा विक्षिप्ता स्वर्णस्य भा दीप्तिर्येन तेन तथा । उत्प्रेक्षते – शशिनः परिधिरिव परिवेष इव । किंभूतः ? । अदसीयम् अमुष्या[5] दमयन्त्या मुखविधुं सेवितुं लम्बमानः । परिवेषः किल चन्द्रं सेवते[6] ॥१०८॥

अनुभवति शचीत्थं सा घृताचीमुखाभि-
र्न सह सहचरीभिर्नन्दनानन्दमुच्चैः ।
इति मतिरुदयासीत् पक्षिणः प्रेक्ष्य भैमीं
विपिनभुवि सखीभिः सार्धमाबद्धखेलाम् ॥१०९॥

अनुभवतीति[1] । तस्य पक्षिणः विपिनस्य वनस्य भुवि भैमीं सखीभिः [सार्धं][2] सह आबद्धखेलां[3] क्रीडन्तीं[4] प्रेक्ष्य इति [मतिः] बुद्धि-[5]रुदयासीत् उत्पन्ना । [इतीति किम् ? ।][6] इत्थं[7] शची इन्द्राणी घृताचीमुखा-

1 l. भ्रमणरयविकीर्ण 2 l. पतनाय 3 l. मण्डलं 4 l. भ्रमस्य 5 R add. देव्या 6 l. add. अनुप्रासो रूपकमुत्प्रेक्षा जातिश्च ॥१०८॥

1 l. अनुभवति शचीत्थं सा । 2 eds. add. सार्धं 3 B॰खेलां; l. add. बद्धकेलीं 4 B क्रीडां 5 l. om. बुद्धि॰ 6 eds. add. इतीति किम् ?, l. इति किम् ? । 7 l. add. दृश्यमानप्रकारेण and सा प्रसिद्धा here.

भि[र्घृताची]प्रभृतिभिरप्सरोभिः सहचरीभिः [सह][8] समं [9]नन्दनवनस्याऽ-
नन्दं सा प्रसिद्धा नानुभवति । अपि तु [10][अ]नुभवति । किं सैवेयं नन्दना-
नन्दमनुभवति । [11]आनन्दाङ्कः । मालिनीवृत्तम्[12] ॥१०९॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहर्षः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥११०॥

[1][श्रीहर्षमिति] तस्य [2]प्रबन्धे [3]द्वैतीयीकतया मितः द्वितीय-
त्वेन संख्यातः [4]सर्गोऽगमत् । [द्वितीयशब्दादीकक् । तीयादीकक् । न
विद्याचित(?) । शार्दूलविक्रीडितम् । अनुप्रास] ॥११०॥

[1]श्रीमानाल्लिगपण्डितः स्वसमयाविर्भूतसर्वाश्रम-
ति/ श्चाण्डूपण्डितसंश्रितं प्रसुषुवे श्रीगौरिदेवी च यम् ।

8 edr. add. सह 9 l. add. उच्चैरुन्नतं प्रचुरं नन्दनस्य 10 l2 ~~आनन्द~~-
अनुभवति अपि तु । 11 l. आनन्दाङ्कता; l2 om. आनन्दाङ्कः । मालिनी-
वृत्तम् । 12 l. add. पूर्वेषु त्रिषु अनुप्रासभ्रान्तिमानौ । साहृश्याद्वस्त्व-
न्तरप्रतिपत्तिः भ्रान्तिमान् (अलं सं ...) ॥१०९॥ 1 l. श्रीहर्षमित्यादि । 2
l. add. महाकाव्यरूपे 3 l. add. नैषधीयं चरितं यत्र त्वत्तथा 4 l. l2 add.
आनन्दाङ्कः । —॥११०॥

a/ 1 l. inserted – इति धवलक्कवास्तव्य-नागरश्रोत्रियावतंस-पण्डित-
वैद्यनाथशिष्य-गुडभाष्यकृत्-अग्निहोमचतुष्टयकृत्-सम्राट्-स्थपति-।
सप्तसोमसंस्था[कि]याजि-द्वादशाहाग्निचित्-दीक्षित-महापण्डित-श्री-
चाण्डूविरचितायां नैषधदीपिकायां टीकायां विहङ्गागमनो नाम द्वितीयः
contd.

सर्ग २ 63

[तेन श्रीखरतरखरङ्कमहिते जातेन गोत्रे सता]
टीकां नैषधवर्णने विरचिता सर्गे द्वितीये शुभा[2] ॥१॥

इति[3] नैषधदीपिकायां द्वितीयः सर्गः[4]।

Contd.

Contd. सर्गः समाप्तः। मङ्गलमस्तु। शुभं भवतु। कल्याणमस्तु सर्वजगतः
परहितनिरता भवन्तु भूतगणाः। दोषाः प्रयान्तु नाशं सर्वत्र सुखीभवतु
लोकः॥ संवत् १४७६ वर्षे (1420 A.D.) भाद्रपदमासे कृष्णपक्षे षष्ठ्यां
तिथौ गुरुदिने भिषग्वर – मन्त्रिश्री-भीमिल~~[illegible]~~सुतनारायणस्य
वैद्यकविशारदस्य वसुमतेः सदा परमसौमनस्यभावितान्तःकरणस्य
निजविपुलविमलकुलगगनमण्डलशशधरस्य दामोदरपरिष्वङ्ग-
शङ्खधवलगुणग्रामविभूषितासंख्यद्वीपविभूषणसागराम्बराभोगस्य
सारसारस्वतजपां कुटीसमाकृष्टभारतीश्वरसमर्पितकविताभाण्डा-
गारस्वैरसमर्पणलर्पितानेकविद्यार्थिनः प्रसागङ्गाहिमाद्रेः सज्जन-
जनमनो – – सन्तस्य पुस्तकमिदमलेखि। शुभं भवतु॥ छ॥ कल्या-
णमस्तु लेखकपाठकयोः॥ श्रीः॥ 2 B add.* किमपि.... चास्य॥२॥
दोषोदयं न तनुते न कुरङ्गसङ्गमङ्गीकरोति न वशं तमसः प्रयाति।
नो जाड्यवान् न कमलोदयमेष हन्ति न क्षीयतेऽद्भुतमिदं द्विजनायकोऽपि॥३॥
*कृत्वैव.... न्नवमानितानि॥४॥ *तदात्मज०.... प्रयोक्ता॥५॥ *सम्राट्....
महनीयजन्मा॥६॥ *श्रीवैद्यनाथा०.... स्म टीकाम्॥७॥ 3 B add.
श्री० 4 B add. समाप्तमिति॥ ग्रन्थसंख्या ५००॥ श्रीः॥ छः॥

— x — — x —

* also at the end of the Canto I

सर्ग 3 1

[1] पूर्वसर्गे [2] हंसमुखेन नलं प्रति दमयन्तीस्वरूपनिवेदन-पूर्वकं तद्द्वार्यन्त्विमङ्गीकार्य [3] कुण्डिनोपवने तां वर्णयित्वेदानीं तस्या[4]ऽनुरागवृद्धिं विवर्णयिषुः[5] कविस्तृतीयं सर्गमारभते ॥

आकुञ्चिताभ्यामथ पक्षतिभ्यां नभोविभागात्तरसाऽवतीर्य ।
निवेशदेशाततधूतपक्षः पपात भूमावुपभैमि हंसः ॥१॥

[1] आकुञ्चिताभ्यामिति । अथोपवनगमनानन्तरं स हंसः [2] उपभैमि भैम्याः समीपे [पपात][3] । क्व[4] ? । भूमौ । किं कृत्वा ? । आकुञ्च-ताभ्यां सङ्कुचिताभ्यां [पक्षतिभ्यां] नभोविभागात्[5] तरसा बलेनाऽव-तीर्य । किंभूतः ? । निवेशदेशे उपवनस्थाने आततौ तथा धूतौ[6] कम्पि-[7]तौ पक्षौ येन स तथा[8] ॥१॥

आकस्मिकः पक्षपुटाहतायाः क्षितेस्तदा यः स्वन उच्चचार ।
द्रागन्यविन्यस्तदृशः स तस्याः सम्भ्रान्तमन्तःकरणं चकार ॥२॥

[1] आकस्मिक (37b) इति । तदा पक्षपुटाभ्याम् आहतायाः क्षितेराकस्मिको[2] यः स्वन उच्चचार, स स्वनः तस्याः दमयन्त्याः अन्तःकरणं मनः[3] सम्भ्रान्तं चकार । कथम् ? । द्राग् झटिति । किंभूतायाः ? ।

1 I. add. ॐ नमः सारदा(?)यै । 2 I. पूर्वं 3 B तद्द्वार्यस्व० 4 I. तस्या अनु० I2 नलस्या० 5 I2 वर्द्धयिषुः — 1 I. आकुञ्चिता ॥ 2 BI2 उपभैमि aft. समीपे 3 I2 पपात: 4 I2 क्व ? भूमौ aft. अवतीर्य 5 B add. [illegible] 6 I2 भूतौ 7 I2 om. कम्पितौ 8 I. add. उपजातयो वृत्तम् । अनुप्रासो जातिश्च ॥१॥ // 1 I. आका । 2 II2 यः आकस्मिकः 3 II2 om. मनः ।

सर्ग ३ 2

अन्यत्र विषयान्तरे विन्यस्ता दृक् यथा तस्यास्तथा। अन्यचित्तो[4] हि स्वनेनोद्भ्राम्यते[5][6] ॥२॥

नेत्राणि वैदर्भसुतासखीनां विमुक्ततत्तद्विषयग्रहाणि।
प्रापुस्तमेकं[1] निरुपाख्यरूपं[2] ब्रह्मेव चेतांसि यतव्रतानाम् ॥३॥

नेत्राणीति[3]। वैदर्भस्य[4] राज्ञः सुतायाः सखीनां नेत्राणि तमेकमेव हंसं निरुपाख्यं वर्णयितुमशक्यं रूपं यस्य तं तथाविधं प्रापुः। [किंभूतानि?] विमुक्तास्त्यक्तास्तेषां तेषां विषयाणां [रूपाणां] ग्रहोऽनवलोकनं यैः तानि तथा। अन्यत्सर्वं परित्यज्य हंसमेवावलोकयन्ति स्म। कानीव? चेतांसीव। यथा यतव्रतानां[5] योगिनां मनांसि एकमद्वितीयं निरुपाख्यम् अत्यन्तासद्रूपं[6] यस्य तत्तथा अरूपं ब्रह्म प्राप्नुवन्ति। अथवा निरुपाख्यं[7] रूपम् अविज्ञेयस्वरूपम्। किंभूतानि? विमुक्तास्त्यक्तास्तेषां शब्दादीनां विषयाणाम् इन्द्रियार्थानां ग्रहो यैस्तानि तथा। ध्यानैकतानानि इत्यर्थः[8] ॥३॥

हंसं तनौ सन्निहितं[1] चरन्तं मुनेर्मनोवृत्तिरिव स्विकायाम्।
ग्रहीतुकामा दरिणाशयेन यत्नादसौ निश्चलतां जगाहे ॥४॥

4 B त्वचित्ता 5 P2 उद्भ्रास्यते 6 P1 add. उदश्चरः सकर्मकात् (पा० I. iii. 53) इति सकर्मकत्वाभावादात्मनेपदाभावः। अनुप्रासो जातिश्च ॥२॥

1 P2 text आपु° 2 P2 text निरुपाख्य° 3 P1 नेत्राणि 4 P2 विदर्भस्य 5 P1 add. चेतांसि 6 P1 अत्यन्तासन्न° 7 B नैरुप्य° 8 P1 add. लिङ्गभेदेऽप्युपमा। स्त्रीव गच्छति षण्ढोऽयं वक्त्येषा स्त्री पुमानिव ( ? ) इत्यादिवदुद्वेगकरत्वाभावान्नात्र दोषः। पर्यायश्च ॥३॥

1 P2 text सन्निहितं

सर्ग ३ 3

हंसं तनाविति। असौ दमयन्ती आदरिणा आदरयुक्तेन /ते शयेन हंसेन अथवा दरिणा[3] [4]भयचलेन[5] यत्नात् हंसं ग्रहीतुकामा निश्चलतां जगाहे। किंभूतम्? [6]स्विकायाम् आत्मीयायां तनौ शरीरे सन्निहितं [7]चरन्तम्। [का इव?] मुनेर्योगिनो मनोवृत्तिरिव[8]। यथा मनसो[9] वृत्तिर्मनोव्यापारः स्वकीयतनौ[10] शरीरे सन्निहितमन्तश्चरन्तं हंसमात्मानम् आदरयुक्तेन आशयेन अन्तःकरणेन ग्रहीतुकामा[11] ज्ञातुमिच्छुर्निश्चलतां [ध्यानपरतां] जगाहे[12] ॥४॥

तामिङ्गितैरप्यनुमाय मायामयं न भैम्या वियदुत्पपात।
तत्पाणिमात्मोपरिपातुकं तु मोघं वितेने प्लुतिलाघवेन ॥५॥

[1]तामिङ्गितैरिति। अयं हंसः (३४a) तां भैम्या इङ्गितैश्चेष्टितैर्मायामनुमाय[अपि][2] ज्ञात्वापि वियदाकाशं नोत्पपात। तर्हि /या

२ Pi हंसम्। ३ B परिणा ४ Pi add. स्त्रीभावात् उड्डयनहेतोर्वा ५ B भयनलेन ६ B स्वकीयायाº ७ B भ्रमरन्तम्; Pi add. गच्छन्तं भक्षयन्तं वा। तनौ इति षष्ठ्यर्थे सप्तमी। प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः (पाº VII.iii.44) इति प्राप्तं, न यासयोः (पाº VII.iii.45) इति निषेधाधिकारे, उदीचामातः स्थाने यकपूर्वायाः (पाº VII.iii.46) इत्यत उदीचामित्यधिकारे च, भस्त्रैषाजाज्ञा[द्वा]स्वानञ्पूर्वाणामपि (पाº VII.iii.47) इति /पी स्वाशब्दस्यातः स्थाने योऽकारस्तस्य इत्वं न भवति उदीचामाचार्याणां मतेन। उदीचां ग्रहणं विकल्पार्थम्। नञ्पूर्वाणामपि, इति अपि शब्दात् अन्यपूर्वाणां केवलानां च विधिरयमिष्यते। निःस्विका। निःस्वका। बहुस्विका। बहुस्वका। इत्येवमादयो विधन्ते। तत्र नञ्पूर्वाणामिति वचनमनुवाद एव। मन्दबुद्धिप्रतिपत्त्यर्थमिति विकल्पेन इकारः। ८ Pi2 om. मनोº ९ Pi2 मनसो १० Pi स्वकीयायां ११ Bº कामो १२ Pi add. उपमा ॥४॥

१ Pi तामिङ्गितैः। Pi2 तामिङ्गितैरपीति। २ Pi om. अपि ३ Pi Pi2 om. तर्हि किं चकार?।

सर्ग ३ 4

किं चकार? । किन्तु तस्याः पाणिमात्मन उपरि [पातुकं][4] धर्तुमिच्छया पलनशीलं मोघं वितेने वृथा चक्रे । केन? [प्लुतैः][5] प्लुतस्य उत्प्लवनस्य[6] गतिविशेषस्य लाघवेन[7] ॥५॥

व्यर्थीकृतं पत्ररथेन तेन तथाऽवसाय व्यवसायमस्याः ।
परस्परामर्पितहस्ततालं तत्कालमालीभिरहस्यताऽलम् ॥६॥

व्यर्थीकृतमिति[1] । आलीभिः सखीभिः तत्कालं परस्परम् अव्ययशब्दः अन्योन्यमर्पितो हस्ते तालः [तालिः] तालि[2]शब्दो यत्र तद्यथा भवति तथा अलमहस्यत । किं कृत्वा? । तेन पत्ररथेन हंसेन अस्याः भैम्याः तथा तादृशं व्यवसाय[3]मभिप्रायं व्यर्थीकृतम् अवसाय मत्वा[4] ॥६॥

उच्चारणीयः करतालिकानां दानादिदानीं भवतीभिरेषः ।
यान्वेति मां द्रुह्यति मह्यमेव साऽत्रेत्युपालम्भि तयालिवर्गः ॥७॥

६/ उच्चारणीय[1] इति । तया दमयन्त्या आलीनां सखीनां वर्गः समूहः इत्युपालम्भि । इतीति[2] किम्? । हे सख्यः । भवतीभिः एष हंसः इदानीं करतालिकानां दानात् उच्चारणीयः विद्रावणीयः । अथ च[3] उच्चं प्रदेशम् आरनीयः गमयितव्यः । ततोऽत्र[4] वने या सखी मामन्वेति,

4 edr. add. पातुकं 5 P2 om. प्लुतैः 6 B उत्पतनस्य; P1 उत्प्लवस्य; P2 तत्प्लवनस्य; edr. उत्प्लवनस्य 7 P1 add. वृत्त्यनुप्रासो जातिश्च ॥५॥

1 P1 व्यर्थी । 2 P1 तालिका 3 P1 add. उद्यमम् 4 P1 add. तत्कालमिति कालाध्वनोरत्यन्तसंयोगे (पा० II.iii.5) द्वितीया । अनुप्रासो जातिश्च ॥६॥

1 P1 इत्यादि । 2 P1 इति किम्? 3 P1 om. च 4 P1 om. ततः

सा मह्यमेव क्रुध्यति[5] ॥७॥

धृतात्पकोपा हसिते सखीनां छायेव भास्वन्तमभिप्रयातुः।
श्यामाथ हंसस्य करानवाप्तेर्मन्दाक्षलक्ष्या लगति स्म पश्चात्॥८॥

धृतात्पकोपेति[1]। अथ श्यामा दमयन्ती[2] करेण हस्तेन अनवाप्तेः[3] सकाशात् हंसस्य पश्चाल्लगति स्म। अप्रसूता भवेच्छ्यामा ( ) । किंभूता? मन्दाक्षस्य लज्जाया लक्ष्या विषयश्रिता। तथा सखीनां हसिते धृतोऽल्पः कोपो यया सा तथा। केव? भास्वन्तं [श्री]-सूर्यमभिमुखं प्रयातुः पुरुषस्य छायेव (यथा सा छाया पुरुषस्य[4] पश्चाल्लगति। कुतः? हंसस्य [श्री]सूर्यस्य कराणामनवाप्तेः। साऽपि श्यामा। तथा मन्दैरप्यक्षैरिन्द्रियैर्लक्ष्या[5] भवति। तथा चापटुतरेन्द्रिया वदन्ति। छायामात्रं[6] लक्ष्यते, न तु स्पष्टरूपम्[7]॥८॥

शस्ता न हंसाभिमुखी पुनस्ते यातेति ताभिश्छलहस्यमाना।
साह स्म नैवाशकुनीभवेन्मे भाविप्रियावेदक एष हंसः॥९॥

शस्ता न[1] हंसेति। सा दमय(३४७)न्तीत्याह स्म उवाच। किंभूता? इति ताभिः सखीभिः छलेन हस्यमाना। हे दमयन्ति!

5 B क्रुध्यति। P. add. क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः (पा० I. iv. 38) इति चतुर्थी। काव्यलिङ्गं च॥७॥

1 P. धृता। 2 P2 दमयन्त्या 3 B भविष्यामौ; P. add. विरोधाच्च। 4 P2 पुरुषस्य छाया लगति पश्चात्। 5 P. अपि इक्षैः 6 B व्मन्त्रं; P2 add. तु 7 P. add. उपमा भावशबलता च॥८॥

1 P. शस्ता।

सर्ग ३ 6

ते तव हंसस्य अभिमुखी यात्रा गमनं न शस्ता। न योग्या। अयं हस्तेन धर्तुमशक्य:। अथ च श्लेषपक्षे, तव हंसस्य श्रीसूर्यस्य अभिमुखी यात्रा प्रयाणं न शस्ता[2]। प्रतिसूर्यं यात्रायाः शास्त्रे निषिद्धत्वात्[3]। किमुवाचेत्याह – हे सख्य:! एष हंसो मे[4] मम नैवाऽशकुनिर्भवेत्। अपि तु शकुनेरूपो भवति। यतो भावि भविष्यत्[5] यत् प्रियं शकुनद्वारेण अभिमतं वस्तु तस्याऽऽवेदक:[6]। हंस: श्रीसूर्यो[7] नाशकुनिर्भवेत्। अपि तु हंस: शकुनि: पक्षी भवेत्। भाविन: प्रियस्य भर्तुरावेदक:[8] ॥९॥

---

2 B सूर्ये 3 P. add. मकरादौ प्रतीच्यवाच्योर्गमने सूर्याभिमुखी यात्रा कर्क्यादौ प्राच्युदीच्योर्गमने च। तथा लग्नस्थे सूर्ये प्राचीं यातुश्च। यदाहु: – दिनकरकरच्युततां मकरादावुत्तरां च पूर्वां च। यायात्कर्कटकादौ याम्यामपरां प्रतीचीं च ॥१॥

तिग्मांशुशिष्ययनयोरनुकूलमाहुर्यानं प्रशस्तमुभयोरुपयत्प्रभावे (?)। यायाद्दिवानिशमसंशयमन्यथा तु यातुर्भवन्ति बहुधा वधबन्धदोषा: ॥२॥

अयनानुकूलगमनं हितमर्केन्द्वोर्द्वयोरसम्पत्तौ। द्युनिशं जयाय यात्रा-विपर्यये क्लेशवधबन्धा: ॥३॥ अयनेन गतोर्कसोमयो: द्युनिशं चास्थितयो: पृथक् पृथक्। विदुषामिव शब्दशास्त्रवित् समवाये द्विषतां विराजता ॥४॥ तथा लग्नस्थे सूर्ये प्राचीं यातुश्च सूर्याभिमुखी यात्रा॥ दिशानधीशा रविशुक्रभौमलयो यमेन्द्विन्दुजसूरय: स्यु:। ललाटगे न प्रवसेद्दिगीशे गन्तव्यमस्मिन् खलु कण्टकस्थे ॥५॥

लग्नस्थश्चण्डरश्मिस्तनयरिपुगतो रात्रिनाथो ललाटी-
माहेय: कर्मसंस्थो हिमकरतनयो बन्धुगो द्वित्रिसंस्थ:।
जीवो लाभान्त्यसंस्थस्त्रिदशरिपुगुरु: सप्तमाशि[?]श्चार्कसूनु:
स्यात् सूनु: सिंहिकाया: निधननवमग: सर्वदैव प्रयाणे ॥६॥

---

4 P. om. मे 5 B भविष्यथ ; P2 भविष्यं 6 P. add. एष 7 P. add. हंसशब्देन वायुरप्युच्यते – हंसो वायुरभिमुखो यस्यामिति। अथ च एष हंसो 8 P. add. वक्रोक्ति: ॥९॥

सर्ग ३ 7

हंसोऽप्यसौ हंसगतेः सुदत्याः पुरः पुरश्चारु चलन्बभासे । ।से
वैलक्ष्यहेतोर्गतिमेतदीयामग्रेऽनुकृत्योपहसन्निवोच्चैः ॥१०॥

हंसोऽप्यसाविति[1] । असौ हंसोऽपि तस्याः हंसगतेः ।स
[सुदत्याः] दमयन्त्याः[2] भैम्याः पुरः [पुरः] चारु यथा भवति तथा चलन् सन्
बभासे । उत्प्रेक्षते – अस्याः वैलक्ष्यहेतोः खेदनार्थम् एतदीयां गतिम्
[अग्रे]ऽनुकृत्योच्चैरुपहसन्निव[3] ॥१०॥

पदे पदे भाविनि भाविनी तं यथा करप्राप्यमवैति[1] नूनम् ।
तथा सखेलं चलता लतासु प्रतार्य तेनाचकृषे कृशाङ्गी ॥११॥

पदे पदे[2] इति । तेन हंसेन सा कृशाङ्गी प्रतार्य प्रलोभ्य
लतासु मध्ये आचकृषे नीता । किं कुर्वता ? तथा तेन प्रकारेण सखेलं
सलीलं चलता सता । यथा सा[3] भाविनी साभिप्राया दमयन्ती भाविनि
भविष्ये[4] पदे पदे क्रमे क्रमे तं[5] हंसं नूनं[6] निश्चितं करप्राप्यमवैति[7]
जानाति । इदानीं धृत इदानीं धृत इति मन्यते तथा चलता ॥११॥

रुषा निषिद्धालिजनां यदैनां छायाद्वितीयां कलयांचकार ।
तदा श्रमाम्भःकणभूषिताङ्गीं[1] स कीरवन्मानुषवागवादीत् ॥१२॥

रुषा[2] निषिद्धेति । यदा [स] हंसः एनां छायाद्वितीयां[3] छायैव

1 B हंसोऽप्यसाविति । P₁ हंसो । 2 P₁P₂ om. दमयन्त्या 3 P₁ add. वैलक्ष्य – वृद्ध्यै गमनानि तस्या अपि पाठान्तरम् । उपमोत्प्रेक्षे ॥१०॥ 1 P₂ read. मवैति 2 P₁ पदे । 3 P₁P₂ om. सा 4 P₁ भविष्यत्यागामिनि 5 B add. तं 6 BP₂ नूनं निश्चितम् at the end. 7 B मवेति ; P₁P₂ मवैति ; edn. मवेति
1 P₂ read. श्रमणा° 2 P₁ रुषा 3 P₁P₂ om. छायाद्वितीयां

सर्ग २  8

द्वितीया यस्याः[5] नाऽन्या काचित् तां तथाविधां कलयांबभूव वेत्ति स्म। यतो रुषा कोपेन निषिद्ध आलिङ्गनो यया तां तथा। तदा कीरवत् शुकवत् मानुषवाक् समवादीत्। किंभूताम्? [6]श्रमाम्भसां कणैः स्वेदलवैर्भूषिताङ्गीम्[8] ॥१२॥

अये! कियद्यावदुपैषि दूरं व्यर्थं परिश्राम्यसि वा किमित्थम्[1]। /कि
उदेति ते भीरपि किं नु बाले! विलोकयन्त्या न घना वनाली: ॥१३॥

अये[2] कियदिति। अये [इ]त्यामन्त्रणे। त्वं कियद् यावद्दूरम् उपैषि। वाऽथवा व्यर्थं[3] निष्फलं कि[मित्थं] परिश्राम्यसि। वि: पक्षी तस्यार्थम्। न हि पक्षिणोऽर्थे एवंविधः श्रमो[4] घटते। नु प्रश्ने। हे बाले! ते[5] तव भीरपि किं नोदेति। किंभूताया:? घना: वनाली: विलोकयन्त्या:[6] ॥१३॥

वृथार्पयन्तीमपदे पदं त्वां मरुल्ललत्पल्लवपाणिकम्पैः।
आलीव पश्य प्रतिषेधतीयं कपोतहुङ्कारगिरा वनाली ॥१४॥ /वि

[1]वृथार्पयन्तीमिति। हे दमयन्ति! वनाली[2] इयं त्वां प्रति[3]षेधति। कीदृशी? कपोतहुङ्कारं किरति सा तथा। गिरेति पाठे [4]कपोतानां हुङ्कार एव प्रतिषेध[5]गीर्वाणी[6] यया प्रतिषेधति। त्वं पश्य।

4 P, R om. यस्याः 5 P नान्यैव 6 P add. श्रमाम्भःकणा एव भूषणं सादृश्यान्मौक्तिकालङ्कारो येषां तानि तथा अङ्गानि यस्याः तां तथा। भूषिताङ्गीमिति पाठे 7 P, R स्वेदैः 8 P add. रूपकमुपमा च ॥१२॥
2 R text किमर्थं 2 P अये। 3 P, R व्यर्थं परिश्राम्यसि व्यर्थं घटते as निरर्थकं परि/वा इत्थं किं परिश्राम्यसि; P, tw. किमर्थमिति पाठान्तरम्। 4 B add. न
5 P om. ते 6 P add. अनुप्रास ॥१३॥ // 1 P वृथा। 2 P इयं वनावली; R वनाळी
contd.

सर्ग ३ 9

किंभूताम्? । वृथा अपदे[7]ऽस्थाने पदमर्पयन्तीम् । कैः प्रतिषेधति? । मरुता[9] ललन्तो ये पल्लवाः त एव पाणयः तेषां कम्पैः । केव? । आलीव । यथा आली सखी निषेधति । अन्योऽपि[10] हुङ्कारगिरा पाणिकम्पैश्च प्रतिषिध्यते । रूपकोपमे[11] ॥१४॥

धार्यः कथङ्कारमहं भवत्या वियद्विहारी वसुधैकगत्या ।
अहो शिशुत्वं तव खण्डितं न स्मरस्य सख्या वयसाऽप्यनेन ॥१५॥

धार्य[1] इति । अहं भवत्या[2] कथङ्कारं धार्यः । किंभूतोऽहम्? । हि वियति विहर्तुं शीलमस्य[3] स तथा । किंभूतया? । वसुधा एव एका[4] गतिर्यस्याः तया तया । अहो इति आश्चर्ये । तव शिशुत्वम् अनेन स्मरस्य सख्या वयसा यौवनेनाऽपि न खण्डितम् । मया वयसा खण्ड्यते[5] इति भक्तिः[6] ॥१५॥

सहस्रपत्रासनपत्रहंसवंशस्य पत्राणि पतत्रिणः स्मः ।
अस्मादृशां चाटुरसामृतानि स्वर्लोकलोकेतरदुर्लभानि ॥१६॥

सहस्रपत्रासनेति[1] । वयं पतत्रिणः स्मः । किंभूताः? । सहस्रपत्रम्[2] आसनं यस्य ब्रह्मणः स तथा तस्य पत्राणि वाहनानि ये हंसाः तेषां

contd. 3 P2 om. प्रतिषेधति.... गिरेति पाठे । 4 P1 add. कपोतहुङ्कार एव गिरा यस्याः सा तथा । अथवा 5 P2 प्रतिषेधः 6 B प्रतिषेधयति 7 B अपथे 8 P1 add. अपदे पदं 9 P1 add. वायुना 10 P1 add. अपदे पदमर्पयन् 11 P1 रूपकमुपमा च ॥ P2 om. रूपकोपमे ॥१४॥ 1 P1 धार्यः । P2 धार्यः कथङ्कारमिति । 2 P2 add. त्वया 3 B ०मस्येति ; P1 यस्य मम 4 B एवका ; P1 add. मुख्या 5 B खण्ड्यते 6 P1 add. विरोधो विशेषोक्तिश्च ॥१५॥
1 B ०पत्रासनमिति । P1 सहस्रपत्रा । P2 सहस्रपत्रेति । 2 B ०पत्रासनं

वंशस्य अन्वयस्य प्रशाखि अङ्कुराः। ततोऽस्मात्कुरान्नाङ्कुरसामृतानि /६
प्रियवाक्यानि स्वर्लोकस्य ये लोका देवास्तेभ्य इतरेषां मानुषाणां
दुर्लभानि ॥१६॥

स्वर्गापगाहेममृणालिनीनां नालामृणालाग्रभुजो भजामः।
अन्नानुरूपां तनुरूपऋद्धिं कार्यं निदानाद्धि गुणानधीते ॥१७॥

स्वर्गापगेति। वयमन्नस्य भक्ष्यस्य अनुरूपां योग्यां (३१b)
तनोः शरीरस्य रूपस्य ऋद्धिं समृद्धिं भजामः। किंभूताः? । स्वर्गापगायां
गङ्गायां हेम्नः सुवर्णस्य मृणालिनीनां नालानां मृणालानाम् अग्रं
भुञ्ज्महे इति क्विप्, ते तथा। युक्तोऽयमर्थः। कार्यं कर्तृ निदानात् कार-
णात् हि यतो गुणानधीते, लक्षणया प्राप्नोति। कारणानुगुणं कार्य
मिति न्यायात् सुवर्णनालादिभोजनात् शरीरमपि सौवर्ण्यमित्यर्थः।
समानस्य ऋकारे वा प्रकृतिरिति सन्धिकार्याभावः॥१७॥

धातुर्नियोगादिह नैषधीयं लीलासरः सेवितुमागतेषु।
हैमेषु हंसेष्वहमेक एव भ्रमामि भूलोकविलोकनोत्कः॥१८॥

धातुर्नियोगादिह नैषधीयमिति। हैमेषु हंसेषु मध्ये अहमेक

3 P₁ वंशः अन्वय एव वंशो वेणुस्तस्य M P₂ वंशा॰ 5 P₁ इतरैर्मानुषै ~~and~~
दुर्लभानि and add. अमृतं हि मानुषैर्दुर्लभम्। अत्र मनुष्यपदे वाच्ये स्व-
वा/ लौकस्लोकेतरेति वाच्यं प्रयुक्तम्। अत्राऽत्रेर्नयनसमुत्थं ज्योति (रघु॰
II. 75) रित्यादिवदोजो गुणः। अनुप्रासः परम्परितरूपकं च ॥१६॥ // 1 P₁ स्वर्गा।
P₂ स्वर्गापमेति। 2 P₁ P₂ भक्ष्यस्य 3 P₂ repeats mg. sup. add. वयं 4 P₁ भुञ्ज्महे
5 B रूपं; P₁ करणा॰ 6 P₁ संधेरभावः। and add. अनुप्रासोऽर्थान्तर-
न्यासश्च ॥१७॥ // 1 P₁ धातु। P₂ धातुर्नियोगादिति।

सर्ग 3 11

एव[4] भ्रमामि । किंभूत: ?[2] । भूलोकस्य विलोकने[3] उत्क: उत्कण्ठित: । किंभूतेषु ? । नैषधसम्बन्धि लीलासर: [एव][4] सेवितुमागतेषु । कुत: ? । धातुर्नियोगात् आदेशात्[5] ॥१८॥

विधे: कदाचिद्भ्रमणीविलासे श्रमातुरेभ्य: स्वमहत्तरेभ्य: ।
स्कन्धस्य विश्रान्तिमदां तदादि श्राम्यामि नाविश्रमविश्वगोऽपि ॥१९॥

विधेरिति[1] । अहं स्वकीयेभ्यो महत्तरेभ्यो[2] वृद्धेभ्यो हंसेभ्य: स्कन्धस्य ~~वि~~ विश्रान्तिमदां दत्तवान् । किंभूतेभ्य: ? । विधेर्ब्रह्मणो भ्रमणीविलासे गमनक्रीडायां मार्गवशात् श्रमातुरेभ्य:[4] । कथम् ? । कदाचित् तदादि तद्दिनादारभ्य अविश्रमं यथा भवति[5] [एवं] विश्वगोऽपि सर्वत्र गच्छन्नपि अहं[6] तेषां वृद्धानां प्रसादान्न श्राम्यामि[7] ॥१९॥

बन्धाय दिव्ये न तिरश्चि कश्चित्पाशादिरासादितपौरुष: स्यात् ।
एकं विना मादृशि तन्नरस्य स्वर्भोगभाग्यं विरलोदयस्य ॥२०॥

बन्धायेति[1] । कश्चित् पाशादि:[2] दिव्ये[3] मादृशि तिरश्चि पक्षिणि बन्धाय न आसादितं पौरुषं येन स तथा स्यात्[4] । लुब्धकानां पाशा न प्रभवन्ति । कथम् ? । एकं नरस्य[स्य] पुरुषस्य स्वर्भोगभाग्य[5] विना ।

2 l2 किंभूता: ? । 3 l2 विलोकने: 4 l1 l2 om. एव 5 l1 add. अनुप्रास: ॥१८॥
1 l1 विधे: । l2 विधे: कदाचिदिति । 2 l2 om. महत्तरेभ्यो 3 l2 om. भ्रमणी°
4 l1 l2 श्रमेण आतुरेभ्य: 5 l1 om. एवं 6 l1 अहं bef. श्राम्यामि 7 l1
add. अनुप्रास: काव्यलिङ्गं विरोधाभासश्च ॥१९॥
1 l1 बन्धाय दिव्ये । l2 बन्धाय दिव्ये इत्येति । 2 l1 l2 om. विसर्ग: 3 l2 दिव्ये:
4 l1 लुब्धकादीनां 5 l1 add. दैवं

तत् प्रसिद्धम् ।[6] बध्नाति नस्त्वन्वि । परमिति पाठे[7] । किंभूतस्य ?[8] विरल
उदयो यस्य तस्य तथा ।[9] यस्य स्वर्भोगाभाग्यं पृथिव्यां स्थितस्यापि[10] नो
बो/ भवति । सोऽस्मान् बध्नाति ।[12] अथ च विगतेन रेफेण लस्य लकारस्य[11]
उ(प० व)दयो यस्य [लस्य तथा] नरस्य । नलस्येत्यर्थः । नरशब्दस्य
रेफस्थाने[13] लकार उच्चार्यते, तदा नल इति[14] शब्दो भवति[15] ॥२०॥

इष्टेन पूर्तेन नलस्य वश्याः स्वर्भोगमत्रापि सृजन्त्यमर्त्याः ।
महीरुहा दोहदसेकशक्तेराकालिकं कोरकमुद्गिरन्ति ॥२१॥

इष्टेन[1] पूर्तेनेति । अमर्त्या देवा इष्टेन यागादिदानेन पूर्तेन वापीकूपतडागादिना च वश्याः सन्तो नलस्य स्वः स्वर्गस्य भोगमत्रापि पृथिव्यामपि सृजन्ति[2] । युक्तोऽयमर्थः । महीरुहा वृक्षा अचेतना अपि
के/ तावद्दोहददानशक्तेः सेकशक्तेश्च सकाशात् आकालिकम् अकालोद्भवं कोरकं[3] कुड्मलमुद्गिरन्ति । किं पुनः सचेतनाः समर्थाश्च देवा भोगं[4] सृजन्तीति अत्र वक्तव्यम् ।[5] अन्तर्वेदि च यद्दानं तदिष्टमभिधीयते[6] । बहिर्वेदि च यद्दानं तद्दत्तं प्रोच्यते बुधैः । वापीकूपतडागादि तत्पूर्तमभिधीयते ( ? ) इति[7] [आकालिकडाद्यन्तवचने (पा० V.1.114)][8] ॥२१॥

6 P2 om. बध्नाति .... पाठे । 7 P1 पाठान्तरम् । 8 P1 add. विरलोदयस्य
9 P1 यस्य om. भाग्यं 10 P1 पृथ्वीस्थितस्य 11 B repeat. उदयस्य .. लकारस्य
12 P2 om. लस्य तथा 13 P1 रकारस्थाने; P2 रेफस्य 14 P1 om. इति 15 P1
add. अनुप्रासः । पाशादिना असम्बन्धप्रतिपादनात् दैवेन च सम्बन्धप्रतिपादनात् सम्बन्धेऽसम्बन्धे च सम्बन्ध इत्येवंरूपातिशयोक्तिः ॥२०॥

1 P1 इष्टेन । 2 P1 add. यत्र दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं च सुखं स्वर्गपदास्पदम् ॥(?)॥ 3 P1 कुड्मलं कोरकं 4 P1 add. तं 5 P1 add. एकाग्निकर्महवनं त्रेतायां यच्च हूयते ( ? ) 6 P1 तद्दत्तं प्रोच्यते बुधैः । 7 P1 om. इति । 8 P1 add. दृष्टान्तः ॥२१॥

सर्ग ३ 13

सुवर्णशैलादवतीर्य तूर्णं स्ववाहिनीवारिकणावकीर्णैः।
तं वीजयामः स्मरकेलिकाले पक्षैर्नृपं चामरबद्धसख्यैः॥२२॥

सुवर्णशैला[1]दिति। वयं सुवर्णशैलान्मेरोरवतीर्य तूर्णं[2] तं नलं स्मरकेलिकाले पक्षैः[3] सुरतश्रान्तं नृपं वीजयामः। किंभूतैः? चामरेण बद्धसख्यैः सदृशैः[4]। पुनः किंभूतैः ~~पक्षैः~~ [पक्षैः]? स्ववाहिन्याः गङ्गायाः वारिकणैरवकीर्णैः[5]। [वीजिर्धातुरपठितोऽपि शिष्टप्रयोगात् भिल्लिखचिकचिक्षपिवद्धातुतया द्रष्टव्यः। तथा च भट्टेन्दुराजेन स्वालङ्कारे – श्रुत्या सम्बन्धविरहात् यत्पदेन पदान्तरम्। गुणवृत्तिप्रधानेन युज्यते रूपकं च तत् ॥ (P. 11)॥ बन्धस्तस्य यतः[6] श्रुत्या श्रुत्यर्थाभ्यां च तेन तत्। समस्तवस्तुविषयमेकदेशविवर्ति[7] च ॥ (
)॥ समस्तवस्तुविषयमालारूपकमुच्यते। यद्वैकदेशवृत्तिः स्यात् परररूपेण रूपणात्॥ (P. 13-14)॥ इत्यत्र[8] उत्पतद्भिः पतद्भिरिव पिच्छाली बालशालीभिः। राजहंसैरवीज्यन्त शरदैव शरो नृपाः॥ (P. 13-14)॥ एकदेशविवर्त्युदाहरणे[9] व्याख्यातम्][10] ॥२२॥

क्रियेत चेत् साधुविभक्तिचिन्ता व्यक्तिस्तदा सा प्रथमाभिधेया।
या स्वौजसां साधयितुं विलासैस्तावत्क्षमानामपदं बहुः स्यात्॥२३॥

क्रियेते[1]ति। चेत् यदि साधूनां विभक्तेर्विभागस्य चिन्ता [क्रियेत] तदा सा नललक्षणा व्यक्तिः प्रथमाभिधेया गणनीया।

1 P₁ सुवर्णशैलात् 2 P₁ om. तूर्णं 3 P₁ पक्षैः aft. नृपं; P₂ aft. श्रान्तं 4 P₁ add. इत्यर्थः 5 B add. व्याप्तैः 6 P₂ यत् 7 P₁ बिभर्ति 8 P₁ om. इत्यत्र 9 P₂ ०हरणं 10 P₁ add. अनुप्रास उपमा च ॥२२॥

1 P₁ क्रियेत चेत्।

या नलरूपा व्यक्तिः स्वकीयानाम[3] ओजसां विलासैः प्रतापैः ताव-
दतिप्रमाणं अमानाम[4] पृथिवीसंज्ञं पदं साधयितुं[5] बहुः स्यात् बह्वी[6]
स्यात्। सर्वत्र नला बहवो भवन्ति। [समर्था इति यावत्]। साधयतीति
साधुः। [7]कृवापाजिमिस्वदिसाधी (उ. सू. I-1) इत्यादिना उणादिक[8] उण्-
प्रत्ययः। बहुशब्दात्[9] (40b) तो गुणवचनादि(     ) इत्यादिना विभाजया
ईप्रत्ययः। अथ च यदि साधु सम्यग् विभक्तीनां सुबादीनां चिन्ता
क्रियते तदा सा प्रथमा विभक्तिर्व्यक्तिः प्रथमाभिधेया वाच्या[10]। प्रथमा-
शब्दो क्षिरावर्तनीयः। [11]या व्यक्तिः सुश्च औ[12] च जश्च स्वौजसः, तेषां
विलासैः तावत्संख्यम् असंख्यं बहु प्रचुरं नाम पदं सुबन्तं ~~[illegible]~~
प्रातिपदिकं साधयितुं निष्पादयितु अमा स्यात्। तथा च पाणिनिः
स्वौजसमौट्छष्[13] (पा॰ IV.1.2) इत्यादिसूत्रं कृतवान्। अत्र[14] समासोक्तिः।
[15]तावच्छब्दः साकल्ये ॥२३॥

राजा स यज्वा विबुधव्रजत्रा कृत्वाऽध्वराज्योपमयैव राज्यम्।
भुङ्क्ते श्रितश्रोत्रियसात्कृतश्रीः पूर्वं पुनः शेषमशेषमन्त्यम् ॥२४॥

राजा स[1] यज्वेति। स राजा नलः यज्वा यजनशीलः
सन् विबुधव्रजत्रा[2] विबुधानामायत्तं कृत्वा। राज्यं भुङ्क्ते। कया?।
अध्वरस्य यज्ञस्य[3] यदाज्यं घृतं तस्य उपमया एव। यथा [आज्यं]

2 P1 ०लक्षणा 3 P2 स्वकीयेन 4 P1 add. पदं 5 P1 add. पालयितुं
6 P1 भवेत्; P2 om. बह्वी स्यात्। 7 P1 कदापाजिमिस्वदीत्यादिना;
P2 ०स्वदीसाधीत्यादिना 8 P1 उणादिकाः 9 P1 बहुवचनात् 10 P1
om. वाच्या 11 P1 add. तथा व्याक्रियते; P2 om. या व्यक्तिः
12 BP1P2 औश्च; edn. औ च 13 P1P2 शस् 14 P2 om. अत्र... साकल्ये।
15 P1 om. ताव॰ साकल्ये ॥२३॥ 1 P1 राजा। 2 P1P2 विबुधामा॰ 3 B यागस्य

सर्ग 3 15

विबुधव्रजाय देवतासमूहाय देयं कृत्वा भुङ्क्ते तथा । किंभूतः ? । श्रोता- णां श्रोत्रियाणाम् आयत्तीकृता श्री[र्लक्ष्मी]र्येन स तथा । पुनः पूर्वम् अध्वरस्य शेषं हुतशेषं भुङ्क्ते । तथा अन्त्यं राज्यस्य शेषं समग्रमपि भुङ्क्ते, चक्रवर्तित्वात् ॥२७॥

दारिद्र्यदारिद्रविणौघवर्षैरमोघमेघव्रतमर्थिसार्थे ।
सन्तुष्टमिष्टानि तमिष्टदेवं नाथन्ति के नाम न लोकनाथम् ॥२५॥

दारिद्र्यदारीति । [तं] लोकनाथं नाम [अरो] के पुरुषा इष्टानि स्वाभिलाषितवस्तूनि न नाथन्ति न प्रार्थयन्ते । द्विकर्मकः । किंभूतम् ? । दारिद्र्यं दारयतीत्येवंशीलं तत् द्रविणं सुवर्णं तस्यौघः प्रवाहः तस्य [वर्षै]र्वृष्टिभिः कृत्वा अर्थिसार्थे अमोघं सफलं मेघव्रतं नियमो यस्य तं तथा । किंभूतम् ? । सन्तुष्टम् । अर्थिप्राप्तौ सहर्षम् । तथेष्टास्त- र्पिता देवाः इन्द्रादयो येन (पा०) न तं तथा । यः किल इष्टदेवो लोक- नाथः स प्रार्थ्यते । अनुप्रासः ॥२५॥

अस्मात्किल श्रोत्रसुधां विधाय रम्भा चिरं भामतुलां नलस्य ।
तत्रानुरक्ता तमनाप्य भेजे तन्नामगन्धान्नलकूबरं सा ॥२६॥ । त

4 B सूर्येण 5 I2 पुनः पुनः 6 I1 add. आज्यं 7 I1 I2 om. तथा 8 I1 add. अनुप्रास उपमा व्यतिरेकश्च । शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनो- र्द्वयोः । तत्र यद्भेदकथनं व्यतिरेकः स उच्यते ॥ (का० द० II १८०) ॥ उपमया चेति पाठे उत्प्रेक्षापि ॥२४॥ // 1 I1 दारिद्र्य 2 B I2 प्रार्थयन्ति 3 I1 समूह० 4 I1 om. कृत्वा 5 I1 I2 मेघस्य 6 B देवेन्द्रा०; I1 देव देवतादयो; I2 देवता; ed. देवा 7 I1 add. इष्टानि सन्तुष्टमिवेति पाठान्तरम् । 8 I1 इष्टो 9 I1 add. एतेन त्यागी नायको विहितः । अनुप्रास उपमा च ॥ I2 om. अनुप्रासः ॥ ॥२५॥

B 115.

सर्ग ३ 16

अस्मात्किलेति। [किल] रम्भा अप्सरोमुख्या अस्मत् सकाशात् चिरं चिरकालम् अतुलां निरुपमां नलस्य भां कान्तिं श्रोत्रे न्यस्य सुधाममृतरूपां विधाय तत्र नले ऽनुरक्ता सानुरागा अभूत्। तलश्च सा तं नलमनाप्य [अप्राप्य] तस्य नामगन्धात् नामलेशात् नलकूबरं धनदपुत्रं भेजे। नलकूबरशब्दमध्ये नलशब्दोऽस्ति॥ २६॥

स्वर्लोकमस्माभिरितः प्रयातैः केलीषु तद्गानगुणान्निपीय।
हाहेति गायन् यदशोचि तेन नाम्नैव हाहा हरिगायनोऽभूत्॥२७॥

स्वर्लोकमिति। अस्माभिरितः पृथिवीलोकात् [स्वर्लोकं] प्रयातैः सद्भिः यत् हरेरिन्द्रस्य गायनो गन्धर्वो गायन् सन् हा हा कष्टं कष्टमित्यशोचि। किं कृत्वा? केलीषु क्रीडासु तस्य नलस्य गानगुणान् निपीय। तेन कारणेन हरेरिन्द्रस्य गायनो नाम्नैव हाहा इत्यभूत्। हाहा नाम॥२७॥

शृण्वन्सदारस्तदुदारभावं हृष्यन् मुहुर्लोम पुलोमजायाः।
पुण्येन नालोकत लोकपालः प्रमोदबाष्पावृतनेत्रमालः॥२८॥

शृण्वन्सदार इति। लोकपालो नाकस्य पालयिता सदारः सकलत्रस्तस्य नलस्य गीयमानम् उदारभावं शृण्वन् सन् पुलोमजाया

1 P. अस्मात्किल-श्रोत्र/ 2 P. किल om. तलश्च सा; P2 om. किल 3 P. add. विसर्गः 4 P. om. अभूत् 5 P2 om. अनाप्य 6 P. add. नलस्य 7 P. add. अनुप्रास उत्प्रेक्षा च॥२६॥ // 1 P. स्वर्लो/ 2 B P. स्वर्गलोकं 3 B P2 इन्द्रस्य हरेः 4 P. अशोचत 5 P. नामा/ and add. अतिशयोक्तिः॥२७॥ // 1 P2 reads नाकपालः 2 P. शृण्वन्नित्यादि/ 3 P. om. लोकपालो 4 P2 om. सन्

इन्द्राण्याः दृश्यन् मुहुः शोभाच्छादित क्षोमे अङ्गाङुष्ठं तस्या एव[6] पुण्येन सुकृतेन[7] नालोकत। इतरथाऽऽशङ्का स्यात्। किंभूतः ?। प्रमोदबाष्पै-रावृता नेत्रमाला यस्य स तथा। आनन्देन[8] बाष्पावृतनेत्रत्वान्न पश्यति[9]। ॥२८॥

सापीश्वरे शृण्वति तद्गुणौघान् प्रसह्य चेतो हरतोऽर्धशम्भुः।
अभूदपर्णाङ्गुलिरुद्धकर्णा कदा न कण्डूयनकैतवेन ॥२९॥

सापीश्वरे[1] इति। साप्यपर्णा देवी पार्वती ईश्वरे तस्य नलस्य गुणौघान् शृण्वति सति[2] कण्डूयनस्य कैतवेन[3] व्याजेन कदा अङ्गुल्या रुद्धः कर्णो यया सा तथाविधा नाभूत्। अपि तु पिहितश्रोत्रा बभूव।[4] किंभूतात् ?। प्रसह्य चेतो हरतः। यतः किंभूता देवी ?। अर्द्धशम्भुः।[5] [6]अत एवाऽन्यत्र गन्तुमशक्यत्वात्। [अर्द्धं शम्भोरर्धशम्भुः। अर्द्धं नपुं-सक (पा॰ II।२।२)मिति षष्ठीसमासापवादस्तत्पुरुषः। एकदेशिनैकाधि-करणे (पा॰ II।२।१) इति वर्तते। अवयवी एकं च द्रव्यं शम्भुः समप्रवि-भागवचनश्चार्द्धशब्दः। अपरे तु] अर्द्धं शम्भुर्यस्याः सा तथा[7]॥२९॥

अलं सृजन् धर्मविधौ विधाता रुणाद्धि मौनस्य मिषेण वाणीम्।
तत्कण्ठमालिङ्ग्य रसस्य तृप्तां न वेद तां वेदजडः स वक्राम् ॥३०॥

5 I₁I₂ om. विसर्गः 6 I₁ पुण्येनैव 7 I₁ add. एव 8 I₁ आनन्दबाष्प॰ 9 I₁ एनापश्यत। हर्षो व्यभिचारी, पुलकोद्गमः साात्त्विकः। तयोरुदयः। छेकानुप्रासः ॥२८॥ // 1 I₁ सापी। 2 I₁ I₂ कदा here 3 I₂ व्याजेन कैतवेन 4 I₁ add. इत्यर्थः 5 I₁I₂ किंविशिष्टात् ?। 6 B अत...मशक्यत्वात् at the end. 7 I₁ add. अपर्णेति साभिप्रायम्। व्याजोक्तिः ॥२९॥

सर्ग २ 18

अलं[1] सृजन्निति। विधाता[2] ब्रह्मा धर्मविधौ सृजन्[3] सर्गं कुर्वन् मौनस्य (MIb) मिषेण सन्ध्यादौ यद्वाणीं रुणद्धि तदलं पूर्यतां वृथा रुणद्धीति[4]। स ब्रह्मा तां वाणीं नलस्य कण्ठमालिङ्ग्य रसस्य[5] तृप्तां न वेद न जानाति। यतो[6] वेदपाठेन जडः। किंभूताम्[7]? वक्रां कुटिलाम्। [8]अथ च वाणी नलकण्ठे रसपूर्णा सरसा, विदग्धत्वाच्च[10] वक्रोक्तिरूपा[11]॥३०॥

श्रियस्तदालिङ्गनभूर्न भूता व्रतक्षतिः कापि पतिव्रतायाः।
समस्तभूतात्मतया न भूतं तद्भर्तुरीर्ष्याकलुषाणुनापि॥३१॥ /षा

श्रियस्तादिति[1]। श्रियो लक्ष्म्याः तस्य नलस्य आलिङ्गनेन भूः परिरम्भजा कापि व्रतक्षतिर्हानिः[3] न भूता। किंभूतायाः? पतिव्रतायाः। तथा[4] तस्याः[5] भर्तुः श्रीपुरुषोत्तमस्य[6] ईर्ष्यया कोपेन[7] कलुषस्य[8] अणुनापि स्वल्पपरिमाणेनाऽपि न भूतम्। कया? [9]समस्तभूतानाम् आत्मतया। परमेश्वरः सर्वेषां प्रत्यगात्मा नलस्यापि आत्मा स एव। अतो
ति:/ न कापि क्षतिः[10]। न च कालुष्यम्[11]॥३१॥

धिक् तं विधेः पाणिमजातलज्जं निर्माति यः पर्वणि[2] पूर्णचन्द्रम्[1]।
षा/ मन्ये स विज्ञः स्मृततन्मुखश्रीः कृत्वार्धमौज्झन्मृडमूर्ध्नि यस्तम्॥३२॥

1 Pl अलं; P2 अलं सृजन्निति। 2 Pl धाता 3 B सृजन् अङ्गीकुर्वन्; P2 सृजन् सङ्गं कुर्वन् 4 Pl om. इति 5 Pl om. रसस्य तृप्तां 6 B तयो 7 P2 add. तां 8 B तया 9 P2 नलस्य 10 P2 ~~add~~ च at the end 11 Pl add. एवं विधां च वेदजडो वक्तुं न जानाति। एतेन तस्य वाग्मिता प्रतिपादिता। अनुप्रासोऽप्रस्तुतिः समासोक्तिश्च॥३०॥ // 1 Pl श्रियः। 2 B आलिङ्गनेन 3 Pl व्रतस्य 4 B यतः 5 Pl अस्याः 6 B कृष्णस्य 7 B add. वा 8 Pl add. कालुष्यस्य 9 Pl समस्तभूतात्मतया 10 Pl व्रतक्षतिः 11 Pl add. अनुप्रासः काव्यलिङ्गं च॥३१॥

contd.

धिक्[3] त्वं विधेरिति। विधेर्ब्रह्मणः त्वमजातलज्ज निर्लज्जं पाणिं धिक् निन्दामः।[4] यः पर्वणि पूर्णं चन्द्रं निर्माति[5]। अहमेवं[6] मन्ये - स[7] पुनर्ब्रह्मणः पाणिर्विरो[9] विशेषरः यः पाणिस्त्वं[8] चन्द्रं कृतार्द्धम् अर्द्धं कृतमेव मृडस्य श्रीमहादेवस्य मूर्ध्नि [औज्झत्][10] चिक्षेप। किंभूतः। स्मृता तस्य नलस्य मुखश्रीर्येन स तथा[11] ॥३२॥

निलीयते ह्रीविधुरः स्वजैत्रं श्रुत्वा विधुस्तस्य मुखं मुखान्नः।
सूरे समुद्रस्य कदापि पूरे कदाचिदभ्रभ्रमदभ्रगर्भे ॥३३॥

निलीय[ते][1] इति। विधुश्चन्द्र[मा][2]स्तस्य नलस्य मुखं नोऽस्माकं मुखात् स्वस्याऽऽत्मनो जैत्रं श्रुत्वा ह्रिया लज्जया विधुरः [सन्] कदाचिदमावास्यायां सूरे श्रीसूर्यमध्ये[3] निलीयते अन्तर्हितो[4] भवति। कदाचिदस्तसमये समुद्रस्य पूरेऽन्तर्द्धत्ते ][5] स्मृततन्मुखश्री(III.32) - रुभयत्र सम्बध्यते। कदाचिदभ्रे आकाशे भ्रमन्ति यान्यभ्राणि मेघास्तेषां गर्भे प्रविशति[6] ॥३३॥

संशाप्य नः स्वध्वजभृत्यवर्गान् दैत्यारिरत्यब्जनलास्यनुत्यै।
तत्संकुचत्पाभिसरोजपीताद्धातुर्विलज्जं रमते रमायाम् ॥३४॥

3 P. धिक्। 4 P. पूर्णचन्द्रं 5 P. add. पूर्णमिन्दुमिति पाठान्तरम्। 6 P. इति; P2 om. एवं 7 P. ब्रह्मणः स पाणिर्विरः; P2 स ब्रह्मणः पाणिः पुत्रः विरः 8 P. पाणिश्चन्द्रं कृतोऽर्द्धो यस्य तं कृतार्द्धम् 9 B उद्रस्य 10 B add. किं; P. add. तत्याज ॥ P. add. इदं पूर्ववाक्येऽपि सम्बन्धनीयम्। प्रदीपं दीपकं च॥३२

1 P. निलीय। 2 P. om. विसर्गः 3 P. om. श्री 4 P2 अन्तर्हीनो 5 P. P2 om. स्मृत°... सम्बध्यते। 7 P. add. न भ्राजति अभ्रं डः प्रत्ययः। व्योम अभ्राति अपोराति वा। अभ्रं न भ्रश्यन्ति आपोऽस्मादित्येके। यद्वा - न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः। ( ) इत्यभ्रं मेघः। अन्योऽपि स्वजैत्रं श्रुत्वा यत्र क्वापि निलीयते। समासोक्तिः पर्यायः तुल्ययोगिताऽपि अनुप्रासश्च ॥३३॥

संज्ञाप्य न इति[1]। दैत्यारिः श्रीकृष्णः धातुर्ब्रह्मणः[2] सकाशात् विलज्जं निर्लज्जं यथा भवत्येवं रमायां लक्ष्म्यां विषये रमते। किंभूतात्[3]। तेन नलमुखस्तवेन[4] संकुचता नाभिसरोजेन पीतात् अन्तर्हितात्। [पूर्वार्धप्रक्रान्ताया नुतेस्तच्छब्देन परामर्शः।] किं कृत्वा?। नोऽस्मान् अत्यब्जस्य अब्जं कमलमतिक्रान्तं येन तस्य तथाविधस्य नलास्यस्य[5] वक्त्रस्य नुत्यै स्तुत्यर्थं संज्ञाप्य सं(५।२७)ज्ञया प्रेर्य। किंभूतान् अस्मान्?। स्वस्य ध्वजस्य गरुडस्य भृत्यवर्गान् परिचारकान्। यदा वयं नलमुखं स्तुमः तदा नाभिकमले संकुचिते ब्रह्मा न दृश्यते[6] ॥३४॥

रेखाभिरास्ये गणनादिवास्य द्वात्रिंशता दन्तमयीभिरन्तः।
चतुर्दशाष्टादश चात्र विद्या द्वेधापि सन्तीति शशंस वेधाः ॥३५॥

रेखाभिरिति[1]। वेधाः ब्रह्मा[2] इति शशंस[3]। अत्र नलमुखे चतुर्दश विद्याः तथा अष्टादश च[4] विद्या द्वेधा द्विप्रकारा अपि सन्ति। उत्प्रेक्षते — अस्य नलस्याऽऽस्ये अन्तर्मध्ये[5] द्वात्रिंशता दन्तमयीभिः रेखाभिर्गणनादिव[6]। चत्वारो वेदाः, षडङ्गानि, पुराणं[7] न्यायो मीमांसा धर्मशास्त्राणीति चतुर्दश। अष्टादशपक्षेऽधिका विद्या, आयुर्वेदो, धनुर्वेदो, नाट्यवेदो, अर्थशास्त्राणि। विशिष्टस्य पुरुषस्य द्वात्रिंशद्दन्ता भवन्ति [एते[8]] दन्ता न भवन्ति [किन्तु] विद्यागणनाया एता[9] रेखाः[10] ॥३५॥

1 P. संज्ञाप्य। 2 B विष्णुः 3 P. किंभूतात् ... अन्तर्हितात् alt. परिचारकान् 4 P2 °स्तवनेन 5 P. नलस्य 6 P. add. अनुप्रासः काव्यलिङ्गं च ॥३४॥

1 P. रेखाभिः। P2 रेखाभिरास्ये इति। 2 P. om. ब्रह्मा 3 B शशास 4 P. P2 om. च 5 B P2 अन्तर्मध्ये alt. °गणनादिव। 6 P. add. -भिरित्यर्थः। सदैकत्वे सर्वाः सङ्ख्येयसङ्ख्ययोः 7 B पुराणान्य[illegible] 8 P2 om. एते 9 P. P2 /य रेखा एताः 10 P. add. सापह्नवोत्प्रेक्षा अनुप्रासश्च ॥३५॥

सर्ग ३ 21

श्रियौ नरेन्द्रस्य निरीक्ष्य तस्य स्मरामरेन्द्रावपि न स्मरामः।
वासेन तस्मिन् अमयोश्च सम्यक्बुद्धौ न दध्मः खलु शेषबुद्धौ॥३६॥

श्रियौ[2] नरेन्द्रस्येति। तस्य नरेन्द्रस्य नलस्य श्रियौ[2] निरीक्ष्य शोभामैश्वर्यं[3] च विलोक्य वयं[4] स्मरामरेन्द्रावपि[5] शोभया कामम् ऐश्वर्येण इन्द्रं[6] च न स्मरामः। किंच तस्मिन्नले उभयो: अमयोर्वासेन पृथ्वीतितिअयोरवस्थाने न शेषबुद्धावपि नागराजं बौद्धागमप्रणेतारं च बुद्धौ न दध्मः[7]॥३६॥

विना पतत्रं विनतातनूजैः समीरणैरीक्षणलक्षणीयैः।
मनोभिरासीदनणुप्रमाणैर्न लङ्घिता दिक्कतमा तदश्वैः॥३७॥

विना[1] पतत्रमिति। तस्य नलस्याश्वैः कतमा दिक् न लङ्घिता[2] आसीत्। किंभूतैः? [पु]तत्रं पक्षं विना विनतातनूजैः गरुडैः। गरुडः पक्षैः वेगवान्।[4] एते स्वयमेव [तथा]। ईक्षणलक्षणीयैः[5] समीरणैर्वायुभिः। वायुः किल चक्षुषामप्रत्यक्षो[6][7][8] भवति, अरूपत्वात्[9]। पुनः किंभूतैः? अनणुप्रमाणैर्मनोभिः। मनः किल[10] परमाणुपरिमाणं भवति। एते चाश्वा महापरिमाणानि मनांसि"॥३७॥

2 P. श्रियौ। P2 श्रियो नरेन्द्रस्येति। 2 P. श्रियो 3 P2 ऐश्वर्येण 4 P2 om. वयं 5 P. न स्मरामः here 6 P. चन्द्रं 7 P. add. खलुशब्दोऽप्यर्थो अनुप्रासो यथासंख्यं प्रतीपं वा॥३६॥ 1 P. विना। 2 P. add. निर्जिता 3 B पक्षौ 4 P. add. अतो, (स्वत एव) 5 B समीरै॰ 6 P. add. न 7 B चक्षुषां alt. भवति; P/P2 चक्षुषः 8 P. प्रत्यक्षो भवति 9 P/P2 add. शब्दस्पर्शगुणश्च। 10 P2 om. किल 11 P. add. अनुप्रासो विभावना वा। तदुक्तं — यस्य यथात्वं लोके प्रसिद्धमर्थस्य विधेत तस्मात्। अन्यस्यापि तथात्वं यस्यामुच्येत सान्येयम्( )॥ यथा असंभृतमण्डनमित्यादि॥३७॥

सङ्ग्रामभूमीषु भवत्यरीणामस्त्रैर्नदीमातृकता गतासु।
तद्बाणधारापवनाशनानां राजव्रजीयैरसुभिः सुभिक्षम् ॥३८॥

सङ्ग्रामभूमीष्विति। तस्य नलस्य बाणधारा एव पवनाशनाः सर्पाः तेषां सङ्ग्रामभूमी(52b)षु राजव्रजीयैर्नृपसम्बन्धिभिरसुभिः प्राणैः सुभिक्षं भवति। किंभूतासु? अरीणाम् अस्त्रैः रुधिरैः नदीमातृकतां गतासु। या भूमी नद्यम्बुजीवना भवति तस्यां सदैव[2] सुभिक्षम्। सर्पा हि[3] वायुभक्षाः।[4] प्राणाश्च वायवः[5] ॥३८॥

यशो यदस्याऽजनि संयुगेषु कण्डूलभावं भजता भुजेन।
हेतोर्गुणादेव दिगापगालीकूलङ्कषत्वव्यसनं तदीयम् ॥३९॥

यशो[1] यदस्येति। अस्य भुजेन संयुगे[षु] कण्डूलभावं भजता खर्जूलत्वं भजता यद्यशोऽजनि तदीयं तस्य यशसः सम्बन्धि दिश एवाऽऽपगाः नद्यः तासामाली[2] श्रेणी तस्याः कूलङ्कषत्वं तस्य व्यसनं हेतोः कारणस्य भुजलक्षणस्य गुणादेव खर्जूलत्वादेव। यादृग् गुणं कारणं तादृग् गुणं कार्यम्। खर्जूलनादुत्पन्नं[3] यशोऽपि खर्जूलम्। अत एव [दिशां] कूलानि[4] कषति[5] ॥३९॥

यदि त्रिलोकी गणनापरा स्यात् तस्याः समाप्तिर्यदि नायुषः स्यात्।
पारेपरार्धं गणना यदि स्यात् गणेयनिःशेषगुणोऽपि सः स्यात् ॥४०॥

1 P. सङ्ग्राम। 2 P.R सर्वदा 3 P. च 4 P. add. जनाः 5 P. add. अनुप्रासो रूपकं पर्यायोक्तं च। गम्यस्यापि भङ्ग्यन्तरेणाभिधानं पर्यायोक्तम्। यथा स्पृष्टास्ता नन्दने शच्याः केशसंभोगलालिताः। सावज्ञं पारिजातस्य मञ्जर्यो यस्य सैनिकैः॥ इ ॥३८॥ 1 P. यशो। 2 B तासां त्वा° 3 P. खर्जूलनादुत्पन्नं, R खर्जूलत्वादेवो° 4 P.R तटानि 5 P. add. अनुप्रासो रूपकं च॥ ॥३९॥

यदि त्रिलोकीति[1]। यदि त्रिलोकी[2] अन्यकार्याणि विहाय गणना-
परा स्यात्। यदि च[3] ~~त्रैलोक्या~~ तस्याः त्रैलोक्याः आयुषः समाप्तिर्न स्यात्।
यदि गणितं[4] संख्या पारेपरार्धं स्यात्[5] परार्धसंख्यायाः अधिकं स्यात्।
ततः सोऽपि नलो गणेयाः[6] गणयितुं[7] शक्याः निःशेषाः गुणा यस्य स
तथाविधः स्यात्। एतच्च पूर्वोक्तं नास्ति। अतो गुणगणनापि[8] न संभवति।
[9]गण (१११६) संख्याने चुरादावदन्तः। स्वराद्यः [illegible] (IV.2.10)[10] इति य प्रत्यये
संज्ञापूर्वकविधेरनित्यत्वात् कारितस्याऽल्लोपे[11] गुणे च गणेय इति रूपम्[12]।
||८०||

अवारितद्वारतया तिरश्चामन्तःपुरे तस्य निविश्य राज्ञः।
गतेषु रम्येष्वधिकं विशेषमध्यापयामः परमाणुमध्याः ||८१||

अवारितेति[1]। वयं तस्य राज्ञोऽन्तःपुरे निविश्य[2] परमाणु-
मध्याः कृशोदरीः प्रमदाः रम्येषु गतेषु अधिकं विलासं[3] विशेषमध्याप-
यामः। कथं निविश्य? तिरश्चां पक्षिणाम् अवारितद्वारतया[4] कृत्वा।
अनिषिद्धद्वार[5]प्रविशत्वेन[6][7]। पक्षिणो हि राजद्वारे न निषिध्यन्ते[8] ||८१||

पीयूष(सुधा)धारानधराभिरन्तस्तासां रसोदन्वति मज्जयामः।
रम्भादिसौभाग्यरहःकथाभिः काव्येन काव्यं सृजताऽऽदृताभिः ||८२||

1 P. यदि। 2 P. P2 om. अन्य...विहाय 3 P. P2 तस्याश्च त्रैलोक्या यदि 4 P. गणित° 5 P. भवेत् 6 P. गणया 7 B गणितुं 8 B गुणगणानां 9 P. add. गणनीयं तु गणेयम् (अमर° III.i.64)। उणादौ, गणेरेयः (?)। अथवा 10 P. P2 om. इति य° 11 P2 om. गुणे च 12 P. add. पारे मध्ये षष्ठ्या वा (पा° II.i.18)। अनुप्रासोऽतिशयोक्तिश्च। रुद्रटमतेन उत्पाद्योपमा। दण्डिमतेन तु अद्भुतोपमा। अतिशयोक्तिरेव तु ज्ञेयः ||८०|| // 1 B अवारीति P. अवा। 2 P2 om. निविश्य 3 P. °द्वारया 4 P. P2 om. कृत्वा 5 P2 om. द्वार° 6 P. °प्रवेशित्वेन 7 P2 add. द्वारस्य 8 P. add. णिचश्च (पा° I.iii.74) इति कर्त्रभिप्राये क्रियाफले विवक्षायामात्मनेपदे प्राप्ते

contd.

1 पीयूषधारेति।(५३अ) वयं तासामन्तःपुरीणाम् अन्तःस्त्रीणां रम्भादीनां सौभाग्यस्य या रहःकथा एकान्तवार्ता स्ताभिः 2 रसोदन्वति शृङ्गारसमुद्रे मज्जयामः 3 । किंभूताभिः ? । पीयूषधाराभ्यः सकाशात् अनधराभिः 4 अहीनाभिः । 5 तद्विरुद्धे नञ् । उत्कृष्टाभिरित्यर्थः । पुनः किंभूताभिः ? । काव्येन शुक्रेण आदृताभिः । किं कुर्वता 6 ? । काव्यं कवित्वं सृजता 7 । उदन्वानुदधौ च (पा० VIII ।ii। 13) इति निपातः ॥ ४२॥

काभिर्न तत्राऽभिनवस्मराज्ञाविश्वासनिक्षेपवणिक् क्रियेऽहम् ।
जिहेति 1 यन्ना बहुतोऽपि तिर्यक्काश्चिन्तिर[...]त्रपते न तेन ॥ ४३॥ ॥ श्रि

2 काभिर्न तत्रेति । तत्राऽन्तःपुरे काभिर्नायिकाभिः अहमभिनवा 3 अपूर्वरूपा या स्मराज्ञा कामाज्ञा तस्याः विश्वासेन यो निक्षेपः रहस्यवार्त्ताकथनं तत्र वणिक् वाणिजको न क्रिये । अपि[तु] 4 सर्वा अपि मम सर्वं कथयन्ति । 5 यत् कारणात् तिर्यक् पक्षी बहुतोऽपि रहस्यवार्त्ताकथनात् अथ[वा] बहुभ्योऽपि 6 जनेभ्यो न जिहेति । तेन कारणेन तिरश्चः पक्षिणोऽपि सकाशात् कश्चिदपि जनो न 7 त्रपते ॥ ४३॥

वार्ता 1 च नासत्यपि सान्यमेति योगादरन्ध्रे हृदि यां निरुन्धे ।

contd. क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः... जनेऽस्पृ[ध] स्पृद्धृभ्यो णेः (पा० I।iii। 86) इति परस्मैपदम् । अनुप्रासो लुप्तोपमा च ॥ ४१॥ // 1 I. पीयूष 2 I. om. रसोदन्वति...किंभूताभिः ? 3 I2 उदन्वानुः..निपातः here. 4 B अहीननाभिः 5 I2 om. तद्विरुद्धे...त्यर्थः । 6 B I2 किंभूतेन ? 7 I. add. अनुप्रासोपमे ॥ ४२॥ // 1 I2 for यन्नैव कुतोऽपि 2 I. काभिर्न 3 B I2 om. अपूर्वरूपा 4 B सर्वापि 5 B I2 यतः 6 I2 om. अपि 7 B I2 त्रपति । I. add. तिर्यक्शब्दो नपुंसकमपि । यथा मधुरैरपरामिलं स्यन्नपि तिर्यञ्चि वयं गिरीशितैः ( ? ) रिति । रूपकं काव्यलिङ्गं चानुप्रासोऽपि ॥ ४३॥
1 I2 for नपि

विरञ्चिनानाननवादधौतसमाधिशास्त्रश्रुतिपूर्णकर्णः ॥४४॥

[2]वार्त्तां च नौति । यां वार्त्ताम् अहं योगाच्चित्तनिरोधात् अरन्ध्रे निश्छिद्रे हृदि निरुन्धे रुणध्मि, सा वार्त्ता[3] असती अपि अभि-व्यापि । अपिशब्दात् भव्यापि । अन्यं पुरुषं नैति न प्राप्नोति । अन्यो न जानाति [4]तां वार्त्ताम् । किंभूतोऽहम् ? । विरञ्चेर्ब्रह्मणो[5] नानाप्रकारा-णामाननानां वादेन तर्केण धौतानि अनुगृहीतानि यानि समाधिरूपाणि सिद्धान्तरूपाणि शास्त्राणि[6] विधिनिषेधपराणि तेषां श्रुत्या आकर्णनेन पूर्णौ कर्णौ यस्य मम स तथा[7] ॥४४॥

नलाश्रयेण त्रिदिवोपभोगं तवानवाप्यं लभते बताऽन्या ।
कुमुद्वतीवेन्दुपरिग्रहेण ज्योत्स्नोत्सवं दुर्लभमम्बुजिन्या ॥४५॥

[1]नलाश्रयेणेति । [[2]बत इति खेदे] [3]नलाश्रयेण परिणयनेन त्रिदिवस्य स्वर्गस्योपभोगम् अन्या काचिल्लभते लप्स्यते । [4]यतस्त्वानवाप्य(43b)मलभ्यम् । यथा कुमुद्वती इन्दोः परिग्रहेण ज्योत्स्नो-[5]त्सवं ज्योत्[6]स्नाया उत्सवं लभते । किंभूतम् ? । अम्बुजिन्याः[7] कमलिन्या दुर्लभम्[8] ॥४५॥

2 l. वार्त्ता । 3 l. add. च 4 B सा; l2 om. तां 5 l. विधे॰ 6 l. विधि-निषेधरूपाणि शास्त्राणि 7 l. add. काव्यलिङ्गं चानुप्रासोऽपि ॥४४॥
1 l. नलाश्रयेणेत्यादि । 2 l. om. बत इति खेदे 3 l. l2 नलस्य 4 l. यथतः; l2 अतः 5 l. l2 om. ज्योत्स्नोत्सवं 6 l. l2 ज्योत्स्नया ~~ ~~ 7 l2 om. विसर्गः 8 l. add. उपमा ॥४५॥

तन्नैषधानूढतया दुरापं शर्म त्वयाऽस्मत्कृतचाटुजन्म।
रसालवन्या मधुपानुविद्धं[1] सौभाग्यमप्राप्तवसन्तयेव ॥४६॥

तन्नैषधेति[2]। तत्कारणात् त्वया नैषधेन अनूढ[नो]या अपरिणीत[ता]या अस्माभिः कृतचाटुवाक्याज्जन्म यस्य तत्तथाविधं शर्म[3] दुरापं सुखं दुर्लभम्। यथा रसालवन्या आम्रबाणेन[4] मधुपैः भ्रमरैः अनुविद्धं[5] सौभाग्यं दुर्लभम्। किंभूतया? अप्राप्तवसन्ततया[6]। वसन्ते हि चूतमुकुलेषु[7] भ्रमरा ध्वनन्ति[8]॥४६॥

तस्यैव वा यास्यसि किं न हस्तं दृष्टं मनः केन विधेः प्रविश्य।
अजातपाणिग्रहणाऽसि तावद्रूपस्वरूपातिशयाश्रयश्च ॥४७॥

तस्यैवेति[1]। वा अथवा तस्यैव नलस्य हस्तं किं न यास्यसि? [अपि तु यास्यसि]। यतो विधेर्ब्रह्मणो मनोऽन्तः प्रविश्य केन दृष्टम्। तावत्त्वम् अजातं पाणिग्रहणं यस्याः सा[2] तथाविधाऽसि। तथा रूपस्वरूपस्य लावण्यस्य अतिशयः तस्याऽऽश्रयश्च त्वमसि। अत्यन्तसुन्दरी। अतस्तेन सह संयोगोऽपि[3] घटते[4]॥४७॥

निशा शशाङ्कं शिवया गिरीशं श्रिया हरिं योजयतः प्रतीतः।
विधेरपि स्वारसिकः प्रयासः परस्परं योग्यसमागमाय ॥४८॥

1 P2 text अनुबद्धं 2 P1 तन्नै। 3 P2 दुरापं शर्म. 4 P1 P2 om. आम्रबाणेन 5 P1 add. अनुबद्धं 6 P2 वसन्ततया 7 B वनेषु; P1 मुकुले 8 P1 add. उपमा ॥४६॥
1 P1 तस्यैव। P2 तस्यैव वेति। 2 P1 P2 om. सा 3 P1 add. तव 4 P1 add. आक्षेपः काव्यलिङ्गं च ॥४७॥

सर्ग ३ 27

निशा[1] शशाङ्कमिति। विधेरपि ब्रह्मणोऽपि परस्पर योग्ययोः स्त्रीपुंसयोः समागमाय स्वारसिकः स्वरसेनैवोत्पन्नः[2] प्रयासः उद्यमः प्रतीतो[3] दृष्टः। किं कुर्वतः ?। निशा राज्या शशाङ्कं स्वयमेव योजयतः। तया शिवया देव्या पार्वत्या गिरीशं[4] श्रीमहादेवं योजयतः। तथा श्रिया लक्ष्म्या हरिं श्रीकृष्णं योजयतः।[6] योग्यानां समागमं स्वयमेव कुर्वतः[7]॥ ॥४८॥

वेलातिगस्त्रैणगुणाब्धिवेणिर्न योगयोग्याऽसि नलेतरेण।
संदर्भ्यते दर्भगुणेन मल्लीमाला न मृद्वी भृशकर्कशेन ॥४९॥

वेलातिगेति[1]। हे दमयन्ति! त्वं नलादितरेण न योगयोग्या [सम्बन्धयोग्या][2] असि। किंभूता त्वम्?। वेलातिक्रान्तो यः स्त्रैणा[नां] स्त्रीसम्बन्धिनां गुणानाम् अब्धिः समुद्रः तस्य वेणिः[3] प्रवाहरूपा।[4] अति-गुणवती। यतः[5] मृद्वी कोमला मल्लीमाला[6] विचकिलस्रक् भृशं कर्कशेन कर्कशामसृणेन दर्भस्य गुणेन रज्ज्वा[7] [न] संदर्भ्यते[8] न[9] ग्रथ्यते[10]। ४९॥

विधिं वधूसृष्टिमपृच्छमेव तद्यानयुग्यो नलकेलियोग्याम्।
त्वन्नामवर्णा इव कर्णपीता मयाऽस्य संक्रीडति चक्रिचक्रे ॥५०॥

विधिं[1] वधूसृष्टिमिति। अहं विधिं ब्रह्माणं नलस्य केलि- ।[अ]

1 P. निशा। 2 P. om. एव 3 P2 प्रतीत 4 B शिवं महेश्वरं 5 P. श्रीवासुदेवं 6 P. add. एवं 7 P. add. समं तुल्ययोगिता च ॥४८॥ 1 P. वेला। 2 P. सम्बन्धोचिता 3 P2 om. विसर्गः 4 P. अतिशयेन 5 P. यत 6 P. P2 विच-किलक० 7 P. om. रज्ज्वा 8 P. संदभ्यते 9 P. om. न 10 P. add. संदर्भ्यते पाठे ग्रन्थ्यते। अनुप्रासो रूपकं समं दृष्टान्तश्च॥
1 P. विधिं।

सर्ग ३ 28

योग्यां क्रीडासमुचितां वध्वा: सृष्टिमुत्पत्तिमपृच्छमेव पृष्टवान् । किं-भूत: ? । तस्य ब्रह्मणो याने रथे धुर्यो धुर्य: सन् मया अस्य विधे: चक्रिणो रथस्य चक्रे रथाङ्गे संक्रीडति सति शब्दं कुर्वति सति इत्वन्नाम-वर्णी इव कर्णपीता: श्रुता: । इवशब्देन किञ्चिदस्पष्टता सूच्यते । संक्री-डतीत्यत्र समो कूजने (वा० १०४) इत्यनेन कूजनत्वादात्मनेपदमाव: ॥५०॥

अन्येन पत्या त्वयि योजितायां विज्ञत्वकीर्त्या गतजन्मनो वा ।
जनापवादार्णवमुत्तरीतुं विधा विधातु: कतमा तरि: स्यात् ॥५१॥ । तु

अन्येन पत्येति । वा अथवा त्वय्यन्येन पत्या भर्त्रा योजितायां सत्यां विधातुर्ब्रह्मणो हणहणाकार: जनापवादमेवार्णवं समुद्रम् [उ]त्तरीतुं कतमा विधा कतमप्रकारा तरिर्नौ: स्यात् । अपि तु न कैवा । किंभूतस्य विधातु: ? । विज्ञत्वस्य विशेष[ज्ञ]त्वस्य कीर्त्या गतं जन्म यस्य स तथा । एतावता नलस्य त्वमेव योग्येति भाव: ॥५१॥

आस्तां तदप्रस्तुतचिन्तयाऽलं मयाऽसि तन्वि ! श्रमितातिवेलम् ।
सोऽहं तदागः परिमार्ष्टुकाम: किमीप्सितं ते विदधेऽभिधेहि ॥५२॥ /म

आस्तामिति । तत् आस्तां [तिष्ठतु] तस्मात् हे तन्वि !

१ । विधि । २ । om. विसर्ग: ३ । । om. अस्य विधे: ४ । । om. सति ५ । इति ६ । कर्णे ७ । इव पुन:शब्देन ८ । add. अनुप्रास उपमा च ॥ ५० ॥
१ । अन्ये । २ । add. भवत्याम् ३ । om. पत्या ४ । । om. हणहणकार: ५ । ०वाद ०वाऽर्णव: समुत्तम् ६ । ०प्रकारं पुन: स्यात् । तरिरिति पाठान्तरम् । कतमप्रकारतरिर्नौ: स्यात् । ७ । विशेषत्वस्य ८ । add. त्वद्योगसंयोगितरेण । पत्या इति पाठान्तरम् । अनुप्रासो रूपकं माऽपेक्ष्य ॥ ५१ ॥ / १ । text किमीप्सितं
२ । आस्ताम् । contd.

सर्ग ३ 29

अप्रस्तुतचिन्तया अलं पूर्यताम् । असि त्वं मया अतिवेलं [अत्यन्तं] बहुकालं श्रमिता तव श्रम उदपादि [[स] अहं तदागः अपराधं परिमार्ष्टु-कामोऽस्मि[4] [5] अभिधेहि कथय [ते[6]] तव[7] किमीप्सितं विदधे करोमि[8] ॥५२॥

इतीरयित्वा विरराम पत्त्री[प] स राजपुत्रीहृदयं बुभुत्सुः ।
ह्रदे गभीरे हृदि चावगाढे शंसन्ति कार्यावतरं हि सन्तः ॥५३॥

इतीरयित्वेति[1] । स पत्त्री[2] हंसः इतीरयित्वा[3] उक्त्वा राजपुत्र्या हृदयं बुभुत्सुः[4] सन् विरराम उपरतः । युक्तं[5] चैतत् । यतः यस्मात्[6] ह्रदे गभीरे[7] नदे हृदि च गम्भीरे अवगाढे सति विलोडिते सति कार्यस्यावतर-[8]मारम्भं सन्तः शंसन्ति । अवतारं तीर्थं च कार्यं च प्रशंसन्ति[9] ॥५३॥

किञ्चित्तिरश्चीन[श्री]विलोलमौलिर्विचिन्त्य वाच्यं[1] मनसा मुहूर्तम् ।
पतत्त्रिणं सा पृथिवीन्द्रपुत्री जगाद वक्त्रेण तृणीकृतेन्दुः ॥ ५४॥

किञ्चित्तिरश्चीनेति[2] । सा[3] पृ(44b)थिवीन्द्रपुत्री[4] [पृथिवीन्द्रस्य पुत्री दुहिता । षष्ठीतत्पुरुषो वा । पुत्रर् ]] पतत्त्रिणं हंसं जगाद । किंभूता॥

cont'd 3 B आस्तां vs. पूर्यताम् 4 l. l2 add. स्फेरयितुकामोऽस्मि 5 l. अभिधेहि कथय vs. करोमि 6 l2 om. ते 7 l. add. भवत्याः 8 l. add. तवेहितं किमिति पाठान्तरम् । अनुप्रासः ॥५२॥ // 1 l. इत्येत । 2 l2 पतत्री 3 l. इति ईदृशम् एवम् अमुना प्रकारेण उक्त्वा । ईरयित्वेति पाठे ईरयित्वा 4 l. add. जिज्ञासमानः 5 l. l2 om. युक्तं चैतत् 6 l. l2 om. यस्मात् 7 l. गभीरे गम्भीरे नदे ह्रदे गभीरे हृदि च अवगाढे 8 l. अवतारम् 9 l. add. अनु-प्रासोऽर्थान्तरन्यासश्च ॥ ५३॥ // 1 l2 text. वाच्यं 2 l. किञ्चिदित्यादि । 3 l. om. सा 4 l2 पृथिवीन्द्रस्य दुहिता ———

वक्त्रेण तृणीकृतो जित इन्दुर्यया सा तथा । पुनः किंभूता? । किञ्चिन्निर-श्चीनो विलोलो मौलिर्मस्तकं यस्याः सा तथा । किं कृत्वा? । मनसा [मुहूर्तं] वाचं विचिन्त्य[6] ॥ ५४॥

धिक् चापले वत्सिमवत्सलत्वं यत्प्रेरणादुत्तरलीभवन्त्या ।
समीरसङ्गादिव नीरभङ्ग्या मया तटस्थस्त्वमुपद्रुतोऽसि ॥ ५५॥

धिक् चापल[1] इति । हे हंस ! चापले चपलत्वे वत्सिम्नो वात्सल्यस्य प्रीतिः अथवा[2] वत्सिम्नि इव वत्सलत्वे[3] इव वत्सलत्वं वात्सल्यं[4] धिक् । यथा व[5]... धेनोर्वात्सल्यं तथा चपलत्वे वात्सल्यं न (? कर्तव्यं, तत् मया कृतम् । यस्य चापल्ये वात्सल्यस्य प्रेरणात्[6] उत्तरली-भवन्त्योत्सुकीभवन्त्या मया त्वं तटस्थः उदासीनः सन्नुपद्रुतोऽसि । यथा समीरस्य सङ्गात् नीरस्य भङ्ग्या ऊर्मिणा तटस्थः उपद्रूयते[7] ॥ ५५॥

आदर्शतां स्वच्छतया प्रयासि सतां स तावत्खलु दर्शनीयः ।
आगः पुरस्कुर्वति सागसं मां यस्यात्मनीदं प्रतिबिम्बितं ते ॥ ५६॥

आदर्शतामिति[1] । हे हंस ! त्वं स्वच्छतया[2] आदर्शतां प्रयासि । [खलु[3]] स आदर्शः तावत्सतां दर्शनीयः [त्वं च दर्शनीयः] रम्यः । यस्य ते तव आत्मनीदम् आगः[4] अपराधः प्रतिबिम्बितम् । किंभूते आत्मनि? ।

5 P1P2 om. पुनः 6 P1 add. वाच्यमिति पाठान्तरम् । अनुप्रास उपमा च ॥ ५४॥

1 P1 धिक् चापले । P2 धिक् चापले इति । 2 P1 वत्सिम्नि 3 P1 वत्सत्वे 4 P1 बाल्यं । ... 5 B P2 वत्सो 6 P1 add. प्रेरणात् 7 P1 add. वत्सांसाभ्यां कामबले (पा० ५. ii. 98) इति लच्प्रत्ययः । अनुप्रास उपमा च ॥ ५५॥

1 P1 आदर्शतामित्यादि । P2 आदर्शतामिति । 2 P1 add. स्वच्छान्तःकरणतया, पक्षे निर्मलतया आदर्शतां 3 P2 om. खलु 4 P1P2 add. अयम्

सर्ग ३ 31

सागसं सापराधां[5] मां पुरस्कुर्वति संभावयति। अहं [तावत्] [6]त्वां प्रति उपद्रवकरणात् सापराधा[7]। त्वमादर्शवत्स्वच्छः। मां च पुरोऽग्रे करोषि। मयि प्रतिबिम्बितायां मम धर्मोऽपराधो[8] त्वयि [9]नान्तरीकतया प्रतिबिम्बितः। अतस्त्वं सापराधः न तु [10]तवाऽपराधोऽस्ति"॥ ५६॥

अनार्यमप्याचरितं कुमार्या भवान्मम क्षाम्यतु सौम्य! तावत्।
हंसोऽपि देवांशतयाऽसि[1] वन्द्यः श्रीवत्सलक्ष्मेव हि मत्स्यमूर्तिः॥ ५७॥

[2]अनार्यमपीति। [3]भवान्मम कुमार्याः अनार्यमप्याचरितं हे सौम्य! तावत् [क्षाम्यतु] क्षमस्व। त्वं हंसोऽपि देवानामंशतया वन्द्योऽसि। यथा मत्स्यमूर्तिः श्रीकृष्णः[4] श्रीवत् सलक्ष्म्या वन्द्यः। हि[5] यस्मान्निश्चितं वा[6]॥ ५७॥

मत्प्रीतिमाधित्ससि कां त्वदीक्षामुदं मदक्ष्णोरपि यातिशेताम्।
निजामृतैर्लोचनसेचनाद्वा पृथक्किमिन्दुः सृजति प्रजानाम्॥ ५८॥

[1]मत्प्रीतिमिति। [2]त्वं कां मम प्रीतिमाधातुं [3]कर्तुमिच्छसि। या प्रीतिर्ममाक्ष्णोस्त्वदीक्षया [4]या मुद् हर्षः (H5a) तामपि अतिशेताम्। सा[5] कापि प्रीतिर्नास्ति, या त्वद्दर्शनेक्षणमतिक्रामति। [वाशब्देन प्रसिद्धत्वाद-

5 B °राधं 6 P add. तत् 7 P °राधः 8 B °राधे; 9 P add. अपि 9 P नान्तरीयक° 10 P तथा° 11 P. add. अनुप्रास उपमा श्लेषश्च॥ ५६॥ 1 P for °भिवन्द्यः 2 P. अनार्य। 3 P. हे सौम्य! तावत् here. 4 P. श्रीवत् सलक्ष्म्या श्रीकृष्णः 5 P. हि निश्चितम्; P हि यस्मात् 6 P. add. अथवा यस्मादित्यर्थे काव्यलिङ्गमुपमा च॥ ५७॥ 2 P. मत्प्रीतिमित्यादि॥ 2 P. add. हे हंस! 3 P/P om. कर्तुम् 4 P. om. या 5 P स्तोकापि

सर्ग २ 32

[धि]पति] अथ [वा] इन्दुः प्रजानां निजैरमृतैर्लोचनानां सेचनात्[6] पृथगन्यत् किं सृजति। अपि तु दर्शनादेवाऽऽनन्दं ददाति। तथा त्वमपीति[7] ॥५८॥

मनस्तु यं नोज्झति जातु यातु मनोरथः कण्ठपथं कथं सः।
का नाम बाला द्विजराजपाणिग्रहाभिलाषं कथयेदलज्जा ॥५९॥

मनस्तु यमिति[1]। [तु] पुनः मौनः यं मनोरथं जातु कदाचिदपि नोज्झति। स मनोरथोऽन्तःकरणात् कण्ठपथं यावत् कथं यातु। वक्तुं[2] न शक्यत[े] इत्यर्थः। यतः का बाला नाम अलज्जा[3] भूत्वा द्विजरा[जस्य] चन्द्रस्य पाणिना ग्रह[ण]स्य [आ]दानस्य अभिलाषं कथयेत् [अ]प्राप्यं मनोरथं कथयति। अथ च का बाला अप्रौढा हे द्विज![4] हंस! राज्ञो नलस्य पाणिग्रहाभिलाषं[5] परिणयनमनोरथं निर्लज्जा भूत्वा कथयेत्। अपि तु न] कथयेदेव[6] ॥५९॥

वाचं तदीयां परिपीय मृद्वीं मृद्वीकया तुल्यरसां स हंसः।
तत्याज तोषं परपुष्टघुष्टे घृणां च वीणाक्वणिते वितेने ॥६०॥

वाचं तदीयामिति[1]। स हंसस्तदीयां मृद्वीं कोमलां वाचं[2] परिपीय श्रुत्वा [परपुष्टस्य] कोकिलस्य घुष्टे शब्दे तोषं तत्याज हर्षं न चक्रे[3]। किंभूताम्? मृद्वीकया द्राक्षया[4] तुल्यरसाम्। तथा[5] वीणायाः क्वणिते घृणां[6]

6 B सेवनात् 7 P. om. इति, and add. अनुप्रास आश्लेषश्च ॥५८॥ 1 P. मनस्तु। 2 P. न वक्तुं 3 B B अलज्जा भूत्वा alt. अभिलाषं कथयेत्, B add. अहो 4 P. add. हे 5 P. ०ग्रहण० 6 P. add. ~~अपि~~ कापि। अनुप्रासोऽर्थान्तरन्यासः श्लेषश्च ॥५९॥ 1 P. वाचं।, B कथं तदीयामिति। 2 P. add. प्रतिपद्य 3 P. अहो 4 P. द्राक्षया 5 P. om. तथा; B तया 6 B जुगुप्सां घृणां ——

जुगुप्सां च विनेने। [तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् (पा० II iii. 72) इति तृतीया ॥६०॥

मन्दाक्षमन्दाक्षरमुद्रमुक्त्वा तस्यां समाकुञ्चितवाचि हंसः।
तच्छंसिते किञ्चन संशयालुर्गिरा मुखाम्भोजमयं युयोज ॥६१॥

मन्दाक्षमन्देति। अयं हंसः गिरा वाण्या मुखाम्भोजं युयोज उवाच। किंभूतः? तस्याः शंसिते कथिते मनोरथे किञ्चन स्वल्पं संशयालुः सन्देहपरः। क्व सति? [तस्यां] दमयन्त्यां मन्दाक्षेण लज्जया मन्दा अस्पष्टा अक्षराणां मुद्रा यत्र वचने तद्यथा भवति एवमुक्त्वा समाकुञ्चिता वाक् यया तथाविधायां सत्याम्। मौनवत्याम् ॥६१॥

करेण वाञ्छेव विधुं विधर्तुं यमित्थमात्थाऽऽदरिणी तमर्थम्।
पातुं श्रुतिभ्यामपि नाधिकुर्वे वर्णं श्रुतेर्वर्ण इवान्तिमः किम् ॥६२॥

करेण वाञ्छेति। करेण हस्तेन विधुं चन्द्रं विधर्तुं मम वाञ्छा ईदृशामिव इ[त्थं] यमर्थं त्वमादरिणी सती आत्थ। द्विजराज-[पाणि]ग्रहाभिलाषम् (III. 50) इत्यनेन श्लोकेन उक्तवती। तमनवाप्यम् अर्थमहं किं श्रुतिभ्यामपि पातुं श्रोतुं नाधिकुर्वे नाधिकृ(?)ता। यथा

7 P. add. तद्वाचमेनां प्रतिपद्येति पाठान्तरम्। अनुप्रास उपमा प्रतीतं च ॥६०॥
1 P. मन्दाक्ष U, 2 मन्दाक्षेति। 2 B अस्पृष्टा 3 B मत्यां 4 P. add. अनुप्रास उपमा च। गिरा युयोजेति रूपकस्य बाधकम्। ननूपमायाः साधकम्। विध्युपमर्दिनो बाधकस्य तदपेक्षया उत्करत्वेन प्रतीतेः ॥६१॥ 1 P. करेण। 2 P. चन्द्रमसं 3 P2 यत्सर्व त्वं 4 B श्रोत्रं 5 P2 ०कुर्वते 6 B P2 ०धिकृत: —

अन्तिमो वर्णः शूद्रः श्रुतेर्वेदस्य वर्णमक्षरं श्रोतुमपि नाधिकरोति ।[7][यमि-
त्थमात्थादरिणी[8] त्वमर्थमिति पाठो व्याकृतः । यमित्थं[9] आत्थमहो त्वमर्थ-
मिति पाठे इत्थमित्यर्थे इत्थमिति अकारान्तो निपातः । तथा च शाङ्खा-[10]
यनकल्पसूत्रे द्वादशाध्याये - इहेत्थ प्रागपागुदगधरागरालागुदभर्त्सेत
(XXIII.1) इत्यत्र इत्थ इत्यतिप्रयोगो दृश्यते । इत्थमात्थम् इति पदानि
आत्थ[11] इत्यर्थे आत्थम् इति निपातः । इत्थम् अनेन[12] प्रकारेण मां त्वम्
आत्थ[13] अवोचीत्यर्थः । यमित्थमात्थत्वमहो इति पाठान्तरम्[14]][15] ॥६२॥

अवाप्यते वा किमियद्भवत्या चिन्तैकपथ्यामपि वर्तते[1] यः ।
यत्रान्धकारः किल चेतसोऽपि जिह्मेतरैर्ब्रह्म तदप्यवाप्यम् ॥६३॥

अवाप्यते वेति[2] । वा अथवा किमियत्[3] यः चित्तस्य एकपदी
मार्गस्तत्रापि वर्तते चेत् स अवाप्यते[4] यतः[5] यत्र[6] ब्रह्मणि किल
चेतसोऽप्यन्धकारः अविषयः तदपि ब्रह्म जिह्मेतरैः अभियुक्ततरैः शास्त्रा-
चार्यप्रसादादवाप्यम्[7] । अविधानाशे विधेयाः[8] स्वरूपस्य प्राप्तत्वादेव ।
यथा भ्रान्त्या कण्ठगतमपि[9] सुवर्णस्याऽलङ्करणं[10] मदीयं क्व गतमिति
पृच्छन् [सन्][11] तटस्थेन त[व] कण्ठे[12] एव चामीकरमिति केनापि स्मारितः,
ज्ञानाद् भ्रान्तिनिरासेन प्राप्तमेव प्राप्नोति । तथा योगी गुरुप्रसात् प्राप्त-
मेव ब्रह्मस्वरूपं प्राप्नोति । अस्थूलमनणिव (बृहदा० III.viii.8) इत्यादि, नेति नेति

7 P1 यमत्थ० 8 P1 दरीक्ष; 9 P2 दरिणा 9 P2 यमित्थमात्थमहो 10 P2 सङ्ख्यायन०
11 P2 आ इत्यर्थे 12 P1 अमुना 13 P2 आत्थं 14 P2 पाठः 15 P1 add. अनुप्रास उपमा
च ॥६२॥ // 1 P2 +ed. विधेते 2 B अवाप्यतेमेवेति । P1 अवाप्य । 3 B ०यत; P1
add. यत्; P2 om. किमियत् 4 B add. च 5 P1 om. यतः 6 P1 किलब्रह्मणि
7 P2 om. अवाप्यम् 8 P2 विधेया 9 B कण्ठे 10 P1/P2 सुवर्णालङ्करणं
11 P2 om. सन् 12 B कण्ठमेव

(बृहदा° IV.iv.22) इत्यादिश्रुतिभ्यः सर्वेन्द्रियादीनामगोचरत्वात्[13] ॥६३॥[14]

ईशाणिमैश्वर्यविवर्तमध्ये! लोकेश लोकेशयलोकमध्ये ।
तिर्यञ्चमप्यञ्च मृषानभिज्ञरसज्ञतोपज्ञसमज्ञमज्ञम् ॥६४॥

ईशाणिमेति[1]। हे [ईशस्य] ईश्वरस्य[2] श्रीमहेश्वरस्य[3] अणिम[4]-लक्षणमैश्वर्यं तस्य यो विवर्तः परिपाकः[5] ~~परि~~ परिणामविशेषः[6] तद्वत्[7] अल्पं [मध्यं] कृशम्[8] उदरं[9] यस्याः सा तथा, तस्याः सम्बोधनम्[10]। हे कृशोदरि! लोकेशो ब्रह्मा तस्य लोकेशया[11] ये लोकाः ब्रह्माण्डस्थिता जनाः तेषां मध्ये वर्तमानं तिर्यञ्चमपि[12] पक्षिणमज्ञम् अज्ञानजडमपि मां त्वमेवंविधम् अञ्च जानीहि। किंभूतम्?। मृषानभिज्ञरसज्ञतायाः सत्यवादितायाः[13] या[14] उपज्ञा तया प्रथमतः प्रणीता समज्ञा[15] सर्वतो ज्ञानसङ्केतः प्रतिज्ञा यस्य तं तथा। उपज्ञोपक्रमं तदाद्याचिख्यासायामिति (पा° II.iv.21)-ति सूत्रेण रसज्ञतोपज्ञसमज्ञेति[16] तत्पुरुष(469)स्य नपुंसकत्वम्। मम प्रतिज्ञा[17] सत्यवादितोपज्ञमित्यर्थः[18]। [एतदुक्तं[19] भवति — मृषा अनृतभाषणे अनभिज्ञा[20] रसज्ञा जिह्वा येषां ते तथोक्ताः तेषां भावस्तत्ता तत्र उपज्ञा[21] उपक्रमस्तस्य समज्ञा[22] सम्यक् ज्ञानं यस्य मम स तथा। सत्यवदनोपज्ञ[23]-

13 P. add. अनुप्रासोऽत्राऽऽक्षेपो विरोधश्च ॥६३॥ / 14 B om. 64 ff.
1 P. ईशाणि / 2 P. P2 om. ईश्वरस्य 3 P. श्रीमहादेवस्य 4 B P2 अणिमा° 5 P. P2 om. परिपाकः 6 B परमाणु° 7 P. P2 om. अल्पं 8 P. कृशं मध्यं 9 P. P2 om. उदरं 10 P. add. अत्र ओजो गुणः 11 P2 येऽपि 12 P2 add. अपि 13 P2 add. सत्यवाचितायाः 14 P. P2 om. या 15 P. कीर्तिर्यस्य मम तं तथा 16 B °ज्ञेति 17 P. °मसमज्ञेति 18 B °तोपक्रम°; P2 °तामित्यर्थः 19 P2 तदुक्तं 20 P2 अनाभिज्ञा 21 P2 om. उपज्ञा 22 P. कीर्तिर्यस्य 23 P. °पज्ञं मम कीर्तिरित्यर्थः; P2 सत्यवादनोपज्ञ°

सर्ग ३ 36

[24] मित्यर्थः] स्त्री किल तामससृष्टित्वात् जडोऽनृतवाक् भवति । अहं तु न तथा । तस्मान्मयि विश्वस्य ब्रूहि[25] ॥६४॥

मध्ये श्रुतीनां प्रतिवेशिनीनां सरस्वती वासवती मुखे नः ।
ह्रियैव[1] ताभ्यश्चलतीयमद्धा यथा न सत्सङ्गगुणेन ~~न~~ नद्धा ॥६५॥

मध्ये[2] ~~श्रु~~ श्रुतीनामिति] (नोऽस्माकं मुखे या सरस्वती [वाणी] वर्त्तते सा श्रुतीनां वेदानां प्रतिवेशिनीनां[3] ब्रह्ममुखानि प्रतिवेश्मानि तत्र स्थितानां मध्ये वासवती [अथवा सन्मुखे एव प्रतिवेशिभवेन स्थितानां श्रुतीनां मध्ये सरस्वती[4]] वासवती वसति । अद्धा असंशयम् इयमस्मद्वाणी ताभ्यः श्रुतिभ्यः[5] ह्रिया [एव][6] लज्जयैव न चलति । उत्प्रेक्षते - सत्सङ्गगुणेन[7] नद्धा यथा बद्धेव । साधुसङ्गतिरेव गुणो रज्जुस्तेन बद्धेवा[8] [ध्रुवेवादीनामेव संभावनाभिधानक्षमत्वात् उत्प्रेक्षायामविवक्षि- (म तस्य साधर्म्यमात्रस्य प्रतिपादने पर्याप्तस्य[10] यथाशब्दस्य सम्भावनाभिधाने शक्तिरवाचकत्वमित्यत्र[11] दोषः । यथा[12] उदयौ दीर्घिकागर्भान्मुकुलं मेचको~~त्प~~त्पलम् । नारीलोचनचातुर्यशङ्कासङ्कुचितं यथा ॥( ? )
अत्र वाचकम् । अतः केचिदुपमां व्याचक्षते । दोषभयात् महाकविप्रयुक्त-

24 P. vadds. समासाद्यते अनया इति समसा कीर्तिः । समसेति पाठे समस्मिन् सर्वत्र ज्ञायते इत्यर्थः । अथवा मृषानभिसाश्च रससाश्च सहृदयाः तेषां भावो मृषानभिरससता तत्र उपसा आधिसानं येषां ते तथा । तेषु समसा कीर्तिर्येषां तेषु मध्ये मत् माधन्तीसा ज्ञानं यस्य ते तथा । सत्यवादिनां रससानां श्रेष्ठमित्यर्थः । उपसा ज्ञानमाधिः स्यात् (अमर ३.१३) । 25 P. adds. अनुप्रासः ॥६४
1 P2 text ह्रियेव 2 P. मध्ये श्रुतीनामित्यादि । 3 P. एवेशानां 4 P2 om. सरस्वती 5 P.1 P2 ह्रिया एव श्रुतिभ्यो 6 P2 ~~...~~ ध्रुवेवा०... ०क्षमत्वात् here. 7 P2 सत्सङ्गा० 8 P2 om. विस्तर्गः 9 P. adds. या किल गुणेन दोरकेण बध्यते सा च न चलति । 10 P2 याप्तस्य 11 P2 om. इत्यर्थः 12 P2 उदयो

सर्ग ३ 37

त्वाच्च प्रयोगः। तथा च शरीरबद्धः प्रथमाश्रमो यथा ( ) इत्युक्तम्॥ ॥६५॥

पर्यङ्कतापन्नसरस्वदङ्कां लङ्कां पुरीमप्यभिलाषि चित्तम्।
कुत्रापि चेद्वस्तुनि ते प्रयाति तदप्यवेहि स्वशये शयालु ॥६६॥

[1]पर्यङ्कतेति। हे दमयन्ति। यदि ते[2] तव चित्तं लङ्कामपि पुरीं प्रति अभिलाषि। किंभूताम्? पर्यङ्कतापन्नः शय्याकारतां प्राप्तः सरस्वतोऽङ्को[3] समुद्रोऽङ्को लक्षणमभिज्ञानं यस्याः सा तथा। समुद्रोपलक्षिताम्। चेद्यदि कुत्रापि अन्यस्मिन्नपि वस्तुनि[4] ते तव चित्तं प्रयाति। तदपि[6] सर्वं त्वं [स्वे] आत्मीये शये हस्ते शयालु हस्तगतमेवेहि जानीहि[7]॥ ॥६६॥

इतीरिता पत्त्ररथेन तेन ह्रीणा च हृष्टा च बभाण भैमी।
चेतो नलङ्कामयते मदीयं नान्यत्र कुत्रापि च साभिलाषम् ॥६७॥

[1]इतीरितेति। सा देवी[2] [तेन] पत्त्ररथेन[3] पक्षिणा इति ईरिता उक्ता सती ह्रीणा लज्जिता हृष्टा च हंसवचनान्मुदिता भैमी बभाण। मम चेतो न लङ्कां पुरीमयते गच्छति। अथ च नलं नैषधं कामयते। अन्यत्र कुत्रापि वस्तुनि च साभिलाषं[5] न अस्ति[6]॥६७॥

पद्ये, अनुप्रासोऽपि
। B. add. समासोक्तिरुत्प्रेक्षा च। उपमा वा॥६२॥
1 B. पर्यङ्क। 2 B. om. तत 3 B सरस्वान्। 4 अथा M B च 5 B. add. सा च नञ्च तत 6 B. व्यवस्थितमेव [7] B. add. अनुप्रासः॥६६॥
1 B. इती। 2 B. om. here. 3 B. add. पतगेन 4 B. च वस्तुनि 5 B. B2 न साभिलाषं; B. om. अस्ति; and add. इत्येवमुक्त्वा इति पाठान्तरम्। श्लोकः॥ 6 B2 here द्विजराजपाणिग्रहणाभिलाषमित्यादि तथा चेतो नलं कामयते इत्यादिद्वयस्यार्थः cf. III. 69.

सर्ग 3 38

विचिन्त्य बालाजनशीलशैलं लज्जानदीमज्जदनङ्गनागम् ।
आचष्ट विस्पष्टमभाषमाणामेनां स चक्राङ्गपतङ्गशक्रः ॥६८॥

विचिन्त्येति[1] । स[2] चक्राङ्गानां पतङ्गानां हंसानां शक्र इन्द्रः एनां[3] दमयन्तीम् आचष्ट अब्रवीत् । कीदृशीम् ? । (466) विस्पष्टम् अभाषमाणाम् । किं कृत्वा ? । बालाजनस्य शीलमेव[4] शैलं पर्वतं विचिन्त्य[5] । लज्जैव नदी तस्यां मज्जन् अनङ्गः काम एव [नागो] हस्ती यस्य तं तथाविधं[6] विचिन्त्य । बालानां न्यक्कृतकामा लज्जा विचार्येत्यर्थः[7] ॥६८॥

नृपेण पाणिग्रहणस्पृहेति नलं मनः कामयते ममेति ।
आश्लेषि न श्लेषकवेर्भवत्याः श्लोकद्वयार्थः सुधिया मया किम् ॥६९॥

नृपेणा[1] पाणीति । मया किं भवत्याः श्लेषकवेः[2] श्लेषेण काव्यकर्त्र्या द्विजराजपाणिग्र[3]... भिलाषामि (III.51) त्यादि चेतो नलं कामयते (III.67) इत्यादि श्लोकद्वयस्य अर्थः[4] सुधिया नाश्लेषि, ज्ञा/ किं[6] न ज्ञातः । अपि तु ज्ञातः । कथम् ? । इति[7] । इतीति किम् ? । मम नृपेण बाला सह[8] पाणिग्रहणं तस्य स्पृहा । तथा द्वितीयश्लोके मम मनो नलं कामयते इति च । नृपस्येति[9] पाठान्तरम्[10] ॥६९॥

1 P. विचिन्त्य । 2 P. adds. हंसः चक्राकाराङ्गो वृत्तत्वात् चक्राङ्ग इत्येके । स चक्राङ्गपतङ्गानां 3 P. एतां 4 P. शीलं स्वभावमेव शीलं 5 P.P₂ om. विचिन्त्य 6 P.P₂ तथा 7 P. adds. अनुप्रासो रूपकं च ॥६८॥
1 P. नृपेणा । 2 P₂ om. श्लेषकवेः 3 B.P₂ ०ग्रहणा०; P. ०ग्रहेति 4 B.P₂ add. मया किं; P. adds. किं 5 P.P₂ स्वधिया 6 P.P₂ om. किं न ज्ञातः । 7 P. इति किम् ? । 8 P.P₂ om. सह 9 P. नृपस्य पाणिरिति 10 P. adds. अनुप्रासः ॥ ॥६९॥

भाव्यस्मि
त्वच्चेतसः स्थैर्यविपर्ययं तु संभाव्य ~~भाव्यास्मि~~ तदस्त एव।
लक्ष्ये हि बालाहृदि लोलशीले दरापराद्धेषुरपि स्मरः स्यात् ॥७०॥

त्वच्चेतस[1] इति। तु पुनस्तव[2] चेतसः स्थैर्यस्य[3] विपर्ययं संभाव्य चञ्चलत्वं मत्वा तत्कारणादस्त एव अज्ञानान एवभावी भवितुकामोऽस्मि। हि यस्मात् बालायां[4] हृदि लक्ष्ये वेध्ये[5] लोलशीले चञ्चलस्वभावे स्मरोऽपि दरम् ईषत् अपराद्धेषुः किञ्चिच्च्युतबाणः[6] स्यात्[7] ॥७०॥

महीमहेन्द्रः खलु ~~[illegible]~~ नैषधेन्दुस्तद्बोधनीयः कथमित्थमेव।
प्रयोजने संशयकम्प्रभीरुक् पृथग्जनेनेव स मद्विधेन ॥७१॥

महीमहेन्द्र[1] इति। खलु निश्चितम्। नैषध एवेन्दुः मह्यां[2] महेन्द्रः[3] भूमीन्द्रः तत्कथं स इत्थमेव निश्चयमन्तरेण संशयेन कम्प्रं चञ्चलं प्रयोजनं मद्विधेन प्रतिष्ठितपुरुषेण बोधनीयः[4]। केनेव? पृथग्जनेनेव। यथा पामरजनेन सन्दिग्धप्रयोजनं[5] कयाचित्[6] साप्यते। (दा
इनन्तत्वात् [गतिबुद्धी... पा० I.iv.52 इत्यादिना] द्विकर्मकः[7] ॥७१॥

पितुर्नियोगेन निजेच्छया वा युवानमन्यं यदि वा वृणीषे।
त्वदर्थमर्थित्वकृतिप्रतीतिः कीदृङ् मयि स्यान्निषधेश्वरस्य ॥७२॥ /षे

1 P. त्वच्चेत। 2 P om. तवच्चेतसः 3 B धैर्यस्य 4 P बालाहृदि 5 P वध्ये 6 P.P om. किञ्चित् 7 P. add. लक्ष्ये लक्ष्ये शरव्ये लक्ष्यते इति धम् व्यक्त। अनुप्रासोऽर्थान्तरन्यासश्च ॥७०॥
1 P. मही। 2 P om. विसर्गः 3 P. महेन्द्रवत् ; P तत here 4 P. add. साधनीयः 5 P. प्रयोजनः 6 P. कश्चित् ; P क्वचित् 7 P. add. अनुप्रासः काव्यलिङ्गं च उपमाऽपि ॥७१॥

सर्ग ३ 40

[1] पितुर्नियोगेनेति । त्वं यदि पितुर्नियोगेन वा अथवा ~~अ~~ [3] [निजेच्छया] यदृच्छया अन्यं युवानं वृणीषे । ततो निषधेश्वरस्य मयि विषये कीदृक्[4] प्रतीतिर्विश्वासः[5] स्यात् । कीदृशे[6] मयि ? । त्वदर्थमर्थित्वं करोमीति[7] तस्मिंस्तथा[8] ॥७२॥

त्वयाऽपि किं शङ्किताधिक्रियेऽस्मिन्नधिक्रिये[2] वा विषये निधातुम् । इतः पृथक् प्रार्थयसे तु यद्यत् कुर्वे तदुर्वीपतिपुत्रि ! सर्वम् ॥७३॥

[2] त्वयापीति । (५७०) हे दमयन्ति ! त्वयाऽपि वा अथवा[3] अस्मिन्नलप्रार्थनलक्षणे विषये निधातुमहं किमधिक्रिये ? । अपि तु नाऽहं तत्राऽधिकारी कर्तव्यः । किंभूते ? । शङ्किता सन्दिग्धा धिक्रिया धिक्कारो यत्र तत्र तथा । हे उर्वीपतिपुत्रि ! इतोऽस्मात्कार्यात् पृथक् अन्यत् यद्यत्[4] प्रार्थयसे तत्तदहं सर्वं कुर्वे । [कल्याणानां त्वमिह महसामीशिषे त्वं विधित्से[5] पुण्यां लक्ष्मीमथ मयि दृशं देहि देव![6] प्रसीद । यद्यत्पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे भद्रं भद्रं वितर[7] ~~भव~~ भगवन् ! भूयसे मङ्गलाय (मेघमाघ: )॥ इतिवत् यत् यदिति येन केनचिद्रूपेण स्थितं सर्वात्मकं वस्त्वाक्षिप्तम् । तथाभूतमेव तच्छब्देन परामृश्यते इति । यद्यदित्युक्त्वा तदित्युक्तोऽपि न दोषः[8] ॥७३॥

अवः प्रविष्टा इव तज्गिरस्ता विधूय वैमत्यधुतेन मूर्ध्ना ।
ऊचे ह्रियोऽपि श्लथितानुरोधा पुनर्धरित्रीपुरुहूतपुत्री ॥७४॥

1 l. पितुर्नि । l2 पितुर्नियोगेति । 2 l2 om. अथवा 3 l2 om. निजेच्छया 4 l2 कादिक 5 l1 l2 om. विश्वासः 6 l1 l2 किंविशिष्टे ? 7 l1 om. इति 8 l1 add. अनुप्रासः ॥७२॥ / 1 l2 ~~+~~ नधिक्रिये 2 l1 त्वया 3 l2 om. अथवा 4 l1 तत् अहं 5 l2 विधत्से 6 l1 देव! देहि 7 l2 वितरस्तु भवन् 8 l1 add. यत्त्वमिति पाठान्तरे / २ ~~दैवज्ञाः किंशुकाः । अनुप्रासो यमकमपि ॥७३॥~~

[1]श्रवः प्रविष्टा इति। धरित्रीपुरुहूतस्य [2]राज्ञः पुत्री पुनरपि ऊचे। किंभूता?। ह्रियो लज्जाया अपि श्लथितोऽनुरोधो यया सा तथा। शिथिलीकृतलज्जा इत्यर्थः। किं कृत्वा?। [3]वैमत्येन विरुद्धोक्तितया धुतेन मूर्ध्ना ताः तस्य हंसस्य गिरः विधूय[4] निराकृत्य[5]। [6]उत्प्रेक्षते-श्रवसि कर्णे प्रविष्टा इव भणित्वा। मूर्ध्ना कम्पितेन निराकृत्य[7]॥७४॥

मदन्यदानं प्रति कल्पना या वेदस्त्वदीये हृदि तावदेषः।
निशोऽपि सोमेतरकान्तशङ्कामोङ्कारमग्रेसरमस्य कुर्याः॥७५॥

[1]मदन्यदानमिति। [2]तावत्त्वदीये हृदि एष वेदः ज्ञानम् अथ च वेदवाक्यं [3]या मम अन्यस्मै दानं प्रति कल्पना[4] नलव्यतिरिक्तो भर्ता शक्यते[5] यदि मम त्वया नलादन्यो भर्ता कल्पनीयः इति वेदः तदा अत एव निशोऽपि रात्रेरपि[8] सोमेतरकान्तशङ्कामेवोङ्कारं प्रणवम् अस्य वेदस्य अग्रेसरं प्रथमं[9] कुर्याः।[10] वेदारम्भे[11] हि[12] प्रणवः क्रियते[13]। स्रवत्यनोङ्कृतं[14] पूर्वमिति मनु० इति स्मरणात्[15]॥७५॥

सरोजिनीमानसराग वृत्तेरनर्कसम्पर्कमतर्कयित्वा।
मदन्यपाणिग्रहशङ्कितेयमहो महीयस्तव साहसिक्यम्॥७६॥

1 P. श्रवः प्रविष्टाः 2 P. दुहिता राजपुत्री दुहिता 3 P. श्रवसि...भणित्वा here 4 P. इव here 5 R निरङ्गराकृत्य 6 P. add. इव 7 P. add. मूर्द्धकम्पेन गिरां निराकरणं सम्भावितम्। अनुप्रास उत्प्रेक्षा च॥७४॥

1 P. मदन्य। 2 P. तावत्...वेदवाक्यं om. शक्यते 3 R om. या 4 R कल्पनाद् व्यति० 5 R प्रथमं here 6 R तदा 7 R om. इति वेदः तदा 8 P. रात्रेऽपि 9 P. om. प्रथमं 10 P. add. पुरःसरं प्रथमं विदध्याः॥ B वेदा० 12 P. om. हि 13 R om. स्रवत्य० स्मरणात् 14 P. B अवत्यनाकृतं 15 P. add. अनुप्रासो रूपकं यथपोक्ति-कल्पितातिशयोक्तिश्च॥७५॥

सरोजिनीति[1]। अहो आश्चर्यं हे हंस! तव महीयः महत्[2]
[साहसिक्यं][3] साहसिकत्वं यदियं ममाऽन्येन नलादितरेण पाणिगृहस्य[4]
शङ्किता वितर्कितवम्। किं कृत्वा? सरोजिन्या मानसस्य चित्तस्य
रणवृत्तेः[5] अनुरागव्यापारस्य अनर्कसम्पर्कम् अतर्कयित्वा अविचार्य।
कमलिन्या(47b)इव अर्कसम्पर्कव्यतिरेकेणाऽपि चन्द्रादिकेऽनु-
रागं तर्कयसि। तदा ममाप्यन्यो भर्त्ता तर्कणीयः। अन्यथा न तर्कणीयः[6][7]॥७६॥

साधु त्वयाऽतर्कि तमेतदेव स्वेनाऽनलं यत्किल संश्रयिष्ये।
विनाऽमुना स्वात्मनि तु प्रहर्तुं मृषागिरं त्वां नृपतौ न कर्तुम्॥७७॥

साधु त्वयेति[1]। तत्[2] त्वया एतदेव साधु रुचिरमतर्कि यदहं
भैमी[3] स्वेनाऽऽत्मना अनलं संश्रयिष्ये। किलेत्युपहासे। तु पुनः अमुना
विना स्वात्मनि स्वशरीरे प्रहर्तुमनलं वैश्वानरं संश्रयिष्ये। पुनः त्वां
नृपतौ नलविषये मृषागिरम् अनृतभाषिणं कर्तुं नलादन्यं वरम् अनलं न
संश्रयिष्ये[4]॥७७॥

मद्विप्रलम्भं पुनराह यस्त्वां तर्कः स किं तत्फलवाचि मूकः।
अशक्यशङ्काव्यभिचारहेतुर्वाणी न वेदा यदि सन्तु के नु॥७८॥

मद्विप्रलम्भमिति[1]। यः पुनस्तर्कः विचारः मया[2] विप्रलम्भं
विप्रतार्य त्वामाह[3]। स तर्कः[4] किं तस्य विप्रलम्भनस्य फलवाचि फल-

1 P. साधु; P2 सरोजिनीति। 2 P. महत्तरं 3 BP. P2 om. साहसिक्यं; edr. add. साहसिक्यं 4 BP. ग्राहणस्य 5 P2 om. विसर्गः 6 P2 कारणीयः 7 P. add. अनुप्रासोऽतिशयोक्तिश्च॥७६॥// 1 P. साधु त्वयेत्यादि। 2 B तत्र 3 P. P2 om. भैमी 4 P. add. श्लेषः॥७७॥// 1 P. मद्विप्र। 2 P2 add. मया 3 P2 add. ब्रुवते 4 P2 add. विचारः

वञ्चने मूकः। येन तर्केण त्वमिति मन्यसे-यत् दमयन्ती मां वञ्चयति। असत्यवञ्चनेन कृत्वा तस्य वञ्चनस्य फलं तव स एव कथयिष्यति। तर्हि तव वाणी सत्यैव इति[6] कथं सोयते[7] इत्याशङ्क्याह- यदि यस्याः वाण्याः व्यभिचारस्य हेतुः कारणम् अशक्यशङ्कैः[8] शङ्कितुमपि[न शक्यः][सा] व्यभिचारिणी वाणी यदि चेत् न वेदा, न वेदवत् प्रामाण्य[9]-भाक् । तु पुनः तर्हि वेदाः क्व सन्तु[10]। अपि त्वन्ये न केऽपि। वेदानामपि अपौरुषेयत्वात् व्यभिचारहेतुरागद्वेषसहितपुरुषप्रणीतत्वा-भावात् प्रामाण्यम्[11]। तथा मम वाण्या अपि वेदतुल्यत्वात् व्यभिचारा-भावः। विमतं वाक्यं[12] वेदाः। अशङ्क्यशङ्क्यव्यभिचारहेतुत्वे सति वाक्य-त्वात्। अग्निमीळे[13] (RV I.1.1) इत्यादिवाक्यवदित्यनुमानम्[14] ॥७८॥

---

अनैषधायैव जुहोति तातः किं मां कृशानौ न शरीरशेषाम्।
ईष्टे तनूजन्मतनोः स नूनं मत्प्राणनाथस्तु नलस्तथापि ॥७९॥

---

अनैषधायेति[1]। (५४६) यदि तातो मम पिता मामनैषधाय नला-दन्यस्मै जुहोति ददाति। हु (११५४) दाने। ततो मां शरीरशेषां[2] प्राणरहितां कृशानौ वह्नौ किं न जुहोति? न प्रक्षिपति। यतो नूनं स पिता तनूजन्मनो[3]-पत्यस्य तनोः शरीरस्य केवलस्य ईष्टे ईशो भवति। अधीगर्थदयेशां कर्मणि (पा० II.iii.52) इति षष्ठी। तु पुनस्तथापि मम प्राणानां नाथो नल एव[4] ॥७९॥

---

तदेकदासीत्वपदादुदग्रे मदीप्सिते साधु विधित्सुता ते।
अहेलिना किं नलिनी विधत्ते[1] सुधाकरेणापि सुधाकरेण ॥८०॥

---

5 B वञ्चयेति 6 P om. इति 7 P प्रतीयते 8 P2 शङ्क्यः 9 B प्रमाण° 10 B add. विसर्गः 11 P प्रमाण्यम् 12 P P2 वाणीत्वात् 13 B P P2 °मीळे, edn. मीळे 14 P add. अनुप्रासः अनुमानं च ॥७८॥ 1 P अनै 2 P2 add. किं 3 B °जनानो 4 P add. तनूजन्मेति साभिप्रायम् । अनुप्रासः काव्यलिङ्गं च ॥७९॥ 1 P2 text करोति —

तदेकदासीत्व[2] इति । ते तव मम ईप्सिते नलावाप्तिलक्षणे
[विधित्सुता] विधातुमि[3]च्छता कर्तुमिच्छता साधु युक्ता । किंभूते ? तस्य
नलस्य[4] एकं दासीत्वं[5] पदं नाम पर्यायोक्तेन भार्यात्वं तस्माद् उदग्रे
अतिस्पृहणीये दुर्लभ[6]फले । अथवा तस्य नलस्य एक[7]दासीत्वपदं
तस्मादपि उदग्रे परिपूर्णे । यदि दासीत्वमपि लभे, तेनाऽप्युदग्रेऽविकले । यतो
नलिनी कमलिनी सुधाया अमृतस्याऽऽकरेण निधानेनाऽपि सुधाकरेण
चन्द्रेण[8] किं विधत्ते[9] करोति । अपि तु न किमपीति[10] । किंभूतेन ? अहेलि-
नाऽऽदित्यव्यतिरिक्तेन । तस्या हेलिना [ऽऽ]सूर्येण सङ्गो आह्लादः[11] ॥८०॥

---

तदेकलुब्धे हृदि मेऽस्तु लब्धुं चिन्ता न चिन्तामणिमप्यनर्घ्यम् ।
चित्ते ममैकः सकलत्रिलोकीसारो निधिः पद्ममुखः स एव ॥८१॥

---

तदेकलुब्धे[1] इति । मम हृदि तस्मिन्नेकस्मिन्नेव नलविषये
लुब्धे अनर्घ्ये महार्हे[3] चिन्तामणिमपि लब्धुं न चिन्ता मनोरथो नास्ति ।
यतो[4] मम[5] चित्ते स[6] एवैकः सकलायाः त्रिलोक्याः सारः[7] पद्ममुखो
नलरूपो निधिर्वर्तते । पद्म इव पद्ममिव वा[8] मुखं यस्येति[9] पद्ममुखः ।
पद्मशब्दो[10] निधिवचनस्तु पुंलिङ्ग एव । तथा सारशब्दः उत्कर्षे पुंसि ।
न्यायादनपेते नपुंसकम् (    ) । नैतत्सारमिति । (48b) अथ च यदा पद्मो
[मुखं यस्य स पद्ममुखो] निधिर्लभ्यते तदा चिन्तामणिना किं कार्यम्[2] ॥८१॥

---

2 B °दासीत्वेऽपि ; 1. तदेकदा । 3. 1, 2 om. विधातुमिच्छता 4. 1, 2 om. नलस्य 5. 1.
°दासीत्वपदं 6. 1. दुर्लभे 7. 1. एकदासी° 8. 1. चन्द्रमसा 9. B. 1. करोति विधत्ते;
1, 2 om. करोति 10. 1, 2 om. इति 11. 1. add. अनुप्रासो दृष्टान्तश्च ॥८०॥ 1. 1. तदे ।
2. 1. om. एकस्मिन् 3. B महार्घ्ये 4. 1. add. मे 5. 1. add. अन्तः 6. 1. एकः स एव
1, 2 एक एव 7. 1. पद्म इव ... पुंलिङ्ग एव 8. 1. om. वा 9. 1. om. इति
पद्ममुखः 10. 1. add. जलजेऽपि लिङ्ग । 1, 2 om. न्यायाद° ... सारमिति । 2. 1.
add. चित्ते ममैक इत्यपि पाठः । अनुप्रासो रूपकं श्लेषश्च ॥८१॥

सर्ग ३ 45

श्रुतः स दृष्टश्च[1] हरित्सु मोहाद् ध्यातः स नीरन्ध्रितबुद्धिधारम् ।
८/ ममाद्य तत्प्राप्तिरसुव्ययो[2] वा हस्ते त्वाऽऽस्ते द्वयमेकशेषः ॥८२॥

श्रुतः[2] स[3] दृष्ट इति । स मया श्रुतः । तथा[3] हरित्सु दिक्षु[4,5] मोहात्[6] दृष्टः । तथा स मया नीरन्ध्रिता विजातीयप्रत्ययेनाऽव्यवहिता[7] बुद्धिधारा सजातीयप्रत्ययवाहो यत्र ध्याने तथा[8] भवत्येवं ध्यातः । ततो ममाद्य[8] तस्य प्राप्तिः[9] असुव्ययो वा प्राणत्यागो[10] वा द्वयमपि तव
८/ हस्ते आस्ते । त्वया[11] दत्तम् । किंभूतं द्वयम् ? एकशेषः एकः शेषो यत एकं किञ्चिद् उभयोर्मध्यात्[12] शिष्यते । इतरत्[13] निवर्त्तते[14] ॥८२॥

सञ्चीयतामाश्रितपालनोत्थं मत्प्राणविश्राणनजं च पुण्यम् ।
निवार्यतामार्य ! वृथा विशङ्का भद्रेऽपि मुद्रेयमये ! भृशं का ॥८३॥

सञ्चीयतामिति[1] । हे हंस ! आश्रितस्य पालनात् उत्थं उत्थानं यस्य[2] तत्पुण्यं सञ्चीयताम्[3] । तथा मम प्राणानां विश्राणनाद्दानाज्जातं[4] पुण्यं[5] च सञ्चीयताम् । हे आर्य ! वृथा मिथ्या विविधा शङ्का निवार्यताम् । अये इति सम्बोधने । भद्रेऽपि कल्याणेऽपि अर्थे भृशं तवेयं का मुद्रा[7] यदिदं कार्यं नाङ्गीकरोषि[8] ॥८३॥

१. श्रुता
1 ~~[illegible]~~ + च स ~~[illegible]~~ 2 B स्तुतः 3 B यथा 4 1 add. सकलासु 5 2 om. मोहात् 6 1 add. था 7 2 add. स 8 B मया° 9 1 प्राप्तिम 10 1 प्राणपरित्याग इति द्वयमपि 11 B 1 ~~[illegible]~~ त्वया दत्तम् । 12 B उत्थितयो° 13 B इतरत्तव हस्तगतम् 14 1 add. तत् एकशेषरूपद्वयं तव हस्तगतम् । समुच्चयः क्रियायौगपद्यं समुच्चयः ॥८२॥ // 1 1 सञ्चीयतामित्यादि 2 1 add. पुण्यस्य 3 1 add. आश्रितेति पाठे अङ्गीकृतपालनादिति व्याख्या 4 1 2 om. दानात् 5 1 2 च पुण्यं 6 2 recto sup. mg. add. किमिदं मौनं 7 B यदीदं 8 1 add. अनुग्रहः ॥८३॥

सर्ग ३ 46

अलं विलङ्घ्य प्रियविज्ञ! याञ्चां कृत्वाऽपि वाम्यं विविधे विधेये।
यशःपथादाश्रवतापदोत्थात् खलु स्खलित्वास्तखलोक्तिखेलात्॥८४॥

अलं[1] विलङ्घ्येति। हे प्रियविज्ञ[2]! याञ्चां[3] विलङ्घ्यालम्[4]। [5]मम याञ्चा त्वया न विलङ्घनीया। तथा मम विधेये कृत्ये[6] कार्ये [विविधे] वाम्यं प्रातिकूल्यं विपरीतत्वं कृत्वा[पि] अलम्। [8]तदपि न कार्यम्। [किंभूतात्?] यशःपथात्। स्खलित्वा खलु पूर्यताम्[7]। किंभूतात्? अस्तः खलोक्तेः दुर्जनवचनस्य खेलः क्रीडा यत्र तस्मात्तथा। यस्मिन् कीर्तिमार्गे दुर्जनवचनानां प्रवेशो नास्ति, एवंविधान्मार्गात् मा स्खलनं[9] [तव] भवतु। किंभूतात्? आश्रवता वचनकारिता[10] तदेव पदं तदुत्थितात्। हंसेन दमयन्त्या वचनं कृतमिति कीर्तिस्तव[11] भविष्यति[12]॥८४॥
(499)

स्वजीवमप्यार्तमुदे ददद्भ्यस्तव त्रपा नेदृशबद्धमुष्टेः।
मह्यं मदीयान्यदसूनदित्सोर्धर्मः कराद्भ्रश्यति कीर्तिधौतः॥८५॥

स्वजीवमपीति[1]। तव ईदृशबद्धमुष्टेः कृपणस्य आर्तानां मुदे हर्षार्थं[2] स्वं[3] जीवं जीवितमपि[4] [ददद्भ्यः पुरुषेभ्यः सकाशात् न[5]] त्रपा न लज्जा। यत् तव करात् कीर्त्या धौतो धर्मो[6] भ्रश्यति। किंभूतस्य तव[7]? मदीयान् [असून् प्रा]णान् मह्यमेवा[8]ऽदित्सोः अदातुमिच्छोः[9]॥८५॥

1 P. अलं वि। 2 I2 अलं विलङ्घ्येति... विचारो युक्तः ८२.२०.१। 2 I2 हे हंस! 3 B add. विशेषणसाऽपि यस्य नलस्य विशेषस। 4 P. याञ्चाः प्रार्थनाः 5 P. om. मम... तथा मम 6 P. om. कृत्ये 7 P. add. पूर्यताम् 8 P. om. तदपि न कार्यम्। 9 P. तव स्खलनं मा 10 P. I2 वचकरता 11 P. तव कीर्तिः 12 P. add. अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा (पा III.iv.18) अनुप्रासः॥८४॥ 1 P. स्वजीप। 2 I2 हर्षाय 3 P. स्व 4 I2 om. अपि 5 I2 om. न 6 P. add. अपि 7 P. om. तव 8 P. om. एव 9 P. add. बद्धमुष्टेः कराद्भ्रश्यति इति तु चित्रम्। विरोधः काव्यलिङ्गमन्तरयोक्ति-श्च॥८५॥

सर्ग ३ 47

दत्त्वाऽऽत्मजीवं त्वयि जीवदेऽपि शुध्यामि जीवाधिकदे नु केन।
विधेहि तन्मां त्वदृणान्यशोऽब्धुममुद्रदारिद्र्यसमुद्रमग्नाम् ॥८६॥

दत्त्वाऽऽत्मजीवमिति[1]। हे हंस! अहं त्वयि[2] जीवदेऽपि प्राणप्रदायकेऽपि [आ]त्म[जी]वं दत्त्वा आत्मप्राणान् दत्त्वा शुध्यामि। जीवाद् अधिके नलः तस्य दायके[3] त्वयि तु पुनः केन शुध्यामि। त्वां प्रति केन [आनृ]ण्यं गच्छामि। तत् त्वं मां तव ऋणानि [अ]शोऽब्धुम्[4] अमुद्रे दारिद्र्यसमुद्रे मग्नां विधेहि। नलप्रदानऋणं शोधयितुं न शक्नोमी-त्यर्थः[5] ॥८६॥

क्रीणीष्व मज्जीवितमेव पण्यमन्यन्न चेदस्ति तदस्तु पुण्यम्।
जीवेशदातर्यदि ते न दातुं यशोऽपि तावत्प्रभवामि गातुम् ॥८७॥

क्रीणीष्वेति[1]। हे जीवेशदातः! मज्जीवितमेव पण्यं क्रीणी-
दं। ष्व स्वीकुरु। इदं[2] जीवितं त्वदधीनमित्यर्थः। अन्यन्न[3]। जीविताद् अधि-[4] कस्य वस्तुनोऽभावात्। ननु यो जीवितस्येशं[5] ददाति तस्य न्यूनत्वात् जीवितं विनिमेयं न भवति इत्याह। अस्ति चेद् वस्त्वन्तरं तर्हि पुण्यमस्तु। इष्टार्थिनश्चेदिष्टं[6] तवापेक्षितं[7] (49b), तर्हि ते तव यदि जीवितेशसमं वस्त्वन्तरं दातुं न प्रभवामि। तथाविधस्याऽभावात्[8] तथापि तावत् यशोऽपि गातुं प्रभवामि। यशोगानमिष्टं[9] भविष्यतीत्यर्थः।

~~उप~~
1 P. दत्वाम। 2 P. तव 3 P. दायिके; R दायकत्वे 4 P. शोद्धुं; R शोढुं 5 P. add. ऋणोक्ष्विति पाठान्तरम्। अनुप्रासो विरोधः रूपकं च ॥८६॥ // 1 P. क्रीणी; R क्रीणीष्विति। वB मत 3 P. add. मत्प्राणमयं चेति पाठान्तरम् 4 P. R om. न 5 P. R जीव० 6 P. R इष्टा० 7 P. R इष्टं 8 P. R add. एव 9 P. R इष्टं

अथवा हे हंस! त्वं मम जीवितमेव पण्यं क्रीणीष्व[10] विसाधय। चौ[11] यदि अन्यद्दातव्यं[12] नास्ति तत्पुण्यमस्तु। ननु पुण्यं परलोकफलम्[13] इह लोके किमपि नास्तीत्याशङ्क्याऽऽह — हे जीवेशदातः![14] यद्यहं ते तुभ्यं[15] दातुं न प्रभवामि। किमपि दातुं न शक्नोमि। [तावत्] तर्हि यशोऽपि गातुं प्रभवामि। तव कीर्तिमपि गातुं किं न प्रभवामि॥ किमपि दातुं न शक्नोमि, तर्हि यशोऽपि गातुं न[16] प्रभवामि। [17]तव कीर्तिमपि गातुं न प्रभवामि किम्?॥ यः किल जीवितेशं नलं ददाति तस्य किं यशोगानव्यतिरेकेण दीयते?॥[18] ॥८७॥

वराटिकोपक्रिययाऽपि लभ्यान्नेभ्याः कृतसानथवाऽऽद्रियन्ते।
प्राणैः पणैः स्वं निपुणं भणन्तः क्रीणन्ति तानेव तु हन्त सन्तः॥८८॥

वराटिकेति[1]। अथवा इभ्याः[2] धनपन्तः कृतसान् पुरुषान्नाऽऽद्रियन्ते नाङ्गीकुर्वन्ति। किंविशिष्टान्?। वराटिका कपर्दिका तस्या उपक्रिययाऽपि लभ्यान्। हन्त अहो सन्तः सत्पुरुषाः[3] तु पुनस्तानेव कृतसान् क्रीणन्ति। कैः?। स्वैः प्राणैः पणैः[4]। किं कुर्वन्तः?। स्वमात्मानं निपुणं भणन्तः। अस्माभिः रुचिरं विसाधनकं लब्धमिति[5]॥८८॥

10 P. क्रीणीष्व। 11 B चित। 12 P. R2 om. दातव्यं। 13 B लोके। 14 B दातः। 15 P. om. तुभ्यं। 16 P. om. न। 17 P. तावकीं। 18 P. किं यश व्यतिरेकेण। 19 P. add. अनुप्रासोऽतिशयोक्तिश्च॥८७॥ 1 P. वरा। 2 P. इभ्यां 3 P. R2 om. सत्पुरुषाः 4 P. R2 om. पणैः 5 P. add. कृपणं भणन्त इति पाठे कृतसानां प्राणेभ्योऽधिकं दातुमुचितम्। प्राणमात्रदाने तु कृपणत्वमिति व्याख्या। अनुप्रास आक्षेपश्च। अहं तावत् कृतसा त्वं च सत्पुरुषः। तस्मात्कार्यमिदं कुरुष्वेति प्रस्तुते सामान्याभिधानादप्रस्तुतप्रशंसा च॥८८॥

सर्ग २ 49

स भूभृदष्टावपि लोकपालास्तैर्मे तदेकाग्रधियः प्रसेदे।
न हीतरस्माद् घटते यदेत्य स्वयं तदाप्तिप्रतिभूर्ममाभूः ॥८९॥

स[1] भूभृदिति। स भूभृन्नलः अष्टावपि लोकपालाः तेषा-मंशाः तैर्लोकपालैः मे मम प्रसेदे[2] प्रसन्नैर्जातम्। किंभूतायाः? तस्मिन्नले एकाग्रा धीर्यस्याः तस्याः तथा। इतरस्मादन्यथा तेषाम-प्रसन्नत्वे[3] भाति न घटते। हि [यत्त्वं]मेत्य ऽऽगत्य स्वयं मम तस्याऽऽ-[5]
३/ प्त्यै प्राप्त्यर्थं प्रतिभूरभूः ॥८९॥

अकाण्डमेवाऽऽत्मभुवाऽर्जितस्य भूत्वाऽपि मूलं मयि वीरणस्य।
भवान्न मे किं नलदत्वमेत्य कर्ता हृदश्चन्दनलेपकृत्यम् ॥९०॥

अकाण्डमेवेति[1]। भवान्मे[2] मम नल[दत्वमेत्य] नलदातृत्वं प्राप्य चन्दनलेपस्य कृत्यं तापोपशान्तिलक्षणं किं न कर्ता। कस्य? हृदः हृद[यो]स्य। किं कृत्वा[3]? मयि [विषये] रणस्य रणरण[कि]स्य औत्सु-क्यस्य मूलं भूत्वा। किंभूतो भवान्? चिः पञ्ची। किंभूतस्य? अकाण्डमेव अकालमेव [आत्मभु]वा कामेनाऽर्जितस्य। अपिशब्दो विरोधे। यः किल आत्मीयया भुवा अर्जितस्य वीरणस्य तृणविशेष[स्य मूलं] भवति, स[4] कथं[5] नलदत्वं म[6]ल्लकीत्वं प्राप्य हृदये चन्दनलेपकृत्यं[7] करोति[8]। उशीरं वीरणीमूलं च शीतत्वात्[9] प्रायेण तापं शमयति। तदपि काण्डेन पर्वणा

1 P. सभू। २ B सा ३ P. vv. सति 4 B हि घटते 5 P. तस्याः 6 P. add. रूपकमनुमानं च ॥८९॥ // 1 P. अका। २ P. om. मे ३ P. add. नलदत्वमितः 4 P. add. वीरणमूलकनलदयोः पर्यायत्वात् 5 P. कथं vv. कृत्यं 6 P. उशीर-त्वं 7 P. मलयजलेपकार्यं कथं कुरुते। 8 P. add. चन्दनलेपो ह्यन्य एव। अतस्तस्मात् पृथगेव वीरणमूलनलदशब्दाभ्यामभिधेयमुशीराख्यं वस्तु स्वकार्यं भिन्नमेव करोति। 9 P. शीतलत्व

रहित, भुवि उन्नतं च भवति। मूलं किल सकलमेव काण्डरहितं भवति॥ ॥90॥

---

अलं विलम्ब्य त्वरितुं हि वेला कार्ये किल स्थैर्यसहे विचारः।
गुरूपदेशं प्रतिभेव तीक्ष्णा[1] प्रतीक्षते जातु न कालमर्तिः॥91॥

---

अलं[1] विलम्ब्येति। हे हंस! विलम्ब्य अलं पूर्यताम्। हि[3] यस्मात्त्वरितुं वेला[4] किल स्थैर्यसहे विलम्बक्षमे कार्ये विचारः कर्तव्यः। [तीक्ष्णा][5] आर्तिर्व्यथा[6] जातु कदाचिदपि कालं न प्रतीक्षते। का इव?। प्रतिभा इव। यथा तीक्ष्णा प्रतिभा गुरूणामुपदेशं न[7] प्रतीक्षते। स्वयं जानाति[8]॥91॥

---

अभ्यर्थनीयः स गतेन राजा त्वया न शुद्धान्तगतो मदर्थम्।
प्रियास्यदाक्षिण्यबलात्कृतो हि तदोदयेदन्यवधूनिषेधः॥92॥

---

अभ्यर्थनीय[1] इति। त्वया स नलो राजा शुद्धान्तगतोऽन्तःपुरगतो मदर्थं नाभ्यर्थनीयः। किंभूतेन?। तत्र गतेन। तदा [हि] प्रियाया अन्तःपुर्याः आस्यदाक्षिण्यं मुखदाक्षिण्यं तेन बलात्कृतोऽन्यस्याः वध्वा निषेध उदयेत्[2][3]॥92॥

---

शुद्धान्तसंभोगनितान्ततुष्टे न नैषधे कार्यमिदं निगाद्यम्।
अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा॥93॥

---

1. R, tear तीव्रा 2. P. अलं 3 R किं 4 P. किल वेला 5. P. आर्ति० 6 R add. पीडा 7. P. om. न 8 Vidd. अनुप्रासः काव्यलिङ्गमर्थान्तरन्यास उपमा च॥91॥ 1. P. अभ्यर्थ्य 2 B मुदयेत 3. Vidd. प्रियस्येत्यपि कश्चित् तदा प्रियस्य भर्तुः अन्यवधूकर्तृको निषेध उदयेदिति व्याचष्टे। काव्यलिङ्गमनुप्रासोऽपि॥92॥

[1] शुद्धान्तसंभोग इति। त्वया नैषधे शुद्धान्तस्य अन्तःपुरस्य संभोगेन नितान्ततुष्टे[2] तृप्ते सति इदं मदर्थप्रार्थनालक्षणं कार्यं न निगाद्यं न वाच्यम्। हि यस्मादपां पानीयानां तृप्ताय पुरुषाय स्वादुरपि सुगन्धिरपि वारिधारा तुषारा[3] शीतला च न स्वदते। अपामिति तृतीयार्थे षष्ठी]॥ ९३॥

त्वया निधेया न गिरो मदर्थाः क्रुधा कदुष्णे हृदि नैषधस्य।
पित्तेन दूने रसने सिताऽपि तिक्तायते हंसकुलावतंस!॥ ९४॥

[त्वया[1] निधेया इति। हे हंस! त्वया नैषधस्य हृदि[2] क्रुधा कदुष्णे ईषदुष्णे मदर्था गिरो न निधेयाः[3]। यतः हे हंसवधूनां वतंस! हंसकुलस्यावतंस! मुकुटभूत! पित्तेन दूने संतप्ते रसने जिह्वेन्द्रिये सिता शर्कराऽपि तिक्तायते कटुर्भवति[4]]॥ ९४॥

धरातुराषाहि मदर्थयाच्या कार्या न कार्यान्तरचुम्बिचित्ते।
तदार्थितस्याऽनवबोधनिद्रा बिभर्त्यवज्ञाचरणस्य मुद्राम्॥ ९५॥

[धरातुराषाहीति[1]। [त्वया धरायाः तुराषाहि[2] इन्द्रे नले कार्यान्तरं चुम्बति चित्तं यस्य[3] तस्मिन् तथा व्यग्रे सति मदर्थं याच्या न कार्या। तदा अर्थितस्य प्रार्थितस्य अनवबोधो ऽप्रतिपत्तिः सैव निद्रा च अवज्ञाचरणस्य मुद्रां बिभर्ति। स व्यग्रत्वात् कार्यार्थं नाऽवबुध्यते[4]। अन्ये इति जानन्ति यदयमवज्ञां कुरुते[5]]॥ ९५॥

1. शुद्धान्त। 2. वतृप्ते तुष्टे 3. om तुषारा 4. add इत्यर्थः॥ ९३॥ 1. B. त्वया। 2. add क्रुधा 3. om निधेयाः 4. add इत्यन्तो निषेध उपमा च॥ ९४॥
~~...~~ 2. तुरासाहि। B तुरासाहि add तुराषाहि 3. B यस्मिन् 4. B न बुध्यते 5. add काव्यलिङ्गमुपमा च॥ ९५॥
1. तुरासाहि

सर्ग ३ 52

विसेन विज्ञाप्यमिदं नरेन्द्रे तस्मात्त्वयाऽस्मिन् समयं निरीक्ष्य।
त्रि/ आत्यन्तिकासिद्धिविलम्बसिद्ध्योः कार्यस्य कार्यस्य शुभा विभाति ॥९६॥

[विसेन विज्ञाप्यमिति। तस्मात् कारणात् त्वया विसेन विशेषविदा अस्मिन्नरेन्द्रे समयं प्रस्तावं निरीक्ष्य इदं कार्यं विज्ञाप्यं वक्तव्यम्[5]। यतः कार्यस्य एका आत्यन्तिकी निश्चिता असिद्धिः। अपरा विलम्बेन सिद्धिः तयोर्द्वयोः सिद्ध्यसिद्ध्योः मध्यात् आर्यस्य तव हंसस्य[7] का शुभा विभाति। असिद्धेः पार्श्वात् विलम्बेनाऽपि सिद्धिः भव्या[8]]॥९६॥

इत्युक्तवत्या यदलोपि लज्जा साऽनौचिती चेतसि नश्चकास्तु।
स्मरस्तु साक्षी तददोषतायामुन्माद्य यस्तत्तदवीवदत्ताम् ॥९७॥

इत्युक्तवत्येति। तया इति पूर्वोक्तमुक्तवत्या [सत्या] यत् लज्जा अलोपि त्यक्ता सा निर्लज्जतालक्षणा अनौचिती नोऽस्माकं
भा/ चेतसि चकास्तु प्रतिभासताम्। तु पुनः तस्याः अदोषतायां स्मर एव साक्षी यस्ताम् दमयन्तीमुन्माद्य विह्वलीकृत्य तत्[तत्] निर्लज्जवाक्यादिकं [अ]वीव[द]दत् [वादयामास[4]] तस्मान्निर्दोषा सा[6] ॥९७॥

उन्मत्तमासाद्य हरः स्मरश्च द्वावप्यसीमां मुदमुद्वहेते।
पूर्वः परस्पर्द्धितया प्रसूनं नूनं द्वितीयो विरहाधिदूनम् ॥९८॥

१ P. विसे। २ P. करणात् ३ P. तस्मिन् ४ P. add. समीक्ष्य ; P. om. इदं कार्यं
5 P. add. विज्ञापयितव्यमेतत् इति पाठान्तरम्। 6 P. शाखांबिलो (?) 7 P. om. हंसस्य 8 P. add. साधीयसी 9 P. add. अनुप्रासः काव्यलिङ्गं च ॥९६॥
१ P. इत्युक्तवा। २ P. add. यत् ३ P. om. यः ४ P. add. अत्र कर्त्रभिप्रायक्रियाफलविवक्षाभावादात्मनेपदाभावः। 5 P. add. उन्मत्तवचनं हि न दोषाय। अतिशयोक्तिः ॥९७॥

उन्मत्तामासाद्येति[1]। उन्मत्ताम् आसाद्य हरः (५०b) श्रीमहादेवः स्मरः कामश्च द्वावपि असीमां मुदं हर्षमूहाते। तयोर्मध्यात् पूर्वः प्रसूनं[2] धत्तूरकं [प्राप्य हरस्य धत्तूरकं] प्रियम्। नूनं द्वितीयः कामः विरहस्य आधिभिर्दूनं पीडितमुन्मत्तं पुरुषं प्राप्य मुदं वहति। कया? परेण सह शत्रुणा सह स्पर्धितया परस्परसंघर्षेण द्वावपि उन्मत्तं[4] प्राप्य नूनं हर्षं वहतः[5]॥९८॥

तथाभिधात्रीमथ राजपुत्रीं निर्णीय तां नैषधबद्धरागाम्।
अमोचि चञ्चुपुटमौनमुद्रा विहायसानेन विहस्य भूयः॥९९॥

[अथ][2]
तथाभिधात्रीमिति[1]। अनेन विहायसा[3] पक्षिणा विहस्य भूयः चञ्चुपुटस्य मौनमुद्रा अमोचि त्यक्ता[4] उक्तम्[5]। किं कृत्वा? तां[6] राजपुत्रीं तथा पूर्वप्रकारेण अभिधात्रीमुक्तवतीं सतीं नैषधे[7] बद्धरागां बद्धानुरागां निर्णीय निश्चित्य[8]॥९९॥

इदं यदि क्ष्मापतिपुत्रि! तत्त्वं पश्यामि तन्न स्वविधेयमस्मिन्।
त्वामुच्चकैस्तापयता नृपं च पञ्चेषुणैवाऽजनि योजनेयम्॥१००॥

इदं[1] यदीति। हे क्ष्मापतिपुत्रि! यदि इदं तव पूर्वोक्तं तत्त्वं[2] तथ्यं सत्यं तदहमस्मिन्नर्थे स्वस्यात्मनः[3] किमपि विधेयं कर्तव्यं न पश्यामि। यत[4] इयं युवयोः योजना संयोगः पञ्चेषुणा[5] कामेनैव

1 P. उन्मत्त। 2 B धत्तूरकं प्रसूनं 3 P. °पुष्पं 4 B तन्मत्तं 5 P. add. उत्प्रेक्षा व्यतिरेकश्च। तदुक्तं – शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयोः। तत्र यद्भेदकथनं व्यतिरेकः स उच्यते (का. II.195)॥९८॥ 1 B तथाविधात्°, P. तथाभिधात्री। 2 B, P, R om. अथ; edn. add. अथ 3 P. पक्षिणा विहायसा 4 R om. उक्तम् 5 P. add. इत्यत्र वक्तव्यम्। 6 R om. तां 7 P. नैषधे° 8 P. बद्धरागां; R बद्धानुरागां 9 P. add. इति स्वभावोक्तिः परिकरः। अनुप्रासः॥९९॥ 1 P. इदं। 2 R om. तत्त्वं 3 P. अस्या° 4 P. यत 5 P. add. एव —

सर्ग ३ 54

अजनि कृता। किं कुर्वता? त्वां च नृपं च नलम् उच्चकैरत्यर्थं तापयता॥ ॥१००॥

त्वद्बद्धबुद्धेर्बहिरिन्द्रियाणां तस्योपवासव्रतिनां तपोभिः।
त्वामद्य लब्ध्वामृततृप्तिभाजां स्वदेवभूयं चरितार्थमस्तु॥१०१॥ /यं

त्वद्बद्धबुद्धेरिति। हे भैमि! तस्य नलस्य बहिरिन्द्रियाणां
श्या/ बाह्यानां चक्षुरादीनां स्वस्य आत्मनो देवभूयं देवत्वभवनम् अद्य
चरितार्थमस्तु। किंभूतस्य? त्वयि दमयन्त्यां बद्धबुद्धेः त्वद्गतान्तः-
करणस्य। किंभूतानाम्? तपोभिः कृत्वा उपवासव्रतिनाम्। इन्द्रियाणां
हि भोजनं शब्दादिविषयोपभोगः। त्वद्गतचित्तत्वात् भोगाभावे तेषामुप-
वासव्रतम्। पुनः किंभूतानाम्? त्वां लब्ध्वा अमृतवत् तृप्तिं भजन्ते
तेषां तथा। तेषां विषयत्याग एव तपः। तथा च विष्णुपुराणम्-
देवा वैकारिका दश(१।२।४६)। तस्य व्याख्यानम्-देवा द्योतनशीला-
श्च भूतादयः त्रिविधादहङ्कारात् इन्द्रियाधिष्ठात्रीणां देवतानाम् इन्द्रि-
याणां भूतसूक्ष्माणां च सृष्टिः। सात्त्विकात् इन्द्रियाधिष्ठात्रीणां देवतानां
दशानां सृष्टिः। देवता यथा-चक्षुषः सूर्यः, श्रोत्रस्य दिशः, पाद्योः पृथिवी
पायोर्मित्रः। एवं कर्मेन्द्रियाणामपि अधिष्ठात्रीसम्बन्धात् देवत्वम्। /धि
इन्द्रिययोगाच्च तस्य वैकारिका इति नाम। राजसात् चक्षुरादीनां सृष्टिः।

6 P. नलं च 7 P. add. तप्तं तप्तेन किल योज्यते। तापयतेति तापस्य कार-
णस्य वर्तमानत्वं योजनक्रियाणस्य कार्यस्याऽजनीत्यतीतत्वम् इति कार्य-/त्वं
कारणपौर्वापर्यविपर्ययादतिशयोक्तिरलङ्कारश्च॥१००॥

1 P. त्वद्बद्ध। 2 P/B स्वसम्बन्धि 3 P/B त्वद्गता॰ 4 P. om. कृत्वा 5 P. add.
बाह्यानां चक्षुरादीनां 6 B भूतां 7 P. add. तपोभिः 8 P. add. तस्य वा
9 B om. तेषां 10 B om. इन्द्रिया॰...देवतानां 11 B प्रभृत॰ 12 P. add. इन्द्रि-
याणां द्योतनयोगात् 13 B श्रोत्रियस्य 14 P. पृथ्वी 15 B मैत्रः 16 P. add.
अपरबुद्धि॰ 17 P. add. इन्द्रियाणां द्योतनयोगात्तथा

सर्ग ३ 55

स तैजसः। तामसात् भूतसूक्ष्माणां शब्दादीनां सिद्धिः। स भूतादिसंज्ञः।
देवा अपि उपवासैः तपसा च देवत्वं प्राप्य अमृतं[18] हविरपि भजन्ते ॥[19] ॥१०१॥

तुल्यावयोर्मूर्तिरभून्मदीया दग्धा परं साऽस्य न ताप्यतेऽपि।
इत्यभ्यसूयन्निव देहतापं तस्यातनुस्त्वद्विरहाद्विधत्ते ॥१०२॥

तुल्यावयोरि[1]ति। अतनुः कामः तस्य नलस्य देहतापं तव विरहात् विधत्ते तनोति[2]। इति कारणात् अभ्यसूयन्निव असहमान इव। इ[3]तीति किम्?। तुल्यमापयोः मम नलस्य च उभयोरपि मूर्तिः सौन्दर्येण तुल्या समानाऽभूत्[4]। तदनु मदीया मूर्तिः महेश्वरेण दग्धा। परं पुनरस्य नलस्य सा मूर्तिः ताप्यतेऽपि न[5], तप्ताऽपि न भवति। इति तापं विधत्ते[6] ॥१०२॥

लिपिं दृशा भित्तिविभूषणं त्वां नृपः पिबन्नादरनिर्निमेषः।
चक्षुर्[6]भिरर्पितमात्मनश्च अनुरागं स धत्ते रचितं त्वया नु ॥१०३॥ । त्व

लिपिं[1] दृशेति। इदानीं क्रमेण विरहिणां[2] या दशा[3] स्मरदशाः- नयन[4]प्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः। निद्राच्छेदस्तनुता बा[5]ष्पाणि तथा प्रलापश्च। उन्मादो मूर्छा मृतिरित्येताः स्मरदशाः दशैव स्युः ( ) इत्यथास्ता दर्शयति। [चतुर्थपादे वि[6]षयनिवृत्तिस्त्रपानाश इति शास्त्रान्तरे पाठः।]
नृपो नलः हे दमयन्ति! भित्तेर्विभूषणभूतां त्वां

।18 शब्दानां ।19 add अनुप्रासः समासोक्तिश्च ॥१०१॥ 2 P. तुल्याव।
2 om. तनोति 3 इति किम्? 4 add सर्वाणि नित्यमपि (पा?)
॥ ?) एकशेषः 5 न 6 add अनुप्रासः समासोक्तिश्च ॥१०२॥ 2 P. लिपिं।
2 om. या 3 स्मरदशा दश 4 नयनां 5 P. विषयनिवृत्तिस्त्रपानाशः। ~~इति शास्त्रान्तरे पाठः~~ । 6 P. बाष्पाणि तथा प्रलापश्च ॥

सर्ग ३ 56

सि/ लिपिं[7] चित्रलिखितां दृशा आदरेण निर्निमेषः सन् पिबन् एकदृष्ट्या[8] सादरमवलोकयन् आत्मनः (51b) चक्षुषि रागं रक्ततां धत्ते। किंभूताम्[9]। चक्षुषोर्मरैरश्रुप्रवाहैरर्पितम्। उत्प्रेक्षते – त्वया रचितमिव[10]। अत्यव-लोकनादनिमिषतयाऽश्रुभिर्नयनानि रक्तानि भवन्ति। त्वयि सानुरागत्वात् त्वया कृतमिव। एतेन[11] नयनप्रीतिर्दर्शिता[12] ॥१०३॥

पातुर्दृशाऽऽलेख्यमयीं नृपस्य त्वामादरादस्तनिमीलयाऽऽस्ते।
ममेदमित्यश्रुणि नेत्रवृत्तेः प्रीतेर्निमेषच्छिदया विवादः ॥१०४॥

पातुर्दृशेति[1]। अस्य नृपस्य अस्तनिमीलया निमेषरहितया दृशा त्वामालेख्यमयीं[2] चित्रलिखितां पातुरत्यर्थम्[3] अवलोकयतः सतः नेत्रेषु वृत्तेर्वर्तमानायाः प्रीतेर्[4]नयनप्रीतेर्दशायाः निमेषस्य[5] छिदा रहितता[6] तया सह अश्रुणि बाष्पजलविषये विवाद आस्ते [वि-चते]। कथम्?। ममेदं ममेदमिति नयनप्रीतिर्भणति। मदीयम् अश्रु रुदं मया कृतम्[7]। निमेषच्छिदा[8] भणति। इदमश्रु मदीयमिति। एतेन बाष्प[9]-प्रवृत्तिर्नाम स्मरदशा[10]। या[11] चक्षुःप्रीतेः कार्यभूता अवान्तरदशोक्ता तस्याः चक्षुःप्रीतावन्तर्भाव[12]: ॥१०४॥

त्वं हृद्गता भैमि! बहिर्गताऽपि प्राणायिता नासि कथाऽस्य गत्या।
न चित्रमाक्रामति तत्र चित्रमेतन्मनो यद्भवदेकवृत्ति ॥१०५॥

7 R om. लिपिं 8 P, R om. एकदृष्ट्या सादरम् 9 B किंभूतानि? 10 R रचित इव 11 P add. छायं दृष्टवतः सम्प्रयोगेच्छालक्षणात् कामादनन्तरं दृशो स्निग्ध भवतः इति 12 P add. उत्प्रेक्षा श्लेषश्च ॥१०३॥ 

1 P पातुर्दृशे 2 R त्वम° 3 P नरित्यर्थं° 4 R प्रीति° 5 R निवापस्य 6 B उरितता 7 R कतानि 8 R मम छिदा 9 R वृत्तिः 10 R om. या.... र्भावः 11 P add. विसर्गः 12 P add. अनुप्रासः ॥१०४॥

सर्ग ३ 57

त्वं हृद्गतेति। हे भैमि! त्वमस्य नलस्य कया गत्या प्राणा इव आचरिता नासि अपि तु सर्वप्रकारैः प्राणायिता। किम्भूता? बहिर्गताऽपि बाह्यस्थिताऽपि हृद्गता हृदि चिन्तया स्थिता। तत्रार्थे चित्रम् आश्चर्यम्। [चिन्तं] मनः नाक्रामति यद्यस्माद् एतस्य नलस्य मनो भवोत्यां त्वय्येव एकस्यां वृत्तिर्यस्य तत्तथा। [नाऽन्यत्र वर्तते]। अथ च [प्राणा अपि नासिकया तथा आस्यस्य मुखस्य गत्या च कृत्वा हृद्गता बहिर्गताश्च भवन्ति। मुखनासिकासञ्चारी प्राण इति]। प्राणवायोर्लक्षणम्। एतेन चिन्ता नाम दशा उक्ता ॥१०५॥

---

अजस्रमारोहसि दूरदीर्घां सङ्कल्पसोपानततिं तदीयाम्।
श्वासान् स वर्षत्यधिकं पुनर्यद् ध्यानात्तव त्वन्मयतां तदाप्य ॥१०६॥

---

अजस्रमारोहसीति। हे भैमि! त्वं तस्य नलस्य सम्बन्धिनीमजस्रमनवरतं दूरमतिशयेन दीर्घामविच्छिन्नां सङ्कल्पततिरेव सोपानततिः तामारोऽ(ऽरो)हसि। स त्वामेव सङ्कल्पैः विकल्पयते। पुनर्यत्स नलोऽधिकं श्वासान् वर्षति [नि]श्वासान् मुञ्चति, तत्तव ध्यानात्त्वन्मयतां त्वच्छरीरत्वमाप्य प्राप्य। यः किल सोपानरोहणं कुरुते, सोऽधिकं श्वासान् मुञ्चति। त्वं सोपानान्यारोहसि। स श्वसितीत्यसङ्गतम्। परं निरन्तरं यत् ध्यायते तन्मयता तस्य भवतीति श्रुतत्वात् स नलः त्वामेव संवृत्तः। ततो युक्तम्। एतेन सङ्कल्पदशोक्ता ॥१०६॥

---

1 P. त्वं हृ। 2 B प्राणा 3 P, B बाह्यस्था॰ 4 B अत्रार्थे 5 B न्यैतस्य 6 P om. नलस्य 7 B आसस्य 8 P भवति 9 B नासिकायां 10 B नवयोर्लक्षणी ॥ P एतेन विषयप्राप्तौ मनःसक्तिरूपा चिन्तासक्तो नाम दशा उक्ता। अनुप्रासो विरोधश्च श्लेष उपमा हेतुश्च ॥१०५॥ 1 P. अजस्रं। 2 B om. दूरम् 3 B om. तत ते 4 P. शरीरताम् 5 P. अवाप्य 6 B om. ध्यायते 7 P, B त्वमेव 8 P. विवर्त एतेन मनसि सक्ते सङ्कल्पोत्पत्तिः। कथं प्राप्स्यामि प्राप्य चैवमनुष्ठातव्यमित्येवंरूपा। विवर्त ध्यानात्तव त्वन्मयतामाप्योति सङ्गतिहेतुप्रतिपादनादसङ्गत्याभासः काव्यलिङ्गम् ॥१०६॥

सर्ग ३ 58

हृत्तस्य यां मन्त्रयते रहस्त्वां तां व्यक्तमामन्त्रयते मुखं यत्।
तद्वैरिपुष्पायुधमित्रचन्द्रसख्यौचिती सा खलु तन्मुखस्य ॥१०७॥

हृत्तस्य[1] यामिति। तस्य नलस्य हृत् हृदयं यां त्वां रहः एका-
चि/ न्ते मन्त्रयते याहशी भवती चिन्तयति यत्[3] तत् सर्वं मुखं कर्तृ व्यक्तं
सभामध्ये प्रकटम् आमन्त्रयते वदति[4] सम्बोधनादिना। सा तस्य [नल]-
सम्बन्धिमुखस्य तस्य[6] नलस्य वैरी यः पुष्पायुधः कामः तस्य मित्रं
चन्द्रः तेन सह यत् सख्यं[6] मैत्री साहश्यम्, मैत्री वदनस्य तस्य औ-
चिती योग्यता किम्। कथमियं वर्तते। कामस्य वैरी नलः कामस्य/च
[मित्र] मित्रं नलस्य ~~...~~ नलेन रहो ~~...~~ यन्मन्त्रितं किमपि तत्
प्रकटयतीत्युचितमेव। मित्रं भेदं कुरुते यत् तेन प्रच्छादयति ॥१०७॥

स्थितस्य रात्रावधिशय्य शय्यां मोहे मनस्तस्य निमज्जयन्ती।
आलिङ्ग्य या चुम्बति लोचने सा निद्राऽधुना न त्वदृतेऽङ्गना वा॥
॥१०८॥

स्थितस्य[1] रात्राविति। अधुना तस्य त्वदृते[2] त्वां विना
सा निद्रा वाऽङ्गना कामिनी वा सा काचिन्नास्ति। या रात्रौ शय्यां
शयनीयमधिशय्य आश्रित्य स्थितस्य नलस्य मनो मोहेऽज्ञाने
निमज्जयन्ती सती लोचने नयनद्वयमालिङ्ग्य चुम्बति। दयिताप्य।—

1 B हृत्तस्य यदिति। P. हन्त। 2 P. om. यां 3 P. om. तत् 4 P. सम्बो-
धनादिना वदति; P2 om. सम्बोधनादिना। 5 P. नलस्य 6 P. नलस्य
तस्य 7 B मैत्री सख्यं; P. om. मैत्री 8 P. vadet. नाम सङ्कल्पदशायाः
कार्यभूता अवान्तरदशा उक्ता। अस्याः सङ्कल्पेऽन्तर्भावः। अनुप्रासः
उपमा उत्प्रेक्षा च ॥१०७॥
2 P. स्थितस्य। 2 P2 त्वात् ऋते

लिङ्गनपुरःसरं लोचने चुम्बति। शय्यामिति कर्मभूताधारः।[4] निद्राच्छेदो नाम[6] [विषयनिवृत्तिश्च] स्मरदशा[7] ॥१०८॥

---

स्मरेण निस्तक्ष्य वृथैव बाणैर्लावण्यशेषां कृशतामनायि।
अनङ्गतामप्ययमाप्यमानः स्पर्धां न सार्धं विजहाति तेन ॥१०९॥

---

स्मरेण[1] निस्तक्ष्येति। अयं स्मरेण बाणैः निस्तक्ष्य तनूकृत्य तथा[3] लाव(52b)ण्यमेव शेषं[4] यस्याः तां तथाविधां कृशतामनायि प्रापितः। यथा अयमनङ्गताम[5] [आप्यमानोऽपि] प्राप्यमानोऽपि[6] तेन [सार्धं] स्पर्धां न जहाति। प्रथमं सौन्दर्यस्पर्धाऽभूत्[7]। पश्चादनङ्गत्वेऽपि तथैव स्पर्धते।[8] एतेन निद्रामलभमानस्य शरीरकार्श्यं तनुता नाम दशा[9] ॥१०९॥

---

3 B ०भूतत्वाधारत्वात् 4 P। add. सङ्कल्पयतो 5 B P2 ०च्छेदे 6 P। add. तथा विषयेभ्यो व्यावृत्तिः। सर्वथा त्वद्गतचित्तत्वादन्यान् विषयान् त्वत्कलत्रप्रस्थान् नोपैतीति एवंरूपा 7 P। add. अनुप्रासः श्लेषो विकल्पश्च। तदुक्तम् - तुल्यविरोधे विकल्पः। यथा भक्तिः(?) विलोकनप्रणयिनीत्यादि॥; P2 reads sup. mg. add. अत्र विकल्पोऽलङ्कारः। यदुक्तम् - तुल्यबलविरोधे विकल्पः॥१०८॥

---

1 P। स्मरेण। 2 P। add. एव तेन एवंप्रकारेण तथैव 3 P। add. तथैव इति क्वचित्पाठः। 4 P2 विशेषं 5 P2 इयम् 6 B P। P2 om. आप्यमानोऽपि; edd. add. आप्यमानोऽपि 7 P। सौन्दर्ये 8 P2 एतेन तनुता नाम दशा 9 P। add. अत्र पूर्ववाक्ये तथेति वचनात् उत्तरवाक्ये पूर्वाचार्यप्रयोगदर्शनात् यथेत्याक्षिप्यते। अथवा प्रक्रान्तप्रसिद्धानुभवैकगोचरानन्तमप्रकारेण बाणैर्निस्तक्ष्य कृशतामनायि तल्लब्ध अनङ्गतामपि आप्यमानोऽयं स्पर्धां न जहाति इति तच्छब्दनैरपेक्ष्येणैव व्याख्या। अतिशयोक्तिः॥१०९॥

सर्ग ३ 60

त्वत्प्रापकात् त्रस्यति नैनसोऽपि त्वय्येष दास्येऽपि न लज्जते यत्।
स्मरेण बाणैरतितक्ष्य तीक्ष्णैर्लूनः स्वभावोऽपि कियान् किमस्य॥११०॥

त्वत्प्रापकादिति। एष तव प्रापकात् एनसः पापात् अपि न त्रस्यते। पातकमपि कृत्वा त्वामर्थयते। यच्च त्वयि विषये दास्ये[ऽपि] दासत्वेऽपि न लज्जते च। ततः किमस्य कियान् स्वभावोऽपि स्मरेण तीक्ष्णैर्बाणैः अतितक्ष्य लूनः छिन्नः॥११०॥

स्मारं ज्वरं घोरमपत्रपिष्णोः सिद्धागदङ्कारचये चिकित्सौ।
निदानमौनादविशद्विशाला साङ्क्रामिकी तस्य रुजेव लज्जा॥१११॥

स्मारं ज्वरमिति। तस्य नलस्य लज्जा सिद्धौषधप्रयो—

१ त्वत्प्रापका। २। प्रापा० ३। om. च ४। vdd. विषयेभ्यो निवर्तमानस्य त्रपानाशः उक्तः। येन गुरुभ्योऽपि न लज्जते। लज्जाया उपलक्षणार्थत्वात् न बिभेति च। अतो भयस्य नाशोऽपि त्रपानाशान्तर्भूतः। अत्र यत्तच्छब्दानुपादानेऽपि सामर्थ्याद् द्वयमपि गम्यते। यथा—ये नाम केचिदिह न प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान् प्रति नैष यत्नः।
स्य/ उत्पत्स्यते तु मम कोऽपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥ (मा० मा० १.५) इत्यत्र य उत्पत्स्यते तं प्रति गम्यते। लज्जते यदिति
ण/ पाठे अलङ्कारिकाणामनभिमतोऽपि शास्त्रेषु तथा प्रयोगदर्शनाददोषः। शास्त्राभिमानिनः खण्डनकारस्य कवेः कवित्वेऽपि शास्त्रीत्यनुसरणं भूषणं न तु दूषणम्। अर्थान्तरन्यासेनोत्तरवाक्यगतत्वं यच्छब्दस्येत्यन्ये। अनुमानमुत्प्रेक्षा विरोधाभासोऽपि॥ ५ vdd. त्रपानाशः उक्तः॥११०॥
१। स्मार। २ [अ]पत्रपिष्णोः गतलज्जस्य। अन्ये तु अपत्रपाशब्दं लज्जावाचकं पश्यन्तः प्रकृतानुपयुक्तमाहुः। तन्मते लज्जापरस्य ———

तरि अथ [3]सिद्धानां देवानाम् अगदङ्कारस्य चये वैद्यानां समूहे ऽविशत् प्रविष्टा इव । किंभूतौ । तस्य स्मरसम्बन्धिनं ज्वरं चिकित्सौ प्रति कर्तुमिच्छौ । किंभूतम् । घोरम् । तस्य किंभूतस्य । अपत्रपिष्णोः लज्जा- [4]परस्य । कस्मात् । [5]निदानविषये मौनात् तूष्णीम्भावात् । [6]निदानं पृष्टाः [सन्तः] वैद्या लज्जया [7]कामज्वरोऽयमिति कारणं कथयितुमशक्ता [8]मौनमेव कुर्वन्ति [9] । राजाऽपि [10]लज्जावशान्मौनमेव कुरुते [11] । किंभूता लज्जा । [12]विशाला साङ्क्रामिकी रुजा इव रोग इव । यथा कुष्ठादिपामादि- [13]रुजा सङ्क्रामति तथा लज्जाऽपि [14]कि नृपात् वैद्येषु सङ्क्रान्तेत्य- [15]र्थः । [16]अत्रापि त्रपानाशः [17] ॥१११॥

बिभेति रुष्टासि किलेत्यकस्मात् स त्वां किलापेति हसत्यकाण्डे ।
यान्तीमिव त्वामनु यात्यहेतोरुक्तस्त्वयेव प्रतिवक्ति मोघम् ॥११२॥

बिभेति[1] रुष्टेति । स राजा इति अकस्मात् निष्कारणं[2] बिभेति । [3]इतीति किम् । त्वं किल रुष्टासि । यथा त्वयि दमयन्त्यां रुष्टायां बिभेति । तथा स[4] त्वां (५ ३१) किलाप प्राप इति कृत्वा अकाण्डे अप्रस्तावे हसति । स त्वां यान्तीमिव क्वापि[5] गच्छन्तीमिव अनु पश्चाद्याति । [6]पर-

३ ख add. पूर्व० ४ ख अपरस्य ५ ग निदानस्य वातपित्तादेरभावात् तस्य ६ ग add. अथ ७ ग लज्जयाना: ८ ग वक्तुम० ९ ग add. राजा तु ज्वरा- विष्ट एव इति अन्ये त्वाहुः । १० ग तु ११ B करोति १२ B विशाला लज्जा १३ ख om. पामादि० १४ ख अपि लज्जा १५ B सङ्क्रामते० १६ ग add. तदुक्तम्- कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च । उपसर्गिकरोगाश्च सङ्क्रामन्ति नरान्नरम् ॥ १७ ग add. वैद्येषु वैद्येषु लज्जाप्रवेशारोपादपह्नुतिः उपमा ॥१११॥
१ ग बिभेति । २ ग निष्कारणं ३ ग इति किम् । ४ ग स किल त्वाम् आप प्राप
५ ग om. क्वापि ६ ख परा०

सर्ग ३ 62

अहेतोः कारणं विनापि तथा स मोघं निष्कलम् आकाशे एव प्रति-
वक्ति उत्तरं दत्ते। उत्प्रेक्षते - त्वया उक्तं इथं। उन्मादो नाम दशा। यस्मात्
प्रनष्टलज्जस्य निर्भयस्य चोन्मादः प्रवर्तते [अकस्मात् अहेतोः अकाण्डे
मोघम् इति नवीकृतम्]॥११२॥

भवद्वियोगाच्छिदुरार्तिधारायमस्वसुर्मज्जति निःशरण्यः।
मूर्छामयद्वीपमहान्धपङ्के हा हा महीभृत्कुलकुञ्जरोऽयम्॥११३॥

भवद्वियोगेति। हा हा इति खेदे। अयं नलो महीभृत्-
कुले राजकुले कुञ्जरः प्रधानभूतो [महीभृत्कुलकुञ्जर इति पाणि
वृन्दारकनागकुञ्जरैः पूज्यमानम् (पा० II. 62) इति समासः] निःशरण्यः
सन् मूर्छामयं यद्द्वीपं जलमध्यगतस्थलं तत्र महदान्ध्यम् अन्धत्वं
[मूढत्वं] तदेव पङ्कस्तत्र मज्जति। कस्याः? नद्याः द्वीपे भवत्याः तव
वियोगेन या अच्छिदुरा अविच्छिन्ना अर्तिधारा बाधापरम्परा
सैव यमस्वसा यमुना तस्याः। यथा कुञ्जरो नदीद्वीपपङ्के अशरणो
मज्जति। ततः कष्टं द्रष्टुर्भवति। एतेनोन्मादानन्तरं भूता अस्पष्टसंज्ञता-
रूपा मूर्छा दशा॥११३॥

सव्यापसव्यत्यजनाद्द्विरुक्तैः पञ्चेषुबाणैः पृथगर्जितासु।
दशासु शेषा खलु तद्दशा या तया नभः पुष्पतु कोरकेण॥११४॥

7 B2 निःफलं 8 P1 प्रणष्टलज्जस्य निर्भयस्य च उन्मादो नाम दशा। 9 P2
om. यस्मात्.... प्रवर्तते 10 P2 अकाण्डम् अहेतोः 11 P1 add. उत्प्रेक्षा॥११२॥

1 P1 भव 2 P1 महीभृन्नलो 3 B राजा 4 P2 वृन्दारकनाम० 5 P1 P2
om. विसर्गः 6 B था 7 P2 पङ्कः शरणो 8 P2 सत 9 P2 एतेन मूर्च्छा नाम
दशा उक्ता। 10 P1 add. तस्य 11 P1 add. अर्तिधारायाः कालुष्यात् यमुना-
त्वेन रूपणम्। रूपकम्। कुञ्जरशब्दः श्लिष्टः॥११३॥

सर्ग ३ 63

[1]सव्यापसव्येति। या [दशासु] दशासु मध्ये शेषा अव-शिष्टा दशमी मरणरूपा तस्य दशा अवस्था वर्तते[4] तया दशया कोरकेण कुड्मलेन नभः आकाशं पुष्पतु विकसतु ।[आकाशकुसुमाना-मभावात् । लक्षणया अत्यन्ताभावो भवतु ।] सा दशा मा भवतु । खलु[5] इत्यहं मन्ये । किंभूतासु[6]? । पञ्चेषोः कामस्य बाणैः पृथक् अर्जितासु कृतासु । किंभूतैः? । सव्येनाऽपसव्येन च वामदक्षिण[पक्षा]भ्यां त्यजनात् द्विरुक्तैर्द्विभावं प्राप्तैः । पञ्च बाणाः यदा उभयथा क्षिप्यन्ते[7] तदा दश भवन्ति[8] ॥११४॥

त्वयि स्मराधेः सततास्मितेन प्रस्थापितो भूमिभृताऽस्मि तेन ।
आगत्य भूतः सफलो भवत्या भावप्रतीत्या गुणलोभवत्याः ॥११५॥

[1]त्वयि स्मराधेरिति । अहं तेन भूमिभृता[2] नलेन त्वयि विषये प्रस्थापितोऽस्मि । किंभूतेन ? । स्मरस्याऽऽधेः सकाशात् । (53b) सततमस्मितेन स्मितरहितेन । ततोऽहं भवत्यास्तव भावस्य अभिप्रायस्य प्रतीत्या अत्र[3] आगत्य सफलो भूतः सञ्जातः[4] । किंभूतायास्तव? । ~~गुणेषु~~ गुणेषु लोभवत्याः[5] ॥११५॥

धन्याऽसि वैदर्भि! गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि ।
इतः स्तुतिः का खलु चन्द्रिकाया[1] यदब्धिमप्युत्तरलीकरोति ॥११६॥

1 Pl सव्या । 2 Pl शेषः शेषा इत्यन्यः 3 Pl दशमा 4 Pl P2 om. वर्तते 5 B2 खलु ... मन्ये at the end. 6 Pl add. दशासु 7 P2 क्षिप्यन्ति 8 Pl add. आर्थं यथासङ्ख्यं रूपकमुत्प्रेक्षा आशीरपि ॥११४॥

1 Pl त्वयि । 2 Pl भूभृता 3 Pl अथागत्य 4 Pl संजातः 5 Pl add. काव्य-लिङ्गं यमकं च ॥ ११५॥

1 P2 two add. विसर्गः

धन्यासीति[2] । हे वैदर्भि[3] ! त्वं धन्याऽसि[4] यया गुणैः सौन्द-[5]
र्यादिभिरुदारैः उत्कृष्टैः[6] नैषधो [नलो]ऽपि समाकृष्यत । खलु यस्मादितोऽ-
न्योऽधिका का[7] चन्द्रिकायाः ज्योत्स्नायाः स्तुतिः यत् सा ज्योत्स्ना
अब्धिं[8] समुद्रमप्युत्तरलीकरोति[9] ॥११६॥

---

नलेन भायाः शशिना निशेव त्वया स भायान्निशया शशीव ।
पुनः पुनस्तद्युगयुग्विधाता योग्यामुपास्ते नु युवां युयुक्षुः ॥११७॥

---

नलेन भाया[1] इति । हे दमयन्ति ! त्वं नलेन[2] कृत्वा[3] भायाः
शोभेस्त्व[4] । यथा निशा शशिना भासते[5] तथा त्वया [स] नलो[6] भायात्
शोभताम् । यथा शशी चन्द्रः निशया रात्र्या भाति । नु इति वितर्के ।
विधाता ब्रह्मा युवां युयुक्षुः नलं च[7] त्वां च[8] योजयितुमिच्छुः सन्
योग्यामभ्यासमुपास्ते । किंभूतः ? पुनः पुनः तद्युगं चन्द्रनिशायुग्मं
युनक्ति । क्विप्प्रत्ययः । नित्यं [नित्यं] रात्रिं[9] चन्द्रं च योजयन्[10] विधिर्युवयो-
र्मेलन[11][यो]ग्याभ्यासं विधत्ते [किम्] ?[12] ॥११७॥

---

2 P. धन्यासी ; P2 धन्यासि वैदर्भीति । 3 P. om. त्वं 4 P. add. अत्र पूर्व-
वाक्यत्वात् चन्द्रिकोपादानं नापेक्ष्यम् 5 B सौन्दर्यादि 6 P. P2 प्रकृष्टैः 7 P.
का कीर्त्तिः ज्योत्स्नायाः 8 P. add. गम्भीरं 9 P. add. दृष्टान्तः । अन्यस्तु इतो
भवत्याः सकाशात् चन्द्रिकायाः का स्तुतिः । अपि तु न कापि । यत्नु अब्धिं
जलमध्ये स्वभावतरलम् उत्तरलीकरोति तथा तु तथा गम्भीरो नलः क्षोभ्यते
इति त्वमेव धन्येति व्याचक्षाणः प्रतीपालङ्कारमाह । तच्च व्याख्यानम् अपिशब्दा-
र्थव्यादिना प्रायः प्रतीतमेव प्रतीमः । सहृदया एवात्र प्रमाणम् ॥११६॥ 1 P. नलेन ।
2 P2 add. सह 3 P. add. तथा 4 P. शोभेथाः ; P2 शोभयेथा 5 P2 शोभते 6 P. P2 नलः
त्वया 7 P2 om. च 8 P. om. च 9 P. चन्द्ररात्रिं 10 P2 योजन् 11 P. add. योजनाय
12 P. add. आशीरुपमोत्प्रेक्षा ॥ ; P2 recto in mg. add. अत्रोत्प्रेक्षालङ्कारः । आशी-
र्वादप्रतिपादनादाशीरलङ्कारोऽपि ॥ ११७ ॥

स्तनद्वये तन्वि! परं तवैव पृथौ यदि प्राप्स्यति नैषधस्य।
अनन्यवैदग्ध्यविवर्धिनीनां पत्रावलीनां वलना समाप्तिम्॥११८॥

[1]स्तनद्वये इति। हे तन्वि! तवैव[2] पृथौ विशाले स्तनद्वये परं केवलं नैषधस्य पत्रावलीनां पत्रवल्लीनां वलना रचना समाप्तिं ~~आप्स्यति~~ यदि प्राप्स्यति यास्य[3]ति तदा तवैव[4] स्तनयुगे नाऽन्यस्याः। किंभूतानाम्? [5]नाऽन्यस्य वैदग्ध्यं विवर्धयन्ती[6]ति [किन्तु] नलस्यैव[7][8]॥११८॥

एकः सुधांशुर्न कथञ्चन स्यात् तृप्तिक्षमस्त्वन्नयनद्वयस्य।(5 49)
त्वल्लोचनासेचनकस्तदस्तु नलास्यशीतद्युतिसद्वितीयः॥११९॥

[एकः[1] सुधांशुरिति] एकः सुधांशुश्चन्द्रः कथञ्चन त्वदी[2]यस्य नयनद्वयस्य तृप्तिक्षमो न स्यात्। एकेन द्वयोस्तृप्तिर्न भवति। ततश्चन्द्रो[3] नलस्याऽऽस्यमेव[4] शीतद्युतिः तेन सह द्वितीयः सन् तव लोचनयोरासेचनकोऽस्तु अतृप्तिकरोऽस्तु। यदि नलमुखेन [5]सहितोऽभूत्। तथापि तव विलोकयन्त्याः तृप्तिर्न भविष्यति। तदा-सेचनकं प्राहुस्तृप्तिर्यस्य न जायते (अमर III/53)। यस्य स्वाधिमानस्य वस्तुनः तृप्तिर्न जायते। किन्तु तृष्णा [6]वर्धते सोऽऽसेचनकः। [तत्र हि

1 B स्तनद्वयेऽपि; Pi स्तनद्व; P2 स्तनद्वयेति। 2 B P2 पृथौ विशाले at the end. 3 Pi P2 यास्यति bef. यदि 4 B स्तनद्वये.... तदा तवैव twice 5 Pi add अनल्प-
[illegible]/वैदग्ध्यं विवर्धयन्ती यासां तथा। अनन्येति पाठे। 6 Pi वर्धयन्तीति 7 P2 नलस्यैव किन्तु 8 Pi add अथवा न विद्यते अन्यत् वैदग्ध्यं यस्मात् तस्याऽनन्यस्य सर्वोत्कृष्टस्य वैदग्ध्यस्य विवर्धनीनाम्। समभलङ्कारः।; P2 ditto. sup. mg. add sec. m. सममत्राऽलङ्कारः। समं योग्यतया योगो यदि सम्भावितः क्वचिदिति लक्षणात्॥११८॥ 1 Pi एकः 2 Pi त्वदीयस्य 3 Pi चन्द्रस्य 4 Pi P2 आनन्दसेककर्ता 5 Pi सतो 6 B वर्धते; Pi add एव

सर्ग ३ 66

द्विधा व्याख्यानम्। सिच्यते आपाध्यते सुभोजनेनाऽपि इति व्युत्पत्त्या[7] तथा न सिच्यते। आपाध्यते दृगनेन च व्युत्पत्त्या आसेचनको भेऽत्र-चिते भेऽर्थे च। कर्तरि सम्बन्धे[8] षष्ठीविधानात्। अतो हलायुधेन कर्तृ-प्रकरणपाठे[9] अपठितेऽपि आवृत्तिव्याख्यया स्वीकृतम्। आसेचनकशब्द-स्य आस्वादकर्मविषयत्वमेवाऽत्र व्याख्येयम्। तथा चाऽमरदत्तः - तमासेचनकं तृप्तेर्नास्त्यन्तो[10] यस्य दर्शनात् ( ) इत्याह। त्व-ल्लोचनासेचनकम् इत्यनुध चन्द्रं नलास्यशीतधुतिसद्वितीयाऽस्तु इति विधेयमिति व्याख्या॥११९॥

---

अहो तपःकल्पतरुर्नलीयस्त्वत्पाणिजाग्रस्फुरदङ्कुरश्रीः।
त्वद्भ्रूयुगं यस्य खलु द्विपत्री तवाधरो रज्यति यत्कलम्बः॥१२०॥

---

अहो तप[1] इति। अहो इत्याश्चर्ये नलीयो नलसम्बन्धी तपः[2] एव कल्पतरुः। किंभूतः? त्वदीया[3] ये पाणिजा नखास्तेषामग्राणि तान्येव स्फुरन्तोऽङ्कुरास्तैः श्रीः शोभा यस्य स तथा। यस्य[4] वृक्षस्य खलु त्वदीयं भ्रूयुगमेव द्विपत्री द्वयोः पत्रयोः समाहारः। यस्य तरोः तवाऽधर[5] ओष्ठ एव कलम्बो द्वितीयकाण्डप्ररोहो रज्यति॥१२०॥

---

यस्ते नवः पल्लवितः कराभ्यां स्मितेन यः कोरकितस्तवाऽऽस्ते।
अङ्गम्रदिम्ना तव पुष्पितो यः स्तनश्रिया यः फलितस्तवैव॥१२१॥

---

7 I2 om. सिच्यते...... व्युत्पत्त्या 8 I2 वर्त्त. च 9 I1 ०प्रकरणे कृतेऽपि
10 I2 तदसेच० ॥ I1 वर्त्त. तपकम्॥११९॥

1 I1 अहो तप। 2 I1 य एव 3 I2 त्वदीयो पाणि० 4 B तस्य 5 I1 तथा०

सर्ग ३ 67

यस्ते[1] नव इति। यो वृक्षो[2] न यस्त्वं [त] कराभ्यां पल्लवितः। यस्य तव स्मितेन कोरकितः आस्ते। यस्य तवाऽङ्गम्रदिम्ना[3] सौकुमार्येण पुष्पितः। यस्य तव स्रजस्त्रिया फलितः। एवंविधस्त्वं[4] तरुणो[5] नलः तपःकल्पपादपो रूपकेन निरूपितः[6] ॥१२१॥

कोसीकृताऽऽसीत्खलु मण्डलीन्दोः संसक्तरश्मिप्रकरा स्मरेण।
तुला च नाराचलता निजैव मिथोऽनुरागस्य समीकृतौ वाम् ॥१२२॥

कोसीकृतेति[1]। खलु इत्यहं मन्ये। इन्दोर्मण्डली स्मरेण कोसीकृता आसीत् पात्ररूपा कृता[2]। किंभूता? संसक्तो रश्मीनां प्रक[3]रः[4]
(ऽप्रकारो) यत्र सा[4] तथा। तथा निजैव कामस्यैव नाराचलता तुला[5]
आसीत्। किमर्थम्? वां[6] युवयोर्मिथः अनुरागस्य समीकृतौ साम्य-
लोकननिमित्तम्[7]। स्वर्णादिवस्तुतोलनार्थं लोहमय्यां तुलायाम् एक-
स्मिन् पक्षे कांस्यपात्री सूत्ररश्मिभिः प्रोता भवति[9] ॥१२२॥

सत्त्वस्रुत[1]स्वेदमधूत्थसान्द्रे तत्पाणिपद्मे मदनोत्सवेषु।
लग्नोत्थितास्त्वत्कुचपत्रलेखास्तन्निर्गतास्त्वं प्रविशन्तु भूयः ॥१२३॥

सत्त्वस्रुतेति[2]। तस्य नलस्य पाणिपद्मे तव कुचसम्ब-

1 Pi यस्तो न। 2 P2 वृक्ष 3 P1, P2 अङ्गानां 4 P1 ०स्थूल० 5 P2 om. विसर्गः
6 P1 add. अमस्तावस्तुविषयं रूपकम्।॥१२१॥
1 B ०कृता इति।; P1 कोसी। 2 P1 add. कारसी इति अपभ्रंशः। 3 P2 प्रकारो
4 B ०स तथा 5 P1 तुलादण्ड 6 P1 वायुं वयोः अनु० 7 P2 मिथः lacuna
8 P2 om. विसर्गः 9 P1 add. रूपकम्। रश्मिपदं श्लिष्टम् ॥१२२॥
1 P2 twice ०स्रुत० 2 B ०स्रुत इति।; P1 सत्व।; P2 ०स्रुतेति।

सर्ग ३ 68

न्विधन्यः पत्रलेखाः मदनोत्सवेषु लेखाः हस्तसंसक्ता[3] अत[4] उत्थिताः प्रतिबिम्बिताः सत्यः भूयस्तं हस्तं प्रविशन्तु। किंभूते? सत्वात् सात्त्विकात् भावात् स्रुतं[5] गलितं स्वेद एव मधूत्थं मकरन्दः तेन सान्द्रे क्लिन्ने। मधूत्थं मौर्णं[6] वा। किं विशिष्टाः[7]? तत्स्मात्[8] [10]तस्मात् सकाशात् निर्गताः। तत्पाणिना कुचेषु[9] कृताः पत्रवल्लिकाः स्पर्शकाले स्वेदार्द्रे[11] त्वत्करे एव लगिष्यन्तीत्यर्थः।[12] [यन्निर्गता इति पाठे यस्मात् करात् निर्गतास्तं[13] करं प्रविशन्तु] यस्मादुत्पद्यते घटः तत्र मृत्तिका[14] पामुपादानकारणे लीयते[15] विनाशकाले[16] ॥१२३॥

बन्धाढ्यनानारतमल्लयुद्धप्रमोदितैः केलिवने मरुद्भिः।
प्रसूनवृष्टिं पुनरुक्तमुक्तां प्रतीच्छतं भैमि! युवां युवानौ ॥१२४॥

बन्धाढ्येति[1]। हे भैमि! युवां युवानौ मरुद्भिर्वायुभिः केलिवने क्रीडाकानने[2] पुनरुक्तम् वारंवारं[3] मुक्तां पुष्पवृष्टिं प्रसूनवृष्टिं पुष्पवृष्टिं प्रतीच्छतं पतन्तीं गृहीतम्। किंभूतैः? बन्धैः सुरतशास्त्रोक्तवात्स्यायनादिप्रणीतैः[6] करणविशेषैराढ्यं[7] कामशास्त्रोदिताः पङ्कजासन-

3 B अस्त०; 2 ०संयुक्ताः 4 B अभ्यु० 5 1, विशन्तु 6 1, मधूच्छिष्टं 7 2 किं विशिष्टः? 8 2 त्वत्० 9 1, कुचयोः 10 1, पत्रवल्लिकाः 11 1, स्वेदार्द्रे त्वत्करे 12 1, गलिष्यन्ती० 13 1 om. तं 14 2 मृत्तिकोपा० 15 1, विनाशकाले लीयते 16 1, add. आशीरूपकं च ॥ 2 add. एतेन नलपाणिपद्मेन सह तव कुचस्पर्शो भवत्विति आशीरलङ्कारः रूपकं च ॥ १२३॥
1 1, बन्धा 1 2 बन्धाढ्यनानारतेति । 2 2 क्रीडावने 3 2 वारं once 4 2 प्रतीच्छतां 5 1, 2 भरत० 6 1, वात्स्यायनमुनिप्रणीतैः पङ्कजासनवेणुदारितप्रभृतिभिः करणैः 7 2 add. नानाविध

सर्ग ३ 69

वेणुदारितादयो बन्धास्तैः प्रचुरं नानाविधं रतमेव मल्लयुद्धं तेन प्रमोदितैः तैः[4] वृक्षेभ्यः पातितास्[9] । अथ च युद्धप्रमोदिता मरुतो देवा द्वयोर्यो[10]धयोरुपरि पुष्पवृष्टिं मुञ्चन्ति[11] । पुंव(ऽऽ)तिस्त्र[12] यूना च पुमान्स्त्रिया (पा० I.ii.27) इत्येकशेषः[13] ॥१२४॥

अन्योन्यसङ्ग्रामवशादधुना विभातां तस्याऽपि तेऽपि मनसी विकसद्विलासे ।
स्रष्टुं पुनर्मनसिजस्य तनुं प्रवृत्तमादाविव द्व्यणुककृत्परमाणुयुग्मम् ॥१२५॥

अन्योन्यसङ्ग्रामेति[1] । अधुनाऽन्योन्यसङ्ग्रामवशात् तस्याऽपि नलस्य[2] ते तवापि उभयोरपि मनसी उभे अपि विभाताम् । किंभूते ? विकसन्तो विलासा ययोस्ते तथा । उत्प्रेक्षते – परमाण्वो[र्युग्मं][3] युगं द्वन्द्वमिव । किंभूतम् ? आदौ द्व्यणुककृत्[4] । पुनः किंभूतम् ? मनसिजस्य कामस्य तनुं[5] शरीरं पुनरपि स्रष्टुं प्रवृत्तम् । द्व्यणुकादिसृष्टिः[6] वैशेषिकाणाम् ईश्वरेच्छापूर्वकमदृष्टलक्षणप्राणिपूर्वकर्मवशात् निमित्तकारणात् परमाणुभ्यः पार्थिवाप्यतैजसवायवीयेभ्यः समवायि[7]कारणेभ्यः जगत्[8]उत्पत्तिः । अदृष्टवशात् परमाणुद्वयसंयोगः[9] । ततो द्व्यणुकं, ततो द्व्यणुकत्रयसंयोगात्[10] त्र्यणुकम् । तत्संयोगात्[च] स्थूलस्थूलतर~~स्थूलतम~~स्थूलतमत्वं क्रमेण । अणुपरिमाणं मनः । ततो द्वयोर्मनसोः परमाण्वोः संयोगात् कामोत्पादकं [द्व्यणुकम्] । ततो क्रमेण मनसिजदेहोत्पत्तिः ॥१२५॥

4 P om. तैः 9 P पतितास् 10 B° मूर्ध्नो° 11 B P मुञ्चन्ति 12 P om. युवतिः, शेषः 13 P add. अनुप्रासो रूपकं प्रतीयमानोत्प्रेक्षा श्लेषः ॥१२४॥ 1 P अन्यो 2 P om. ते ... कामस्य; but scribe in l. mg. add. अपि तेऽपि तवाऽपि मनसी व्यविभातास् । कीदृशी ? विकसन्त उल्लसन्तः विभ्रमा विलासा ययोस्ते । अथोत्प्रेक्षते मनसिजस्य कामस्य 3 P om. युग्मं 4 P द्व्यणुकृत् 5 P तनुः 6 P द्व्यणुकादिः 7 P समवाय° 8 P जगदु° 9 P °संयोगात् 10 P add. तत् 11 P add. वसन्ततिलका वृत्तम् । मनसिजस्येति साभिप्रायम् । आशीः समुत्प्रेक्षा च ॥१२५॥ —

कामः कौसुमचापदुर्जयममुं जेतुं नृपं त्वां धनु-
र्वल्लीमव्रणवंशजामधिगुणामासाद्य माद्यत्यसौ।
ग्रीवालङ्कृतिपट्टसूत्रलतया पृष्ठे कियल्लम्बया
ष्णु/ भ्राजिष्णु कपरेखयेव निवसत्[1]सिन्दूरसौन्दर्यया ॥१२६॥

काम[2] इति। हे भैमि! [असौ] कामस्त्वां धनुर्वल्लीमासाद्य माद्यति[3]। किं कर्तुम्? अमुं नृपं नलं जेतुम्। किंभूतम्? कौसुमेन चापेन दुर्जयम्। किंभूताम्? अव्रणे निर्दोषे[4] वंशे अन्वये[5] जाताम्। तथा अधिका गुणाः सौन्दर्यादयो यस्याः तां तथा। धनुरपि व्रणरहितवंशाद्भवति। ज्याभिधिरूढं च। पुनः किंभूताम्? ग्रीवायामलङ्कृतौ[6] आभरणे विलग्ना या पट्टसूत्रलता दोरकलक्षणा तया भ्राजिष्णुं शोभमानाम्। किंभूतया[7]? पृष्ठभागे कियत् स्तोकं लम्बया[8] बन्धनावशेषदोर(ऽऽऽ)को हि पृष्ठदेशे[9] लम्बमानो भवति। उत्प्रेक्षते – कपस्य रेखयेव। किंभूतया?[10] निवसता सिन्दूरेण सौन्दर्यं यस्याः।[11] धनुषो वंशस्य परीक्षा यदा क्रियते तदा सिन्दूररेखा[12] वंशे क्रियते। पट्टसूत्रदोरकः[13] सिन्दूरसदृशो[14] भवति[15]॥१२६॥

त्वत्कुच्छावलिमौक्तिकानि गुलिकास्तं राजहंसं विभो–
र्वेध्यं विद्धि मनोभुवः स्वमपि तां मञ्जुं धनुर्मञ्जरीम्।

1 R᷊ text विल्लस° 2 P. कामः; R कामः कौसुमचापेति। 3 R add. हृष्यति 4 B. निर्दोषे 5 R अन्वयाज्जाता। 6 R ग्रीवाया 7 P. add. तया 8 P. add. लम्ब-मानया 9 P. ०देशे)व० 10 P. निवसत् विलसत् सिन्दूरवत् सौन्दर्यं; R निवसत् सिन्दूरवत् सौन्दर्यं 11 P. add. अथ च सिन्दूरस्य सौन्दर्यं यस्याम् 12 P. विधीयते 13 P. add. च; R दोरका 14 P. सिन्दूररेखासदृशो 15 P. add. शार्दूलविक्रीडितं वृत्तम्। अनुप्रासो रूपकमुत्प्रेक्षा श्लेषश्च उपमा वा॥; R lecto. sup. mg. add. अत्र वक्ष्यमाणश्लोके च शार्दूलविक्रीडितं वृत्तम् ॥१२६॥

यन्नित्याङ्कनिवासलालिततमज्याभुज्यमानं लस-
न्नाभीमध्यबिला विलासमखिलं रोमालिरालम्बते ॥१२७॥

त्वद्गुच्छावलीति[1]। हे भैमि! त्वदीया या गुच्छावलिः[2] हारलता तस्या मौक्तिकानि त्वं गुलिका विद्धि जानीहि। तथा तं ।द्वि राजहंसं नलं मनोभुवो [वेध्यं] लक्ष्यं विद्धि। त्वं स्वमप्यात्मानं धनुर्मञ्जरीं[3] विद्धि। किंभूताम्? मञ्जुं मनोरमाम्। यस्या धनुर्मञ्जर्या नित्यमङ्के उत्सङ्गे निवासेन लालिततमा[4] स्फुरन्ती या ज्या मौर्वी तया भुज्यमानं[5] क्रियमाणं विलासमखिलं समग्रमपि [रोमाली][6] रोमावलिरालम्बते। किंभूता? लसन्ती नाभी एव मध्ये बिलं[7] यस्याः सा तथा। गोलकधनुर्वल्ल्यां मौर्वीमध्ये पृथुलं गर्ताकारं बिलं भवति। तत्र गोलिकां मुक्त्वा हंसादयः पक्षिणो लक्ष्यन्ते[8]। त्वमेव धनुर्वल्ली तत्र रोमाली[9] मौर्वी तत्र नाभीलक्षणं बिलम्[10] ॥१२७॥

पुष्पेषुश्चिकुरेषु ते शरचयं त्वद्भालमूले धनू
भ्रू चक्षुषि तज्जितस्तनुमनुप्राप्यं च यश्चिक्षिपे।
निर्विघ्नाश्रयदाश्रमं स वितनुस्त्वां तज्जयायाधुना
पत्रालिस्त्वदुरोजशैलनिलया तत्पर्णशालायते[1] ॥१२८॥

पुष्पेषुरिति[2]। हे भैमि! पुष्पेषुः ते तव चिकुरेषु केशेषु[3]

1 P. त्वद्गु। 2 P. add. पञ्चविंशतियष्टिका 3 P. add. धनुर्वल्लरीं 4 P. R. लासित° 5 P. add. भज्यमानं 6 R. om. रोमाली 7 R. om. बिलं 8 P. add. विध्यन्त इत्यर्थः 9 P. रोमावलिरेव R. रोमवल्ली 10 P. add. राजहंस इव। पक्षे, आताम्रचरणा नलो हंसः। अनुप्रासो रूपकं च ॥१२७॥
1 R. for तत्पत्रपत्रा° 2 P. पुष्पे। R. पुष्पेषुश्चिकुरेष्विति। 3 R. om. केशेषु

शराणां चयं [4] चिक्षिपे निक्षिप्तवान्। केशेषु पुष्पाणि भवन्ति [5]। तव भालमूले [6] ललाटमूले [7] स्वं धनुः कामो निक्षिप्तवान् [8]। ललाटस्य मूलं धनुराकारं भवति। तथा कन्दर्पो रुद्रस्य तृतीये चक्षुषि अनुभ्राष्ट्रं [10] भ्राष्ट्रस्याऽनुरूपं यथा भवति एवं स्वां तनुं शरीरं चिक्षिपे [11] जुहाव। यतस्तेन नलेन जितः [11] स ततोऽनन्तरं निर्विद्य निर्वेदं कृत्वा त्वामाश्र (५६a) मम् आश्रयत् [13]। यतो वितनुः शरीररहितः। किमर्थम्? तस्य नलस्य जयाय। अधुना [14] अन्योऽपि विरक्तः तपोर्थमाश्रमं भजते। अत एव तव उरोजद्वयमेव शैलः तन्निलयः। पत्राली पत्रवल्ली तस्य [16] कामस्य पर्णशाला इवाचरति, सोऽपि पर्वते पत्रकुटीं [15] कृत्वा तपस्यति॥ ॥१२८॥

इत्यालपत्यथ पतत्त्रिणि तत्र भैमी
सख्यश्चिराद्यदनुसन्धिपराः परीयुः।
शर्मास्तु ते विसृज मामिति सोऽप्युदीर्य
वेगाज्जगाम निषधाधिपराजधानीम् ॥१२९॥

4 Pi add. चिक्षिपे निरस्तवान्। अथवा अनुपसर्गस्याऽपि धातोर्निक्षेपार्थवाचकत्वम्; B२ निचिक्षिपे 5 Pi add. पुष्पेषुरिति साभिप्रायम्। ~~[illegible]~~ 6 B२ °स्थले 7 B२ त्वं 8 Pi add. ललाटमूले भ्रूद्वयम्। अथवा 9 Pi भालस्यैव 10 Pi अनुभ्राष्ट्रं भ्राष्ट्रस्या° 11 Pi add. निर्जितः 12 B२ om. त्वाम् 13 B आश्रयेत् 14 Pi om. अधुना 15 Pi पर्ण° 16 Pi add. शरचयेन कुसुमसमूहस्य धनुषा च भ्रूयुगस्याऽत्र निगीर्णस्याऽध्यवसानादतिशयोक्तिः। समासोक्तिः। रूपकमुपमाऽनुप्रासोऽपि। पातालमिव ते नाभिः स्तनौ क्षितिधरोपमौ (का.प्र. ) इत्युपमायाम् उपमानस्य प्रमाणगताधिकतानुचितार्थत्वं दोष इति मम्मटेनोक्तम्। तेनैव न्यायेन स्तनयोः शैलत्वारोपणं यद्यपि दोष एव तथापि पर्णशालायत इत्युपमायामेतद्रूपकमङ्गम्। तदभावे उपमाया अनुदय एव स्यात्। अत उपमानुरोधादधिके प्रमाणरूपणं न दोषमावहति। प्रत्युत अतिशयप्रतिपादनाद् औचित्यमेवाऽनिर्विण्णेषु पुरुषव्यापारे वर्णनीया। अत्र न दोषः इति सर्वमनवद्यम् ॥१२८॥

सर्ग ३.   73

इत्यालपतीति। अथ पतत्रिणि पक्षिणि हंसे इत्यालपति सति सख्यः सर्वाः चिरात् तत्र भैमीं तां परीयुः परितो व्यापुः। किंभूताः?। तस्याः दमयन्त्याः अनुसन्धानं वनमध्येऽवलोकनं तत्पराः सत्यः। सोऽपि हंस इत्युदीर्य कोऽन्निषधाधिपस्य राजधानीं जगाम। इतीति किम्?। ते तव शर्म सुखमस्तु। हे भैमि! मां विसृज त्वं प्रस्थापय॥ ॥११९॥

चेतोजन्मशरप्रसूनमधुभिर्व्यामिश्रतामाश्रय-
त्प्रेयोदूतपतङ्गपुङ्गवगवीहैयङ्गवीनं रसात्।
स्वादं स्वादमसीममृष्टसुरभि प्राप्ताऽपि तृप्तिं न सा
तापं प्राप निताम्तमन्तरतुलामानर्च्छ मूर्च्छामपि ॥१२०॥

चेतोजन्मेति। सा दमयन्ती नितान्तं तापं प्राप। अन्तर्मध्ये अतुलां मूर्च्छामपि आनर्च्छ प्राप। किंभूता?। प्रेयसो भर्तुः दूतस्य पतङ्गपुङ्गवस्य (हंसस्य) या गौर्वाणी पतङ्गपुङ्गवगवी सैव हैयङ्गवीनं दुग्धदधिसारं तत् रसात् अनुरागात् स्वादं स्वादम् आस्वाद्याऽऽस्वाद्य स्वदित्वा तृप्तिं न प्राप्ताऽपि सती अतृप्ताऽपि। किंभूतम्?। असीम निरतिशयं मृष्टं मधुरं सुरभि च प्रसिद्धम्। किं कुर्वत्?। चेतोजन्मनः कामस्य शरा एव प्रसूनानि तेषां मधुभिर्मकरन्दैः व्यामिश्रितामाश्रयत्।

1 P. इत्या।; P2 इत्यालपत्यथेति। 2 P. add. तत्र 3 B2 om. पक्षिणि 4 P. add. विपिने 5 P. P2 तां भैमीं 6 P. पुरोयुः 7 P. add. गवेषणे 8 B इति दीर्घं 9 P. इति किम्?। 10 P. om. ते 11 P. त्वं here 12 P. add. वसन्ततिलका वृत्तम्। अनुप्रासः। समासप्रौढिरोजो गुणः ॥११९॥ 1 B चेतोजन्म इति।; P. चेतो।; P2 चेतोजन्मशरेति। 2 P. अन्तर्मध्ये here 3 B P2 प्राप आनर्च्छ M P2 पुङ्गवी 5 P. add. तस्य हैयङ्गवीनमिति उपमा तेनाऽन्तर्निर्गीर्णसारभूतमध्यवसितम्। अथवा उपमेयं पतङ्गपुङ्गवगवी 6 B °वादि° 7 B तत्र 8 B निरतिमृष्टं ——

यथा नलवार्तां शृणोति तथा कामशरैः पीड्यते। अन्योऽपि यो मधुना मिश्रं हैयङ्गवीनं भक्षयति स उभयसंयोगो[10] उपविषतुल्यत्वात्[11] मूर्च्छां तापं च प्राप्नोति, तृप्तेरभावेऽपि। गवीत्यत्र गोरवाङ्छिताभिधेये (का० II-6-41-2) इति अ(56 b) दन्तता।[13] हैयङ्गवीनं संज्ञायामिति (पा० V.ii.23) इति निपातः[14] ॥१३०॥

तस्या दृशाऽधिपतिबन्धुमनु[1] व्रजन्त्यास्तं बाष्पवारि नचिरादवधिर्बभूव।
पार्श्वेऽपि विप्रचकृषे यदनेन दृष्टे-
रारादपि व्यवदधे न तु चित्तवृत्तेः ॥१३१॥

तस्या[2] दृशेति। तस्या भैम्या दृशा दृष्ट्या अधिपतेर्भर्तुः बन्धुं हंसं[3] तमनुव्रजन्त्याः सत्याः यदनेन[4] हंसेन दृष्टेः पार्श्वेऽपि स्थिते न[5] दृष्टे विप्रचकृषे[6] विप्रकृष्टेन विप्रकृष्टेन न जातम्[7]। बाष्पव्याकुलि-[8]ता दृष्टिर्न पश्यति। तथा आरादपि चित्तवृत्तेर्दूरेऽपि सता नचिरादेव बाष्पवारि नयनजलमवधीर्बभूव[9]। नदीतीरे किल बन्धुं विसर्जयेत्।[10] उक्तं च — नदीतीरे गवां गोष्ठे क्षीरवृक्षे जलाशये। आरामेषु च कूपादौ विप्रं बन्धुं विसर्जयेत् ॥( ? )॥ तथा च — यमिच्छेत् पुनरायातं न तं दूरे विसर्जयेत्।( ? )। अनेन[11] हंसेन तु पुनर्न व्यवदधे न व्यवहितेन जातम्, तत्रस्थत्वात्[12] ॥१३१॥

9 I. add. चेतोजन्मेति साभिप्रायम्। 10 B. संयोगः। 11 I. °विषरूपत्वात्; I. add. भजेते विषरूपत्वं तुल्यांशौ मधुसर्पिषी ( ? ) इति। 12 I. तृप्तेरभावेऽपि hence 13 I. add. गोरतद्धितलुकि (पा० V.iv.92) इति पाणिनीयम्। ह्योगोदोहोद्भवं हैयङ्गवीनम् (अमर ) ॥ 14 I. add. शार्दूलविक्रीडितं वृत्तम्। अनुप्रासोऽतिशयोक्तिः। समासोक्तिर्विरोधाभासश्च। हैयङ्गवीनं स्वादं स्वादं प्राप्ताऽपि अभीष्टं तत्फलं तृप्तिं न परं प्राप। यावदप्रार्थितमप्यनर्थं विषमं तापं प्रापेति व्याख्यायां विषमश्च ॥१३०॥ 1 B₂ text वियति 2 B. तस्या दृशा इति।; I. तस्याः। B₂ तस्या दृशाधिपतिबन्धुमिति। 3 I. तं हंस° 4 B I. अनेन .... contd.

सर्ग ३ 75

अस्तित्वं कार्यसिद्धेः स्फुटमथ कथयन्पक्षयोः कम्पभेदै-
ना/ रस्थात्तु वृत्तमेतन्निषधनरपतौ सर्वमेकः प्रतस्थे।
कान्तारे निर्गतासि प्रियसखि! पदवी विस्मृता किं नु मुग्धे!
मा रोदीरेहि यामेत्युपहृतवचसो निन्युरेनां[1] वयस्याः॥१३२॥

---

अस्तित्वमिति[2]। द्वयोर्मध्यादेको[3] हंसो[4] निषधनरपतौ नलविषये[5] सर्वं वृत्तमाख्यातुं सन् सर्वं वृत्तान्तं कथयितुं प्रतस्थे। [6]तृन्[7]प्रत्यये निष्ठादित्वात्सर्वमिति कर्मषष्ठ्यभावः[8]। आचष्टे इत्येवंधर्मा। किं कुर्वन्? । पक्षयोः कम्पभेदैः कार्यसिद्धेरस्तित्वं[9] स्फुटं कथयन्। शकुनशास्त्रे हि पक्षिणां चेष्टया कार्याणां [सिद्धिर्]सिद्धिर्वा ज्ञायते। वयस्याः सख्यः[10] एनामन्यां द्वितीयां दमयन्तीं निन्युः। किंभूताः? । इति तां प्रति उपहृतवचसः[11] उक्तवाक्याः। इतीति किम्[12]? । हे प्रियसखि! त्वं कान्तारे वने एकाकिनी निर्गतासि। हे मुग्धे! किं [तु] तव पदवी मार्गो विस्मृता। त्वं मा रोदीः[13]। एह्यागच्छ। सर्वा अपि याम[14]॥१३२॥

---

contd ..... दूरेऽपि सता alt. दूरे विसर्जयेत्। 5 P. दृष्टि° 6 P. जाता 7 R बाष्प° ...पश्यति at the end. 8 P. बाष्पाकुलिता 9 P. add. च्विप्रत्ययः 10 P. R om. उक्तं च ॥ P. add. यत् 12 P. add. वसन्ततिलका वृत्तम्। अतिशयो-क्तिविरोधोऽपि ॥१३१॥

---

1 R text. एनां 2 P. अस्ति। ; R अस्तित्वं कार्यसिद्धेरिति। 3 P. add. एनामिति पाठान्तरम्। अन्यामिति एक इति; R add. एव पाठान्तरं मूल-पाठः। 4 R एक 5 P. R add. नल 6 P. आचष्टे इत्येवंकर्मा R... 7 B तृन् 8 R om. आचष्टे ...धर्मा 9 P. ०सिद्धिः 10 P. add. मूलपाठे अन्यां द्वितीयाम्। एनां पाठान्तरे दमयन्तीं; R एनां पाठान्तरं मूलपाठः अन्यां द्वितीयां दमयन्तीं ॥ P. add. उपहारीकृतवाक्याः उक्तवचनाः; R उक्तवत्याः 12 P. इति किम्? 13 R om. विसर्गः 14 P. add. स्रग्धरा वृत्तम्। उत्प्रेक्षा जातिश्च ॥१३२॥

सरसि नृपमपश्यद्यत्र तन्त्रीरभाजः
स्मरतरलमशोकानोकहस्योपमूलम्।
किसलयदलतल्पम्लायिनं प्राप तं स
ज्वलदसमशरेषुस्पर्द्धिपुष्पर्द्धिमौलेः॥१३३॥

सरसीति[1]। स हंसो यत्र यस्मिन् सरसि [तं] नृपं नल-
मपश्यत्। तन्त्री(574)रभाजः तस्य सरसः तटे उद्भूतस्य[2] अशोक-
तरोरुपमूलं[3] मूले समीपे तं नृपं[4] प्राप[5]। किंभूतं नृपम्? स्मरेण तरलं
व्याकुलम्। पुनः किंभूतम्? किसलयदलतल्पं मृदुपल्लवमयीं[6] शय्यां[7]
म्लापयति[8] मर्मरीकरोतीत्येवंशीलस्तम्[9]। किंभूतस्य? अशोकानोक-[10]
हस्य ज्वलतो दीप्तान् असमशरस्य (कामस्य) इषून् स्पर्द्धते इत्येवं-
शीला पुष्पर्द्धिमौलौ यस्य[11] तथा[12]॥१३३॥

परवति! दमयन्ति! त्वां न किञ्चिद्वदामि
द्रुतमुपनम किं मामाह सा शंस हंस!।
इति वदति नलेऽसौ तच्छशंसोपनम्रः /शं
प्रियमनु सुकृतां हि स्वस्पृहायां विलम्बः॥१३४॥

परपतीति[1]। असौ हंसः आकाशे एव नले इति वदति

1 P. सरसि।; R सरसि नृपमिति। 2 P. R उद्भूतस्य 3 R om. मूले 4 P. नलं 5 R om. नृपं 6 P. पल्लवपर्णमयीं 7 P. शय्या 8 P. add. या अपि म्लाना भवतीत्येवंशीलम्। म्लायिनमिति पाठे पल्लवमयी या शय्या; P. R add. तत्र स्थितम्; म्लापितमिति पाठे 9 P. मुर्मुरीकुरुते; 10 R om. मर्मरीकरोति 10 P. R नोकहस्य 11 P. add. तस्य 12 P. add. मालिनी वृत्तम्। अनुप्रासोपमे॥१३३॥ 1 P. परा; R om. परवतीति।

सर्ग 3

सति[2] उपनम्रः सन् [तत्] सर्वं शंसन्स । इतीति क्रिया । हे परपाति ! पर-
न्तपो ! दमयन्ति ! अहं त्वां किञ्चिदपि न वदामि । हे हंस ! [8] द्रुत-
मुपनम आगच्छ, शंस कथय । सा दमयन्ती मां प्रति किमाह ? ।
कृतोऽयमर्थः । [सुकृतां साधूनां प्रियमर्थमनु लघूकृत्य स्व-
स्पृहाया एव विलम्बः । यावदिच्छां न कुर्वन्ति, तावदेव विलम्बः] ॥
॥१३४॥

कथितमपि नरेन्द्रः शंसयामास हंसं
किमिति किमिति पृच्छन् भाषितं स प्रियायाः ।
अधिगतमथ सान्द्रानन्दमाध्वीकमत्तः
स्वयमपि शतकृत्वस्तत्तथान्वाचचक्षे ॥१३५॥

[कथितमपीति । नरेन्द्रो नलः प्रियायाः [यो] भैम्या भाषितं
वचनं[2] कथितमपि हंसेन पुनरपि हंसं शंसयामास आख्यापयामास ।
हंसमिति [शंसेः शब्द[3]कर्मकस्य] इगन्तत्वात् कर्मत्वम् । किं कुर्वन् ?
किमिति किमिति कृत्वा हंसं पृच्छन् । अथाऽनन्तरं सान्द्रस्याऽऽनन्द-
स्याऽर्थे माध्वीकमैरेयसदृशम् । अनेना[4]ऽऽनन्दाङ्कृता । अन्तर्मध्ये
अधिगतं विज्ञातार्थं सत् तत्[5] प्रियाभाषितं यथा हंसेनोक्तं तथैव
शतकृत्वः शतं वारान् स्वयमात्मनापि[6] [न्वाचचक्षे] [7] न्वकथयत् ॥
॥१३५॥

2 P2 add. तत्सर्वं सतो स 3 P2 आसन् 4 P2 om. शशंस 5 P1
इति क्रिया 6 P2 तपः लेऽतिगत हे दमयन्ति ! 7 P1 add. पितृ°
8 P1 add. त्वं 9 P1 add. मां प्रत्याह 10 P2 असुकृत्य 11 P1 add.
अर्थान्तरन्यासः ॥१३४॥

1 P1 कथि 2 P2 वचपाक: तासमपि (?) 3 P2 शब्दकर्मत्वात् 4 P2 om.
अनेनाऽऽनन्दाङ्कृता 5 P1 om. तत् 6 B1 P2 om. अन्वाचचक्षे; edr.
add. अन्वाचचक्षे 7 P1 add. अनुप्रासो जातिश्च ॥१३५॥

सर्ग ३ 78

[1] श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तार्तीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१३८॥

[2] श्रीहर्षमिति। तार्तीयीकतया [3] तृतीयत्वेन मितः परि-
सातः [4] ॥१३८॥

श्रीमानाल्लिगपण्डितः स्वसमयाविर्भूतसर्वाश्रम-
श्चाण्डूपण्डितसंज्ञितं प्रसुषुवे श्रीगौरिदेवी च यम्।
उत्काख्ये क्रतुपुङ्गवे शिखिमुखे नानाहविर्निर्हुतैः
सन्तर्प्य त्रिदशान् स एव विवृतिं सर्गे तृतीये व्यधात् ॥१॥

किमपि मुकुटरत्नं नागरश्रोत्रियाणां
प्रतिनिधिरिव तेजःसद्मनः पद्मयोनेः।
विधुरुपशमसिन्धोराल्लिगो नाम धीमा-
निह समजनि पत्नी गौरिदेवीति चास्य ॥२॥

क्लृप्तैर्यथा स्वसमयं पशुबन्धचातुर्मास्याग्निचयाग्रयणसोमसुखैर्मखैर्यः।
सम्प्रीणयन् दिविषदः सदसद्विवेकधीरः कृतार्थमकरच्छ्रुतिदृष्टमर्थं ॥३॥

1 P2 om. श्रीहर्षं ... यम् and add. तदर्थम् 2 P. श्रीहर्षमित्यादि । 3 P.
Di/ तार्तीयीक० M P. add. तीयादीकस्वार्थे वा वक्तव्यः। न विद्यायाः विद्या
चेद्वाच्या तदा तृतीया विद्येत्येव भवति। शार्दूलविक्रीडितम् । 3 P2 add.
सर्गोऽगमत् ।

सर्ग ३ 79

तदात्मजस्ताल्हणनामधेयो विशारदः शारदचन्द्रकीर्तिः।
महाकृतौ ज्योतिषि कर्मकाण्डे क्रमाच्चतुःसंस्थतया प्रयोक्ता ॥४॥
सम्राट्स्थपत्यग्निचिदग्रजन्मा –
ग्रागण्यचाण्डूजनुषोऽनुजन्मा।
त्रैविद्यवृद्धार्चितसर्वदेव –
सुधाग्रजन्मा महनीयजन्मा ॥५॥
श्रीवैद्यनाथाभिधस्वत देवी –
पदप्रसादोपचितप्रसादैः।
पदैरुदारैर्विवृतप्रक्लृप्तां
क्वचित् क्वचित् शोधयति स्म टीकाम् ॥६॥

इति [1]श्रीमच्चाण्डूपण्डितविरचितायां]
नैषधदीपिकायां [पतिपतङ्गदूतो नाम]
तृतीयः सर्गः [समाप्तः[2]] ॥३॥

1 $P_1$ महापण्डितश्रीचाण्डू° ; $P_2$ om. श्रीमं°... विरचितायां 2 $P_1$ om. समाप्तः and ~~add~~. recto mg. add. ७१५ ग्रन्थ ; $P_2$ add. ग्रन्थ ७४४॥ छ॥ श्रीः॥

P. M. S.

सर्ग ४ 1

# चतुर्थः सर्गः।

[1] [पूर्वसर्गे दमयन्त्या नलेऽनुरागं सप्रपञ्चमनु[2]वर्ण्य हंसमुखेन नलस्यापि दमयन्त्यामनुरागं निवर्ण्य [3] प्रथमानुरागाख्यं विप्रलम्भं विवर्णयिषुः कविश्चतुर्थं सर्गमारभते ॥]

अथ नलस्य गुणं गुणमात्मभूः सुरभि तस्य यशः कुसुमं धनुः।
श्रुतिपथोपगतं सुमनस्तया तमिषुमाशु विधाय जिगाय ताम् ॥१॥

[1] अथ नलस्येति। अथाऽनन्तरमात्मभूः कामः तां भैमीं जिगाय। किं कृत्वा? [2] नलस्य गुणं [3] [[4] गुणं] मौर्वीं विधाय। तथा तस्य नलस्य सुरभि प्रसिद्धं यश एव कुसुमं धनुर्विधाय। तथा तं नलमिषुं बाणं विधाय[5] (57b) किंभूतं तम्[6]? श्रुतिपथे कर्णमार्गे उपगतम्। कया इषुं विधाय? सुमनस्तया। नलो हि सुमना विद्वान्। स्मरस्यापि धनुर्गुणो, नलस्य [7] पद्मिनीनालस्य गुणः तस्य धनुरपि सुगन्धि[8] कुसुमं, तस्य इषुरपि आकर्णकृष्टः सुमनः पुष्पं च। एवं मौर्वी धनुर्बाण[9] लक्षणां साधनसामग्रीम् आसाद्याऽऽशु शीघ्रं [10] तां वशीचकारेत्यर्थः" ॥१॥

यदतनुज्वरभाक् तनुते स्म सा प्रियकथासरसीरसमज्जनम्।
सपदि तस्य चिरान्तरतापिनी परिणतिर्विषमा समपद्यत ॥२॥

1 P1 add. ॐ नमः सिद्धम्। 2 P1 ०मुप० 3 P1 add. तस्याः। — 1 P1 अथ। 2 P1 add. तस्य 3 P2 recto. int. mg. add. शीलादिकं 4 P1 om. गुणं 5 P1 add. कृत्वा 6 P1 om. तं 7 P2 ०नलस्य 8 B सुगन्धं पुष्पं; P2 सुगन्धि० 9 P1 P2 लक्षणं 10 P2 lecto. sup. mg. तामपि ॥ P1 add. द्रुतविलम्बितं वृत्तम्। रूपकं दीपकं श्लेषश्च ॥१॥

सर्ग ४ 2

यदतनुज्वरेति[1]। यत्सा[2] दमयन्ती प्रियस्य कथा एव सरसी तस्या एव रसे[3] शृङ्गारादौ विप्रलम्भे मज्जनम् आप्लवनं तनुते स्म। किं विशिष्टा सा?। अतनुज्वरं कामज्वरं भजते या सा तथा। सपदि तत्क्षणं तस्य मज्जनस्य विषमा[4] परिणतिः[5] [समपद्यत। विषमपरिणामो बभूव। किंभूता परिणतिः?।] चिरकालमान्तरं मनस्तापयतीत्येवंशीला[6]। किल ज्वरभाजां तापार्थी अप्सु [आ]प्लवनं कुर्वताम्। त्रिदोषलक्षणो विषमपरिणामो भवति। अस्या[7] अपि प्रियकथया विप्रलम्भो ववृधे[8] ॥२॥

ध्रुवमधीतवतीयमधीरतां[1] दयितदूतपतङ्गतवेगतः।
स्थितिविरोधकरीं द्व्यणुकोदरी तदुदितः स हि यो यदनन्तरः ॥३॥

[ध्रुवमधीतवतीति[2]] ध्रुवं निश्चितम् इयं द्व्यणुकोदरी परमाणुद्वयं द्व्यणुकं परमाणोर्निरवयवत्वेन प्रचयविशेषाभावात्[3] तदपि परमाणुपरिमाणमेव[4] द्व्यणुकमिवोदरं यस्याः सा तथा। दयितस्य दूतो योऽसौ पतन्[5] पक्षी हंसः तस्य वेगात् अधीरतां कातरत्वमधीतवती। किंविशिष्टामधीरताम्?। स्थितेरवस्थानस्य[6] [7] विरोधकरीम्। हि यस्मात् यो यस्मादनन्तरः[8] स तदुत्पन्नः। कारणान्तरक्षणो हि कार्यनिष्पत्तिः। हंसगमनानन्तरमेवाधीरतादर्शनादियमाशङ्का[9] ॥३॥

1 P1 यद। 2 P1 om. यत 3 P1 विप्रलम्भशृङ्गारादौ M1 add. विरुद्धा अक्षरच्युतकेन विषमेत्यर्थः। 5 P1 परिणितिः 6 P2 ०शीलः 7 P1 P2 तस्या 8 P1 add. रूपकं रूपकादेवाऽर्थान्तरसमासोक्तिः ॥२॥

1 B text here. 2 P1 ध्रुव। 3 P2 प्रचयमपि 4 P2 ०परिणाम० 5 B P2 पतत् 6 P1 स्थितेर्जीवितस्य ~~...~~ व्यवस्थाया वा पक्षे अवस्थानस्य 7 P2 lecto. int. mg. add. जीवितस्य नाशिकां 8 P1 ०दनन्तरं 9 P1 add. अनुप्रास उपमोत्प्रेक्षार्थान्तरन्यासः। स्थितिरिति [अ]वशिष्टम् ॥३॥

सर्ग ४ 3

अतितमां समपादि जडाशयं स्मितलवस्मरणेऽपि तदाननम् ।
अजनि पङ्गुरपाङ्गनिजाङ्गणभ्रमिकणेऽपि तदीक्षणखञ्जनः ॥४॥

[अतितमामिति] तस्या आननमतितमां स्मितस्य लवो लेशस्तस्य स्मरणेऽपि जडाशयं समपादि । हास्यविस्मरणशीलं सम्पन्नम् । तथा तस्या ईक्षणं लोचनं तदेव खञ्जनः पक्षी अपाङ्ग एव निजाङ्गणं तत्र भ्रमिकणे भ्रमणलेशः तत्राऽपि पङ्गुरजनि । कटाक्षं विस्मृतवान्, विप्रलम्भव्याकुलत्वात् । अथ च इतरान् खञ्जान् कुर्वन्नपि स्वयमङ्गाणेऽपि बं/ पङ्गुर्बभूव ॥४॥

किमु तदन्तरुभौ भिषजौ दिवः स्मरनलौ विशतः स्म विगाहितुम् ।
तदभिकेन चिकित्सितुमाशु तां मखभुजामधिपेन नियोजितौ ॥५॥

[किमु तदन्तरिति] तस्या अन्तर्हृदयम् उभौ स्मरश्च नलश्च एतावेव दिवः स्वर्गस्य ~~भिष~~ भिषजावश्विनीकुमारौ विगाहितुं विशतः स्म प्रविष्टौ । अतिसुन्दरत्वत्वादुत्प्रेक्षा । किंभूतौ ? । मखभुजामधिपेन इन्द्रेण नियोजितौ प्रहितौ । किं कर्तुम् ? । तां दीव्यमाशु चिकित्सितुम् । दे किंभूतेन ? । तां दमयन्तीं प्रति अभिकेन कामुकेन । [अनुकाभिकाभीकः कमिता (पा० V. ii. 74)] ॥५॥

1. अति । 2 B यस्या 3 P2 आनने 4 P2 लेशस्य 5 P1 add. अनुप्रासातिशयोक्तिर्निरङ्गरूपकं च ॥४॥

1. P1 किमु । 2 B अस्या । 3 P1 add. तदभिकेन तस्या अभिकेन 4 P1 add. देवी 5 B आभिकेन 6 P1 add. इत्यर्थः । 7 P2 अभीकाभिकः ; 8 P1 add. उत्प्रेक्षा काव्यलिङ्गं च ॥ ; P2 sup. lin. add. एतेनेन्द्रस्याऽपि अभिलाषो भैम्यामस्तीति सूचितम् ।

सर्ग ४ 4

कुसुमचापजतापसमाकुलं कमलकोमलमैक्षत तन्मुखम् ।
अहरहर्वहदभ्यधिकाधिकां रविरुचिग्लपितस्य विधोर्विधाम् ॥६॥

[कुसुमचापेति][1] तस्या मुखं कमलकोमलं कुसुमचापः कामः तस्माज्जातेन तापेन समाकुलं सत् रवेः रुचि[भि]र्ग्लपितस्य विधोर्विधां प्रकारं साहश्यं वह[2](58b)त् ऐक्षत[3] । किंभूताम्[4] ! अहरहः प्रतिदिनम् अभ्यधिकाधिकाम्[5][6] ॥६॥

तरुणतातरणिद्युतिनिर्मितद्रढिम तत्कुचकुम्भयुगं तदा ।
अनलसङ्गतितापमुपैतु नो कुसुमचापकुलालविलासजम् ॥७॥

[तरुणतेति][1] तस्याः कुचकुम्भयुगं तदा विरहकाले अनल[2]सङ्गतिः न नलस्य संयोगः तथा तापं किं नो उपैतु मा प्राप्नोतु । अपि तु प्राप्नोतु उपैतु । कुम्भो हि अनलस्य वह्नेः संयोगात् तप्यते । किंभूतम्! [4]तरुणता एव तरणिः [श्री]सूर्यस्य द्युतिस्तया निर्मिता द्रढिमा यत्र तत्तथा । पुनः किंभूतम् ! । कुसुमचापः काम एव कुलालस्तस्य विलासाज्जातम्[5] ॥७॥

अधृत यद्विरहोष्मणि मज्जितं मनसिजेन तदूरुयुगं तदा ।
स्पृशति तत्कदनं कदलीतरुर्यदि मरु[1]ज्ज्वलदु[ष्ण]रदूषितः ॥८॥ /ज

[अधृत यदिति][2] तस्या ऊर्वोर्युगं मनसिजेन[3] विरहोष्मणि मज्जितं सत् तदा यत्कदनं कदर्थनम् अधृत, तत्कदनं[4] कदलीतरुः तदा

1 P कुसु। 2 B दधत् 3 BP एक्षत 4 P किंभूतम्!! 5 P अत्यधि॰ 6 P add. अनुप्रासनिदर्शने ॥६॥ 1 P तरुण। 2 P अनलस्य 3 P तापः तम् 4 BP तरुणता.. ..तत्तथा at the end. 5 P add. कर्मविशेषणं चेदम् । अनुप्रासो रूपकं श्लेषश्च ॥७॥
1 P text ज्वर॰ 2 P अधृत। 3 P recto sup. lin. add. कामेन 4 B तत् —

सर्ग ४ 5

स्पृशति दधाति[5]। यदि मरुदेशे ज्वलता तप्तेन ऊषरऊेत्रेण दूषितः स तरुर्भवति[6]॥८॥

स्मरशराहतिनिर्मितसंज्वरं करयुगं हसति स्म दमस्वसुः।
अनपिधानपतत्तपनातपं तपनिपीतसरःसरसीरुहम्॥९॥

[1] [स्मरशराहते(ति)] दमस्वसुः करयुगं[2] स्मरस्य शराहतिभिः निर्मितसंज्वरं सन्तप्तं सत् तपेन[3] ग्रीष्मेण[4] निपीतं शोषितं यत्सरः तस्य सरसीरुहं कमलं हसति स्म। तस्मादपि तप्तं बभूव। किंभूतं कमलम्?। अनपिधानं निरावरणं यथा भवत्येवं पतत् तपनस्य [श्री]सूर्यस्य आतपो यत्र तत्तथा[5]॥ ॥९॥

मद(ऽवव)नतापभरेण विदीर्य नो यदुदपादि हृदा दमनस्वसुः।
निबिडपीनकुचद्वययन्त्रणा तमपराधमधात्प्रतिबध्नती॥१०॥

[1] [मदनतापेति] यत् दम[न]स्वसुः हृदा हृदयेन मदनस्य तापभरेण कृत्वा विदीर्य स्फुटित्वा नो [उ]दपादि[2] नोत्पादितम्। तमपराधं निबिडं दृढं पीनं [च] यत्कुचद्वयं तस्य यन्त्रणा बन्धोऽधात् दधार[3]। किं कुर्वती?। प्रतिबध्नती। [विदीर्योत्पन्नं] प्रतिबन्धं कुर्वती। तापनिरोधं[4] कुर्वती। अन्यदपि गृहं यत्[5] निबिडैः तपीनैः चेष्टकादिभिः बन्धैर्यन्त्रितं भवति तत् प्रज्वलनादितापेन न स्फुटति[6]॥१०॥

5 Pl. Ez om. दधाति। 7 Pl. lect. mg. add. ऊषरऊेत्रेण - एतावता ऊषरभूमिक्षेत्रे न व कदलीतरुर्भविष्यति। न ऊर्वोः उपमानं कदनेऽपि कदलीतरोर्नोपमानमिति भावः। अनुप्रासोऽतिशयोक्तिश्च॥८॥

1 Pl. स्मर। 2 Pl. व्युक्रमं 3 Pl. तप्त M B तप्तेन 5 Pl. add. अनुप्रास उपमा च॥९॥

1 Pl. मदन। 2 B नोदपाति 3 B दाधार 4 Pl. om. तापo... कुर्वती; Ez add. अथवा 5 Pl. Ez om. न 6 Pl. add. अतिशयोक्तिः॥१०॥

सर्ग ४ 6

निविशते यदि शूकशिखा पदे सृजति सा कियतीमिव न व्यथाम्।
मृदुतनोर्वितनोतु कथं नु[1] तामवनिभृत्तु निविश्य हृदि स्थितः॥११॥

[निविशत[2] इति] यदि शूकस्य शिखा [किंशारुसूचिः[3]] पदे चरणे निविशते। ततः सा कियतीमिव[4] व्यथां न सृजति। अपि तु महा[5]-व्यथां कुरुते। तस्या मृदुतनोर्दमयन्त्याः [तु] पुनः स[6] अवनिभृन्नलः हृदि निविश्य[7] स्थितः सन् तां पीडां कथं नु[8] न तनोतु [अपि तु करोतु] अथ च कोमलतनोर्[हृदये] वनिभृत् पर्वतः प्रविष्टोऽतिव्यथते[9]॥११॥

मनसि सन्तमिव प्रियमीक्षितुं नयनयोः स्पृहयाऽन्तरुपेतयोः।
ग्रहणशक्तिरभूदिदमीययोरपि न सम्मुखवास्तुनि वस्तुनि॥१२॥

[मनसीति[1]] इदमीययोरस्याः सम्बन्धिनोर्नयनयोः सम्मुख-वास्तुन्यपि अभिमुखस्थितेऽपि वस्तुनि ग्रहणशक्तिर्दर्शनशक्तिर्नाभूत्[2]। किंभूतयोः[3]? उत्प्रेक्षते- मनसि सन्तं प्रियं[4] नलमीक्षितुं स्पृहया अन्त-र्हृदयमध्ये[5] उपेतयोः प्रविष्टयोरिव[6]॥१२॥

हृदि दमस्वसुरश्रुसरप्लुते प्रतिफलन्विरहात्तमुखानतेः।
हृदयभाजमराजत चुम्बितुं नलमुपेत्य किलागमितं मुखम्॥१३॥

1 l2 text न 2 l1 निविशा।; l2 निविश्य[5] पातेति। 3 l2 om. सूचिः 4 B add. वा 5 B महती 6 l1 om. स 7 B प्रविश्य 8 l1 om. नु 9 l1 add. अनु-प्रासोऽतिशयोक्तिः काव्यलिङ्गम्। अवनिभृदिति श्लेषम्॥११॥
1 l1 मनसि। 2 l1 add. सम्मुखवास्तुनि अभिमुखभूमौ यद्वस्तु तस्मिन्निति वैयधिकरण्यमित्यन्यः। 3 l2 किं तयोः? 4 l1 नलं प्रियं 5 l2 अन्तर्हृदया-न्तर्मध्ये 6 l1 add. ग्लानिः। व्यभिचारी। अनुप्रास उत्प्रेक्षा विरोधाभासश्च। उक्तनिमित्ता विशेषोक्तिर्वा॥१२॥

[1] [हृदीति।] दमस्वसुर्मुखमराजत। किंभूतम्? हृदि प्रतिफलत् प्रतिबिम्बितम्। किंभूते? अश्रूणां झरैः प्रवाहैः प्लुते[2]। किंविशिष्टायाः? विरहेणाऽऽत्ता गृहीता मुखस्यानतिः[3] यया तस्यास्तथा। किल उत्प्रेक्षते — हृदयभाजं नलं चुम्बितुमुपेत्य पुन[रपि] आगमितम्। आगमः सञ्जातो यस्य तदागमितम् आगतम्। तारकादित्वादितच्[4]॥१३॥

सुहृदमग्निमुदञ्चयितुं स्मरं मनसि गन्धवहे न मृगीदृशः।
अकलि निःश्वसितेन विनिर्गमानुमितनिह्नुतवेशनमायिता॥१४॥

[1] [सुहृदमिति।] लोकैर्मृगीदृशो दमयन्त्या निःश्वसितेन कृत्वा गन्धवहे वायौ विनिर्गमेन निःसरणेन अनुमितं यत् निह्नु[तं]वेशनं गुप्त[2]प्रवेशनं तस्य मायिता[3] [4]कपटत्वं किं न अकलि। अपितु वायोर्मायि[वि]ता ज्ञाता। किं कर्तुं प्रवेशः? मनसि स्मरं सुहृदमग्निं कामानलम् उदञ्चयितुम् उद्दीपयितुम्। अथवा निःश्वसितेन गन्धवहेन निःश्वासवायुना मृगीदृशो मनसि[5] विनिर्गमेनाऽनुमितस्य निह्नुतवेशनस्य मायिता अकलि धृता[6]॥१४॥

1 P. हृदि। 2 B प्लुतौ 3 P. अवनतिः 4 P. add. अन्यसुहृदयभाजं नलं चुम्बितुमुपेत्य समीपं गत्वा मुखमागमितमिवाऽऽनीतमिव। मुखं तु नलस्यैव। यस्य किल चुम्बनं क्रियते तस्य मुखं समीपम् आनीय चुम्बयत इत्याह। उत्प्रेक्षाऽतिशयोक्तिश्च॥१३॥ 1 P. सुहृदमित्यादि। 2 B[2] गुप्तं 3 P. मायाविता, B[2] मायावित 4 B[2] कपटत्वं किं न 5 P. add. अग्निमुदञ्चयितुम् 6 P. add. अथवा गन्धवहेन वायुना कर्त्रा निःश्वसितेन करणभूतेन विनिर्गमानुमितनिह्नुतवेशनमायिता धृता। निःश्वसितेन कर्त्रा गन्धवहेन घ्राणेन करणभूतेन विनिर्गमानुमितनिह्नुतवेशनमायिता इत्यन्यः। रूपकमुपमाऽनुमानं काव्यलिङ्गं च॥१४॥

सर्ग ४ 8

विरहपाण्डिमरागतमोमषीशितिमतन्निजपीतिमवर्णकैः।
दश दिशः खलु तद्दृगकल्पयल्लिपिकरी नलरूपकचित्रिताः॥१५॥

[विरहेति][1] तस्या दृग् दृष्टिरेव लिपिकरी चित्रकरी[2] खलु दश दिशः नलस्य रूपकैः चित्रिताः अकल्पयत्। सर्वत्र नलं पश्यति स्म। कैः?। विरहस्य पाण्डि(60b)मा तथा रागोऽनुराग एव रागः रक्तत्वम्। तमो मोह एव मषी तस्याः शितिमा कृष्णत्वम्। तथा[3] तस्य नलस्य निजो यः पीतिमा एवं एव वर्णकाः तैः। अथवा तस्य पीतिमा तथा दमयन्त्याश्च पीतिमा[5]॥१५॥

स्मरकृतिं[1] हृदयस्य मुहुर्दशां बहु वदन्निव निःश्वसितानिलः।
व्यधित वाससि कम्पमदःश्रिते त्रसति कः सति नाश्रयबाधने॥१६॥

[स्मरेति][2] निःश्वसितानिलः अमुया श्रिते[3] वाससि कम्पं व्यधित। उत्प्रेक्षते – स्मर[स्य][4] कृतिं कामकृतां हृदयस्य दशामवस्थां मुहुर्बहु[6] यथा भवति एवं वदन्निव[6]। युक्तोऽयमर्थः। आश्रयस्य बाधने सति को न त्रसति[7]। वाससो यतो हृदयमाश्रयः[8]॥१६॥

करपदाननलोचननामभिः शतदलैः सुतनोर्विरहज्वरे।
रविमहो बहु पीतचरं चिरादनिशतापमिषादुदसृज्यत॥१७॥ ।सृ

1 P. विरह। 2 P2 om. चित्रकरी। 3 P. add. तस्या दमयन्त्या अथवा 4 P2 om. एव 5 P. add. उत्प्रेक्षा रूपक विशेषोऽनुप्रासोऽपि॥१५॥ 1 P2 for कृतौ 2 P2 स्मर। 3 P. श्रितम् अदः हृदयं वा पूर्वार्द्धप्रक्रान्तं तेन श्रुते 4 P. कामस्य 5 P. मुहुर्मुहुर्यथा 6 P2 वदन्नपि 7 P. वससो 8 P. add. अनुप्रास उपमाऽर्थान्तरन्यासश्च॥१६॥

सर्ग ४ 9

[करपदेति][1] सुतनोर्दमयन्त्याः विरहज्वरे सति[2] करकमल-पदाम्बुज-आननपद्म-लोचनपङ्कज[3] इति नामानि येषां तैः शतदलैः पद्मैः अनिशतापस्य मिषात् रवेः [श्री]सूर्यस्य महस्तेज उदसृज्यत उत्सृष्टम्। किं भूतम्?। चिरात् प्रभृति बहुलत्वर्यं पीतचरं पूर्वं पीतम्। भूतपूर्वेचरट्[4] (पा० V·iii·53)[5] ॥१७॥

उदयति स्म तदद्भुतमालिभिर्धरणिभृद्भुवि तत्र विमृश्य यत्।
अनुमितोऽपि च बाष्पनिरीक्षणाद् व्यभिचचार न तापकरो नलः ॥१८॥

[उदयतीति][1] तदद्भुतमुदयति स्म[3] यत्[4] तत्र[तस्यां] धरणि-भृतो[राज्ञः] भुवि पृथ्व्यां दमयन्त्यां विषये आलिभिः[6] सखीभिः विमृश्य बाष्पस्याऽश्रुणो निरीक्ष्य क्षणात् अनुमितोऽपि नलः तापकरो न व्यभि-चचार (60b)[7] नलः ज्वाऽस्याः विरहज्वरकर इति सखीभिः सम्यगेव ज्ञातम्। यतो धरणिभृतो भुवि पर्वतप्रदेशे धूमभ्रान्त्या बाष्पस्य गोपाल-तप्तचरी[8]बाष्पस्य[9] निरीक्षणात् विमृश्य योऽनलो वह्निरनुमितो भवति। तापकरः स व्यभिचरति। यतो यः सन्ततोर्ध्वबहुलधूमत्वात्। वह्निमान् अयं पर्वत[10] इत्यनुमीयते। तत्र वह्निर्भवत्येव। [व्य]भिचारी। अन्यत्र बाष्पेण व्यभिचरति। अत्र[11] बाष्पेण लिङ्गेनाऽनुमितोऽपि नलो न व्यभिचरति [स्म] इत्याश्चर्यम्। तापकरोऽनल इति सन्धौ सति। पक्षे, नलः पक्षे चानलः इति अकारप्रश्लेष[पे] शब्दप्रश्लेषः[12] ॥१८॥

1 P. कर। 2 P. ibid mg. add. वियोगसन्तापे सति 3 B °नाम्बुज° 4 P. अभूतपूर्वे° 5 P. add. अन्योऽपि यः पूर्वं पानीयादि पिबति स पश्चात् ज्वरे सति उत्सृजति। अतिशयोक्तिः। समासोक्तिरपह्नुतिः॥ P. ibid mg. add. ज्वरेनाऽतिदाहः प्रतिपादितः ॥१७॥

1 P. उदय।; P. उदयेति। 2 P. sup. mg. add. आश्चर्यम् 3 P. sup. mg. add. उद्भुतं सञ्जातमिति यावत् 4 B यत्र 5 P. add. तत् 6 P. आलीभिः; 7 B P. ज्वाऽस्य; edd. ज्वाऽस्याः 8 P. om. तप्त° 9 P. om. बाष्पस्य अग्र 10 P. add. धूमत्वात् 11 P. add. तु 12 P. add. इ गता(333) वित्यस्मात्लट्। श्लेषो व्याति —
contd.

हृदि विदर्भभुवः प्रहरन् शरैः रतिपतिर्निषधाधिपतेः कृते।
कृततदन्तरस्वदृढव्यथः फलदनीतिरमूर्च्छदलं खलु ॥१९॥

[हृदि[1] विदर्भेति।] रतिपतिर्विदर्भभुवो[2] हृदि[3] शरैः निषधाधिपतेः कृते नलहेतोः प्रहरन् [सन्] अमूर्च्छत् वृद्धिं प्राप। ~~कृतः दमयन्त्याः~~[4] खलु इति शङ्के। कृततदन्तरगस्वदृढव्यथः[5] सन् मूर्च्छां प्राप। कृतः[6] दमयन्त्याः तस्य हृदयस्य अन्तरगोऽस्य [अन्तर्गतस्य] स्वस्याऽऽत्मनो दृढव्यथो[7] येन स तथा। अत एव फलन्ती अनीतिर्यस्य स तथा। कामेन हृदयमध्यस्थितः[8] स्वात्मा विद्ध इति मूर्च्छितोऽनीतिश्च फलिता[9] ॥१९॥

विधुरमानि तया यदि भानुमान् कथमहो स तु तद्हृदयं तथा।
अपि वियोगभरास्फुटनस्फुटीकृतदृषत्वमजिज्वलदंशुभिः ॥२०॥

[विधुरिति[1]।] यदि तया विधुः चन्द्रो भानुमानमानि। कया? विधुरमात्मानं मन्यते विधुरमानिनो भावः तया। एकमपि[2] पदम् आवर्त्य[3] द्विधा व्याख्येयम्। अहो आश्चर्ये। तु पुनः स चन्द्रस्तस्या हृदयं कथं तथा (ता) अंशुभिः अजिज्वलत्। किंभूतम्? वियोगभरेण[4] वियोगाधिक्येन
स्फु/ यदस्फुटनं तेन स्फुटीकृतं[5] दृषत्वं येन तत् तथाविधमपि कथं ज्वालयामास। चन्द्रस्याऽविधुरत्वात् [श्री]सूर्यवद्दीपनमनुचितमित्यर्थः[6] ॥२०॥

cont. श्लेषो विरोधाभासश्च ॥१८॥ 1 P. हृदि। 2 P. om. रतिपतिः 3 Pz add. दमयन्त्या 4 P. add. मूर्च्छा वृद्धिर्मोहश्च। 5 Pz add. विसर्गः 6 P. कृतस्य हृदयस्य; Pz
टी/ कृततस्य 7 P. Pz दृढो 8 B न्स्थितमात्मानं विद्धम्। 9 P. add. काव्यलिङ्गमुत्प्रेक्षा अमूर्च्छदिति श्लिष्टम् ॥१९॥

1 P. विधुर। 2 P. एकमपीदं 3 B आवर्त्त्य 4 P. Pz om. वियोगाधिक्येन 5 P. भूतं 6 P. add. अनुप्रासो विरोधश्च ॥२०॥

हृदयदत्तसरोरुहया तया क्व सदृगस्तु वियोगनिमग्नया।
प्रियधनुः परिरभ्य हृदा रतिः किमनुमर्तुमशेत[1] चितार्चिषि ॥२१॥ ।त

[हृदयदत्तेति[2]] तया दमयन्त्या विरहतापवशात् हृदये दत्तं सरोरुहं यया[3] तथाविधया वियोग[4]निमग्नया सदृक् सदृशी रतिः कामवधूः[5] क्वाऽस्तु कथं भवतु। [यतः] किं रतिः हृदा प्रियस्य धनुः कामरूपं परिरभ्य अनुमर्तुं[6] अनुगमनं कर्तुं चितायाः[7] अर्चिषि यस्य[8] तस्मिन् चितार्चिषि वह्नौ[9] अशेत। अपितु [न]। यदि सा तथा प्रविष्टा स्यात्तदा उपमानं स्यात्[10] ॥२१॥

अनलभावमियं स्वनिवासिनो न विरहस्य रहस्यमबुध्यत।
प्रशमनाय विधाय तृणान्यसू[1]ञ्ज्वलति तत्र यदुज्झितुमैहत ॥२२॥

[अनलेति[2]] इयं दमयन्ती स्वस्मिन् [नि]वासिनो विरहस्य रहस्यं सारमनलभावं नलस्याऽभावम्[3] अप्राप्तिमथ च अनलभावं वैश्वानरभावं नाऽवबुध्यत न जज्ञौ। यत् तत्र विरहे ज्वलति सति तस्य विरहानलस्य प्रशमनायाऽसून्प्राणान् तृणानि विधाय[4] तृणवत् सा उज्झितुं ऐहत ईहाञ्चक्रे। यदि जानाति तदा किं वह्नेः प्रशमनाय उपरि तृणानि ।ति क्षिपति[5] ॥२२॥

2 B+ext चिन्ता° 2 P. हृदया। 3 P2 यथा 4 P, P2 वियोगो 5 P2 om. विसर्गः 6 B °मर्तुं 7 P, P2 चितायाम् 8 B तस्य 7 P. add. चितायाः अर्चिषि ज्वालायां वा 10 P. add. व्यतिरेकः ॥२१॥

2 B+ext °न्यसू° 2 P. अनलं। 3 P2 om. नलस्याऽभावम् 4 P, P2 प्रशमाय 5 P. add. अनुप्रासोऽनुमानातिशयोक्तिः काव्यलिङ्गं विरोधश्च रूपकं वा ॥२२॥

प्रकृतिरेतु गुणः स न योषितां कथमिमां हृदयं मृदु नाम यत् ।
तदिषुभिः कुसुमैरपि दुन्वता सुविवृतं विबुधेन मनोभुवा ॥२३॥

[1] [प्रकृतिरेत्विति] योषितां हृदयं नाम (61.b) मृदु भवति इति यो ऽयं प्रकृतिर्गुणः स इमां दमयन्तीं कथं न एतु [कथं] न प्राप्नोतु । अपि तु तस्या हृदयं प्रकृत्यैव मृदु तच्च स्वाभाविकमृदुगुणत्वम् । मनोभुवा विबुधेन देवेन सुविवृतं प्रकटितम् । किं कुर्वता ? (कुसुमैरपि इषुभिः तत् हृदयं दुन्वता । अथ च यो विबुधो विद्वान् स [2] सन्दिग्धमर्थं सुष्ठु विवृणोति टीकां कुरुते । यत् मृदु तत् कुसुमैरपि पीड्यते [3] ॥२३॥

रिपुतरा भवनादविनिर्यतीं विधुरुचिर्गृहजालबिलैर्नु ताम् ।
इतरथात्मनिवारणशङ्कया ज्वरयितुं [1] बिशवेषधराऽविशत् ॥२४॥

[2] [रिपुतरेति] नु इति वितर्के । विधोश्चन्द्रस्य रुचिः बिश [3] स्य वेषधरा सती तां दमयन्तीं ज्वरयितुम् [4] अविशत् । विरहेण पद्मिनीकन्दा [5] [6] हृदये दत्ताः चन्द्रकान्तिवदुत्प्रेक्ष्यन्ते [7] — के ? प्रविष्टाः ? । गृहस्य जालानां गवाक्षाणां बिलैः छिद्रैः । किं कर्तुम् ? ( [8] तां ज्वरयितुम् । किंभूता ? । रिपुतरा [9] प्रकर्षेण विरहिणीत्वात् शत्रुभूता । किंभूताम् ? । भवनात् गृहात् [10] अविनिर्यतीम् । दमयन्ती [हि] गृहान्न निर्गच्छति । किमर्थं ? छलेन प्रविष्टा ? । इतरथा [अन्यथा] आत्मनो निवारणशङ्कया । शत्रुः किल प्रवेशं न लभते [11] ॥२४॥

1 । प्रकृ । 2 । संसदिग्धमर्थं 3 । add. अनुमानं श्लेषो विरोधिस्त्वा । २३ ॥ 1 । 2 text ज्वल° 2 । रिपुत । 3 । 2 बिसस्य M B पद्मीकं वा 5 । । 2 हृदि 6 B । उत्प्रेक्षन्ते 7 B प्रविष्टाः 8 । om. तां ज्वरयितुम् । 9 । तस्या विरहिणीत्वात् प्रकर्षेण शत्रुभूता । 10 । 2 om. गृहात् 11 । add. बिसमिति बिस्यतेर्धातोः प्रयोगः । यदाह यस्काचार्यः — बिसं बिस्यतेर्भेदेन कर्मणो विकर्मणो वा (        ) इति । यः किल शत्रुः सोऽन्यरूपं कृत्वाऽद्वारेण रिपुं तापयितुं प्रविशति । सापह्नवोत्प्रेक्षा समासोक्तिः काव्यलिङ्गं च ॥२४॥

सर्ग ४ 13

हृदि विदर्भभुवोऽश्रुभृति स्फुटं विनमदास्यतया प्रतिबिम्बितम् ।
मुखदृगोष्ठमरोपि मनोभुवा तदुपमाकुसुमान्यखिला: शरा: ॥ २५ ॥

[हृदि विदर्भेति[1]] मनोभुवा कामेन विदर्भभुवो हृदि[2] मुखं च दृशौ च ओष्ठौ च मुखदृगोष्ठं तस्य [मुखादे:[3]] उपमेयस्य उपमा: कुसुमान्येवाऽखिला: शरा: [अरोपि] आरोपितम् । समाहारद्वन्द्वत्वादेकत्वम्[4] । मुखस्य पद्मं, दृशो-रिन्दीवरद्वयम्, अधरयोर्बन्धुजीवम्[5] उपमा । कुसुमशरा: । स्फुटं निश्चितम्[6] । त/ कि(६२७)भूतम् ? । विनमदास्यं यस्या: तस्या: भावस्तत्त्वं तया प्रतिबिम्बितम् । किंभूते हृदि ? । अश्रुभृति विरहाश्रुपूर्णे । अतो मुखादिप्रतिबिम्ब:[7] । । २५ ॥

विरहपाण्डुकपोलतले विधुर्व्यधित भीमभुव: प्रतिबिम्बित: ।
अनुपलब्ध्यसितांशुतया मुखं निजसखं सुखमङ्कमृगार्पणात् ॥ २६ ॥

[विरहपाण्डु इति[1]] विधुश्चन्द्र: भीमभुवो दमयन्त्या विरहेण पाण्डुनि कपोलतले प्रतिबिम्बित: सन् मुखं[2] सुखम्[3] अनायासेन यथा भवति एवं निजस्याऽऽत्मन: सखायं सदृशं व्यधित[4] । कस्मात् ? । अङ्कमृगस्य कलङ्कमृगस्याऽर्पणात् । कया ? । अनुपलब्ध्या[5]: सिता अंशवो यस्य कपोले [प्रतिबिम्बितस्य] स तथा, तस्य भावस्तत्ता तया तया । चन्द्र: मिथ/ कपोले प्रतिबिम्बितोऽपि शुभ्रत्वान्न ज्ञायते । परं कलङ्केन प्रतिबिम्बितेन

1 P. हृदि । 2 B हृदये 3 P2 om. मुखादे: 4 P. add. द्वन्द्वश्च प्राणितूर्यसेनाङ्गाना-मिति(पा० II iv 2) इति सूत्रम् । तत्रैको बाणो द्वौ दृशौ द्वावोष्ठौ एवं पञ्च । 5 P. add. इत्यादि । 6 P. add. इत्युत्प्रेक्षाव्यञ्जकम् । 7 P. add. अतिशयोक्ति: ॥ २५ ॥
1 P. विरह । 2 P2 om. सुखं 3 P. P2 om. अनायासेन 4 B व्यधिता 5 B शितां-शु: चन्द्रो यस्य कपोले ~~6 B भायत । P.~~

मुखं चन्द्रसदृशं सुखेन साययत् ॥२६॥

विरहतापिनि चन्दनपांशुभिर्वपुषि साऽर्पितपाण्डिममण्डना।
बि/ विषधराभिबिसाभरणा दधे रतिपतिं प्रति शम्भुविभीषिकाम् ॥२७॥ /दि

[विरहेति] सा द[म]यन्ती रतिपतिं प्रति कामं प्रति शम्भोः श्री-
महादेवस्य विभीषिकां भयानकत्वं दधे। किंभूता? चन्दनस्य पांशुभिश्चूर्णैः
वपुष्यर्पितं पाण्डिमैव मण्डनं यया [सा]। शम्भुरपि पाण्डुः। किंभूते? विरहेण
तापिनि। पुनः किंभूता? विषधराः सर्पाः तदाभानि तत्सदृशानि बिसानां
पद्मिनीतन्तूनाम् आभरणानि यस्याः सा तथा। अतितापेन पद्मिनीकन्दा
म्लानत्वात् [सर्प]सदृशाः। यथा शम्भुः सर्पाभरणः तथाह[मि]मपि भूत्वा [शम्भु-
वेषेण] कामं भीषयामीत्यभिप्रायः ॥२७॥ [पाण्डुरत्व]

(62b) विनिहितं परितापिनि चन्दनं हृदि तया धृतबुद्बुदमाबभौ।
उपनमन् सुहृदं हृदयेशयं विधुरिवाऽङ्कगतोऽपरिग्रहः ॥२८॥ /बु

[विनिहितमिति] तया परितापिनि हृदि विनिहितं चन्दनम्
आबभौ। किंभूतम्? तापवशात् धृता बुद्बुदा येन तत्तथा। उत्प्रेक्षते-
विधुरिव। किं कुर्वन्? हृदयेशयं कामं [सुहृदम्] उपनमन् आगच्छन्।

6 B साययत। 1 P add. अनुप्रास उपमा सामान्य च। तुद्गरमते अतद्गुणः। यदाह
– यस्मिन्नेकगुणानामर्थानां योगलक्ष्यरूपाणां संसर्गे नानात्वं न लक्ष्यते ऽ-
तद्गुणः स इति ॥२६॥ 1 P2 text दधौ 2 P विरहतापि 3 P P2 om. प्रति 4 B
भायनक° 5 P2 om. पांशुभिः 6 B विरहेण 7 B बिसानां पद्मिनीनां 8 P add.
भस्मना 9 P2 °यामि° 10 P add. अनुप्रासः काव्यलिङ्गमुपमा च ॥२७॥ 1 B
text °हतं 2 P विनि 3 P add. हृदये 4 B °हतं 5 P बभौ ~~6 B भात~~

सर्ग ४ 15

किंभूतश्चन्द्रः? । अङ्कगतः उत्सङ्गगतः उडूनां[6] परिग्रहो[7] यस्य[8] स तथा । चन्दनस्य चन्द्रसदृशत्वात् । बुद्बुदानां च नक्षत्रसदृशत्वात्[9] ॥२८॥

स्मरहुताशनदीपितया तया बहु मुहुः सरसं सरसीरुहम् ।
थं/ श्रयितुमर्द्धपथे[1]कृतमन्तरा श्वसितनिर्मितमर्मरमुज्झितम्[2] ॥२९॥

[स्मरहुतेति][3] तया[4] बहु प्रचुरं [मुहुः] सरसमार्द्रं सरसीरुहं कमलजातीयं श्रयितुं सेवितुम् अर्द्धपथमन्तरा[5] मध्येऽर्द्धमार्गं[6] यावत् कृतम् । किंभूतम्? । श्वसितेन निर्मितं[7] मर्मरं शुष्कपत्रत्वं यस्य तत्तथा उज्झितं तत्रैव च परित्यक्तम् । किंभूतया? । स्मरहुताशनेन दीपितया । विरहि[8]निःश्वासस्योक्तत्वात् कमलानि शुष्काणि[9] । अर्द्धपथमिति अन्तरा-योगे द्वितीया । [अन्तरान्तरेण युक्ते (पा० म ।।। ४)][10] ॥२९॥

प्रियकरग्रहमेवमवाप्स्यति स्तनयुगं तव ताम्यति किं न्विति[1] ।
जगदतुर्निहिते हृदि नीरजे दवथुकुड्मलनेन पृथुस्तनीम् ॥३०॥

[प्रियकरेति][2] हृदि निहिते[3] नीरजे द्वे कमले दवथुना तापेन यत्

6 B नत: 7 P. उडुपरि° 8 P. यस्याः सा 9 P. वत्र. काव्यलिङ्गमुत्प्रेक्षा च ॥२८॥
1 B₂ text पथी; P₂ text पथे 2 B text मुर्मुर° 3 P. स्मर 4 P. मया 5 P₂ om. श्रयितुं 6 P. अर्द्धपथं कृतम् अर्द्धमार्गं यावत् कृतम् । अन्तरा मध्ये उज्झितम् । 7 P. निर्मितः मर्मरः शुष्कपत्रशब्दः शुष्क° 8 B P. विरह° 9 P. अर्द्धपन्था यस्येति सरसीरुहविशेषणम् । अथवा अन्तरे निःश्वसितेत्यादिना समस्यते । अथ मर्मरः स्वनिते वस्त्रपर्णानामि( गति अमरसिंहः । मर्मरेति शब्दानुकरणम् अनुप्रासोऽतिशयोक्तिः ॥२९॥
1 P₂ text न्विति । 2 P. प्रिय । 3 P. P₂ निहते

कुड्मलनं सङ्कोचस्तेन कृत्वा[4] पृथुस्तनीं दमयन्तीम्[5] इतीव जगदतुः अवदताम्। इदं स्तनयुगं तव एवं सङ्कुचितकमलगृहीतस्तनवत् प्रियकरग्रहं भर्तुः पाणिग्रहणम्[6] अवाप्स्यति। ततः किं नु[7] कथमिति ताम्यति[8] क्लिश्यति[9] ॥३०॥

(६३७) त्वदितरो न हृदाऽपि मया धृतः पतिरितीव नलं हृदयेशयम्[1]।
स्मरहविर्भुजि बोधयति स्म सा विरहपाण्डुतया निजशुद्धताम् ॥३१॥

[त्वदितर[2] इति।] सा हृदयेशयं नलं स्मरहविर्भुजि कामानले निजस्य शुद्धताम् इतीव बोधयति स्म ज्ञापितवती। कया? विरहेण या पाण्डुता तया। इतीति[3] किम्? हे नल! मया[4] त्वत्सकाशात् इतरोऽन्यः पुरुषो हृदाऽपि[5] मनसाऽपि न धृतः। यः किल दिव्येन शुद्धो भवति स शुक्लो भवति। शुद्धशब्दः श्लिष्टः[6]। गतिबुद्धि (पा॰ I.iv.52) इत्यादिना कर्मत्वम्। बुधयुधनश[जने] (पा॰ I.iii.86) इत्यादिना परस्मैपदम्[7] ॥३१॥

विरहतप्ततदङ्गनिवेशिता कमलिनी निमिषद्दलमुष्टिभिः।
किमपनेतुमचेष्टत किं पराभवितुमैहत तद्वपुषं पृथुम् ॥३२॥ [६

[विरहतप्तेति[1]।] कमलिनी विरहेण तप्तं तस्या अङ्गं[2] तत्र निवेशिता सती तस्या वपुः ~~पृथु~~ तापं पृथुं किमपनेतुं स्फेटयितुमचेष्टत। किं वा[3] पराभवितुमैहत अचेष्टत। कैः? निमिषन्ति सङ्कुचन्ति

4 P1 om. कृत्वा 5 P1 add. इति 6 P1 पाणिना 7 P2 तु 8 B ताम्यसि 9 P1 add. प्रतीयमानोत्प्रेक्षा ॥३०॥ // 2 P2 + exr नस्थितं 2 P1 त्वदि 3 P1 इति किम् 4 P2 om. मया 5 P2 om. मनसाऽपि 6 P2 भवति and om. गति॰... परस्मैपदम्। 7 P1 add. उत्प्रेक्षा ॥३१॥ // 2 P1 विरहता 2 B अत्र 3 P2 च

यानि दत्तानि तान्येव मुष्टयस्तैः। यत् किलापनीयते तत् ~~मुष्टीन्~~ मुष्टीन् धृत्वा[5] क्षिप्यते। यच्च पराभूयते तन्मुष्टिभिर्हन्यते[6]॥३२॥

---

इयमनङ्गशिरावलिपन्नगक्षतिविसारि[वि]योगविषावशा[1]।
शशिकलेव[2] खरांशुकरार्दिता करुणनीरनिधौ निदधौ न कम्॥३३॥

---

[इयमनङ्गेति[3]] इयं दमयन्ती कं पुरुषं करुणनीरनिधौ दया[रस]-समुद्रे न निदधौ। अपि[4] तु सर्वं[5] निदधौ। किंभूता? अनङ्गस्य या शिरावलिः सैव पन्नगाः सर्पास्तेषां क्षतिर्दंशः[6] तेन विसारी प्रसरणशीलो वियोगः (63b) एव विषं तेन[7] अवशा विह्वला। क्षत इति पाठे क्षतेषु विसारिणा[7] इ व्याख्येयम्। केव? शशिनः[8] कला [इव]। यथा [शशिकला] खरांशोः [अर्क]-सूर्यस्य करैरर्दिता सर्वमपि जनं करुणारसे निदधाति[9] क्षिपति[10]॥३३॥

---

ज्वलति मन्मथवेदनया निजे हृदि तयार्द्रमृणाललतार्पिता।
स्वजयिनोस्त्रपया सविधस्थयोर्मलिनतामभजद्भुजयोर्भृशम्॥३४॥

---

[ज्वलतीति[1]] तया [निजे] हृदि अर्पिता आर्द्रमृणाललता भृशं नूनं भुजयोस्त्रपया लज्जया मलिनतामभजत्। किंभूतयोः[2]? स्वस्यात्मनो जयिनोः तथा सविधस्थयोः समीपस्थयोः भुजाभ्यां मृणालं जितम्। किंभूते हृदि? मन्मथवेदनया ज्वलति[3]॥३४॥

---

4 P2 add. किंतु 5 P1 P2 भृत्वा 6 P1 add. उत्प्रेक्षा॥३२॥

1 B P2 +क्षत° 2 B +ocr °कलेव 3 P1 इयम्। 4 P2 om. अपि ... निदधौ 5 B सर्वे 6 B सर्पः 7 B क्षत .... व्याख्येयम् at the end. 8 P1 add. शशिनः कला 9 P2 om. निदधाति 10 P1 om. क्षिपति; and add. रूपकमुपमा च॥३३॥ 1 P1 ज्वल° 2 B मृणालं 3 P1 add. अन्योऽपि स्वजयिनः सन्निधौ लज्जया मलिनतां भजते। अनुप्रास उत्प्रेक्षा च॥३४॥

सर्ग ४ 18

पिकरुतिश्रुतिकम्पिनि शैवलं हृदितया निहितं विचलद्बभौ ।
सततत[1]तहृच्छयकेतुना हृतमिव स्वतनु[2]घनघर्षिणा ॥३५॥

[पिकरुतीति] तया[3] हृदि निहितं शैवलं विचलत्[4] सत् बभौ । किं भूते? । पिकस्य कोकिलस्य रुतिः[5] श्रुतिः श्रवणं तेन कम्पिनि । उत्प्रेक्षते । — सततं तज्जतो[6] दमयन्तीसंस्थो[7] यो हृच्छयः कामः तस्य केतुः मत्स्यः [अथवा मकरः] तेन हृतमिव चालितमिव । किंभूतेन? । स्वस्यास्तन्वाः[10] शरीरस्य घनं घर्षणशीलेन । मत्स्यो हि शैवलं शरीरेण घर्षयति भक्षयति च । [मकरस्य] कामध्वजे मत्स्यमकरयोर्व्याप्त[11] [12] ॥३५॥

न खलु मोहवशेन तदाननं नलमनः शशिकान्तमबोधि तत् ।
इतरथा शशिनो[1]ऽभ्युदये ततः कथमसुस्रवद[2]श्रुमयं पयः ॥३६॥

[न[3] खलु मोहेति] नलस्य मनः कर्तृ तत्[4] तस्याः आननं कर्म । क(64a) प्रीतापन्नं मोहवशेन भ्रान्त्या शशिकान्तं चन्द्रकान्तं न खल्वबोधि । अपि तु निश्चितमेव चन्द्रकान्तं [पुरो] मणिम् अबोधि[5] अबुद्ध । इतरथा अन्यथा शशिनोऽभ्युदये नलः[6] दमयन्तीवदनात्[7] अश्रुमयं पयो जलं कथमसुस्रवत् सुस्राव[8] । चन्द्रोदये चन्द्रमणिः स्रवति ।[9] भ्रान्त्या हि यत् मरुमरीचिकायां जलं[10] भवति । तेनार्थक्रियातृप्तिर्न भवति । अतोऽर्थक्रियाकारित्वात्[11] चन्द्रकान्तत्वं प्रामाणिकम्[12] ॥३६॥

1 B+ed स्वतनुघन° 2 P. पिक। 3 B तथा H/2 om. सत् 5 B P. रुतिः 6 P. add हृदयगतो 7 P/2 ~~संस्~~स्थो 8 P. यः ~~वसे~~ कामः /2 9 P. हृदयः 10 P. तस्याः° 11 P. मकरमत्स्ययोः 12 P. add. उत्प्रेक्षा ॥३५॥ 1 B+ed शशिनो° 2 B+ed °मसुस्रुवदस्रु° 3 P. न खलु। 4 P/2 om. तत् 5 P/2 om. अबोधि 6 P. om. नलः 7 B दमयन्त्याः 8 P2 सुस्राव 9 P2 अतोऽर्थ°... प्रामाणिकम् here. 10 P2 add. न 11 P. °कान्तित्वं 12 P. प्रामाणिकी; and add. दीपजने (पा° III. i. 61) त्यादिना चिण्। ~~अनुमानात् शशिकान्तमिति लक्षणम्~~ ॥३६॥

सर्ग ४ 19

रतिपतेर्विजयास्त्रमिषुर्यथा जयति भीमसुताऽपि तथैव सा।
स्वविशिखानिव पञ्चतया ततो नियतमैहत योजयितुं स ताम् ॥३७॥

[रतिपतेरिति[1]] यथा रतिपतेः कामस्य विजयास्त्रम् इषुर्बाणो[2] जयति सा भीमसुताऽपि तथैव कामास्त्रवत् सर्वोत्कर्षेण वर्तते[3]। ततः कारणात् स[4] कामः तां दमयन्तीं नियतमहं मन्ये – पञ्चतया योजयितुमैहत अचेष्टत। पञ्चत्वं मरणम्। कानिव? स्वान् विशिखान् बाणानिव। बाणा अपि पञ्चसंख्यया योजिताः। साऽपि कामस्य विजयास्त्रम्[5] ॥३७॥

(64 b) शशिमयं दहनास्त्रमुदित्वरं मनसिजस्य विमृश्य वियोगिनी।
झटिति वारुणमश्रुमिषादसौ तदुचितं प्रतिशस्त्रमुपाददे ॥३८॥

[शशिमयमिति[1]] असौ वियोगिनी शशिमयं मनसिजस्य[2] दहनास्त्रम् आग्नेयमस्त्रमुदित्वरमुदयपरं विमृश्य झटिति तस्याऽऽग्नेयस्योचितं प्रतिशस्त्रमुपाददे। किं? वारुणं वरुणदैवत्यम्[3]। कस्मात्? अश्रुमिषात्[4] ॥३८॥

अतनुना नवमम्बुदमाम्बुदं सुतनुरस्त्रमुदस्तमवेक्ष्य सा।
अचितमायतनिःश्वसितच्छलाच्छ्वसनशस्त्रममुञ्चदमुं प्रति ॥३९॥

[अतनुनेति[2]] सा सुतनुः अतनुना कामेन नव[जलधर]मा[3] –

1 P रति। 2 P इषुबाणो 3 B वर्तते 4 P om. स 5 P add. अतिशयोक्तिरुपमोत्प्रेक्षा। पञ्चतयेति श्लिष्टम् ॥३७॥ 1 P शशि। 2 P मनसिजस्य शशिमयं 3 B ०दैवत्वम्, P देवत्यम् 4 P add. अतिशयोक्तिरपह्नुतिश्च ॥३८॥
1 P + च्छल ०च्छ्वसनमस्त्रा० 2 P अतनु 3 P जलवर्षि ——

म्बुदं[4] मेघास्त्राम् उदस्ताम् उत्क्षिप्तमवेक्ष्य अमुं कामं प्रति उचितं[5] श्वसनस्य शास्त्रं वायव्यास्त्रम् अमुञ्चत। वायुना मेघाः स्फाय्यन्ते। कस्मात्?। ~~[illegible]~~ आयतस्य दीर्घस्य निःश्वसितस्य छलात्। इयं सुतनुः[सा] वैरी अतनुः तं प्रति किं क्रियते।[6] अतिशयोक्तिः॥३९॥

(63b) रतिपति[1] प्रहितानिलहेतितां प्रतियती सुदती मलयानिले। तदुरुतापभयात्तमृणालिकामयमियं भुजगास्त्र[2]मिवाददे[3]॥४०॥

[रतिपतीति[4]] सा[5] सुदती मलयानिलविषये रतिपतिना[6] प्रहिता अनिलहेतिः वायव्यास्त्रं तस्याभावस्तत्ता[7] तां प्रतियती मन्यमाना सती इयं भुजगास्त्रमिवाऽऽददे। सर्पा वायुं पिबन्ति। किंभूतम्?। तस्य कामस्य[8] च उरुतापः तस्य[9] भयात् आत्ता[10] गृहीता [या] मृणालिका तन्मयम्। सा किल म्लाना सती सर्पसदृशी कृष्णवर्णा भवति[11]। [तच्छब्देन वृत्तिच्छन्नस्यापि[12] रतिपतिपदस्यानुवृत्तिः। सर्वनाम्नाऽनुवृत्तिर्वृत्तिच्छन्नस्यापीति[1] वामनः।] सापह्नवो[13]त्प्रेक्षा[14]॥४०॥

व्यधित तद्हृदि शल्यमिव द्वयं विरहितां च तथापि च जीवितम्। किमथ तत्र निहत्य निखातवान् रतिपतिः स्तनबिल्वयुगेन तत्॥४१॥

[व्यधितेति[1]] रतिपतिस्तस्या हृदि विरहितां[2] जीवितमपि च

4 P1 add. वारुणम्। अथवा जलवर्षि नवम् आम्बुदं 5 BP2 उचितं vlt. अमुञ्चत
6 P1 अनुप्रासोऽतिशयोक्तिश्च अपह्नुतिः॥ P2 om. अतिशयोक्तिः॥३९॥ L ०घाति B text
2 B text ०जास्त्रा० 3 P2 text ०वादित 4 P1 रति। 5 P1 om. सा 6 P2 add. कामेन
7 P1 om. तां 8 B कामास्त्रस्य; P1P2 रतिपतेः 9 P1 तद्भयात्; P2 तदुभयात् 10 P2 अत्ता
11 P2 om. भवति 12 P2 ०वृत्ते० 13 P2 om. सापह्नवोत्प्रेक्षा 14 P1 add. अनुप्रासोऽपि॥
1 P1 व्यधित। 2 P1 add. च

सर्ग ४ 21

तथा[3] इदं द्वयं शल्यमिव व्यथितं[4] अथ [च] पश्चात् स कि[लेत] शल्यद्वयं स्तनावेव बिल्वयुगं [बिल्वफलद्वयं[5]] कीलकद्वयं[6] तेनोपरि निहत्य[7] निखातवान्। यत्[8] कीलकादिकं क्वाऽपि जडनार्थं निक्षिप्यते। तस्य मस्तके कुलङ्किका निश्चलत्वनार्थं[10] निहन्यते घातः क्रियते।[11] उपमोत्प्रेक्षा ॥४१॥

(८५०) अतिशरव्ययता मदनेन तां निखिलपुष्पमयस्वशरव्ययात्।
स्फुटमकारि फलान्यपि मुञ्चता तदुरसि स्तनतालफलार्पणा[1]: ॥४२॥

[अतिशरेति[2]] मदनेन तामतिशरव्ययता [अतिशयेन शरव्यं कुर्वता] वेध्यत्वेनाऽतिक्रामता सता स्फुटं तस्या[3] उरसि स्तनावेव तालफलयुग्मं[4] तस्याऽर्पणा अकारि। किं कुर्वता[5]? फलान्यपि शरान् मुञ्चता। कस्मात्?[6] निखिलानि पुष्पाण्येव स्व[शी]रास्तेषां व्ययात्। अतिशयेन वेध्यं कुर्वता सकलं पुष्पबाणा व्ययिता।[7] ततो बाणरूपेण फलान्यपि मुक्तानि[8] ॥४२॥

अथ मुहुर्बहुनिन्दितचन्द्रया स्तुतविधुन्तुदया च तया मुहुः।
पतितया स्मरतापमये गदे निजगदेऽश्रुविमिश्रमुखी सखी ॥४३॥

[अथ मुहुरिति[1]] तया अथ मुहुर्बहु यथा भवति एवं निन्दित-

3P. add. अथवा तथाऽपि विरहित्वेऽपि जीवितं च M. add. द्वयस्य शल्येन संभावनाम् उभयोः साधर्म्यमित्यन्वयः। 5 R. om. बिल्वफलद्वयम् 6 B.R. बालक० 7 P. निहत्य twice 8 P. add. किल 9 B. मस्तके 10 R. ०निश्चलतार्थं 11 P. उत्प्रेक्षा रूपकं च। पाक्षिकी उपमाऽपि। R. om. उपमोत्प्रेक्षा ॥ ४१॥ 2 R. +श्या ०युग्म० 2 P. अति। 3 R. उपरि M. R. युगं 5 R. कृत्वा 6 P. add. निखिला पुष्पमयाः 7 P. add. न 8 P. add. उत्प्रेक्षा रूपकं च; R. Sup. mg. add. एतेन स्मरतापाधिक्यं प्रतिपादितम् ॥४२॥ ~~1 P. अथ मु। 2 B~~

सर्ग ४ 22

श्वेन्द्रो यथा तथा तथा स्तुतो विधुन्तुदो राहुर्यथा तथा तथा सखी निजगदे उक्ता । किंभूतया ? । स्मरतापमये गदे रोगे पतितया । किंभूता सखी ? । अश्रुभिर्विमिश्रं मुखं यस्याः सा तथा ॥४३॥

नरसुराब्जभुवामिव यावता भवति यस्य युगं यदनेहसा ।
विरहिणामपि तैस्तवधुवक्षणामितं न कथं गणितागमे ॥४४॥

[नरसुराब्जेति] हे सखि ! नराश्च सुराश्च अब्जभुवश्च तेषां मध्ये यावता यत्संख्या तेन अनेहसा कालेन यस्य यत् युगं भवति गणितशास्त्रेऽस्ति तेषामिव विरहिणामपि तैर्युगं गणितागमे कथं न गणितम् । किंभूतम् ? । रतवतोः परस्परं रतियुक्तयोः यूनोः स्त्रीपुरुषयोः क्षणैर्निमेषकालावयवैः मितं ~~सख्या~~ सङ्ख्यातम् । षष्ट्यधिकशतत्रयदिनै-र्देवानां (65b) दिनम् । दिव्यवर्षाणां द्वादशसहस्रैः कृतत्रेताद्वापरकलिरिति । त-च्चतुर्युगं देवानां युगम् । दैविकानां युगानां यत्सहस्रद्वयं तेन ब्रह्मणो दिन-मेकम् । तथा परिगणनया ब्रह्मणः पञ्चाशता वर्षैः परार्द्धम् । परार्द्धद्वयं ब्रह्मणः परमायुः । यथा इत्थं तेषां परिगणना तथा ~~श्री~~ प्रीतिमतां यूनां ये क्षणास्तैरेतावत्सङ्ख्यैः विरहिणो युगं भवतीति किं न गणितम् । किन्तु यस्तेषां

2 B श्चन्द्रा 3 P. om. तथा 4 B किंभूता ? । 5 B विमिश्रं 6 P. add. वक्ष्यमाणयोरपि चन्द्रनिन्दाराहुस्तुत्योः सामान्येन प्रतिपादनापतीतत्वेन निर्देशः । यथाक्रमादमुं नारद इत्यबोधि स इति भविष्यत्यपि नारदबोधे [ ] ददर्शावतरं तमम्बराद् हिरण्यगर्भाङ्गभुवं मुनिं हरिः (शिशु° ) रिति प्रागेव मुनिदर्शनस्य सामान्येनाप्रतीतत्वेन निर्देशः । अनुप्रासः ॥४३॥ 1 P. नर । 2 B मध्य 3 P. यस्य twice 4 P. om. तद्युगं 5 P. add. नियतैः कैश्चिन्मितम् । एकेनैव वा क्षणेन 6 P. om. दैविकानां ..... °द्वयं 7 B P. तथा, P. add. हि 8 P. प्रीतिमतो-र्यूनोः 9 P. add. एकेनैव वा रतवधुक्षणेन 10 P. यस्तयोः

सर्ग ४ 23

अणः स वियोगिनो[1] युगान्तकल्पः[2] ॥४४॥

जनुरधत्त[1] सती स्मरतापिता हिमवतो न तु तन्महिमादृता।
ज्वलति भालतले लिखितः सतीविरह एव हरस्य[2] न लोचनम् ॥४५॥

[जनुरधत्तेति[3]] सती दक्षसुता स्मरेण तापिता सती[4] हिमवतः सकाशात् जनुर्जन्म अधत्त[5] । न[6] तु तस्य हिमाचलस्य[7] महिम्नि माहात्म्ये आदृता आदरपरा पार्वती जाता। किं च हरस्य भालतले लिखितः स्थिरः सत्या दक्षसुतायाः अयं विरहानल एव ज्वलति न तृतीयं लोचनम्।[8] तादृगन्यव्यपोहो वाच्यः॥४५॥

दहनजा न पृथुर्दवथुव्यथा विरहजैव पृथुर्यदि नेदृशम्।
दहनमाशु विशन्ति कथं स्त्रियः प्रियमपासुमुपासितुमुद्धुराः॥४६॥

[दहनजा नेति[1]] दहनाज्जाता [दवथु[2]] व्यथा पृथुरधिका न भवति, किन्तु विरहाज्जाता एव व्यथा पीडा पृथुरधिकतरा (अत्र) व्यतिरेको[3]ऽनुमानमर्थापत्तिर्वा। प्रमाणमाह — यदीदृशं न भवति [तदा] (66a) स्त्रियः अपगता असवः प्राणा यस्य तं तथाविधं मृतं प्रियं भर्तारमुपासितुम् उद्धुराः उत्सुकाः सत्यः दहनं कथं विशन्ति सहगमनं कथं कुर्वन्ति। दहन—

॥ 1. P2 वियोगिनो: 2 P. add. उपमातिशयोक्तिश्च ॥४४॥

1 B+ccr जम्भु॰ 2 B+ccr न रस्य 3 P. जनु। 4 P2 om. सती 5 P. add. अन्यत स्थापयित्वा प्रकृतिनिषेधमाह 6 P2 तेन 7 B महिमा तस्य 8 P. add. भालतले हि विधातृलिपिलेखनास्पदम् इति लिखित इत्युक्तम्। ज्वलतिना नलत्वमाक्षिप्तम्। अपह्नुतिरतिशयोक्तिश्च॥ P2 om. तादृग॰...वाच्यः ॥४५॥

1 P. दहन। 2 Pc. add. दवथु॰ 3 B. व्यतिरेकाऽनु 4 P. add. उत्करा 5 P. अनुगमनं

सर्ग ४ 24

व्यथा विरहदुःखात् न्यूनपरिमाणा तद्भयादङ्गीक्रियमाणत्वात् । यद्दुःखं यद्भयादङ्गीक्रियते तत्र ततो न्यूनम् । यथा लकुटप्रहारभयात् कम्बाप्रहारदुःखम् । तथा चेदम् । तस्मात्तथा । इति प्रयोगः । तथा विरहे सति वह्निप्रवेशः अन्यथा अनुपपद्यमानस्वदुःसमर्थात् विरहदुःखान्न्यूनं गमयति । इत्यर्थापत्तिरपि ॥४६॥

---

हृदि लुठन्ति कला नितराममूर्विरहिणीवधपङ्ककलङ्किताः ।
कुमुदसख्यकृतस्तु बहिष्कृताः सखि! विलोकय दुर्विनयं विधोः ॥४७॥

---

[हृदि लुठन्तीति] हे सखि! विधोर्दुर्विनयं विलोकय [यतः] अमूर्विरहिणीनां वधलक्षणेन पङ्केन कलङ्किताः कलाः [नितरां] हृदि लुठन्ति, कलङ्कस्य उत्सङ्गास्थितत्वात् । तु पुनः याः कलाः कुमुदैः सह सख्यकृतः मैत्रीकारिण्यस्ताः बहिष्कृताः ॥४७॥ /हि

---

अयि! विधुं परिपृच्छ गुरोः कुतः स्फुटमशिक्ष्यत दाहवदान्यता ।
ग्लपितशम्भुगलाद्गरलात्त्वया किमुदधौ जड! वा वडवानलम् ॥४८॥

---

[अयि विधुमिति] अयि! सखि! त्वं विधुं परिपृच्छ त्वया कुतो

---

6 P. नुपरि॰ 7 P2 om. कम्बा... अर्थात् 8 P. अन्यथाऽनुपपद्यमान; P. add. अनुमानं व्यतिरेकश्च ॥४६॥ 1 P. add. इदानीं चन्द्रनिन्दामाह । 2 B om. विसर्गः 3 P. हृदि लुठन्तीत्यादि । 4 P2 विधौ 5 P2 om. पङ्केन 6 P2 कलङ्कस्य ...स्थितत्वात् at the end 7 B सः 8 P. add. कला चन्द्रस्य षोडशो भागः शिल्पं च । अनुप्रासः समासोक्तिश्च ॥४७॥
1 B text ग्लपितशम्भु॰ 2 P. अयी 3 P. om. त्वं

गुरोः सकाशात् स्फुटं[4] दाहवदान्यता[5] दातृत्वमशिक्ष्यत[6]। किमुदधौ[7] गरलात् विषात् शिक्षिता। किंभूत[8] (66b) तात्? । उल्लापितं[9] दग्धं शम्भोर्मौलिं येन कालकूटेन तस्मात्तथा[10]। अथवा हे जड[11]! अब्धौ वडवानलात् दाहदातृत्वं शिक्षितम्। त्वं[12] समुद्राज्जातः[13] ॥४८॥

---

अयमयोगिवधूवध[1]पातकैर्भ्रमिमवाप्य दिवः खलु पात्यते।
शितिनिशा[2]दृषदि स्फुरदुत्पतत्कणगणाधिकतारकिताम्बरः ॥४९॥

---

[अयमयोगीति][3] अयं चन्द्रः खलु इति मन्ये अयोगिनीनां[4] विरहिणीनां वधूनां [यो] वधो हिंसा तस्य[5] पातकैर्भ्रमिमवाप्य दिवः स्वर्गात् शितिः[6] कृष्णा निशा एव दृषत् शिला[7] तस्यां पात्यते। पातयन्तीति पातकानि। किंभूतः? । स्फुरन्तः अत एवोत्पतन्तश्च ये कणानां [वि[8]]स्फुलिङ्गानां गणास्तैरधिकं[9] तारकितम् अम्बरम् आकाशं येन स तथा[10]। तारकाः सञ्जाता यत्र। तारकादिदर्शनात् सञ्जातेऽर्थे[11] इतच्। शुक्लपक्षात् कृष्णपक्षेऽधिकास्तारका भवन्ति। अन्योऽपि यो भ्रामयित्वा[12] शिलायां कुम्भादिः स्फोट्यते[13] तस्य खण्डान्युत्पतन्ति[14] ॥४९॥

---

4 P1 om. स्फुटं 5 P2 दाहस्य 6 P1, P2 अशिक्षत 7 P2 om. उदधौ 8 B किंभूतम्॥ 9 P1, P2 om. दग्धं 10 P1 add. त्वं हि शम्भोर्मौलिमावससि। 11 P1 जल 12 P1 समुद्राज्जातस्त्वम्। 13 P1 add. आख्यातोपयोगे (पा० I.iv.29) इत्यपादानम्। अनुप्रासः॥४८॥ || 1 B text व्यव° 2 B text स्फुटमु° 3 P1 अथ। 4 P1 add. अयोगानां 5 P1 add. तस्माद्घातेन 6 P1 शनिः 7 P1 शाला 8 P2 किं 9 P1 अधिकतारकितम् अधिकत्तारकीकृतम्। 10 B तारका ... इतच् om. भवन्ति; 11 P1 add. तारकितमिति ण्यन्तनिष्ठा। 11 P1 add. अधिकं तारकितमम्बरं यस्मादिति वा। 12 B भ्रमित्वा 13 B पात्यते। 14 P1 add. अनुप्रासः उत्प्रेक्षा रूपकम् अनुमानं समासोक्तिश्च ॥४९॥

सर्ग ४ 26

त्वमभिधेहि विधु सखि! मद्गिरा किमिदमीदृगधिक्रियते त्वया।
न गणितं यदि जन्म पयोनिधौ हरशिरःस्थितिभूरपि विस्मृता[1] ॥५०॥

[त्वमभिधेहीति[2]] हे सखि! त्वं[3] मम गिरा विधुमभिधेहि ब्रूहि। त्वया हे चन्द्र! इदं प्रत्यक्षं ईदृक् विरहिणीवधलक्षणं किमधिक्रियते अयमधिकारः कथं क्रियते? यदि त्वया पयोनिधौ जन्म आत्मीयं[5] न[4] गणितम्। ततः किं हरस्य शिरसि स्थितिभूराश्रयभूमिरपि विस्मृता। कलंकितत्व रत्नाकर, संसर्गश्च (670) ...... यन्महे-
:। खरशिरसि[6] त्वां बिभर्ति। त्वंविधा प्रतिष्ठा[7] ॥५०॥

किमसुभिर्ग्लपितैर्जड! मन्यसे मयि निमज्जतु भीमसुतामनः।
मम किल[1] श्रुतिमाह तदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः ॥५१॥

[किमसुभिरिति[2]] हे जड! त्वं किमेवं[3] मन्यसे यदसुभिर्ग्लपितैर्भीमसुताया मनो मयि निमज्जतु। मरणे सति प्राणिनो मनश्चन्द्रं[4] लयमेति। किल यस्मात् विबुधो विद्वान् स्मरो मम तदर्थिकां श्रुतिं वेदवाणीं नलमुखेन्दुपरां[5] नलस्य यो मुखेन्दुस्तत्परां तन्निष्ठामाह। [परो]पुरुषस्य हि चन्द्रमा मनसो जातः (ऋ.X. ) तस्य[6] चन्द्रो मनसि लीयते। [जन मनांसि
न्ते। तु चन्द्राज्जायन्ते चन्द्रे च लीयन्ते। मम मनो नलमुखचन्द्रे लयं प्राप्स्यति, न तु त्वयि चन्द्रे[7] ॥५१॥

1 B text add. विसर्गः 2 P। त्वम्। 3 P2 om. त्वं 4 P2 om. 3 4 5 P2 om. न
6 P1P2 त्वां शिरसि 7 P। add. विभ्रमः ॥५०॥

1 B text किलि 2 P। किम्। 3 B मेयं 4 B श्चन्द्रे 5 BP2 नलस्य... त-न्निष्ठां abt. लीयते 6 P। add. च 7 P। add. काव्यलिङ्गं रूपकं जडविबुध-पदश्लिष्टम् ॥५१॥

सर्ग ४ 27

निपतताऽपि न मन्दरभूभृता त्वमुदधौ शशलाञ्छन ! चूर्णितः[1]
अपि मुनेर्जठरार्चिषि जीर्णतां बत गतोऽसि न पीतपयोनिधेः[2] ॥ ५२ ॥

पी/ [निपतताऽपीति[3]] हे शशलाञ्छन ! त्वमुदधौ[4] निपतताऽपि[5] मन्दरभूभृता न चूर्णितः । बत इति खेदे । किञ्च[6] मुनेरपि अगस्त्यस्य जठरार्चिषि जीर्णतां त्वं[7] न गतोऽसि । किं भूतस्य[8] । पीतश्चुलुकित: पयोनिधिर्येन तस्य तथा[9] ॥ ५२ ॥

मुखरयस्व यशोनवडिण्डिमं[1] जलनिधेः कुलमुज्ज्वलयाऽधुना ।
जि/ अपि गृहाण वधूवधपौरुषं[2] हरिणलाञ्छन ! मुञ्च[3] कदर्थनाम् ॥ ५३ ॥

[मुखरयेति[4]] हे चन्द्र ! त्वं यशसः कीर्तेर्नवडिण्डिमं पटहं मुखरयस्व । मया विरहिण्यो हता इति [मुखरय इति स्वयर[5]] इति वा[उपवादे] अधुना जलनिधेः कुलमुज्ज्वलय । अपीति आमन्त्रणे । अपीति वा पाठः । हे हरिणलाञ्छन ! त्वं वधूनां वधेन पौरुषं गृहाण । कदर्थनां मुञ्च ॥ ५३ ॥

निशि शशिन्[1] ! भज कैतवभानुतामसति भास्वति तापय पाप ![2] माम् ।
अहमहन्यवलोकयितास्मि ते पुनरहर्पति[3]निह्नुत[4]दर्पताम् ॥ ५४ ॥

1 B text °र्चिषि 2 B text °निधेः 3 P. निपत 4 P. अब्धौ 5 P. अपि aft. °भूभृता 6 P. add पीत...तथा here 7 P. om. त्वं 8 B किंभूत: ॥ 9 P. add. विभावना । अनयोः श्लोकयोः पाठे क्वचिद्विन्यासः ॥ ५२ ॥
1 B text शयो° 2 B text पौरषं 3 B text मुच 4 P. मुखर । 5 P. add अनुप्रासो व्याजस्तुतिर्दीपकं च ॥ ५३ ॥
1 B text शशि 2 B text माप 3 B text °रहपति° 4 B, P text °निर्हुत°

सर्ग ४ 28

[निशि शशिन्निति] हे शशिन् ! त्वं निशि कैतवेन छलेन भानुतां भज । (67b) हे पाप ! भास्वति [श्री]सूर्ये असति अविद्यमाने मां तापय । [अहनि] अहनि दिवसे ते[6] तव अहर्पतिना श्रीसूर्येण निह्नुतदर्पतां[7] [8] गलिताहङ्कारतां [पुनः] अवलोकयितास्मि विलोकयिष्यामि । श्वस्तनी (कर्तरि) तास्मि[9] ॥ ५४ ॥

शशिकलङ्क ! भयङ्कर ! मादृशां ज्वलसि[1] यन्निशि भूतपतिं श्रितः ।
तदमृतस्य तवेदृशभूतताऽद्भुतकरी परमूर्द्धविधूननी ॥ ५५ ॥

[शशिकलङ्केति][2] हे शशिकलङ्क[3] । मादृशां[4] हे भयङ्कर ! यत् त्वं निशि ज्वलसि तपसि । किंभूतः[5] ? । भूतपतिं श्रितः [श्री]महादेवं श्रितः[6] । अथ च[7] भूतानि रात्रौ ज्वलनरूपाणि भूत्वा जनं भीषयन्ति[8] । तत्तवा-मृतस्य[9] शीतलस्य ईदृशभूतता[10] तापकरत्वमद्भुतकरी आश्चर्यकरी । तथा परस्य मूर्ध्नो विधूननी । [आश्चर्येण] मूर्द्धा[11] धून्यते । अथ च अमृतस्य मरणरहितस्य[12] ईदृशभूतता प्रेतत्वमाश्चर्यम् । भूतो हि[13] परशरीरमाविश्य मस्तकं धूनयति । भूतःशब्दः प्रेते उभयलिङ्गः । क्रियाशब्दस्याऽभि-धेयवत् लिङ्गम् । ईदृशभूतस्य भावः तत्ता[14] ॥ ५५ ॥

श्रवणपूरतमालदलाङ्कुरं[1] शशिकुरङ्गमुखे सखि ! ~~कि~~ निक्षिप ।

5 P. निशि । 6 P. om. ते तव 7 P. निर्ह्नुत॰ 8 P. add. त्याजितदर्पतां 9 P. add. पाणिनीये लुट् उत्तमपुरुषैकवचनम् । अतिरयोक्तिः । पर्यायोऽपि ॥ ५४ ॥
1 B text ज्वलसिर ॥ शशिकलङ्क । 3 B शशलाञ्छन; P. शशि॰ 4 P. हे मादृशां 5 P. किम् ? 6 B श्रितम् 8 P. भीषयन्ते 9 P. add. सुधामयस्य 10 P. add. ईदृशश्चासौ भूतश्च तस्य भावः । क्रियाशब्दस्य अभिधेयवल्लिङ्गाद् । पिशाचे उभयलिङ्गत्वम् । 11 B मूर्ध्ना 12 P. ईदृशश्चासौ भूतश्च ईदृशं च तद्भूतं चेति वा । 13 P. हि अपि 14 P. add. विरोधः श्लेषोऽनुप्रासश्च ॥ ५५ ॥ 2 B text ॰दलाङ्कुर —

सर्ग ४, 29

ब्दिं/ किमपि लुन्द्रिलित: स्थगयत्यमुं स यदि तेन तदुच्छ्वसिमि क्षणम् ॥५६॥

[श्रवणपूरेति] हे सखि! त्वं शशिन: कुरङ्गस्य मुखे श्रवणपूरार्थं
लद्/ कर्णाभरणार्थं यस्तमालपल्लवाङ्कुर: तं निक्षिप। स यदि तेन भक्षितेन कि-
मपि तुन्दिलित: आपूरितोदर: सन् अमुं चन्द्रं स्थगयति। तत् क्षणमहम्
उच्छ्वसिमि जीवामि ॥५६॥

असमये मतिरुन्मिषति ध्रुवं करगतैव गता यदियं कुहू:।
पुनरुपैति निरुध्य निवास्यते सखि! मुखं न विधो: पुनरीक्ष्य(८४९)ते॥५७॥

[असमय इति।] ध्रुवमसमयेऽप्रस्तावे मतिरुन्मिषति यदियं कुहू:
क/ अमावास्या करगता एव सती गता अतिक्रान्ता। यदि पुनरपि उपैति निरु-
ध्यात्रैव निवास्यते। यथा हे सखि! विधोर्मुखं पुनर्न ईक्ष्यते ॥५७॥

अयि! ममैष चकोरशिशुर्मुनेर्व्रजति सिन्धुपिबस्य न शिष्यताम्।
अशितुमब्धिमधीतवतोऽस्य वा शशिकरा: पिबत: कति शीकरा: ॥५८॥

[अयि ममैष इति।] अयि सम्बोधने। एष मम चकोरशिशु:
सिन्धुपिबस्याऽगस्त्यस्य मुने: शिष्यतां किं न व्रजति। वाशब्दो हेतौ। यस्मा-
दस्य चकोरशिशोरब्धिमशितुं पातुमधीतवत: पठितवत: शशिन: करा:
पिबत: सत: कति शीकरा: कियन्तो बिन्दव:। बालस्याऽभ्यासे रुचि: भवति ॥५८॥

२ B+ स्थ तुन्दलित: ३ B+ क्षणम् ४ P. श्रवणपूरण। ५ P. add. चेत् ६ P.R
तुन्द° ७ P. add. तुन्दादिभ्य इलच्च (पा° V ii 117) ततो ण्यन्तान्निष्ठा। हेतु: ॥५६॥
1 P. असम। 2 R om. सती गता 3 R ईक्ष्यते 4 P. add. अर्थान्तरन्यास: ॥५७॥ 2 B+ or
शिशुमुने २ P. अयि। ३ P.R मुनेरगस्त्यस्य 4 P. om. किं 5 B पाठित: 6 edr. add.
पशिशो: 7 P.R बालस्याऽभ्यासो रुचिरो भवति। 8 P. add. अनुप्रासो विरोधश्च ॥५८॥

सर्ग ४ 30

कुरु करे[1] गुरुमेकमयोघनं बहिरितो मुकुरं[2] च कुरुष्व मे।
विशति तत्र यदैव विधुस्तदा सखि! सुखादहितं जहि तं द्रुतम् ॥५९॥

[कुरु करे इति।][3] हे सखि! त्वं करे एकं गुरुम् अयसो लोहस्य घनं कुरु गृहाण। इतः प्रदेशात्[4] [मे] मम मुकुरमादर्शं च बहिः कुरुष्व[5] मुञ्च। तस्मिन्नादर्शे यदैव[6] विधुर्विशति प्रतिबिम्बितो[7] भवति, तदा सुखात्त्वम् अहितं[8] शत्रुं द्रुतं घनेन जहि खण्डशः [कुरु][9] ॥ ५९॥

उदर एव धृतः किमुदन्वता न विषमो वडवानलवद्विधुः।
विषवदुज्झितमप्यमुना न स स्मरहरः किममुं बुभुजे विभुः ॥६०॥

[उदर[1] एवेति।] अयं विधुः उदन्वता समुद्रेण उदरे एव [किं न धृतः?] किंभूतः? वडवानलवद्विषमः [विषमत्वेन च साधर्म्योपमा।][2] धृता त्ववधर्म्येण वैधर्म्योपमा।] किं चाऽमुना समुद्रेण विषवदुज्झितमपि अमुं चन्द्रं स विभुः समर्थः स्मरस्य हर्ता किं न बुभुजे[3][4] ॥६०॥

असितमेकसुराशित[म](68b)प्यभून्न पुनरेष विधुर्विशदं विषम्[1]।
अपि निपीय सुरैर्जनितश्रयं स्वयमुदेति पुनर्नवमार्णवम् ॥६१॥

1 B text करै 2 B मुखा° 3 P. कुरु। M P. add. अस्मिन्प्रदेशे वा 5 कुरु 6 P. Pz यदेव 7 B प्रतिबिम्बो 8 Pz शत्रुम् अहितं 9 P. add. अनुप्रासः ॥ Pz second sup. mg. add. न हि अन्येनोपायेनाऽयं शत्रुः साध्य इत्यर्थः ॥ ५९॥
1 P. उदर। 2 P. om. विषम°... साधर्म्योपमा। 3 P. ~~add.~~ विबुभुजते 4 P. add. विषवदेव उपमासन्देहौ ॥ ६०॥
1 B text पुन° ——————

सर्ग ४ 31

[असितमिति] [3] असितं विषं कालकूटम् एकेन सुरेण श्रीमहादेवेनाऽशितं भक्षितमपि पुनरपि जाड्यभूत न जातम्। पुनरेष चन्द्रो विशदं धवलं विषं [4] ततश्च सर्वैः सुरैर्निपीय जनितक्षयमपीदम् आर्णवं सामुद्रं विषं [5] पुनर्नवं वारंवारमुदेति [7] ॥६१॥

विरहिवर्गवधव्यसनाकुलं कलय पापमशेषकलं विधुम्।
सुरनिपीतसुधाकमपापकं ग्रहविदो विपरीतकथाः कथम् ॥६२॥

[विरहिवर्गेति [1]] हे सखि! त्वमशेषकलं परिपूर्णं विधुं पापं पापिष्ठं कलय जानीहि। यतो विरहिणां वर्गस्य यो वधस्तेन व्यसनेनाऽऽकुलम्। यश्चन्द्रः [2] सुरैर्निपीतसुधाकं [तं] मपापकं पापरहितं विद्धि। कान्तिरहितत्वादहिंसकम्। एते ग्रहविदो गणकाः कथं विपरीतकथाः पूर्णचन्द्रमपापं वदन्ति। क्षीणपापं ज्योतिःशास्त्रे ब्रुवन्ति [3] ॥६२॥

विरहिभिर्बहुमानमवापि यः स बहुलः खलु पक्ष इहाजनि।
तदमितिः सकलैरपि यत्र तैर्व्यरचि सा च तिथिः किममीकृता ॥६३॥

[विरहिभिरिति [1]] खलु इति मन्ये। यः पक्षो विरहिभिः बहुमानमवापि [2] स पक्षो बहुलोऽजनि [3]। बहु लाति गृह्णाति इति बहुलः [4]।

2 P. असित। 3 P. add. आर्णवं समुद्रोत्पन्नम् 4 P. om. ततश्च 5 P. स्वयं 6 P. वारं नूतनं सत् उदेति 7 P. add. आत्मवमिति पाठे लवं लेशमप्यभिवाप्य निपीय जनितक्षयमपीति योज्यम्। अङ्कुरमात्रमपि न शोषितमित्यर्थः। अथवा नवं देशालेशमपि अव्यभिव्याप्य उदेति योज्यम्। व्यतिरेकविरोधौ ॥६१॥
1 P. विरह। 2 B om. विसर्गः 3 P. add. अनुप्रासः काव्यलिङ्गमतिशयोक्तिर्विरोधश्च ॥६२॥ 1 P. विरहिभिः। 2 P. add. प्यन्तमप्यन्तमपि वा 3 P. add. बहुमानमस्याऽस्तीति बहुलः। सिध्मादिपाठात् लच्। अथवा बहुमानं लायते
contd.

सर्ग ४ 32

चन्द्राभावादन्धकारपक्षो जनितो यत्र यस्यां तिथौ तस्य बहुमानस्य अमितिः अतिमात्रता। मितिरहितत्वं तैः सकलैरपि विरहिभिः व्यरचि। किं सा तिथिः अमीकृता अमावास्या कृता। अनया अमा कृता अमीकृता मानं मा प्रमाणम्। न मा अमा तस्यां (६१०) हि सर्वथा चन्द्राभावः। च्वि-प्रत्यये ईकारः[6]॥ ६३॥

---

स्वरिपुतीक्ष्णसुदर्शनविभ्रमात् किमु विधुं ग्रसते स विधुन्तुदः।
निपतितं वदने कथमन्यथा बलिकरम्भनिभं निजमुज्झति ॥ ६४॥

---

[स्वरिपुतीक्ष्णेति][1] स विधुन्तुदो राहुः विधुं किमु स्वास्यो रिपुः। रा। रिपोर्वा[2] इति व्याख्याने प्रत्यनीकत्वम्। [यः] तीक्ष्णः सुदर्शनः [श्री]कृष्ण-चक्रं तस्य विभ्रमात्[3] भ्रान्त्या ग्रसते, न तु चन्द्रं मत्वा। अन्यथा[4] तं चन्द्रं निजं बलिकरम्भनिभं कथं वदने निपतितं सन्तमुज्झति। राहोर्बलिदाने करम्भो दधिमिश्रो नैवेद्यम्। निजवदनमिति वा पाठः। निजे वदने इति वा ॥६४॥

---

वदनगर्भगतं न निजेच्छया शशिनमुज्झति राहुरसंशयम्।
अशित गलत्ययमत्ययं सखि! विना गलनालबिलाध्वना ॥ ६५॥

---

Contd. आप्यते बहुलः। अथवा 4 P. add. अयित्वे 5 B परं च 6 P. add. पक्षे, बहुलशब्दः पुंलिङ्गः। यदाह—बहुलं भूरि वियतो बहुलः पावके शितौ। कृष्णपक्षे तु बहुलः सुरभ्यां नीलिकेलयोः ( )। उत्प्रेक्षाद्वयम्। ६३॥
1 P. स्वरिपु। 2 P. यः तीक्ष्णः here 3 P. भ्रान्त्या विभ्रमात् 4 P. अथवा
5 P. om. वा; and add. भ्रान्तिमाननुमानं च। अन्यस्तु किं चक्रभ्रमाद् ग्रसते, अपि तु न। किं तर्हि? एवमेव रिपुभ्रान्त्या चन्द्रं न ग्रसते इति व्याचष्टे। ६४॥

सर्ग ४ 33

वदनगर्भेति। असंख्य राहुवदनगर्भितं निजेच्छया शशिनं नोज्झति। किं तर्हि? अयमशित इव भक्षित इव अत्ययं मरणं विना जीवन्नेव चन्द्रो गलनालस्य कण्ठस्य बिलं छिद्रं तेनाऽध्वना गलति निःसरति॥ हे सखि!॥६५॥

[ऋजुदृशः कथयन्ति पुराविदो मधुजितं किल राहुशिरश्छिदम्।
विरहिमूर्द्धभिदं निगदन्ति न क्व नु शशी यदि तज्जठरानलः॥६६॥

[ऋजुदृश इति] पुराविदो विद्वांसः किल मधुजितं श्रीकृष्णं राहोः शिरश्छिदं कथयन्ति। परं ते ऋजुदृशः आर्यदृष्टयः। [यतः] विरहिणां मूर्द्धभिदं मस्तकच्छेत्तारं श्रीकृष्णं यत न निगदन्ति। यदि तस्य राहोर्जठरानलः स्यात्। शशी चन्द्रः क्व नु भवेत्। परं राहोर्मस्तकं छित्वा विरूपंकृतम्॥ज ॥६६॥

स्मरसखौ रुचिभिः स्मरवैरिणा मखमृगस्य यथा दलितं शिरः।
न/ सपदि संदधतुर्भिषजौ दिवः सखि! तथा तमसोऽपि करोतु कः॥६७॥

[स्मरसखाविति] यथा दिवः स्वर्गस्य भिषजौ अश्विनीकुमारौ स्मरस्य वैरिणा श्रीमहादेवेन दक्ष(१७६) प्रजापतेर्मखस्य मृगरूपिणो दलितं छिन्नं शिरः सपदि सन्दधतुः। किंभूतौ? रुचिभिः शोभाभिः स्मरस्य सखायौ। सतु स्मरवैरी। हे सखि! तथा तमसोऽपि राहोरपि शिरः कः करोतु सन्दधातु॥ ॥६७॥

1 P. वदन। 2 P. om. अयम् 3 P. add. अनुप्रास उत्प्रेक्षा विरोधश्च॥६५॥

1 P. ऋजु। 2 B पुर०; P. om. विदो 3 P. add. राहोः शिर इति षष्ठी। शिलापुत्रकस्य शरीरमिति तदुपचारान्भेदे। 4 P. च्छेत्तारं 5 P. शशी... जीवेत्। यदि... स्यात्। 6 P. न 7 P. add. काव्यलिङ्गम्॥६६॥

1 P. स्मरस। 2 P. यदा 3 BhP. यशस्य; edn. मखस्य 4 P. add. उपमा॥६७॥

नलविमस्तकितस्य रणे रिपोर्मिलति किं न कबन्धगलेन वा।
धृतिभिया भृशमुत्पततस्तमोग्रहशिरस्तदसृग्दृढबन्धनम्॥६८॥

[नलविमस्तेति[1]] वा अथवा रणे नलेन विमस्तकितस्य छिन्नशिरसः कस्यचिद्रिपोः कबन्धस्य गलेन कण्ठेन ~~संयुज्यते~~ [तमो-ग्रहस्य राहोः शिरो मस्तकं किं न मिलति न संयुज्यते[2]। किंभूतम्?। तस्य नल[3]शत्रुशिरसः असृजा नवरुधिरेण दृढं बन्धनं सन्धिर्यस्य तत्तथा। किं-भूतस्य [रिपोः]?। धृतिभिया धरणभयेन[4] भृशं दिवमाकाशम् उत्पततः। आकाशे वर्तमानं राहुशिरः उत्पततः रिपोः कण्ठे मिलितं सत् परिपूर्णो राहु-र्भवति॥६८॥ [5]

सखि! जरां परिपृच्छ तमःशिरः सममसौ दधताऽपि कबन्धताम्।
मगधराजवपुर्दलयुग्मवत्किमिति न व्यतिसीव्यति केतुना॥६९॥

[सखि! जरामिति[1]] हे सखि! [त्वं] जरां राक्षसीं परिपृच्छ वादय[2] तत्किम्[3] असौ जरा तमसो राहोः शिरः[4] केतुना ग्रहेण सह किमिति न व्यतिसीव्यति [तमःशिरः इति व्यपदेशिवद्भावेन विहितायाः षष्ठ्याः समासः।] केतोः कबन्धः राहोर्मस्तकं [च] उभयमपि विनिमयेन कथं[5] न धास्यति। किंभूतेन?। कबन्धतां दधता। अपि समुच्चये। केतुना[6] चेत्यर्थः। किंवत्?। मगधराजस्य वपुषो यद्दलयुग्मम् अर्द्धद्वयं तद्वत्। यथा [चण्ड-कौशिकप्रसाद[7]समासादितमाम्रफलं बृहद्रथेन पत्नीभ्यां दत्तम्। ताभ्यां द्विधा कृत्वा[8] भक्षितम्।] जन्मकाले जरासन्धस्य फालिद्वयं प्रादुर्भूतम्। चतुष्पथे

1 P1 नल। 2 P1 add. तमोग्रहस्य शिर इति अभेदेऽपि भेदोपचारः। 3 P2 नलस्य 4 B धभिया; P2 धरणस्य 5 P1 add. काव्यलिङ्गम्॥६८॥ 1 P1 सखि। 2 P1 वादयस्व 3 P1, P2 om. तत्किं 4 P1 add. अपि 5 P1 किं; P2 om. कथं 6 P1 add. तमोमस्तकं च 7 P1 समासादितप्रसादम् 8 P1 भूत्वा

त्यक्तम्] जरया मीलितम्[9] ॥६९॥

वद विधुन्तुदमालि! म(७०a)दीरितैस्त्यजसि किं द्विजराजधिया[1] रिपुम्[2]।
किमु दिवं पुनरेति यदीदृशः पतित एव निषेव्य हि वारुणीम् ॥७०॥

[वद[3] विधुन्तुदमिति] हे आलि! त्वं[4] मम ईरितैर्वाक्यैर्विधुन्तुदं राहुं वद। त्वमिमं रिपुं चन्द्रं द्विजराजधिया ब्राह्मणोऽयमिति भयेन किं[5] त्यजसि?। [द्विजराजधियेति वा पाठः।] हि[6] यस्मादेष वारुणीं निषेव्य पतितः किमु दिवं पुनरेति यदीदृशः द्विजराजो भवेत्तस्मान्नैवायं द्विजराजः[7]। नित्यं मद्यं ब्राह्मणो वर्जयेत् ( ) इति निषेधात्। [अथवा] यत्कारणादयमीदृशः पातकी विरहिणीहन्ता वारुणीं दिशम् अथ च मदिरां निषेव्य [किमु] दिवमाकाशम् अथ च स्वर्गं किमु [पुनर्] [अपि] एति आगच्छति। किंतु[8] पतित एवाऽस्तमित एव। अथ च द्विजराज इरीदृशमद्यपानेन पतित एव। पतनीयेन कर्मणा कृतेन[9] ॥७०॥

दहति कण्ठमयं खलु तेन किं गरुडवद्द्विजवासनयोज्झितः।
प्रकृतिरस्य विधुन्तुद! दाहिका[1] मयि निरागसि का वद विप्रता ॥७१॥

[दहति[2] कण्ठमिति।] खल्विति शङ्के। अयं चन्द्रः तव कण्ठं गलि[3]तः सन् दहति यथा मां दहति। किं तेन कारणेन द्विजस्य वासनया श्रद्धया त्वयाऽपि गरुडवद् अयमुज्झितः। हे विधुन्तुद! अस्य दाहिका[4] दहनशीला प्रकृतिः स्वभावः। यतो मयि स्त्रियां निरागसि निरपराधायाम् अस्य का विप्रता कीदृशी ब्राह्मणता वद। ब्राह्मणाः किल अपराधं विना न पीडयन्ति।

9 P1 add. इत्युपमा ॥६९॥ 1 B P2 text °धिया 2 B text विधुम् 3 P1 वद विधुन्तुद। 4 P1 om. त्वं 5 P1 add. न 6 P2 om. हि...°देष 7 P2 om. भवेत्...द्विजराजः 8 P1 add. इति निश्चितम् 9 P1 add. तस्माद् यद्यपि द्विजराजोऽयं भवति तथाऽपि पुनः प्राप्त्यभावात् द्विजराजबुद्ध्या द्विजराजधिया वा रिपुर्न त्याज्यः। समासोक्तिः॥ P2 recto contd.

— Collation no. 71 on P. 36 — contd.

सर्ग ४ 36

[तस्माद् द्विजोऽयं नैव] गरुडेन पुरा निषादभक्षणे ब्राह्मणः कण्ठं दहन् परित्यक्तः ॥ ॥७१॥

कलया
सकलया [किल दंष्ट्रया समवधाय यमाय विनिर्मितः ।
विरहिणीगणचर्वणसाधनं विधुरतो द्विजराज इति श्रुतः]॥७२॥

[सकलयेति] [अयं विधुः अतः द्विजानां राजेति श्रुतः प्रसिद्धः। अयं दन्तानां राजा किल। यतः सकलया कलया पूर्णया सह समवधाय कला एव दंष्ट्रा तया। सम्यगवधाय सम्बध्य यमाय अन्तकाय विनिर्मितः। किंभूतः? विरहिणीगणस्य चर्वणसाधनम्। दन्तेन हि चर्व्यते सर्वम् ॥७२॥

स्मरमुखं (७०b) हरनेत्रहुताशनाज्ज्वलदिदं चक्रुषे विधिना विधुः।
बहुविधेन वियोगिवधागसा शशमिषादथ कालिकयाऽङ्कितः ॥७३॥

[स्मरमुखमिति] अयं विधुर्नूनं स्मरस्य [रूपं] मुखं ज्वलत्सत् विधिना ब्रह्मणा हरस्य तृतीयनेत्रहुताशनाच्चक्रुषे। अथ बहुविधेन व/ वियोगिनां वधस्याऽऽगसा पापेन ~~कृत्वा~~ कृत्वा। शशस्य मिषात् कालिकया अङ्कितः लाञ्छितः ॥७३॥

cont'd sup. mg. add. अत्र समासोक्तिरलङ्कारः ॥७०॥
1 B ~~text~~ दाहिका 2 P. दह 3 P. गिलितः 4 P2 दाहिका 5 P2 add. कः 6 P. add. ब्राह्मणं तेजः ; P2 om. वद 7 P. add. उत्प्रेक्षा काव्यलिङ्गानुपमाऽतिशयोक्तिश्च ॥७१॥
1 P2 ~~text~~ श्रुतः 2 P. सकल 3 P. किल ~~here~~ 4 P. राजइति 5 P. add. सम्भावने वा 6 P2 अन्तकाय 7 P. add. वधायेति पाठे वधार्थं 8 P. add. श्रुतिरिति पाठान्तरम्। अनुप्रासः सापह्नवोत्प्रेक्षा ॥७२॥
1 P2 ~~text~~ विधिना चक्रुषे 2 P. स्मर 3 P2 add. च 4 P. om. लाञ्छितः; and add. अनुप्रासो रूपकमपह्नुतिश्च ॥७३॥

सर्ग ४ 37

द्विजपतिग्रसनाहितपातकप्रभवकुष्ठ[1]सितीकृतविग्रहः।
विरहिणीवदनेन्दुजिघृक्षया[2] स्फुरति राहुरयं न निशाकरः॥७४॥

[पुस्तकान्तरेऽयं श्लोको न भवति। द्विजपतीति।] अयं राहुः स्फुरति निशाकरो न भवति। कया?। विरहिणीनां वदनमेवेन्दुः तस्य जिघृक्षया। किंभूतः?। द्विजपतेश्चन्द्रस्य अथ च ब्राह्मणस्य ग्रसनेनाऽऽहितात् पातकात् प्रभवं यत् कुष्ठं रोगस्तेन सितीकृतः[4] श्वेतो[5] विग्रहः[6] शरीरं यस्य स तथा[7]॥७४॥

इति विधोर्विविधोक्तिविगर्हणं व्यवहितस्य वृथेति विमृश्य सा।
अतितमां दधती विरहज्वरं हृदयभाजमुपालभत[1] स्मरम् ॥७५॥

[इति[2] विधोरिति।] साऽतितमां विरहज्वरं दधती सती हृदयभाजमासन्नं स्मरमुपालभत[3]। किं कृत्वा?। इति विमृश्य। इतीति[4] किम्?। यदिदमिति विधोश्चन्द्रस्य व्यवहितस्य दूरस्थितस्य विविधयोक्त्या विगर्हणं निन्दनं [तत्] वृथा[5]॥७५॥

हृदयमाश्रयसे यदि मामकं ज्वलयसीत्थमनङ्ग। तदेव किम्?।
स्वयमपि क्षणदग्धनिजेन्धनः क्व भवितासि हताश। हुताशवत्?॥७६॥

[हृदयमिति[1]।] यदि त्वं मामकं मदीयं हृदयमाश्रयसे हे अनङ्ग।

1 P. + ext नरितीº 2 B + ext जिघत्सया 3 P om. किंभूतः?। 4 P. शितीकृत: 5 P2 विग्रहः here 6 P. श्वेतविग्रहः 7 P. add. उत्प्रेक्षा॥७४॥
1 B + ext ºजनुº 2 P. इति विधो। 3 P. ºलभते 4 P. इति किम्?। 5 P. add. अनुप्रासः॥; P2 [ed. sup. mg. add.] अतः स्मरोपालम्भनं कृतम्॥७५॥
1 P. हृदयमाश्रय।

तदेवेत्थं कथं ज्वलयसि। हे हुताश! हे निन्द्य! अनेन दग्धो निज आत्मा एवेन्धनं[3] येन स तथाविधः(71a) सन् स्वयमपि[4] क्व भवितासि। ~~अथवा~~ अभावमापत्स्यसे। हुताशवत्[5]। यथा वह्निः स्वाश्रयमिन्धनं[6][7] दहन् स्वयम्-अभावरूपो भवति। यतस्त्वमङ्गरहितः अन्यच्छरीरं नास्ति[8] ।।७६।।

पुरभिदा गमितस्त्वमदृश्यतां त्रिनयनत्वपरिप्लुतिशङ्कया।
स्मर! निरैष्यत[1] केनचनाऽपि न त्वयि किमङ्गिगते नयनैस्त्रिभिः ।।७७।।

[पुरभिदेति[2]] त्वं पुरभिदा श्रीमहादेवेन अदृश्यतां गमितः। कया? त्रिनयनत्वस्य [या] परिप्लुतिर्विप्लवो बाहुल्यं तया [तस्या वा] शङ्कया। यतः हे स्मर! त्वय्यङ्गिगते दृश्यतां गते किं केनचनापि त्रि[भि]र्नयनैर्न निरैष्यत[3]। अपि तु सर्वः कोऽपि त्रिनेत्रो(ऽ)भविष्यत्, अत्युन्मत्तत्वात्[4]। इण् ~~गतौ~~(।।२०) गतौ। क्रियातिपत्तिः, स्यत्, भावे आत्मनेपदम्। अथ च भवेद्-अङ्गितो द्रष्यः( )इति हलायुधस्मरणात्। त्वयि द्रष्ये सति। अत्रा-नुमानं प्रमाणमाह — लोकस्त्रिनेत्रो भवेत्। कामस्याऽङ्गितत्वात्[5]। यस्य यस्य कामोऽङ्गितः स स त्रिनेत्रः। यथा श्रीमहादेवः। तथा चायं कामोऽङ्गि-गतः[7]। तस्मात् त्रिनेत्रः। एकत्र द्रष्यः अपरत्र दृश्यः कामः[8] ।।७७।।

सहचरोऽसि रतेरिति विश्रुतिस्त्वयि च सत्यपि मे न रतिः कुतः।
अथ न सम्प्रति सङ्गतिरस्ति वामनु मृता न भवन्तमियं किल ।।७८।।

2 P. दग्धं निजमात्मीयमिन्धनं 3 P. add. निजमात्मीयम् इन्धनं स्वयं 4 B त्वमपि 5 B P. हुताशनवत् 6 P. स्वमाश्रय° 7 B °मिन्धनं 8 P. add. अनुप्रास उपमा च ।।७६।। 1 B2 text निरैक्ष्यत 2 P. पुरा; B2 सुरभिदेति। 3 B निरैक्ष्यत 4 P. add. अयम् प्रमाणकोपन्यासः। 5 B तस्य 6 P. add. कः त्रिनेत्रो भवेत् 7 B °गतत्वात् 8 P. add. उत्प्रेक्षाऽनुमानं च। अङ्गित इति श्लेषम् ।।७७।।

सर्ग ४ 39

[सहचरोऽसीति[1]] हे काम ! त्वं रते: सहचरोऽसि इति विश्रुति: । त्वयि च सत्यपि मे मम कुतो रतिर्नास्ति । अथवा सति कारणे[2] सम्प्रति वां युवयो: सङ्गतिर्नास्ति । किल यत: इयं रति: भवन्तमनु न मृता । अनुगमनं कुर्वती आकाशवाण्या निषिद्धा[3] ॥ ७८ ॥

रतिवियुक्तमनात्मपरस्त्र ! किं स्वमिव[1] मामपि तापितवानसि ॥
कथमतापभृतस्तव सङ्गमादितरथा हृदयं मम तप्यते[2] ॥ ७९ ॥ /प

[रतिवियुक्तमिति[3]] हे अनात्मपरज्ञ ! रत्या वियुक्तं स्वमात्मा-[4]
मिव मामपि[5] किं[6] तापितवानसि । स्वमपि मामिव पाठे । किमिति[8] उत्प्रेक्षायाम् । मामिव स्वमपि किं तापितवान् । अहम् अन्या त्वं चान्य इति न वेत्सि । इतरथा अन्यथा तव सङ्गमात् मम हृदयं कथं तप्यते दह्यते । किंभूतस्य तव । न तापं बिभर्तीति अतापभृत् तस्य तथा । त्वं तु विरहित्वात् तापभृत्[9] ॥ ७९ ॥

अनुममार न मार ! कथं नु सा रतिरतिप्रथिताऽपि पतिव्रता ॥
इयदनाथवधूवधपातकी दयितयाऽपि तयाऽसि किमुज्झित: ॥ ८० ॥

[अनुममारेति[1]] नु इति प्रश्ने । हे[2] मार ! मारणात्मक[3] ! सा रति:

1 P. सह । 2 P. युवयो: lacuna; P2 सम्प्रति युवयो: 3 P. add. रति: कामभार्या सुखं च । विभावना आक्षेप: काव्यलिङ्गं च । रतिशब्द: श्लेष: ॥ ७८ ॥

1 P2 for स्वमपि मामिव 2 B for दह्यते 3 P. रतिर्वियुक्तमित्यादि । 4 P2 स्वमिव आत्मानमिव 5 B ममापि 6 P. add. पूर्वं त्वं तनुं मां च कस्मात् 7 P. P2 om. असि 8 P2 om. किमिति उत्प्रेक्षायाम् 9 P. add. दह्यत इति कर्मकर्तरि । उपमोत्प्रेक्षानुमानं च ॥ ७९ ॥ 1 P. अनु । 2 B हि 3 P. मरणा°

अतिशयेन पतिव्रता इति प्रथिता[ऽपि][4] कथं त्वामनु पृष्ठतो न ममार। आशीरधितन्योश्च मृड् (का॰ ) इति दुर्गसिंहवचनात्। [म्रियतेर्लुङ्लिङोश्च (पा॰ I. iii. 61) इति स्मरणात्। लिङ्लुङोरपि संज्ञान्तरे] आशीरधितनी अन्विकरणव्यतिरेकेणाऽत्र परस्मैपदम्। किं तया प्रथितयाऽपि असि त्वमुज्झितः। किंभूतः?। इयतीनामेतावतीनाम[8]नाथानां वधूनां वधेन पातकी। आत्मघ्नः सम्प्रतीक्ष्यो हि महापातकि[को] दूषितः (याज्ञ॰ आचारा॰ 77) इति [श्री]याज्ञवल्क्यस्मृतेः[9] ॥८०॥

---

सुगत एव विजित्य जितेन्द्रियस्त्वदुरुकीर्तितनुं यदनाशयत्।
तव तनुमवशिष्टवतीं ततः समिति भूतमयीमहरद्धरः ॥८१॥

---

[1][सुगत एवेति।] यत्[तत्]त्वदुरुकीर्तिरेव तनुः शरीरं तां सुगत एव बुद्ध एव अनाशयत्। यतो[2] जितेन्द्रियः तथा च भग्नं[3] मारबलं येनेत्यादि श्रूयते। किं कृत्वा?। त्वां विजित्य[4] ततस्तव[5] तवाऽवशिष्टवतीमुद्धृतां तनुं शरीरं भूतमयीं पञ्चभूतात्मिकां समिति सङ्ग्रामे हरोऽहरत्। कीर्तिशरीरे गते पुरुषो निर्वीर्यो भवति[6] ॥८१॥

---

फलमलभ्यत यत्कुसुमैस्त्वया विषमनेत्रमनङ्ग! विगृह्णता।
अहह नीतिरवाप्तभया ततो न कुसुमैरपि विग्रहमिच्छति ॥८२॥

---

[1][फलमलभ्यतेति।] हे अनङ्ग! यत्त्वया कुसुमैर्[विषम]नेत्रं

---

4 P2 add. तत 5 P1 नलिङ्लिङो॰ 6 P1 लिङ्लुङ 7 P2 सङ् 8 P2 om. एता-वतीनाम् 9 P1 add. अनुप्रास उत्प्रेक्षाऽतिशयोक्तिश्च विरोधोऽपि ॥८०॥

1 P1 सुगत 2 P1 जितो 3 P1 येन निर्जितं भवपञ्जरम् 4 P1 P2 विजत्य 5 P1 ततश्च; 6 P2 om. -त 6 P1 add. अनुप्रासो रूपकं च ॥८१॥ 1 P1 फल

सर्ग ४ 41

श्रीमहादेवं विगृह्णतः फलं देहदाहलक्षणमलभ्यत । ततः कारणात् । अहह इति खेदे । नीतिरवाप्तमया सती कुसुमैरपि विग्रहं नेच्छति । पुष्पैरपि न योद्धव्यं किं पुनर्निशितैः शरैः[2] ?रिति नीतिशास्त्रम्[3] ।। ८२ ।।

---

अपि धयन्निनरामरवत्सुधां त्रिनयनात् कथमापिथ तां दशाम् । /८
भण रतेरधरस्य रसादरादमृतमाप्तघृणः खलु मा पिब ।। ८३ ।।

---

[अपि[1] धयन्निति ।] हे स्मर ! त्वमितरामरवत् सुधां [धयन्नपि] पिबन् सन् त्रिनयनात् तां देहदाहात्मिकां दशां कथमापिथ । यथाऽन्यैर्देवै-रमृतं पीतं तथा त्वयाऽपि । परममरो नाऽभूस्त्वम् । भण[2] वद । खलु इति मन्ये त्वममृतं नापिबः । किंभूतः ? । रतेः कान्तायाः अधरस्य[3] रसादरादाप्तघृणः प्राप्त-जुगुप्सः सन् । अमृतं नीरसमधररसात्[4] ।। ८३ ।।

---

भुवनमोहजजेन किमेनसा तव परेत ! बभूव पिशाचता ।
यदधुना विरहाधिमलीमसामभिभवन् भ्रमसि स्मर ! मद्विधाम् ।। ८४ ।।

---

[भुवनेति[1] ।] हे परेत ! हे प्रेत[2] ! तव भुवनस्य मोहनात् जातेनैनसा पापेन किं पिशाचता बभूव[4] ? यस्त्वमधुना विरहस्याऽऽधिना मलीमसां /त्व मद्विधां स्त्रियमभिभवन् भ्रमसि[5] हे स्मर ![6] मलीमसमशुचिं किल प्रेतोऽभिभवति ।। ।। ८४ ।।

---

2 P. add. युद्धे विजयसन्देहः प्रधानपुरुषक्षयः ( )।। 3 P. add. प्रतीयमानो-त्प्रेक्षा ।। ८२ ।। 1 P. अपि । 2 P. वद भण 3 P. अधरमादरात् 4 P. add. उत्प्रेक्षा ।। ८३ ।। 1 P. भुवन । 2 P. add. मृत ! 3 P. मोहजातेन 4 P. add. हे स्मर ! 6 P. add. अनुमानम् । तत्र हि किमिति संशयपूर्वप्रश्ने उत्प्रेक्षाव्यञ्जकमुत्प्रेक्षा इत्यन्ये । तत्र तु उत्प्रेक्षितस्य तात्त्विकेन रूपेण परिवर्जितत्वात् निरुपाख्यप्रख्यस्य सिद्ध्यर्थं साधनवचनं गगनतलं सिद्ध्ये । साधनोपादानमिवाऽत्यन्तप्रसमीचीन-मिति निर्विषयत्वमेतस्याऽनुचितार्थता दोषः ।। 6 P. om. मलीमस॰ ... भवति ।। ८४ ।।

बत ददासि न मृत्युमपि स्मर![1] स्खलति ते[2] न धनुः कृपया करात्।
अथ मतोऽसि मृतेन च मुच्यते न खलु मुष्टिरुरीकृतबन्धनः॥८५॥

[बत[3] ददासीति] हे स्मर! त्वं[4] मम बत मृत्युमपि न ददासि। किं च ते[5] तव करात् कृपया[6] धनुर्न स्खलति न[7] पतति। अथवा सातं त्वं मृतोऽसि। अतो मृतेन पुरुषेण खलु[8] निश्चितं[9] मुष्टिर्न मुच्यते। किंभूतः? उरीकृतमङ्गीकृतं बन्धनं येन[10] स [तो]था। [अतो बद्धमुष्टित्वात् न ददासि। न च धनुः स्खलति][11]॥[12]॥८५॥

दृगुपहत्यपमृत्युविरूपताः[1] शमयते परनिर्जरसेविता।
अतिशयान्ध्यवपुःअतिपाण्डुताः स्मर! भवन्ति भवन्तमुपासितुः॥८६॥

[दृगुपहतीति[2]] परेषामन्येषां निर्जराणां देवानां सेविता ~~पुरुषः~~ [श्रीकालेश्वरी श्रीवैद्यनाथश्रीसूर्यादीनां सेवकः] पुरुषः[3] दृशा[4]मुपहतिम् अपमृत्युं विरूपतां च शमयते।[5] परं हे स्मर! भवन्त[6]मुपासितुः पुरुषस्याऽतिशयेनाऽऽन्ध्यं कामान्धता वपुषः [अतिः] अयरोगेण मृत्युः पाण्डुता विरूपता च एताः प्रत्युत भवन्ति[7]॥८६॥

1 B text स्मरः 2 P2 text कृपया न धनुः 3 P1 बत 4 P2 add. मे 5 B तव ते 6 P1 P2 add. वा 7 P2 om. न पतति 8 P1 add. किल 9 P1 P2 om. निश्चितं 10 P1 यस्य; P2 यस्या 11 P2 पतति 12 P1 add. अनुप्रास आक्षेपश्च उत्प्रेक्षेत्यन्यः। तत्तु विचारासहम्॥८५॥

1 B ०हस्त्य० 2 P1 दृगुपहत्यपमृत्यु इत्यादि। 3 P1 add. अपरनिर्जरसेवित्वमित्यन्यः 4 B दृशानु० 5 P2 श्रीकालेः ... सेवकः here 6 B भवतः 7 P1 add. व्यतिरेको विषमोऽनुप्रासश्च॥८६॥

स्मर! नृशंसतमस्त्वमतो (नृउ१) विधिः सुमनसः कृतवान् भवदायुधम्।
यदि धनुर्दृढमाशुगमायसं तव सृजेत् त्रिजगत्[1]प्रलयं व्रजेत् ॥८७॥

[स्मर[2]! नृशंसतम इति] हे स्मर! त्वं नृशंसतमोऽतिक्रूरः। अतो विधिर्ब्रह्मा भवत आयुधं सुमनसः पुष्पाणि कृतवान्। अथ [च] त्वं दुष्टमनाः[3] शस्त्रं च सुष्ठु मनः। यदि विधिः[4] तव दृढं[5] धनुः आयसं लोहमयम् आशुगं बाणं च सृजेत् तत्रिजगत् प्रलयं व्रजेत्[6] ॥८७॥

स्मर! रिपोरिव रोपशिखी पुरां दहतु ते जगतामपि मा त्रयम्।
इति विधिस्त्वदिषून् कुसुमानि किं मधुभिरन्तरसिञ्चदनिर्वृतः ॥८८॥

[स्मर[1]! रिपोरिति] हे स्मर! विधिः किमनिर्वृतः सन्[2] [इति हेतोः] तव इषून् कुसुमानि अन्तर्मधुभिर्मकरन्दबिन्दुभिरसिञ्चत [इतीति किम्?] [यतः] तव रोपाणां बाणानां[3] शिखी वह्निर्जगतां त्रयमपि मा दहतु। यथा[4] पुरां त्रयाणां रिपोः रोपशिखी पुरां त्रयं दग्धवान्[5] ॥८८॥

विधिरनंशमभेद्यमवेक्ष्य ते जनमनः खलु लक्ष्यमकल्पयत्।
अपि स वज्रमदास्यत चेत्तदा त्वदिषुभिर्व्यदलिष्यदसावपि[1] ॥८९॥

[विधिरनंश[2]मिति] विधिस्ते तव खलु शङ्के जनानां मन[4]श्चित्तम् अनंशं निरवयवम् अत एव चाभेद्यम्[3] अवेक्ष्य लक्ष्यं वेध्यमकल्प

1 P2 text प्रलयं त्रिजगत् 2 P. स्मर नृशंसतम इत्यादि। 3 P. दुष्टु॰ 4 P1 P2 तव विधिः 5 B धनुः दृढं 6 P. add. काव्यलिङ्गम्। सुमनस इति श्लिष्टम् ॥८७॥ 1 P. स्मर-रिपोः। 2 P. इति किम्? 3 P. शखी बाणानां 4 P1 P2 add. स्मरः 5 P. add. उपमा उत्प्रेक्षा च ॥ ~~८८~~ 6 B 89. ॥८८॥ 1 B text ॰विद॰ 2 P. विधि 3 P2 om. च 4 B वैध्य॰; P. ॰मवाकल्पयत्।

सर्ग ४ 44

यत् । चेत् यदि स ब्रह्मा तव वज्रमपि लक्ष्यमदास्यत् तदा तवेषुभिः[6] असावपि वज्रोऽपि विशेषेणाऽऽदलिष्यत् शतखण्डोऽभविष्यत्[7] ॥८९॥

---

यदतनुस्त्वमिदं जगते[1] हितं क्व स मुनिस्तव यः सहते हतीः ।
विशिखमाश्रवणं परिपूर्य चेदविचलद्भुजमुज्झितुमीशिषे ॥९०॥[2]

---

[यदतनुरिति][3] यत्[4] त्वमतनुः अङ्गरहितः इदं जगते[5] हितं पथ्यं[6] [चेत्] यदि त्वमाश्रवणं[7] विशिखं परिपूर्य अविचलद्भुजं यथा भवति[8] एव उज्झितुमीशिषे । तदा स क्व मुनिरपि अस्ति यस्तव हतीः प्रहारान् सहते[9] ॥९०॥

---

अपि विधिः कुसुमानि तवाशुगान् स्मर! विधाय न निर्वृतिमाप्तवान् ।
अदित पञ्च हि ते स नियम्य तांस्तदपि तैर्बत जर्जरितं जगत् ॥९१॥

---

[अपि विधिरिति][1] हे स्मर! विधिः कुसुमानि[2] [अपि] तवाऽऽशुगान् विधाय न निर्वृतिमाप्तवान् [ततः] स नियम्य [हि] निश्चितं[3] पञ्चैव [ते] अदित दत्तवान् । नाधिकान् । तदपि बत तैः जगत् जर्जरितम्[4] ॥९१॥

---

उपहरन्ति न कस्य सुपर्वणः सुमनसः कति पञ्च सुरद्रुमाः ।
तव तु हीनतया पृथगोकिका धिगियताऽपि न तेऽङ्ग! विगर्हणम् ॥९२॥

---

5 B अतिः; I2 यदि चेत् 6 P. add. बाणैः 7 P. add. विरोधः ॥८९॥
1 I2 for जगतो 2 P. I2-94 3 P. यदत । 4 P. यतः 5 B जगतो 8 add. लोकस्य 6 P. I2 om. पथ्यं 7 P. कः 8 P. प्राणान् 9 P. add. अनुप्रासो हेतुश्च ॥९०॥

1 P. अपि । 2 P. कुसुमान्यपि alt. आशुगान् 3 P. add. अवधारणे वा 4 P. add. तैरिति करणे तृतीया । कर्तृत्वोपचारो वा । विरोधः ॥९१॥

सर्ग ४ 45

[उपहरन्तीति][1] हे स्मर! पञ्च सुरद्रुमाः [मन्दाराद्याः] कल्पवृक्षाः कस्य सुपर्वणो देवस्य कति सङ्ख्याः सुमनसः पुष्पाणि नोपहरन्ति[2]। अपि तु बहून्यर्पयन्ति। तु पुनस्तव हीनतया पृथक्[3] एकिकां[4] सुमनस एकैकं कुसुममर्पयन्ति[5]। अङ्ग सम्बोधने[6] धिगिति खेदे [तव] विगर्हणमियता[7] एतावतापि नैव भवति[8] ॥८२॥

कुसुममप्यतिदुर्नयकारि ते किमु वितीर्य धनुर्विधिरग्रहीत्।
किमकृतैष[1] तवैकलदास्पदे द्वयमभूदधुना हि नलभ्रुवोः ॥८३॥

[कुसुममपीति][2] विधिः कुसुममपि धनुस्ते[3], तव वितीर्य किमु पुनरप्यग्रहीत्। किंभूतम्? अतिशयेन दुर्नयकारि। एष विधिः[4] किमकृत। न किमपि कृतवान्। हि यस्मात्[5] एकस्य तुच्छ[6] धनुषः आस्पदे स्थाने[7] अधुना[8] तव/स्य नलस्य भ्रुवौ धनुर्द्वयमभूत[9] ॥८३॥

(74b)
षड्तवः कृपया स्वकमेककं कुसुममक्रमनन्दितनन्दनाः।
कु/ ददति षड्भवते कुरुते भवान् धनुरिवैकमिषूनिव[1] पञ्च तैः ॥८४॥

[षड्तव इति][2] षट् ऋतवः कृपया स्वकं[क] आत्मीयं[यत्] एककं कुसुमं भवते[3] मिलित्वा षट् कुसुमानि ददति। किंभूताः? अक्रमेण युगपत् नन्दितं नन्दनं[5] वनं यैः ते तथा तैर्भवानेकं[6] धनुरिव कुरुते पञ्च इषूनिव कुरुते[7] ॥८४॥

1 । उप । २ । २ om. न 3 B पृथक् twice 4 R एककं 5 P। 2 उपहरन्ति 6 B धिगिति खेदे at the end. 7 P। तव विगर्हणं 8 P। add. काव्यलिङ्गं व्यतिरेकोऽपि ॥८२॥ 1 B text किमन्वद्र 2 P। कुसुम । 3 P। तुभ्यं तव वा 4 P। add. तव 5 P। add. वत 6 B तव 7 B स्थानके 8 R अधनु 9 P। add. तव वर्तते पाठः। उत्प्रेक्षा अतिशयोक्तिश्च ॥८३॥ 1 B text -वमिषूनिव 2 P। षट्; R षड्तवः। 3 P। add. ददति/ऋतौ षड्भवते इति क्वचित् पाठे 4 P। निन्दितं 5 R om. वनं 6 P। एवे 7 P। add. पूर्ववाक्यगतचन्द्रशब्दापेक्षया अस्तोरीति लचशब्दः पाठान्तरे प्रक्रान्तापेक्षः। उपमोत्प्रेक्षा च ॥८४॥

सह तया स्मर! भस्म धिगित्यभूः[1] पशुपतिं प्रति यामिषुमग्रहीः।
ध्रुवमभूदधुना वितनोः शरस्तव पिकस्वर एव स[2] पञ्चमः ॥९५॥

[सह[3] तयेति।] हे स्मर! त्वं तया इष्वा बाणेन सह[4] धिगिति[5] भस्माऽभूः। यामिषुं पशुपतिं प्रत्यग्रहीः[6]। ध्रुवमधुना[7] तव वितनोः शरीररहितस्य स पिकस्वर एव पञ्चमध्वनिः[8] पञ्चमः शरो[9]ऽभूत[10] ॥९५॥

६/ स्मर! स मधुरितैरफलीकृतो भगवतोऽपि भवद्दहनश्रमः।
सुरहिताय हुतात्मतनुः पुनर्ननु जनुर्दिवि तत्क्षणमापिथ ॥९६॥

[स्मर![1] स मधुरितैरिति।] हे स्मर! स[2] भगवतः श्रीमहादेवस्याऽपि[3] भवतो[4] दहनश्रमः मम दुरितैः[5] अफलीकृतः। ननु यस्मात् त्वं दिवि तत्क्षणं पुनरपि[6] जनुर्जन्म अवापिथ[7]। किंभूतः? सुराणां हिताय हुताः आत्मनस्तनुर्येन स तथा[8] ॥९६॥

विरहिणो विमुखस्य विधूदये शमनदिक्पवनः स न दक्षिणः।
सुमनसो नमयन्नटनौ धनुस्तव तु बाहुरसौ यदि दक्षिणः ॥९७॥

1 B text धिगि° 2 B न 3 P1 सहा। 4 P2 om. सह 5 P1 सगिति; P2 खिगिति 6 P2 lecto. inf. text add. धृतवान् 7 P2 lecto inf. text add. ध्रुवमुत्प्रेक्षाव्यञ्जकः। पञ्चम इति श्लेषम्। 8 P1 add. विशेषः आकृत्या 9 B स्वरो° 10 P1 add. उत्प्रेक्षा। पञ्चम इति श्लेषम् ॥९५॥ 1 P1 स्मर। 2 P1 om. स 3 P1 add. श्रमो 4 B भवेत् 5 B नविफलो° 6 B/P2 पुनरपि om. अवापिथ 7 P2 lecto. inf. text add. तस्मिन्नेव समये प्राप्तवानसि। 8 P1 add. अनुप्रासोऽतिशयोक्तिश्च ॥; P2 inf. text add. शम्भुकोपानलेन दग्धः किं जीवति यच्च जीवितो भवान् तन्मम पातकानां फलमित्यर्थः। अत्राऽतिशयोक्तिरलङ्कारः ॥९६॥

सर्ग ४ 47

[विरहिण इति ।][1] विरहिणः पुरुषस्य वियोगुदये विमुखस्य [सतः] शमनस्य यमस्य या दिक् दक्षिणा तस्याः पवनो मलयानिलो न[2] [स][3] दक्षिणः न अनुकूलः।[4] यद्वा दक्षिणस्याः[5] वायुः स दक्षिणो[6] भवत्येव। अथ च चन्द्रोदये पश्चिमाभिमुखस्य दक्षिणोऽपि वामो भवति। यः (75a) सर्वं शमयति तद्दिग्भवः कथमनुकूलः। यद्यसौ दक्षिणानिलः एव[7] पुनस्तव [तु] बाहुः स्यात्तदा दक्षिणः। तेन सम्बन्धेन भुजरूपेण दक्षिणः। न तु दक्षिणा-सम्बन्धात्। किं कुर्वन् [वायुः]? सुमनसः पुष्पाणि [धनुः] अरत्नौ प्रान्ते नमयन्। स्मरो हि दक्षिणभुजेन धनुर्नमयति[8] ॥८७॥

किमु भवन्तमुमापतिरेककं मदमुदान्धमयोगिजनान्तकम्।
यदजयत्तत एव न[1] गीयते स भगवान् मदनान्धकमृत्युजित् ॥८८॥

[किमु भवन्तमिति।][2] हे स्मर! यदुमापतिर्भवन्तमेव एककं मदस्य[3] मुदा अन्धं तथा अयोगिनो विरहिणो जनस्याऽन्तकं हन्तारम् अजयत्। तत एव स भगवान् मदमुदितो मदन[4] एव अन्धको[5] अन्धो मृत्यु-विरहिमारयिता तं जितवान् [स] तथा लोकैर्न किं गीयते? अपि[तु] तस्मादेव कारणात् ननु मदनजेता[6] अन्धकदैत्यस्य[7] जेता मृत्योः कालस्य जेता इति त्रयजेता[8] ॥८८॥

त्वामिव[1] कोऽपि परापकृतौ कृती न ददृशे न च मन्मथ! शुश्रुवे।

1 P1 विरहिणो वि। 2 P2 om. न 3 BP1P2 om. स; edr add. स 4 P2 अननु० 5 P1 om. च; P2 om. यद्वा 6 P2 दक्षिणा स्या 7 P2 om. तु 8 P1 add. अतिशयोक्तिः। दक्षिण इति श्लेषश्च। विरोधोऽपि ॥८७॥ ‖ 1 B text न twice 2 P1 किमु। 3 P2 मदनमुदा 4 P2 मद एव 5 P2 अन्ध० 6 P1 मदनस्य 7 P1 अन्धकस्य 8 P1 add. अनुप्रासः सापह्नवोत्प्रेक्षा च। कुत्रटेन च मतमित्यपह्नुतेः पृथक्क्रम ॥८८॥
1 B text त्वमपि

स्वमदहो दहनात् ज्वलतात्मना ज्वलयितुं परिरभ्य जगन्ति [ये] ॥९९॥

---

[त्वमिव[2] कोऽपीति] हे मन्मथ! त्वमिव[3] परस्यापकृतौ द्रोहे कृती दक्षः। को[ऽपि] न ददृशे न शुश्रुवे च। यस्त्वं[4] दहनात्[5] ज्वलताऽऽत्मना परिरभ्य[6] जगन्ति ज्वलयितुं स्वमात्मानम् अदहः। त्वं सर्वजनचित्तस्थत्वादात्मना दह्यमानेन सर्वमपि धक्ष्यामीति स्वयमधाक्षीः[7]॥९९॥

---

त्वमुचितं नयनार्चिषि शम्भुना भुवनशान्तिकहोमहविः[1] कृतः।
तव वयस्यमपास्य मधुं मधुं हृतवता हरिणा बत किं कृतम् ॥१००॥

---

[त्वमुचितमिति[2]] त्वं शम्भुना उचितं युक्तं नयनस्याऽर्चिषि[3] भुवनस्य शान्तिकार्थं सुखार्थं होमार्थं हविः होतव्यद्रव्यं कृतः। बत इति खेदे। तव वयस्यं मित्रं मधुं वसन्तमपास्य मधुं दैत्यं हृतवता [हरिणा] श्रीकृष्णेन किं कृतम्। न किञ्चित्[5] ॥१००॥

---

इति कियद्वचसैव भृशं प्रियाधरपिपासु तदाननमाशु तत्[1]।
अजनि पांशुलमप्रियवाक्ज्वलन्मदनशोषणबाणहतेरिव ॥१०१॥

---

[इति[2] कियदिति] तत्[3] तस्मात् [तत्] आननम् आशु पांशुलं[5] धूलियुक्तमिव अजनि[6] केन? । इति कियत्[7] स्वल्पमात्रेण वचसा एव कण्ठ-

---

2 P1 त्वमिव कोऽपीत्यादि। 3 B त्वमपि 4 P1 यत्त्वं 5 B दह्नात् 6 P2 परिज्वलयितुं 7 B त्वमधीक्षीः; P1 स्वमधाक्षीः; and add. अनुप्रास उपमाऽतिशयोक्तिश्च॥९९॥
1 B text °विधिः 2 P1 त्वमु। 3 P1 P2 om. नयनस्यार्चिषि 4 P1 शान्तिकार्यम् उपद्रवशमनेन 5 P1 add. अनुप्रासो रूपकमतिशयोक्तिश्च॥१००॥ 2 P2 text यत 2 P1 इति। 3 P2 तस्या तत 4 B आननं twice 5 B पांसुलं 6 P1 add. वचसः प्रक्रान्तत्वात् तत्कारणस्याऽऽननस्याऽपि प्रक्रान्तत्वमतिरमणीयत्वेन प्रसिद्धत्वं वा। 7 P1 कियता

शोषणात्[8]। किंभूतम्?। प्रियस्याऽधरं पिपासु[9]। उत्प्रेक्ष्यते — अप्रियया वाचा ज्वलन् कोपज्वलितो यो मदनस्तस्य शोषणेन [बाणेन] था हृतिहीनं तस्याः सकाशादिव पांशुलं जातम्। यः किल तृषितस्तस्य कण्ठशोषात् पांशुरिव जायते[10] ॥१०१॥

प्रियसखीनिवहेन सहाऽथ सा व्यरचयद्गिरमर्द्धसमस्यया।
हृदयमर्मणि मन्मथसायकैः क्षततमा बहुभा[1]षितुमक्षमा ॥१०२॥

[प्रियसखीति[2]] अथ कण्ठशोषणाक्रन्दनाशक्त्या सा दमयन्ती प्रियसखीनिवहेन सहार्द्धसमस्यया[3] गिरं व्यरचयत्। अर्द्धं सखी[4] वदति, अर्द्धं देवी वदति। [यतः] बहुभाषितमक्षमा। किंभूता?। मन्मथस्य सायकैर्हृदयमर्मणि क्षततमा[6] ॥१०२॥

अकरुणादव सूनशरादसून् सहजयाऽऽप[1]दि धीरतयाऽऽत्मनः।
असव एव ममाधि विरोधिनः कथमरीन् सखि! रक्षितुमात्थ माम् ॥१०३॥

[अकरुणादिति[2]] हे दमयन्ति! त्वमकरुणात् सूनशरात् कामात्[3] आत्मनोऽसून् प्राणानेव[4] रक्ष। क्व?। आपदि सत्याम्। कया?। सहजया धीरतया। [हे] सखि! ममाऽधाऽसवो [एव] विरोधिनो जाताः। प्राणा एव शत्रवः। तत्कथं तान् अरीन् रक्षितुं माम्[5] आत्थ त्वं वदसि[6] ॥१०३॥

8 P₂ ॰शोषात् 9 B ॰धरं 10 P add. उत्प्रेक्षा। लेशोक्तिश्चेत्यन्यः ॥१०१॥
1 B text ॰भाषितु॰ 2 P प्रियसखी। 3 P ॰समयस्यया 4 B देवी 5 B सखी 6 P add. हेतुः सहोक्तिश्चाऽनुप्रासोऽपि ॥१०२॥
1 B text ॰पदि 2 P अक। 3 B कामान् 4 B प्राणानेव 5 P₂ om. माम् 6 P add. इतोऽप्यस्तु वक्रोक्तिः ॥१०३॥

हितगिरं न शृणोषि किमाश्रवे! प्रसभमप्यव [जीवितमात्मनः।
सखि! हिता यदि मे भवसीदृशी मदरिमिच्छसि या मम जीवितम् ॥१०४॥

---

हितगिरमिति[1]।] (76a) हे आश्रवे! वचनकरे। दमयन्ति! हितगिरं किं न शृणोषि?। आत्मनो [जीवितं] जीवनं प्रसभमपि बलादप्यव रक्ष[2]। सर्वत एव आत्मानं गोपयेदित्यादिशास्त्रात्। हे सखि! यदि[3] त्वं मे मम[4] हिता भवसि तदीदृशी भवसि[5]। या त्वं जीवितं[6] मदरिं मम शत्रुभूतम् इच्छसि। यो हि हितो भवति स ईदृशो न भवति[7] ॥१०४॥

---

अमृतदीधितिरेष विदर्भजे! भजसि तापममुष्य किमंशुभिः।
यदि भवन्ति मृताः सखि! चन्द्रिकाः शशभृतः क्व तदा परितप्यते ॥१०५॥

---

[अमृतदीधितिरिति[1]।] ~~सखी~~ सखी[2] आह — हे[3] विदर्भजे![4] एषोऽमृतदीधितिस्[5]तत्किममुष्यांऽशुभिस्तापं[6] भजसि[7]।[8] दमयन्त्याह[9] हे सखि![10] यद्यस्य शशभृतश्[11]चन्द्रिकाः[12] दीधितयो[13] मृता[14] भवन्ति तदा क्व[15] परितप्यते[16] ॥१०५॥

---

1 P1 हित। 2 P1 रक्षयेत 3 P2 om. यदि 4 P1 मह्यं 5 P1 add. इति तच्छब्द सम्बन्धनीयः। अथवा सखिहिता त्वम् इत्येकं वाक्यम्। नैव हितेत्यर्थः। यदि मे मम ईदृशी भवसि। 6 P1 जीवितं aft. शत्रुभूतं 7 P2 add. तदा क्व परितप्यते ॥१०४॥ 1 P1 अमृत। 2 P2 om. सखी आह 3 P2 अहो 4 P2 add. भैमि 5 P1 add. सुधांशुः; P2 सुधाकरः तस्मादमुष्यां° 6 P2 add. मयूखैः किं 7 P2 add. वाहं 8 P2 add. आश्रयसे 9 P1 दमयन्ती न मृता दीधितयोऽस्येति मनसिकृत्य श्लेषेण आह।; P2 एषोऽमृतमयो वर्त्तते इति सखीवचः भैमी प्राह 10 P1 अस्य; P2 om. यद्यस्य 11 P2 add. चन्द्रस्य 12 P2 add. ज्योत्स्ना यदि चेत् 13 P2 ~~de~~ om. दीधितयो 14 P2 add. गतासवो 15 P2 कः 16 P2 add. अपि तु न क्वापीत्यर्थः। अतो मृताः। अतः परितापः ॥१०५॥

व्रज धृतिं त्यज भीतिमहेतुकामयमचण्डमरीचिरुदञ्चति।
ज्वलयति[1] स्फुरमातपमुर्मुरैरनुभवं वचसा सखि! लुम्पसि ॥१०६॥

[व्रज[2] धृतिमिति।] सख्याह—त्वं धृतिं व्रज। अहेतुकां[3] निष्कारणां भीतिं त्यज। यतोऽयम्[4] अचण्डमरीचिश्चन्द्रः उदञ्चति उद्गच्छति। दमयन्त्याह[5]—हे सखि! त्वं ममाऽनुभवं प्रत्यक्षं वचसा वचनमात्रेण लुम्पसि[6]। प्रत्यक्षेणाऽस्य मरीचयश्चण्डा अनुभूयन्ते। त्वं तु अचण्डतां वदसि। ततस्त्व- सखि वाक्यम् आप्तवाक्यमपि प्रत्यक्षविरुद्धम्। यतोऽयमातपस्य मुर्मुरैः[7] चूर्णैः स्फुटं प्रत्यक्षं मां ज्वलयति। [त्वचामिति पाठे त्वगेव कर्म।]॥१०६॥

अपि शपे हृदयाय तवैव यदि विधोर्न रुचेरसि गोचरः।
रुचिफलं सखि! दृश्यत एव यज्ज्वलयति त्वचमुत्कलयत्यसून् ॥१०७॥ (द्रु

अपि[1] शपे इति। सख्याह—अहं तवैव हृदयायाऽ[पि] शपे। अकरणीयमपि[2] शपथं करोमि। [हृदयमत्र ज्ञीप्सितमिति श्लाघह्नुङ् (पा॰ I.iv. 34) इत्यादिना सम्प्रदानम्।] यदि त्वं विधोश्चन्द्रस्य रुचेः कान्तेर्गोचरः[3] विषय-भूता नाऽसि।[4] दमयन्त्याह सोत्कण्ठम्—हे सखि! रुचेः प्रीतेः फलमिदं ननु[5] दृश्यत एव यदयं[6] चन्द्रः त्वचं ज्वलयति, असूनुत्कलयति निष्कासयति। यदि मयि रुचिः प्रीतिः स्यात्[7] न मां ज्वलयेत्। [नैव असून् उत्कलयेत्।]॥१०७॥

1 P2 text ज्वलयसि 2 P1 व्रज। 3 P2 om. अहेतुकां 4 P1 यत 5 P2 om. हे 6 P2 lecto ind. text add. नाशयसि। लुम्पसीति मुचादित्वान्नकारागमः। 7 P1 P2 मर्मरैः ॥१०६॥

1 P1 अपि। 2 P1 अकरीय॰ 3 P1 गोचरं 4 P1 add. चन्द्रचन्द्रिकाविषये त्वं न वर्तसे। अतः किं परितापेनेत्यर्थः। रुचिर्वाञ्छा अति श्लेषेण 5 P1 ननु; P2 om. ननु 6 P2 तत 7 P1 add. तत ॥१०७॥

सर्ग ४ 52

विधुविरोधितिथेरभिधायिनीं ननु[1] न किं पुनरिच्छसि कोकिलाम्।
सखि! किमर्थगवेषणया गिरं किरति सेयमनर्थमयीं मयि॥१०८॥

विधुविरोधीति[2]। सख्याह — त्वं पुनरपि कोकिलां किं नेच्छसि?। किंभूताम्?। विधोर्विरोधिनी[3] या तिथिरमावास्या तस्या अभिधायिनीमा[4]-कारिणीम्। [अमावास्याभिधायिनीं कोकिलाम् अपि किं पुनर्नेच्छसि इति वा योजना[5]] दमयन्त्याह — हे सखि! अर्थस्य गवेषणया[7] कुहूशब्देनाऽमा-वास्याऽभिधीयते। अनयाऽर्थगवेषणया किं कार्यम्[8]?। त्वे सेयं कोकिला मय्यनर्थमयीं गिरं किरति। विरहिणां पिकध्वनिरनर्थकः[9]॥१०८॥

हृदय एव तवाऽस्ति स वल्लभस्तदपि किं दमयन्ति! विषीदसि।
हृदि परं न बहिः खलु वर्तते सखि! यतस्तत एव विषी[1]दते॥१०९॥

हृदय[2] एवेति। हे दमयन्ति! स वल्लभस्तव हृदये एवाऽस्ति। हे दमयन्ति! तदपि[3] किं विषीदसि?। दमयन्त्याह — हे सखि! यतः[4] स मद्व-ल्लभः परं केवलं हृद्येव वर्तते न बहिर्दृश्यते। तत एव विषीदते॥१०९॥

स्फुटति हारमणौ मदनोष्मणा हृदयमप्यनलीकृतमेध ते। ।स्फु
सखि! हताऽस्मि तदा यदि हृद्यपि प्रियतमः स मम व्यवधापितः॥११०॥

स्फुटतीति[1]। सख्याह — मदनस्योष्मणा तापेन हारमणौ स्फुटति

2 P2 text अपि 2 P। विधु। 3 P ॰धिनी M P2 अभिधायिनी आकारिणी S P2 om. कोकिलाम् 6 P। योजना वा 7 P। गवेषया 8 B कार्यः 9 P। करति॥१०८॥
1 P2 text विषिधते 2 P। हृदय एवेत्यादि।; ~~स्थितैव~~ 3 P2 om. तदपि M P। om. यतः स — ॥१०९॥ 1 स्फुर।

[सति] अथ ते तव हृदयमपि [अनलङ्कृतं] न अलङ्कृतं, हाराभावात् अथ च अनलं नलरहितं कृतम् इति भ्रान्तिस्थाने जाते दमयन्त्याह – हे सखि! अहं हतास्मि। यदा यदि स मम प्रियतमो हृद्यपि हृदयेऽपि व्यवधापितः व्यवहितीकृतः। हृदयं चेदनलं कृतम् ॥११०॥

---

इयमुदीर्य तदैव मुमूर्च्छ सा मनसि मूर्च्छितमन्मथपावका।
क्व सहतामवलम्बलवच्छिदामनुपपत्तिमतीमपि दुःखिता ॥१११॥ /पि

---

इयमुदीर्येति। सा इयमुदीर्य तदैव मुमूर्च्छ। किंभूता? मनसि मूर्च्छितो वृद्धिंगतो मन्मथपावको यस्याः सा तथा। नन्वनलं कृतं तव हृदयमिति श्रवणमात्रात् कथं मूर्च्छां गता इत्याशङ्क्याऽऽह – दुःखिता अनुपपत्तिमतीम् अपि अघटमानामपि अवलम्बलवस्य छिदां क्व सहतां कथं क्षमते। तस्या हृदये नलोऽस्तीत्यालम्बनमासीत्। तदपि सखीवचनेन त्रुटितं भ्रान्तिस्थानं तु तत् ॥१११॥

---

अधित कापि मुखे सलिलं सखी प्यधित कापि सरोजदलैः स्तनौ।
व्यधित कापि हृदि व्यजनानिलं न्यधित कापि बिसं सुतनोस्तनौ ॥११२॥

---

1 P₁ स्फुर। 2 P₂ om. अथ च 3 P₂ om. कृतम् 4 P₁ add. श्लेषेण 5 P₁ भ्रान्ति अस्थाने ॥११०

1 P₁ इय। 2 P₁ मूर्च्छागता 3 P₁ दुःखिनो भावः 4 B ०मती 5 P₂ om. अघटमानामपि 6 B कथं क्षमताम् 7 P₁ add. दुःखिता दमयन्तीत्यन्वयः। तस्य 8 B P₂ त्रुटितभ्रान्ति० 9 P₁ तत। and add. अनुप्रासो रूपकमर्थान्तरन्यासो व्याख्यान्तरे काव्यलिङ्गं विरोधश्च ॥१११॥

सर्ग ४ 54

अधित[1] काऽपीति। तदनन्तरं काऽपि सखी मुखे सलिलम् अधित। काऽपि सरोगानां दलैः स्तनौ व्यधित[2] आच्छादयामास। काऽपि तस्याः हृदि व्यजनानि[लं] व्यधित। काऽपि सुतनोर्दमयन्त्यास्स्तनौ[3] शरीरे बिसं[4] पद्मिनीकन्दं न्यधित[5][6] ॥११२॥

---

उपचचार चिरं मृदुशीतलैर्जलजबालमृणालजलानिलैः[1]।
प्रियसखीनिवहः स तथा क्रमादियमवाप यथा लघु चेतनाम् ॥११३॥

---

उपचचारेति[2]। प्रियसखीनां निवहः स तथा तां मृदुभिः[3] शीतलैश्च जलजैर्बालमृणालैर्जलैर्व्यजनानिलैश्च चिरमुपचचार।[4] यथेयं दमयन्ती क्रमाच्चेतनां लघु शीघ्रमवाप[5][6] ॥११३॥

---

अथ कले! कलय श्वसिति स्फुटं चलति पक्ष्म चले! परिभावय।
अधरकम्पनमुन्नय मेनके! किमपि जल्पति कल्पलते! शृणु ॥११४॥
रचय चारुमति! स्तनयोर्वृतिं कलय केशिनि! केशसंयतम्।
अवगृहाण तरङ्गिणि! नेत्रयोर्जलझराविति शुश्रुविरे गिरः ॥११५॥

---

अथ[1] कले! इति। युग्मम्। अथेति गिरो वाणीः[2] शुश्रुविरे

---

1 P₁ अधि। 2 P₁ व्यधित 3 P₁P₂ om. विसर्गः 4 B बिसं 5 P₁ व्यधित 6 P₁ add. सर्वत्रैव सर्वत्रैक एव धातुरुपसर्गवशात् अर्थान्तरप्रतीतिः। अनुप्रासो जातिश्च। वक्ष्यमाणेन युग्मं वा ॥११२॥

~~1 P₁ उपच~~ 1 P₂ read जलादिभिः 2 P₁ उपच। 3 P₂ om. मृदुभिः 4 P₁ add. जलादिभिरिति पाठान्तरम्। आदिशब्दात् व्यजनानिलादीनां सङ्ग्रहः। बाल-मृणालेति पाठान्तरम् 5 B°माप 6 P₁ add. अनुप्रासो जातिश्च ॥११३॥

1 P₁ अथ ... रचयेत्यादि। 2 P₁P₂ om. विसर्गः

सर्ग ४ 55

अन्तः[3] पुरे – हे कले! सखि! त्वं कलय जानीहि स्फुरे प्रकम्प इयं दमयन्ती श्वसिति। हे चले! हे सखि[4]! अस्याः पक्ष्म चलति त्वं परिभावय विलोकय। हे मेनके! त्वमस्या अधरस्य कम्पनं स्फुरणम् उन्नय विचारय[5]। हे कल्पलते! इयं किमपि जल्पति इति शृणु[6] ॥११४॥

रचयेति।[7] हे चारुमति! त्वं स्तनयोर्वृतिं रचय। हे कैशिनि! त्वमस्याः असंयतं स्रस्तं कैश्यं केशकलापं कलय बधान। [केशाश्वाभ्यां यञ्छावन्यतरस्यामिति (पा० IV. ii. ४८) इति यञ्]। हे तरङ्गिणि! त्वमस्या[8] नेत्रयोर्जलझरावश्रुप्रवाहौ अवगृहाण अपनुद। कला-चला-मेनका-कल्पलता[9] – चारुमती-कैशिनी-तरङ्गिणीति[10] सखीनामानि[11] ॥११५॥/सखी

कलकलः स तदालिजनाननादुदलसद्विपुलस्वरितैरितैः।
यमधिगम्य सुतालयमेतवान् धृतदरः स विदर्भपुरन्दरः ॥११६॥ ।तै

कलकल[1] इति। तस्या आलिजनस्याऽऽननात् सः[2] कलकल उदलसत्[3]। किंभूतः?॥ ~~स्वरितैरितैः~~ स्वरितैरीरितैर्विपुलः[4]। यं कोलाहलमधिगम्य ज्ञात्वा स विदर्भपुरन्दरो भीमो धृतदरः सभयः सन् सुताया आलयमेतवान् गतः[5] ॥११६॥

3 Pl om. अन्तःपुरे M[2] om. हे सखि। 5 Pl. add. नशिमन्योरलिट्येत्वं छन्दस्यमिपचोरपि। ध्यानशन्मेनका चास्य व्योमानं लिडपे चरन् ॥(      ) ॥ इति वार्त्तिककारवचनात् छान्दसत्वेऽपि मेनकापदस्य महाकविप्रयोगादत्र प्रयोगः। 6 Pl. add. जल्पलतेति पाठान्तरम्। 7 Pl. add. द्वितीयश्लोकस्य व्याख्या 8 Pl. om. त्वम्; M[2] एतस्या 9 Pl. कैशिकी 10 Pl. चेति ॥ Pl. add. अनुप्रासो जातिश्च ॥११४-११५॥ 1 Pl. कल। 2 Pl. om. स 3 P[2] recto sup. text. add. अत्थितः 4 Pl. add. ईरितैरिति उल्लासस्य करणं वा। 5 Pl. add. अनुप्रासो जातिश्च ॥११६॥

सर्ग ४ 56

कन्यान्तःपुरबाधनाय यदधीकारान्न दोषा नृपं
द्वौ मन्त्रिप्रवरश्च तुल्यमगदङ्कारश्च तावूचतुः।
देवाकर्णय सुश्रुतेन चरकस्योक्तेन जानेऽखिलं
स्यादस्या नलदं विना न दलने तापस्य कोऽपि श्रमः॥ ११७॥

---

[1] कन्यान्तःपुरेति। तौ द्वौ नृपं भीमं [दमयन्त्याः] पितरमूचतुः। तुल्यं सदृशमेव वाक्यम् एकमेवेत्यर्थः। कौ के?[2] मन्(न्त्)त्रिप्रवरश्चाऽमात्यश्च[3] तथा अगदङ्कारश्च वैद्यश्च। यस्य मन्त्रिणोऽधीकारात् व्यापारात् कन्यान्तःपुरस्य बाधनाय[4] व्यभिचारादयो दोषो[5] न भवन्ति। [तथा यस्य वैद्यस्य अधिकारात् कन्यानां पीडनाय रोगादयो दोषा[6] न प्रभवन्ति]। हे देव! त्वमाकर्णय। अहं चरकस्य प्रणिधेः उक्तेन सुष्ठु श्रुतेनाऽऽकर्णितेन सर्वं जाने। अस्यास्त्वन्तस्तापस्य दलने नलं ददाति यः कश्चित्तं विना कोऽपि न श्रमः स्यात्[8] इत्यन्तःपुराधि[कृ]तमन्त्रिणो[ऽगदङ्कारस्य च] वचनम् एकमेव। तथाऽहं सुश्रुतेन आयुर्वेदग्रन्थेन तथा चरकग्रन्थस्योक्तेनाऽखिलं रोगनिदानं जाने। अस्या नलदं[9] सल्लकीमतिशीतलामोषधीं विना तापस्य दलने कोऽपि[10] न श्रमः स्यात्॥ [शार्दूलविक्रीडितं वृत्तम्।]॥ ११७॥

---

ताभ्यामभूद्युगपदप्यभिधीयमानं भेदव्यपा(या)कृति मिथः प्रतिघातमेव।
श्रोत्रे तु तस्य पपतुर्नृपतेर्न किञ्चिद्भैम्यामनिष्टशतशङ्कितया कुलस्य॥ ११८॥

---

1 P. कन्या। 2 P. om. विसर्गः 3 P2 om. अमात्यश्च 4 P2 बाधनायस्य 5 P2 दोषाय 6 P2 om. दोषा 7 P. add. किमूचतुरित्याह– 8 P. तथा अहं ...... न श्रमः स्यात् here 9 P. नलदम् उशीरम् अतिशीतलम् औषधम्। 10 P. add. औषधनिवहे। 11 P. add. श्लेषः। तुल्ययोगिता चेत्यन्यः।; P2 recto in the text add. अत्र तुल्ययोगिता श्लेषश्चालङ्कारः। चरक इत्यत्र स्वार्थे कः॥ ११७॥

तान्याम्भूदिति[1]। ताभ्यां मन्त्रिवैधाभ्यां युगपदभिधीयमानमपि तदेकं वाक्यं मिथः परस्परं प्रतिघातो यस्य तत्तथाविधं व्याहतमेवाऽभूत्। एकस्याऽन्यो वाक्यार्थः, अपरस्याऽन्यः। किंभूतयोः। भेदव्ययस्याऽभेदस्याऽऽकृतिर्यस्य तत्तथा अभिन्नाकारम्[2]। तु पुनस्तस्य नृपतेः श्रोत्रे कर्णौ न किञ्चित् पपतुः[3] न शुश्रुवाते[4]। किंविशिष्टस्य। भैम्यां सुतायामनिष्टानां शातस्य शङ्कितया आकुलस्य व्याकुलस्य। अतिव्याकुलतया राज्ञा तयोर्वाक्यं न चिन्तितम्। [यतः] अनिष्टशङ्कीनि बन्धुहृदयानि[5] ॥११८॥

---

द्रुतविगमितविप्रयोगचिह्नामपि तनयां नृपतिः पदप्रणम्राम्।
अकलयदसमाशुगाधिमग्नां झटिति पराशयवेदिनो हि विज्ञाः ॥११९॥

---

द्रुतविगमितेति[1]। नृपतिस्तां तनयां द्रुतं विगमितमपनीतं विप्रयोगस्य विरहस्य चिह्नं मृणालादिकं यस्याः तां तथाविधमपि पदयोः प्रणम्रां सतीम्। असमा विषमा आशुगा[2] बाणा यस्य स तथा तस्य कामस्याऽऽधिषु[3] वियोगपीडासु मग्नाम् अकलयत् ज्ञातवान्। हि यस्मात् ये विज्ञा विशेषज्ञास्ते झटिति परस्याऽऽशयस्याऽभिप्रायस्य वेदिनो भवन्ति[4] ॥११९॥

---

व्यतरदथ पिताऽऽशिषं सुतायै नतशिरसे सहसोन्नमय्य मौलिम्।
दयितमभिमतं स्वयंवरे त्वं गुणमयमाप्नुहि वासरैः कियद्भिः ॥१२०॥

---

1 P1 ताभ्याम्। 2 P2 अभिधाना° 3 P1 पततुः 4 P1 शुश्रुवतुः 5 P1 add. वसन्ततिलका वृत्तम्। विरोधो जातिश्च ॥११८॥

1 P1 द्रुत। 2 P1 om. आशुगा; P2 बाणा आशुगा 3 P2 कामस्य 4 P1 add. पुष्पिताग्रा वृत्तम्। विरोधोऽर्थान्तरन्यासश्च ॥११९॥

सर्ग ४ 58

व्यतरदथेति[1]। अथ पिता सुतायै आशिषं व्यतरत्। किंभूतायै? नतं लज्जया शिरो यस्याः तस्यै तथा। किं कृत्वा? अङ्कसा मौलिमुन्नमय्य। हे दमयन्ति! त्वं स्वयंवरे अभिमतं दयितं भर्तारं गुणमयं कियद्भिर्वासरै- रा/ अवाप्नुहि[2][3] ॥१२०॥

तदनु स तनुजासखीरवादीत्तुहिनऋतौ गत एव हीदृशीनाम्।
कुसुममपि शरायते शरीरे तदुचितमाचरतोपचारमस्याम् ॥१२१॥

तदन्विति[1]। स राजा तदनु पश्चात् तनुजायाः [स्वपुत्र्याः] सखीरवादीत्[2]। हि निश्चितम् ईदृशीनां किञ्चित् यौवनप्रवेशवतीनां तुहिनऋतौ हेमन्ते गते एव शरीरे कुसुममपि लग्नं सत् शर इवाचरति। कोमलत्वात् (77b) ज्ञात्वात्। अथ च [वसन्ते] कामबाणायते। तदस्यां विषये उचितमुपचारमाचरत। यूयं शीतोपचारं कुरुत[3]॥१२१॥

कतिपयदिवसैर्वयस्यया वः स्वयमभिलष्य वरिष्यते वरीयान्।
कृशिमशमनयाऽनया तदाप्तुं रुचिरुचिताऽथ भवद्विधाभिधाभिः ॥१२२॥

कतिपयेति[1]। हे सख्यः! कतिपयदिवसैः वो युष्माकं वयस्य-[2] [या] दमयन्त्या स्वयमभिलष्य वरीयान् भर्त्ता वरिष्यते। तत्तस्मादनया सुतया भवद्विधानां सखीनाम् अभिधाभिरुक्तिभिः[3] रुचिः शोभा आप्तुमुचिता [अर्हा]। अथ[4] पुनरपि स्वशरीरकान्तिः प्राप्यताम्[5]। कया? कृशिम्नः कृश-

1 P. व्यत। 2 B2 अवाप्नुहि 3 P. add. आशीः ॥१२०॥ 1 P. तद। 2 B2 om. वि-सर्गः 3 P. add. अनुप्रासो विरोध उपमाऽर्थान्तरन्यासः ॥१२१॥ 1 P. कति। 2 P. add. अथ 3 P. विधाभिरुपचारप्रकारैः 4 P. B2 om. अथ 5 P. add. कीदृशीत्याह -कृशिमशमनया कृशिमशमायेय नयो यस्याः सा तथा। अथवा ——

त्वस्य शमन। उपशमकारिता तया कृत्वा[6] ॥१२२॥

---

एवं यद्वदता नृपेण तनया नापृच्छि लज्जास्पदं[1]
यन्मोहः स्मरभूरकल्पि वपुषः पाण्डुत्वतापादिभिः।
यच्चाशीः कपटादवादि सदृशी स्यात्तत्र या सान्त्वना
तन्मत्वाऽऽलिजनो मनोऽब्धिमतनोदानन्दमन्दाक्षयोः ॥१२३॥

---

एवं[2] यदिति। यदेवं पूर्वोक्तं वदता सता नृपेण राज्ञा तनया लज्जाया[3] आस्पदं दमयन्ती नाऽपृच्छि। त्वं[4] [किं] लज्जसे? इति न पृष्टम्। यच्च[5] वपुषः पाण्डुत्वेन तापादिभिश्चास्याः स्मराद्भूतो[6] जातो मोहोऽकल्पि[7]। ~~इति अस्याशिषः~~ यच्चाशीः कपटात् तत्र प्रस्तावे सदृशी योग्या[8] सखीनां च[9] तस्याश्चोचिता या सान्त्वना सामवाक्यप्रयोगः स्यात् सा अवादि राज्ञोक्ता।[10] तत्सर्वं मत्वा आलिजनः स्वकीयं मनः आनन्दमन्दाक्षयोरब्धिं समुद्रमतनोत्। मनसि हर्षश्च लज्जा च समुद्रतुल्या बभूव। [आनन्दाङ्कता][11]।[12] ॥१२३॥

---

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।

---

6 P1 add. अभिधाभिरिति पाठे अभिधाभिरुक्तिभिः। अयमर्थः। कशिमशमनया कर्णभूतया रुचिः कान्तिः प्राप्तुमुचिता। अथ भवद्विधाभिः रुचिः योग्यवरविषयाभिलाषः कान्तिरेव वा प्राप्तुमुचिता। अनुप्रासे, रुचिरिति श्लेषः ॥१२२॥
1 P2 text लज्जापदं 2 P1 एवं यद। 3 P1 P2 पदं; P1 txt. नापृच्छि– किं तवेयं दुरवस्थेति। अथवा लज्जायाः पदं M P2 कि alt इति 5 P1 P2 प्रभृतिभिः 6 P1 om. जातो 7 P1 अकल्पयत च। 8 B1 P2 यच्चाशिषः; edn. यच्चाशीः 9 P2 om. च 10 P1 add. अथवा कपटात् यच्च सदृशीराशिरवादि। या च तत्र सदृशी सान्त्वना स्यात् सा च अवादि। इन्यत्रापि सम्बध्यते वा। 11 P2 om. आनन्दाङ्कता। 12 P1 add. शार्दूलविक्रीडितं वृत्तम्। रूपकं समुच्चयो भावशबलता च ॥१२३॥

सर्ग ४ 60

तुर्यः स्थैर्यविचारणप्रकरणभ्रातर्ययं तन्महा-
काव्येऽत्र व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥१२४॥[1]

श्रीहर्षमिति[2]। तस्य कवेरत्र महाकाव्येऽयं तुर्यश्चतुर्थः सर्गो
व्यगलत्। किंभूते? स्थैर्यविचारणं नाम बौद्धानां क्षणिकवादपक्षदुर्ललि-
तानां पराजयार्थं प्रकरणं ग्रन्थविशेषस्तस्य भ्रातरि। तदप्यनेन कृतमित्यर्थः।[3]
॥१२४॥

[1]श्रीमानाल्लिगपण्डितः स्वसमयाविर्भूतसर्पाश्रम-
श्चाण्डूपण्डितसंज्ञितं प्रसुषुवे श्रीगौरिदेवी च यम्।
इष्ट्वा षोडशिनि क्रतौ शतमखं सन्तर्प्य सोमग्रहैः
काव्ये नैषधसंज्ञिते स विवृतिं सर्गे चतुर्थे व्यधात् ॥१२५॥

इति [श्री[2]चाण्डूपण्डितविरचितायां नैषधदीपिका-
यां टीकायां[3]] चतुर्थः सर्गः समाप्तः[4]॥

1 P2 text add. वैदर्भीविप्रलम्भो नाम ॥४॥; 2 P1 श्रीहर्षमित्यादि। 3 P1 add.
अनुप्रासो रूपकं च ॥१२४॥

1 P1 om. the verse 2 P1 महापण्डितश्रीचाण्डू०; P2 श्रीपण्डितचाण्डू० 3 P1
add. वैदर्भीविप्रलम्भो नाम 4 P1 ॥ छ ॥ श्रीः ॥ शुभं भवतु ॥ छ ॥ कल्याण-
मस्तु ॥ छ ॥ श्रीः ॥ छ ॥

# पञ्चमः सर्गः।

पूर्वसर्गे दमयन्त्या विरहवर्णनमुखेन चन्द्रमसं मकरध्वजं च सखीसंवादमिषेण निन्दित्वा[1] स्वयंवरार्थम् इन्द्रादिलोक[3]पालानां दूतत्वाङ्गीकारं[3] विवर्णयिषुः श्रीहर्षः कविः[4] पञ्चमं सर्गमारभते।

यावदागमयतेऽथ नरेन्द्रान् स स्वयंवरमहाय महेन्द्रः[1]।
तावदेव ऋषि[2]रिन्द्रदिदृक्षुर्नारदस्त्रिदशधाम जगाम ॥१॥

[3]यावदागम[4]यते इति। स महेन्द्रः[5] अथ यावत् स्वयंवरमहाय नरेन्द्रानागमयते तावदेव इन्द्रं दिदृक्षुः नारद ऋषि[6] त्रिदशानां[7] धाम स्वर्गं जगाम।[8]तस्मिन् प्रस्तावे जगाम[9]॥१॥

नात्र चित्रमनु तं प्रययौ यत् पर्वतः स खलु तस्य सपक्षः।
नारदस्तु जगतो गुरुरुच्चैर्विस्मयाय गगनं विललङ्घे ॥२॥

नात्र[1] चित्रमिति। अत्रास्मिन्नर्थे न चित्रं[2] (न) आश्चर्यं यत् पर्वतनामा ऋषिः तं नारदम् अनु पृष्ठतः प्रययौ अनुजगाम। खलु यतः स

1 P. नन्दित्वा 2 P. add. चतुष्पथ० 3 P. ०करणं 4 P. महाकविरत ऊर्ध्वं।
1 P2 tear महीन्द्रः 2 P2 tear मुनि० 3 P. add. ॐ नमः सरस्वत्यै। 4 P. यावदित्यादि;
P2 यावदिति। 5 P1 P2 महीन्द्रः 6 P. om. ऋषिः 7 P. त्रिदशधाम 8 P2 om. तस्मिन्... जगाम 9 P. add. णीञ्जनुसम्परिच्छस्त्वे (पा० I. iii. 2) इति त्यत्र आगमेः क्षमायां मित्यात्मनेपदं वक्तव्यात् (वा० 105)। क्षमा उपेक्षा कालहरणम्। णिकारे समानस्य प्रकृतिभावो विभाषया। स्वागता वृत्तम्॥१॥ 1 P. नाम 2 P. यथा ~~अत्र~~

सर्ग ५ 2

पर्वतः तस्य नारदस्य सपक्षः सहचारी। अथ च पर्वतोऽपि[3] यदा सह पक्षतिभ्यां वर्तते तदा (78 a) सं[4] अनुगच्छति। तत्र चित्रं न भवति। तु पुनः यत् नारदो जगतो गुरुरपि[5] गगनं विलङ्घ्यते[6]। तत् उच्चैर्विस्मयाय बभूव। यः किल गौरवयुक्तो[7] भारवान् स गगनं यदा विलङ्घ्यते तदा आश्चर्यम्। गुरुत्वात् पतनमिति वैशेषिकसूत्राद्[8] ॥२॥

---

गच्छता पथि विनैव विमानं व्योम तेन मुनिना विजगाहे।
साधके[1] हि नियमोऽन्यजनानां योगिनां तु तपसाऽखिलसिद्धिः ॥३॥ खि

---

गच्छता[2] पथीति। तेन मुनिना विमानं विनैव पथि गच्छता सता[3] व्योम विजगाहे। हि यस्मात् साधके[4] उपकरणविषये यो नियमः नियतत्वं स[6] अन्यजनानाम्[7] इतरजनानामनेनैव करणेनेदं कर्त्तव्यम् इति नियमः। तु पुनर्योगिनां[8] तपसाऽखिला सिद्धिर्भवति[9] ॥३॥

---

खण्डितेन्दुभुवनाधिपमानाँल्लङ्घते स्म मुनिरेष विमानान्।
अर्चितोऽप्यतिथितामनुमेने नैव तत्पतिभिरध्वविनम्रः ॥४॥

---

खण्डितेन्दु[1]भवनादीति। एष मुनिर्नारदो विमानान् लङ्घते स्म[2]।

---

3 P1 om. अपि 4 P1 सोऽनुगच्छति 5 P1 add. जगतः पूज्यः। अथ च जगतः सकाशात् गौरववान्; P2 add. तं 6 B यत 7 P2 om. गौरव° 8 P1 add. विरोधः। सपक्षो गुरुरिति श्लेषम् ॥२॥

1 P2 tear साधने 2 P1 गच्छतो। 3 P2 om. सता 4 P1 add. साधने 5 B नियति° 6 P1 सोऽन्य° ~~7P2 योगिन~~ 7 B P1 P2 °जनार्थं; edr: जनानां 8 P2 योगिनः 9 P1 add. विशेषस्य सामान्येन वैधर्म्येण समर्थनादर्थान्तरन्यास उक्तनिमित्ता... विशेषोक्तिर्व्यतिरेकोऽनुप्रासः ॥३॥ 1 P1 खण्ड।; P2 खण्डितेन्द्विति। 2 B विलङ्घते; P2 लम्भते

सर्ग ५ 3

किंभूतान्?। खण्डित इन्दुभुवनादीनां चन्द्रलोकप्रभृतीनाम् अभिमानो यैः तान् तथा। चन्द्रलोकादपि विमानानि रम्याणि।[3] स नारदस्तेषां विमानानां पतिभिः[4] स्वैस्स्वस्थाने[5] स्थितैरधोविनम्रैः चरणपतितैरपि अर्चितो[6]ऽपि अभ्यर्थ्यमानोऽपि आतिथितां नैव अनुमेने।[7] आतिथ्यं नैव[8] जग्राह[9]॥४॥

तस्य तापनभिया तपनः स्वं तावदेव समकोचयदर्चिः।
यावदेव दिवसेन शशीव द्रागताप्यत न तन्महसैव॥५॥

तस्य[1] तापनेति। तपनः[2] श्रीसूर्यः तस्य नारदस्य तापन-भिया तापनात् भयेन स्वम् अर्चिः तावदेव समकोचयत्। तथा[3] स्वल्पं कृतं[4] यावदेव तस्य[5] नारदस्य महसा एवं[6] द्राक् झटिति न अताप्यत[7]। यथा श्रीसूर्यः तत्तेजसा न तापितः। क इव?। शशीव। यथा दिवसेन[8] शशी ताप्यते[9]॥५॥

पर्यभूद्दिनमणिर्द्विजराजं यत्करैरहह तेन तदा तम्।
पर्यभूत् खलु करैर्द्विजराजः कर्म कः स्वकृतमत्र न भुङ्क्ते॥६॥

3 P. add. इंदुभुवनादि इति पाठे इंदुभुवनं चन्द्रशालाशिरोगृहमिति यावत्। आदिशब्देन गिरिशिखरादीनां ग्रहणम्। इन्द्रभुवनादीति पाठान्तरम्। 4 B यतिभिः 5 P. स्वः स्वः 6 P2 अभ्यर्थितोऽपि 7 P. अतिथ्यं; P2 आतिथ्यतां 8 P.P2 नः 9 P. add. अनुप्रास उपमा विशेषोक्तिश्च। क्रियापदान्वयः॥४॥ 1 P. तस्या 2 P. तपना: 3 P. add. अति°; P2 add. अपि 4 P. कृतवान् 5 P2 om. नारदस्य 6 B च 7 B P2 अताप्यात 8 P. शशी दिवसेन; P2 दिवसे शशीन 9 P. add. यावदेव तन्महसैव न अताप्यत अपि तु तापित इति काकुव्याख्यानम्। अथवा यावदेव तस्य नारदस्य महसैव न न अताप्यत। अपि तु तापितः। यथा दिवसे शशी तन्महसा सूर्यमहसा न न ताप्यते। अपि तु ताप्यते इत्यन्वयः। तदा साधर्म्योपमा काव्यलिङ्गं वैधर्म्योपमाऽतिशयोक्तिश्चानुप्रासोऽपि॥

सर्ग ५                                  4

~~पर्यभूदिति। दिनमणिः श्रीसूर्यः यत्करैः किरणैः द्विजराजं चन्द्रं~~
पर्यभूत। अहह इति खेदे। तेन कारणेन तदा तं श्रीसूर्यं करैस्तेजोभिः द्विज-
राजो नारदः [पर्यभूत] परिभवति स्म। उक्तमिदम्। अत्र स्वेन कृतं कर्म
को न भुङ्क्ते ॥६॥

---

विष्टरं तटकुशालिभिरद्भिः पाद्यमर्घ्यमथ कच्छरुहाभिः।
पद्मवृन्दमधुभिर्मधुपर्कं स्वर्गसिन्धुरदितातिथयेऽस्मै ॥७॥

---

विष्टरं तटेति। स्वर्गसिन्धुर्गङ्गा अस्मै अतिथये नार-
दाय तटे [षु] कुशानां दर्भाणां मालयः पङ्क्तयस्ताभिर्विष्टरम् आसनम्
अदित। अद्भिः पानीयैः पाद्यं ददौ। [अर्घ्यं पाद्यानन्तरं कुर्वणाद्यर्घ्य-
मिति हि कल्पसूत्रे क्रमः। सूर्यलोकगमनान्तरं वा। कच्छरुहाभिः
दूर्वाभिरर्घ्यं ददौ] तथा गङ्गा पद्मवृन्दानां मधुभिर्मकरन्दैः मधु-
पर्कम् अदात् ॥७॥

---

स व्यतीत्य वियदन्तरगाधं नाकनायकनिकेतनमाप।
सम्प्रतीर्य भवसिन्धुमनादिं ब्रह्म शर्मभरचारु यतीव ॥८॥

---

स व्यतीत्येति। स नारदः वियत आकाशस्य अन्तर्मध्यम्
अगाधम् अपारं व्यतीत्य नाकनायकस्य इन्द्रस्य निकेतनं स्वर्गम्
आप। क इव? यतीव। यतं विद्यते यस्य [स] यती संन्यासी।

---

1 P. पर्यभूदित्यादि। 2 P. add. अहनीति षष्ठे दिवसे यत्र पर्यभूदित्यर्थः; 3 B. & P.
om. पर्यभूत; edr. add. पर्यभूत 4 P. इयुक्तमिव 5 P. नाम ॥६॥ 1 P. विष्टर;
P. विष्टरमिति। 2 P. पानीयैः twice 3 P. कच्छ०... ददौ here 4 P. ददे 5 P.
अदत्त 6 P. add. अनुप्रासस्तुल्ययोगिता च। 7 P. add. गृहागतस्य किल
विष्टराद्येक दीयते ॥७॥ 1 P. स व्य। 2 P. add. शर्मभरचारु 3 B. प्राप 4 P. यत

सर्ग ५ 5

अनादिं प्रवाहनित्यं भवसिन्धुं संसारसमुद्रं सम्प्रतीर्य ब्रह्म परमात्मानं स्वरूपं प्राप्नोति। किंभूतम्। शर्मणः सुखस्य महानन्दस्य भरेण। चारु[5] योगी मुक्तमेव[6] विद्यया संसारिणमात्मानं मन्यमानः पुनरपि शास्त्राचार्य-प्रसादात् मुक्तमेव जानाति। विस्मृतकण्ठ(78 b)गतचामीकरप्राप्तिवत्। प्राप्त[7]-मेवाऽऽत्मानं प्रापत्[8] ॥८॥

अर्चनाभिरुचितोच्चतराभिश्चारु तं सदकृताऽतिथिमिन्द्रः।
यावदर्हकरणं किल साधोः प्रत्यवायधुतये न गुणाय ॥९॥

अर्चनाभिरिति[1]। इन्द्रः तं नारदम् उचिताभ्यः सकाशात् उच्चतराभिः अर्चनाभिः चारु यथा भवति त्वं[2] सदकृत सत्कृतवान्। किं भूतम्। अतिथिम्। किल यस्मात् साधोर्विदुषः यावदर्हस्य उचितस्य करणं प्रत्यवायस्य धुतये पापपरिहाराय भवति, न[3] गुणाय। अतोऽधिकां पूजां[4] चक्रे[5] ॥९॥

नामधेयसमतासखमद्रेरद्रिभिन्मुनिमथाऽऽद्रियत प्राक्।
पर्वतोऽपि लभतां कथमर्चां न द्विजः स विबुधप्रियुलम्भी ॥१०॥

नामधेयेति[1]। अद्रिभिदिन्द्रः अथ प्राक् प्रथमं अद्रेः[2] नाम-धेयेन[3] समता साम्यं तया सखायं पर्वतं मुनिम् आद्रियत[4] अपूजयत्। युक्तो-

5 P2 add. विसर्गः 6 B युक्तमेव 7 B प्राप्तं° 8 P1 प्राप्नोति; and add. अनादीति ब्रह्मविशेषणमित्यपि केचित्। वियदम्लमिति पाठान्तरम्। अनुप्रासः पर्याय उपमा रूपकं च ॥८॥ 1 P1 अर्घा 2 P1 om. त्वं; P2 add. सत्येवं 3 P2 add. तु 4 B पूजां twice 5 P1 add. अनुप्रासोऽर्थान्तरन्यासः परिसंख्या च ॥९॥
1 P1 नाम 2 P2 om. अद्रेः 3 B नामधेयतत्सम° 4 B अद्रियत

सर्ग ५ 6

यमर्थः। स पर्वतोऽपि कथमर्चां न लभताम्। यतो द्विजः ब्राह्मणः तथा विबुधानां प्रभुमिन्द्रं लभते इत्येवं श्लिष्टः। अथ च विदुषां प्रभोः समीपं प्राप्तः पर्वतोऽपि जडोऽपि [द्विजः] पूजां लभते। ब्राह्मणो जायमानो हि पृथिव्यामधि जायते ( ) इति स्मरणात्। इतरथा योऽद्रिं भिनत्ति स कथं अद्रिस्वं पूजयति।[6] ॥१०॥

तद्भुजादतिवितीर्णसपर्या द्योद्रुमानपि विवेद मुनीन्द्रः।
स्वःसहस्थितिसुशिक्षितया तान् दानपारमितयैव वदान्यान् ॥११॥

तद्भुजादतीति।[1] मुनीन्द्रो नारदः तस्य इन्द्रस्य भुजात्[3] सकाशात् या दानस्य पारमिता परमप्रकर्षता तया एव[2] तान् द्योद्रुमानपि स्वर्गकल्पवृक्षानपि[4] वदान्यान् विवेद ज्ञातवान्। किंभूतया[5]। स्वः स्वर्गे[6] या सहस्थितिः इन्द्रस्य भुजेन सहावस्थानं तया सुशिक्षितया। किंभूतात् भुजात्। अतिशयेन वितीर्णा सपर्या पूजा येन तस्मात्तथा[7]। परममेव ~~पारम~~ पारमम्। पारममस्याऽस्तीति पारमिणो भावः पारमिता।[8] अथवा पारम् इता[9] प्राप्ता इति व्युत्पत्तिः। बौद्धग्रन्थे यथा प्रज्ञापारमिता। यद्वा[10] दान-पारमिता इत्यादयः संज्ञा ॥११॥

5 B याजमानो 6 P. add. अद्रेर्नामधेयस्यता स्वामिति वाच्यप्रौढिरोजो विरोधः कथंचित्। ~~अर्थ~~ पर्वतविबुधशब्दौ च श्लिष्टौ ॥१०॥ 1 P. तद्भुजे-त्यादि।[2] P. add. दातृतयैव न तु वल्गुत्वात् केन; P. ज्ञातवान् 3 B द्यौ० 4 P. स्वर्गद्रुमान् कल्पवृक्षानपि 5 B किंभूत्वा। 6 P. किंभूतान् भुजान्। 7 B तत्तदा० 8 P. add. इत्यादयः संज्ञा अतिशयोक्तिश्च। स्वर्गः त्रिविष्टपं द्योदिवौ इत्यादिदर्शनाच्च। द्योशब्द उकारान्तोऽप्यस्ति। भाष्ये ओतो णिदि (पा० VII. i. 90) इत्यत्र ओतो णिदिति न्यासान्तराम्नानात्। वामनोऽपि तपरकरणम्। ओन्निर्देशार्थमेव। केचिदोतो णिदिति पठन्ति। द्योशब्दोऽपि हि विद्यते। यदर्थं द्यौः द्यावो द्यावः। गौः स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशा-लयाः। सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम्। ( ) इत्यमर-
contd.

सर्ग ७ 7

मुद्रितान्यजनसंकथनः सन्नारदं बलरिपुः समवादीत्।
आकरः स्ववरभूरिकथानां प्रायशो हि सुहृदोः सहवासः ॥१२॥

मुद्रितान्येति[2]। बलरिपुरिन्द्रः नारदं समवादीत्[3]। किंभूतः?।
मुद्रितानि अन्येषां जनानां संकथनानि येन स तथा। तानि निषिध्य।
हि यस्मात् सुहृदोर्मित्रयोः सहवास उक्त मिलनं[4] [स्व]भूरिकथानां
[प्रभूरिकथानां] च प्रायशो[5] बाहुल्येन आकरः[6] खनिः[7] ॥१२॥

तं कथानुकथनप्रसृतायां दूरमालपनकौतुकितायाम्।
भूभृतां चिरमनागतिहेतुं ज्ञातुमिच्छुरवदच्छतमन्युः ॥१३॥

तं कथानुकथनेति[2]। शतमन्युरिन्द्रस्तमवदत्। किं कर्तु-
मिच्छुः?। स्वर्गे भूभृतां राज्ञां चिरम्[3] आरभ्य अनागते-
र्हेतुं कारणं ज्ञातुमिच्छुः। कस्यां सत्यामी?। दूरम् अतिशयेन[4] आल-
पनस्याऽऽलापस्य कौतुकितायां कथानुकथनेन प्रसक्तानुप्रस-
क्त्यां[5] प्रसृतायां वर्धितायां सत्याम्[6] ॥१३॥

contd. दत्तवचनात्॥ 9 P2 om. इता 10 P2 तथा ॥११॥

1 P1 मुद्रितेत्यादि। 2 P1 add. नारदेन सह संवादं चकार। 3 P1 om.
किंभूतः?। 4 P1 मिलता। 5 B प्रायसो 6 B आकारः 7 P1 add. न
इत्येतदेव वा तपरकरणनिर्देशाद्योकारान्तोपलक्षणं द्रष्टव्यम्।
वर्णनिर्देशेषु हि तपरकरणं प्रसिद्धम्। अतिशयोक्तिरर्थान्तर-
न्यासो जातिश्च ॥१२॥

1 P1 तं कथा। 2 P1 om. आरभ्य 3 P1 add. अनागमनस्य 4 B
शयेनस्याल० 5 P2 प्रसत्त्यां 6 P1 add. अनुप्रासः ॥१३॥

सर्ग ५ 8

प्रागिव प्रसुवते नृपवंशाः किं नु[1] सम्प्रति न वीरकरीरान्।
ये परप्रहरणैः परिणामे विक्षताः क्षितितले निपतन्ति ॥१४॥ /त

[2]प्रागिवेति। हे नारद[3]! नृपाणां वंशाः अन्वयाः सम्प्रति [4]किं नु प्रागिव पूर्ववत् वीरा [एव करीरा] अङ्कुरास्तान् न प्रसुवते। वंशाङ्कुरे करीरम् ( ) इति। ये वीराः परिणामे अन्तकाले परेषां शत्रूणां प्रहरणैः [विक्षताः सन्तः क्षितितले निपतन्ति। न तु स्वात्मायां म्रियन्ते। अतश्च स्वर्गमायान्ति। वंशा अपि परेषां प्रहरणैः] कुठारैः विक्षताः भूमौ पतन्ति। परिणतत्वात्[5]॥१४॥

पार्थिवं हि निजमाजिषु वीरा दूरमूर्ध्वगमनस्य विरोधि।
गौरवाद्वपुरपास्य भजन्ते मत्कृतामतिथिगौरवऋद्धिम् ॥१५॥

[1]पार्थिवं हीति। हि यस्मात् वीराः पार्थिवं भौतिकं निजं वपुः आजिषु[2] अपास्य त्यक्त्वा। मया कृताम् अतिथीन् प्रति गौरवस्य बहुमानस्य ऋद्धिं समृद्धिं भजन्ते स्वर्गं आगच्छन्ति। किंभूतं वपुः?। गौरवात् गुरुत्वात् दूरम् अतिशयेन ऊर्ध्वगमनस्य विरोधि। गुरुत्वात् पतनम् ( ) इति कणादसूत्रम्[3]॥१५॥

अभिशापमिव नातिथयस्ते मां यदद्य भगवन्नुपयान्ति।
तेन न श्रियमिमां बहु मन्ये स्वोदरैकभृतिकार्यकदर्याम् ॥१६॥

1 P2 text नु 2 P. प्राग् 3 P. भगवन् 4 P. P2 नु 5 P. add. अनुप्रास उपमा रूपकं श्लेषश्च ॥१४॥

1 P. पार्थिव। 2 B P2 अपास्य आजिषु 3 P. add. ऋकारे समानस्य प्रकृतिभावो विभाषया। अनुप्रासः॥१५॥

सर्ग ५ 9

साभिशापमिति[1]। हे भगवन्! यत् ते नृपाः अतिथयः अद्य साभिशापं सापवादमिव मां न उपयन्ति[2]। तेन कारणेनाऽहम् इमां श्रियं न बहु मन्ये। यतः स्वस्य उदरस्यैव या [गे]का भृतिर्भरणं तदेव कार्यं तेन कदर्यम्[3][4]॥ ॥१६॥

पूर्वपुण्यविभवव्ययस्पृष्टाः श्रीभरा[1] विपद एव विमृष्टाः।
पात्रपाणिकमलार्पणमासां तासु शान्तिकविधिर्विधिदृष्टः॥१७॥

पूर्वपुण्येति[2]। श्रीभरा लक्ष्म्यतिशया विमृष्टाः सन्तः विपद इव आपद[3] एव। [किंभूताः?] पूर्वजन्मपुण्यस्य विभवः सञ्चयः तस्य व्ययेन विनाशेन स्पृष्टाः[4] [बद्धाः]। तत[5] एषां श्रीभराणां तासु आपत्सु सतीषु पात्राणां पाणिकमलेषु[6] अर्पणं दानं यतः[7] [8]स एव विधिना वेदेन दृष्टः शान्तिकविधिः। न विद्यया केवलया तपसा वाऽपि पात्रता। यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते(याज्ञ० आचारा० २००) इति[9] मनुः[10](?)॥ १७॥

तद्विसृज्य[ज्य] मम संशयशिल्पि स्फीतमत्र विषये सहसाद्य।
भूयतां भगवतः श्रुतिसारैरद्य वाग्भिरघमर्षणकल्पैः॥१८॥

तद्विसृज्येति[1]। तत् अद्य भगवतो वाग्भिर्मम अघमर्षस्य रुग्भिर्भूयताम्। [किंभूताभिः?] श्रुतीनां वेदानां सारैः। वेदे हि ऋतं च सत्यं चे(ऋग्वे. VIII. ८. ४८) तिस्रः ऋचः पापस्फोटिन्यः[2]। अघमर्षणो भाववृत्तमनुष्टुप् इत्यार्षं दैवतं छन्दश्च(       ) इत्यनुक्रमण्यामुक्तम्।

1 P. साभि० 2 P. [नन]यन्ति 3 B कदर्यम् 4 P. add. उपमाऽनुप्रासः। पूर्वेतर-श्लोकनिर्दिष्टस्य नृपवंशानां वीरकरीरप्रसवलक्षणसाध्यस्य आतिथ्यग्रहणाय वीरानागमनलक्षणस्य श्लोकद्वयेनोपन्यासात् श्लोकत्रयेणाऽनुमानम्॥१६॥
1 R text संपदो 2 P. पूर्वपुण्य 3 B व्यापद 4 B स्पृष्टाः 5 B तान्; R तत 6 R add यत् 7 R om. यतः 8 P. add. श्रीर्हि कमले तिष्ठति 9 P. add. अनुप्रासो रूपकमपह्नुतिश्च॥१७॥
1 P. तद्विसृज्ये। 2 R स्फोटिन्यः 3

सर्ग ५ 10

३। किं कृत्वा?। मम अत्राऽस्मिन् विषये नृपानागमनलक्षणे[4] स्फीतम् अघम् अज्ञानलक्षणं[6] [7]सहसा विसृज्य विनाश्य। किंभूतम्?। संशयशिल्पि सन्देहकारि। अज्ञानात् संशय उत्पद्यते[9]। तत्राऽनवधारणज्ञानं संशयः। स च समानधर्माऽनेकधर्मविप्रतिपत्त्युपलब्ध्यनुपलब्धिभेदात् पञ्चधा भिद्यते। यथा समानधर्मात् स्थाणुर्वा पुरुषो वा। अनेकधर्मात् [यथा] आकाश[:]विशेषगुणत्वात्[10] अनित्यः शब्दो, नित्यो वा। विप्रतिपत्तेर्वादिनां यथा – एके भौतिकानीन्द्रियाण्याहुः। अपरे त्वभौतिकानीति। उपलब्धेर्यथा – किं सत् उदकमुपलभ्यते उताऽसदिति। अनुपलब्धेर्यथा – किमविद्यमानः पिशाचो नोपलभ्यते किं वा विद्यमान इति (परि I P. 2) न्यायसारकारः[11]॥१८॥

इत्युदीर्य मघवा विनयर्द्धिं वर्धयन्नवहितत्वभरेण।
चक्षुषां दशशतीमनिमेषां तस्थिवान् मुनिमुखे प्रणिधाय ॥१९॥

इत्युदीर्येति[1]। मघवा[2] इति उदीर्य चक्षुषां दशशतीं दशानां शतानां समाहारस्तां साहस्रीं[3] दृशो मुनेर्नारदस्य मुखे प्रणिधाय तस्थिवान्। किंभूताम्?। अनिमेषाम्[4]। किं कुर्वन्?। अवहितत्वस्य भरेणाऽऽधिक्येन विनयस्य ऋद्धिं वर्धयन्[5] ॥१९॥

ओमित्थ तस्य विनये परिपाकं पाकशासनपदं स्पृशतोऽपि।
नारदः प्रमदगद्गदयोक्त्या विस्मितः स्मितपुरःसरमूचे ॥२०॥

4 P2 नृपागमन॰ 5 P. add. पापं दुःखं वा 6 B ~~आज्ञ~~ अज्ञाने 7 P. add. शीघ्रं 8 P. add. बलेन वा 9 P. add. संशयशल्पि वा 10 P. ॰गुणत्वात् किमयं शब्दो नित्यः स्यादनित्यो वेति 11 P. add. अघं दुःखे व्यसनेनसोः ( गङ्गा? ) ... रूपकमतिशयोक्तिर्वा। अघमिति क्लिष्टम् ॥१८॥ 1 P. इत्युदी। 2 P. add. इन्द्रः 3 B साहस्रा 4 P. अनिमिषाम् 5 P. add. जातिरनुप्रासोऽपि ॥१९॥

वीक्ष्य तस्येति[2] नारदः प्रमयेन हर्षेण गद्गदया [उत्त्या] ऊचे[3]। किंभूतः[4]?। विस्मितः साश्चर्यः। कथम्?। यथा भवति स्मितपुरःसरम्। अथ च यो विगतस्मितो भवति स कथं स्मितपूर्वाभिभाषी? इति[5] विरोधाभासः। कुत आश्चर्यमित्याशङ्क्याऽऽह — किं कृत्वा?। तस्य [पाक]शासनपदम् ऐन्द्रं पदं स्पृशतोऽपि विनये विवेकविषये परिपाकं परिणामं वीक्ष्य[6]। अपि च यः पाकं दैत्यं शास्ति तस्य विनये शासने परि समन्तात् पाकंशासनीयं वीक्ष्य आश्चर्यम्। अत्रापि विरोधाभासः[7] ॥२०॥

भिक्षिता शतमखी सुकृतं यत्तत्परिश्रमविदः स्वविभूतौ।
तत्फले तव परं यदि हेला क्लेशलब्धमधिकादरदं तु ॥२१॥

भिक्षिता शतमखीति[1]। यत्त्वया शतस्य मखानां समाहारः शतमखी सुकृतं भिक्षिता[2]। द्विकर्मकः। तस्य सुकृतस्य फले स्वविभूतौ ऐश्वर्ये यदि हेला अवज्ञा तत्परं केवलं तवैव, नान्यस्य। किंभूतस्य?। तस्य भिक्षणस्य[3] परिश्रमं वेत्तीति तस्य तथा[4]। तु यस्मात् क्लेशात् लब्धं वस्तु अधिकम् आदरं ददाति[5]। त्वं तु ऐश्वर्ये[ऽपि] विनीतः। अग्निष्टोमेन[6] यजेत स्वर्गकामः ( ) इति वेदवाक्यम्। यागक्रियायां कृतायामपि जीवतो यजमानस्य स्वर्गाभावात् वेदस्याऽप्रामाण्यं कुरुते। तच्च अन्यथा अनुपपत्तिबलेन मीमांसका अपूर्वं कल्पयन्ति। यागोऽपूर्वं नाम सुकृतं

1 P2 tear ०सरमास्थत 2 P1 वीक्ष्या। 3 P1 add. आस्थत 4 P1 कथम्।... ०सरम्। किंभूतः ... साश्चर्यः। 5 P1 om. इति 6 B P2 वीक्ष्य परिणामम् 7 P1 add. उत्त्या इति उपादानं विशेषणार्थम्। अनुप्रासः ॥२०॥

1 P1 भिक्षितेति P2 lecto sup. mg. add. याचिता इत्यर्थः। 3 P1 add. तस्याः शतमख्या वा 4 P1 add. परं तवैव[व] योऽभिस्तस्य नान्यस्येत्यस्य हेतुमाह। 5 B किन्तु 6 B यसेन

कृत्वा विनश्यति। अत्राऽर्थापत्तिः प्रमाणम्। इतरथा अप्रामाण्यं स्यात्। तर्थी अनङ्गीकारे पराहतं वेदवादिभिः[1]॥२१॥

सम्पदस्तव गिरामपि दूरा यन्न नाम विनयं विनयन्ते।
श्रद्दधाति क इवेह न साक्षादाह चेदनुभवः परमाप्तः॥२२॥

सम्पदस्तवेति[1]। तव गिरां वाचां दूरा अगोचरा अपि सम्पदः यत् नाम अहो विनयं विवेकं न विनयन्ते[2] नाऽपनयन्ति इति क इव जनः श्रद्दधाति। न कोऽपि मन्यते। इह चेत् यदि [साक्षात् प्रत्यक्षं] परं केवलं आप्तः प्राप्तः अनुभवः न[3] आह न वदति[4] [अथ च यः परमश्चाऽसौ आप्तश्च /प्त हितकारी[5] यत् वदति] तत् माननीयमेव[6]। कर्तृस्थे चाशरीरे कर्मणि (पा० I·iii·37) त्यात्मनेपदम्[7]॥२२॥

श्रीभरानतिथिसात्करवाणि स्वोपभोगपरतो न हितेति।
पश्यतो बहिरिवान्तरपीयं दृष्टिसृष्टिरधिका तव काऽपि॥२३॥

श्रीभरानिति[1]। हे इन्द्र! तव इति पश्यतः सतः इयम् अन्तर्मध्येऽपि अधिका काऽपि दृष्टेः सृष्टिः नानाधिक्यं बहिरिव। यथा बहिः शरीर-

7 P2 अग्निष्टोमेनेति वेदवाक्यम्। परम् अत्राऽर्थापत्तिः प्रमाणम्। पीनो देवदत्तेत्यादिक्षणविध्वंसिनो क्रिया। तर्हि यसक्रियया कथं स्वर्गावाप्तिः। नेवम्। क्रियया यसकर्त्तरि पुरुषे अपूर्वा परिणतिः स्वर्गाय भवति। 8 P2 तद्धा० 9 P1 add. काव्यलिङ्गम्॥२१॥ 1 P1 सम्प। 2 P1 नापनयन्ते; P2 वाप० 3 P2 om. न 4 P1 add. नेति पूर्ववाक्येन वा सम्बध्यते। 5 P2 add. अति० 6 P3 माननीय० 7 P1 add. प्रत्यक्षसदृशोः साक्षात् ( )। अनुप्रासोऽतिशयोक्तिश्च। परमाप्त इति श्लिष्टम्॥२२॥ 1 P1 श्रीभरा।

सर्ग ५ 13

दशोऽधिका सहस्रसङ्ख्याद्दृष्टीनां नयनानां सृष्टिः। किं[2] पश्यतस्तव ? इत्या-
शङ्क्याऽऽह - अहं[3] श्रीभरान् लक्ष्मीविलासान् अतिथिसात्करवाणि। मम
स्वस्याऽऽत्मन एव उपभोगपरता न हिता[4] ॥२३॥

आः स्वभावमधुरैरनुभावैस्तावकैरतितरां तरलाः स्मः।
द्यां प्रशाधि गलितावधिकालं साधु साधु विजयस्व बिडौजः! ॥२४॥

आः[1] स्वभावेति। आ इति हर्षे[2]। [हे] इन्द्र! तावकैः स्वभाव[3]-
मधुरैः अनुभावैर्वयम् अतितरां तरलाः स्मः [क्षुभिताः स्मः]। त्वं गलिता-
वधिकालम्[4] अवधिरहितं समयं यावत् द्यां प्रशाधि। साधु यथा भवति
[5]तथा स्वर्गं शाधि। तथा साधु विजयस्व। हे बिडौजः![6] हे इन्द्र![7] ॥२४॥

सङ्ख्यविदितलनुस्त्रवस्त्रजालिताखिलनिजाघलघूनाम्[8]।
यत्त्विहानुपगमः शृणु तासां तज्जगद्युवमुदन्तमुदन्तम् ॥२५॥

सङ्ख्यविदितेति[1]। तु पुनर्यत् इह स्वर्गे तासाम् अनुपगमः
तम् उदन्तं वार्तां शृणु। किं भूतम् ? जगतो यूनां तरुणानां (४०१) मुदो हर्षस्याऽ-
न्तं सीमानम् अथवा मुत् हर्षो[2] अन्ते यस्य तं तथा। किं विशिष्टानाम् ?।

2 P. किं पश्यतव 3 P. om. अहं 4 P. add. अनुप्रासोऽतिशयोक्तिश्च। उपमा व्यति-
रेकोऽपि ॥२३॥ 1 P. आं स्वभावे। 2 P. add. अव्ययानामनेकार्थत्वात्
निरर्थको वाक्यालङ्कारमात्रो वा आङ्। 3 P. स्वभावैः 4 B. अवधि° 5
P. om. तथा 6 P. हे बिडौज! 7 P. add. आः इति सविसर्गपाठो वा। तदा
बलिरिन्द्रो भविष्यतीति। मनसिकृत्य आः इति पीडायाम्। तदाह - आस्तु
स्यात् कोपपीडयोः ( ) रिति। अत एव गलितावधिकालं द्यां प्रशाधि
इत्याशीः। इति पाठान्तरे व्याख्यानम् ॥२४॥ 1 P. सङ्ख्या तु। 2 P. om. हर्षो —

सर्ग ५ 14 5

सङ्ग्रामे रणे विक्षतेभ्यस्तनुभ्यः स्रवता अस्रेण रुधिरेण आप्लुत यत [अखिलं] निजं शरीरम्[6] अघं तेन लघूनां निष्पापानाम्[7] ॥२५॥

सा भुवः किमपि रत्नमनर्घ्यं भूषणं जयति तत्र कुमारी।
भीमभूपतनया दमयन्ती नाम या मदनशस्त्रममोघम् ॥२६॥

[1] सा भुव इति। तत्र पृथिव्यां सा दमयन्ती नाम[2] भीमभूपस्य तनया कुमारी जयति सर्वोत्कर्षेण वर्तते[3] किंभूता? भुवः पृथिव्याः किमपि [अनिर्वचनीयं रत्नम्] अनर्घ्यम् अमूल्यं भूषणं या[4] अमोघं सार्थकं मदनस्य शस्त्रम्[5] ॥२६॥

सम्प्रति प्रतिमुहूर्तमपूर्वा काऽपि यौवनजवेन भवन्ती।
आशिखं सुकृतसारभृते सा क्वाऽपि यूनि भजते किल भावम् ॥२७॥

[1] सम्प्रति प्रतीति। सा सम्प्रति क्वाऽपि कस्मिन्नपि यूनि किलेति श्रूयते भावं भजते[2]। किंभूते? आशिखं शिखां[3] मर्यादीकृत्य नखात्प्रभृति सुकृतस्य सारैर्भृते पुण्यवति। किं कुर्वन्ती[4]? प्रतिमुहूर्तं क्षणे क्षणे यौवनस्य[5] जवेन अपूर्वा काऽपि अद्भुतरूपा[6] भवन्ती[7] जायमाना[8] ॥२७॥

4 P. om. यत 5 B P2 om. अखिलं; edr. add. अखिलं 6 P. शरीरं 7 P. add. अनुप्रासोऽतिशयोक्तिः ॥२५॥

1 P. सा भुवः 2 P. om. नाम 3 P. add. जयति सकर्मक एककर्मको द्विकर्मको वाऽनियतोत्कर्षे अकर्मकस्तु नियतोत्कर्षे। 4 B तथा 5 P. add. अतिशयोक्तिः ॥२६॥

1 P. सम्प्रति प्रतीत्यादि 2 B किंभूतम्? 3 P. शिखामभिव्याप्य 4 B P. कुर्वती? 5 P2 यौवनजवेन 6 B ०रूपं 7 P2 om. भवन्ती 8 P. add. अनुप्रासोऽतिशयोक्तिः ॥२७॥

कथ्यते न कतमः स इति त्वं मां विवक्षुरसि किं चलदोष्ठः।
अर्द्धवर्त्मनि रुणत्सि न पृच्छां निर्गमेण न परिश्रमयैनाम् ॥२८॥

कथ्यते नेति[1]। हे इन्द्र! त्वं मां किम् इति विवक्षुरसि[2]। स युवा कतम इति न कथ्यते।[3] किम्?। यतः त्वं चलन्तौ ओष्ठौ यस्य स तथा।[4] तत्[5] एनां पृच्छाम् अर्द्धवर्त्मनि किं न[6] रुणत्सि। अपि तु अर्द्धोक्ते स्थापय[7]। निर्गमेण एनां[8] न परिश्रमय। मा खेदं नैषीः ॥२८॥

यत्पथावधिरणुः परमः सा योगिधीरपि न पश्यति यस्मात्।
बालया निजमनःपरमाणौ ह्रीदरीशयहरीकृतमेनम् ॥२९॥

यत्पथावधिरिति[1]। यस्मात् एनं युवानं सा प्रसिद्धा योगिनां [धीः] बुद्धिरपि न पश्यति, योगिनोऽतीन्द्रिया[2] अपि न[3] जानन्ति। यस्याः योगिबुद्धेः पन्थाः यत्पथः, यत्पथस्याऽवधिः परमोऽणुः। परमाणवो हि योगिप्रत्यक्षाः। ततोऽपि सूक्ष्मतरं योगिबुद्धेरगोचरम्। किंभूतम्[4]?। तया बालया दमयन्त्या निजमनस्येव परमाणौ ह्रीर्लज्जा। सैव दरी तत्र शयनशीलं हरिं सिंहं कृतम्। च्विप्रत्ययः। [यथा] गिरिगुहास्थितं[5] सिंहं न कश्चन[6] पश्यति। परमाणुपरिमाणं मनः। कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव [illegible] इति। मनःपरमाणुमध्ये लज्जा।

1 P. कथ्यते। 2 P. add. इति किम्?। 3 P. add. कथं विवक्षा जाता इत्याह—यतः 4 P. add. ईषच्चलदोष्ठ इति वा। 5 B. बत 6 P. रुणत्सि नः 7 P. स्थापयति। काकुव्याख्या। 8 P. एताम् इमां
1 P. यत्प। 2 P. अतीन्द्रियज्ञा 3 P. परमाणुः 4 P. किंभूता?। 5 B. गिरिउहा० 6 P. कश्चित्

तन्मध्येऽपि स्थितं सिंहं नृपं तत्राऽपि बालया गृहीतं कः पश्यति। [बाल-ग्रहो हि दुर्मोक्षो भवति।] तथा च मुरारिः - मनोऽपि शङ्कमानाभिर्बालिकाभि[7]-रुपजीव्यते। अवक्षीणषाड्गुण्यमन्त्री मकरकेतनः॥ (       )। परमाणु-[सद्भावे] प्रमाणम् - अणुपरिमाणतारतम्यं[8] क्वचिद्विश्रान्तं परिमाणतार-तम्यत्वात्, महत्परिमाणतारतम्यवत्[9]। महत्त्वपरिमाणतारतम्यं यथा आकाशादौ[10] विश्रान्तम्। अत एव च नित्यत्वं तस्य सिद्धम्। यतः परं विभाज्यो[11] नाऽस्ति स परमाणुः। कारणविनाशात् कारणविभागाद्वा [वस्तुनो] विनाशः। [परमाणोश्च कारणानि] अवयवा एव न सन्ति। कुतस्तेषां विनाशाद्विभागाद्वा विनाशोऽस्य सम्भवति। ततो नित्यत्वम्। निरवयवत्वा[12]-द्विाऽतीन्द्रियत्वम्। ततश्च योगिनामेव प्रत्यक्षाः परमाणवः[13] ॥२९॥

---

सा शरस्य कुसुमस्य शरव्यं सूचिता विरहवाचिभिरङ्गैः।
तातचित्तमपि धातुरधत्त स्वस्वयंवरमहाय सहायम् ॥३०॥

---

सा[1] शरस्येति। सा दमयन्ती तातस्य पितुश्चित्तमपि[2] धातुर्ब्रह्मणः[3] स्वस्य[4] स्वयंवरमहाय[5] उत्सवाय सहायम्[6] अधत्त। ब्रह्मणोऽग्रे स्वयंवरार्थम् आदरश्चित्तेऽभूत्। अधुना[7] पितुरपि चित्ते स्वयंवरार्थ-कोऽभूत्? विरहवाचिभिः अङ्गैः पाण्डुत्वकृशत्वयुक्तैः कुसुमस्य शरस्य

---

7 B °र्बालिकाभि° 8 R °तारतम्यात् 9 R. om. महत्°... °तम्यवत् 10 R. add. च 11 B अस्ति न 12 R. R °त्वाद्यातीo 13 R. add. अनुप्रासो विरोधो रूपकमति-शयोक्तिश्च। पृच्छाया अर्द्धवर्त्मनिरोधो निर्गमेण परिश्रमाभावयोरिदं वाक्यं हेतुरिति श्लोकद्वयेन काव्यलिङ्गम् ॥२९॥

1 B सा शरस्येति। : R. सा शरस्य। 2 R add. मनोऽपि 3 R add. स्वयंभुवो 4 R add. आत्मनः 5 R सर्वसामेलनोत्सवाय 6 R add. सखायम् 7 R अधुनाऽपि चित्ते

सर्ग ५ 17

कामबाणस्य शरव्य[8] वेध्य सूचिता[1] ॥३०॥

मन्मथाय यददादित राज्ञां द्रुतिदूत्यविधये विधिराज्ञाम् ।
तेन तत्परवशाः पृथिवीशाः सङ्गरं गरमिवाऽऽकलयन्ति ॥३१॥

मन्मथायेति[1] । यत् विधिर्ब्रह्मा अथ राज्ञां द्रुतिः[2] आह्वानं तदर्थम् दूत्यविधये मन्मथाय आज्ञाम् आदेशम् अदित ददौ[3] । तेन कारणेन तस्य[4] मन्मथस्य परवशाः [पृथिवीशाः[5]] क्षितिशाः राजानः सङ्गरं सङ्ग्रामं गरमिव विषमिवाऽऽकलयन्ति [न कुर्वन्ति] ॥३१॥

येषु येषु सरसा दमयन्ती भूषणेषु यदि वाऽपि गुणेषु ।
तत्र तत्र कलयाऽपि विशेषो यः स हि क्षितिभृतां पुरुषार्थः ॥३२॥

येषु[1] येष्विति । दमयन्ती येषु [येषु] भूषणेषु [यदि वाऽपि[2]] गुणेषु गीतादिषु सरसा[3] सानुरागा तत्र [तत्र[4]] तेषु तेषु भूषणेषु गुणेषु वा [विषये] कलयाऽपि स्वल्पेनाऽपि यो विशेषः यस्याऽऽधिक्यं क्षितिभृतां राज्ञां स [हि[5]] एव पुरुषार्थः । अथ[6] कल्पे राजानस्तदेवाऽभ्यसन्ति, न तु सङ्ग्रामम्[7] ॥३२॥

8 B शरव्या वेध्या P. add. अङ्कैरिति पाठान्तरम् ।
अनुप्रासोऽतिशयोक्तिरनुमानं समुच्चयश्च ॥३०॥ 1 P. मन्म । 2 B द्रुतिं 3 P. om. ददौ 4 P. मन्मथस्य तस्य 5 B.P.P2 om. पृथिवीशाः; edn. add. पृथिवीशाः ॥३१॥
1 P. येषु । 2 P2 om. यदि वाऽपि 3 B सारसा; P2 सारसा 4 P2 om. तत्र 5 P. add. स; P2 om. हि
6 P. om. अथ कल्पे 7 P. add. तथा च वात्स्यायनीये कामशास्त्रे कन्यासम्प्रयुक्ते तृतीयेऽधिकरणे तृतीयाध्याये बालोपक्रम इङ्गिताकारसूचनप्रकरणाभ्यामयमर्थः सम्प्रपञ्चो निरूपितः । अल्लिङ्गनमात्रमत्र दर्शितम् । अभियुक्तैर्विशेषस्तत्र द्रष्टव्यः ।
अनुप्रासोऽतिशयोक्तिर्विरोधश्च ॥३२॥

शैशवव्ययदिनावधि तस्या यौवनोदयिनि राजसमाजे।
आदरादहरहः कुसुमेषोरुल्ललास मृगयाभिनिवेशः॥ ३३॥

शैशवव्ययेति[1]। कुसुमेषोः कामस्य यौवनोदयिनि तासां समाजे तरुणनृपसमूहे अहरहः[2] आदरात् मृगयाभिनिवेशः उल्ललास। कथम्॥ तस्या दमयन्त्याः शैशवव्ययोऽस्य यौवनस्य दिनं तत् अवधिर्मर्यादा यत्र उल्लसते तदेषा भवति। यौवनादारभ्य कामः राजकुमारेषु आखेटकं करोति[3]॥३३॥

इत्यमी वसुमतीकमितारः सादरास्त्वदतिथीभवितुं न।
भीमभूसुरभुवोरभिलाषे दूरमन्तरमहो नृपतीनाम्॥ ३४॥

इत्यमीति[1]। हे इन्द्र! इति कारणात् अमी वसुमतीकमितारो (मत्या:) नृपाः त्वयि अतिथीभवितुं न सादराः। अहो नृपतीनां भीमभूर्दमयन्ती[2] सुरभूः स्वर्गस्तयोरभिलाषे[4] दूरम् अन्तरं महान् भेदः। दमयन्ती रम्यतमा। अथच भीमभूः सुरभूश्च तयोर्महदन्तरम्। एकाऽत्र, अपरा उपरि[4]॥३४॥

तेन जाग्रदधृतिर्दिवमागाँ सङ्ख्यसौख्यमनुसर्तुमनु त्वाम्।
यन्मृधं क्षितिभृतां न विलोके तन्निमग्नमनसां भुवि लोके॥ ३५॥

तेन[1] जाग्रदिति। तेन[2] कारणेन जाग्रती स्फुरन्ती अधृतिरधैर्यं यस्य स तथाविधः सन् अहं त्वामनु लक्ष्यीकृत्य सङ्ख्यस्य सौख्यम् अनुसर्तुं दिवम् आगाम्। तत्र युद्धं[3] भविष्यतीत्याशयो[4] यत् यतः[5] भुवि लोके

1 B शैशवे। 2 B om. विसर्गः 3 B add. अतिशयोक्तिः॥३३॥ 1 B इत्यमी; B इत्यमी इति। 2 B सीम० 3 B स्वर्गभू० 4 B add. अमुत्र। अनुप्रासो हेत्वतिशयोक्तिः॥३४॥ 1 B तेन जाग्रदित्यादि। 2 B om. अहं 3 B शुद्धं प्रीणाशयः 5 B यथेत्

सर्ग ५ 19

[अतिभृतं] मृधं सङ्ग्राम न विलोके न पश्यामि। यतः तस्या विषये निमग्न-
मनसाम् ॥३५॥

वेद यद्यपि न कोऽपि भवन्तं हन्त हन्तकरणं विरुणद्धि।
पृच्छ्यसे तदपि येन विवेकप्रोञ्छनाय विषये रससेकः ॥३६॥

वेद[1] यद्यपीति। अहं यद्यपि इति वेद जानामि [यत्] हन्त
निश्चितं भवन्तं हे इन्द्र! कोऽपि न विरुणद्धि त्वया विरोधं न कुरुते।
किंभूतम्? हन्तरि विषये ~~शब्दस्पर्शादिके तदपि~~ अकरुणं निर्दयम्। तदपि
मया त्वं पृच्छ्यसे[2] यतः विषये शब्दस्पर्शादिके रसस्याऽनुरागस्य सेक
आधिक्यं विवेकस्य प्रोञ्छनाय निरासाय भवति। ~~ते~~ ममन्च कलहे रागः।
तेन विवेको निरस्तः। ततो जानन्नपि पृच्छामि[3]॥३६॥

एवमुक्तवति देवमुनीन्द्रे प्रागभेदि मघवाननमुद्रा।
उत्तरोत्तरशुभो हि विभूनां कोऽपि मञ्जुलतमः क्रमवादः ॥३७॥

एवमुक्तवतीति[1]। एवं देवर्षीणामिन्द्रे नारदे उक्तवति सति
प्राक् झटिति मघोन इन्द्रस्य आननमुद्रा अभेदि मौनं भग्नम्[2]। हि यस्मात्
विभूनां स्वा(धा)मिनां कोऽपि क्रमवादः अनुक्रमोक्तिप्रत्युक्तिप्रबन्धः
मञ्जुलतमः[3]। उत्तरोत्तरेण शुभः। यथदुत्तरं तत्तद्रम्यम् ॥३७॥

6 P. add. अतिभृशं न हि ततः 8 B मनसम् ॥ P. add. अनुप्रासो हेतुश्च ॥३५॥
1 P. वदे यद्यि। 2 B पृच्छ्यते 3 P. add. अनुप्रासोऽर्थान्तरन्यासश्च ॥३६॥
1 P. एवमुक्तवतीत्यादि। 2 P. add. अत्रापि मकारे प्रकृतिविभाषया। 3 P.
add. कीदृक्। 4 P. add. अनुप्रासोऽर्थान्तरन्यासश्च ॥३७॥

सर्ग ५ | 20

कोऽनुजे मम निजे धनुजारौ जाग्रति स्वशरणे रणचर्चा।
यद्भुजाङ्कमुपधाय जयाङ्कं शर्मणा स्वपिमि वीतविशङ्कः॥३८॥

कोऽनुजे[1] ममेति। मम निजे अनुजे धनुजारौ उपेन्द्रे श्रीकृष्णे जाग्रति सति का रणस्य चर्चा चिन्ता [विचारणा]। किंभूते[2]। स्वस्य मम शरणभूते। अहं यस्य विष्णोर्भुजाङ्कं मध्यम उपधाय[4] उच्छीर्षकं कृत्वा शर्मणा सुखेन स्वपिमि। वीता विविधा शङ्का यस्य स तथा। किंभूतम्। जयस्याङ्कं चिह्नभूतम्। अथवा जयस्य अङ्कश्चिह्नं यत्र तं तथा। परमेश्वरस्य[6] भुजे जयलक्षणानि सन्ति[7]॥३८॥

विश्वरूपकलनादुपपन्नं तस्य जैमिनिमुनित्वमुदीये।
विग्रहं मखभुजामसहिष्णुर्व्यर्थतां मदशनिं स निनाय॥३९॥

विश्वरूपकलनादिति[1]। तस्य श्रीकृष्णस्य जैमिनिमुनित्वम् उदीये जातम्[2]। किंभूतम्। विश्वरूपमूर्तिकलनात् धरणात्[3] उपपन्नं घटमानम्। विश्व[स्य] मध्ये जैमिनिराचार्योऽपि मीमांसाशास्त्रे सूत्रकारः। किंच [तत्र] सहस्राधिकरणमध्ये एकं विश्वेदेवाधिकरणं (          ) कलितमस्ति। [अपरं रूपाधिकरणं (          ) नाम[4] कलितमस्ति। तत्र द्रव्यदेवतं हि कर्मणो रूपमिति[5] (          ) इति रूपाधिकरणं विचारितमस्ति। इत्थं यो यो विश्वरूपकलनं कुरुते स स जैमिनिः। [श्री]कृष्णोऽपि विश्वरूपकलनं कृतवान्। तस्माज्जैमिनिः इत्यमनुमानप्रमाणेनोपपन्नम्। (जै॰ सू॰

1 Pi कनुज इत्यादि। 2 Pi add. सतेर्वा 3 Pi Pz भुजस्य 4 B उपा॰ 5 B Pz वीत 6 Pi Pz परमेश्वरभुजे 7 Pi add. अनुप्रासो हेतुश्च॥३८॥
1 Pi विश्वरूप।; Pz विश्वरूपेति। 2 Pi add. इङ् (१२।४) गतौ। 3 B धारणात् 4 Pz नामकरणं 5 Pz om. रूपमिति ———

सर्ग ५ 21

)।सोऽपि जैमिनिर्मुनिः अशनिं वज्रं व्यर्थतां निनाय।यतः मखभुजां यज्ञभागभुजां देवानां विग्रहं शरीरम् असहिष्णुः।

मन्त्रमयी हि देवता मीमांसकानां, न विग्रहवती। इदमग्नये इदमिन्द्राय इत्यादिचतुर्थ्यन्तनामपदं देवता। केचन वेदान्तिप्रभृतयो[6] नैयायिका वैशेषिकाः साङ्ख्याश्च विग्रहवतीं देवतामाहुः। तदयुक्तम्। यतो विग्रहवत्त्वे[7] सति युगपदनेकयजमानानां कर्मसु जायमानेषु एकमिन्द्रशरीरम् एकस्य यागे गतं तस्मिन्नेव काले अपरस्य हविः कथं ग्रहीतुं शक्नुयात्?। ऐश्वर्ययोगात्, चेत्, अनेकशरीराणि कृत्वा[8] युगपत् सर्वत्र प्रयास्यति। यथा योगी योगबलेन कैश्चित् शरीरैः विषयान् सेवते। कैश्चिदुग्रं तपश्चरेदिति। तदपि न। न हि याः काश्चि-देवता यज्ञभागं[9] लभन्ते। तासां सर्वासामपि परमैश्वर्ययोगोऽस्ति। देवतामात्रस्य [अपि] यागे भागसम्बन्धोऽस्ति। तथा चानुक्रमणीकारः — या[11] काञ्चिन्मन्त्रे स्तूयते सा देवता। चेतनाऽचेतना वा भवतु। क्वचि-द्ग्रावाणः। क्वचिद्धनुः। क्वचिन्मौर्वी। ( )॥ निरुक्तकारोऽपि-सूक्त-भाजो हविर्भाजश्च देवता ( ) इत्याह। या यत्र भजते हविः सा [तत्र][12] देवता। ततश्च विग्रहवत्त्वे अङ्गीक्रियमाणे युगपदेकस्या देवताया हविर्ग्रहण[13]शक्तिमत्त्वाभावात्। कर्मणामभावे वेदस्याऽप्रामाण्यं स्यात्। मन्त्रमयी[त्वे] त्वङ्गीक्रियमाणे शरीराभावात् इदमिन्द्रायेति चतुर्थ्यन्तं मन्त्रपदं दे(41b)वता तस्या जात्या[14] सर्वत्र एकत्वात्। अनेकयागेष्वपि सम्बन्धो घटते। ततश्च वेदस्य[15] प्रामाण्यम्। इत्थं जैमिनिराचार्यो देवतानां विग्रहवतीत्वं[16] न सहते। ननु यदि विग्रहवत्त्वं नास्ति, तत्कथं

6 B वेदान्त° 7 P1 विग्रहत्वे 8 P2 om. कृत्वा 9 P1.P2 यज्ञे भागं 10 P1.P2 श्रूयते 11 P2 add. या 12 P2 om. तत्र 13 P1 °ग्रहणे 14 P1 add. विसर्गः 15 B देवस्य; P1 वेदप्रामाण्यं 16 P1.P2 विग्रहवत्त्वं

वज्रहस्तः पुरन्दरः (          ) इत्यादीनि श्रुतौ इन्द्रस्य हस्तविशेषणानि इत्याशङ्क्याऽऽह— स मम अशनिं वज्रहस्त इति विशेषितं व्यर्थताम् अर्थवादतां निनाय। प्रशंसामात्रमिदं, न पुनस्तस्य रूपम्। अतो विरोधे सति अयं गुणवादः। गौणमिदं वज्रहस्त[17] इति वाक्यम्। तथा च भट्टाचार्यः विरोधे गुणवादः स्यादनुवादोऽवधारिते। भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः (श्लो० वा०          ) इति। अथवा मदशनिं व्यर्थतां निनाय। जैमिनेः स्मरणे विघ्नं न पतति। तथा च— जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च। पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारणाः (          ) इत्यपि केचिदाहुः।[18] ॥३९॥

---

ईदृशानि मुनये विनयाब्धिस्तान्यथिवान् स वचनान्युपहृत्य।
प्रांशुनिःश्वसितपृष्ठचरी वाङ् नारदस्य निरियाय निरोजाः ॥४०॥

---

ईदृशानीति। [स] ईदृशानि[1] वचनानि मुनये नारदाय उपहृत्य ढौकनिकारूपाणि कृत्वा तस्थिवान्। किंभूतः? विनयस्य अब्धिः समुद्रः। ईदृशानि इति वदन् कविः मुनेरनभिमततां[2] सूचयति। तदनु नारदस्य वाक् निरियाय निर्गता। किंभूता? निर्गतम् ओजो यस्याः सा तथा। प्रांशु[3] दीर्घो यो निःश्वसितो वायुस्तस्य पृष्ठचरी च[4]। प्रथमं च निःश्वसितम् ततो वाक्[5] ॥४०॥

---

स्वारसातलभवाहवशङ्की निर्वृणोमि न वसन् वसुमत्याम्।
धांगतस्य खलु हृदि मे दुर्दर्कः क्ष्मातलद्वयभराजिवितर्कः ॥४१॥

---

17 P. ०हस्तमिति 18 P. add. अनुप्रासो हेतुरतिशयोक्तिश्च ॥३९॥
1 P. ईदृशानि। 2 P. ०मततानि 3 P. दीर्घं यन्निःश्वसितं निश्वासवायु० M.P. ०स्य च 5 P. add. अनुप्रासो रूपकं जातिश्चोपमाऽपि ॥४०॥

सर्ग ५ 23

स्वारसातलेति[1]। अहं वसुमत्या पृथिव्या वसन्[2] न निर्वृणोमि न निवृत्तो भवामि। किंभूतः॥ स्वर्गे रसातले वा भवम् आहवं शङ्कते इत्येवंशीलः। इति पृथिव्यां[3] स्थितस्तर्कयामि। यतः[4] स्वर्गे सङ्ग्रामो भविष्यति स्वर्गं गच्छामि। पाताले वा सङ्ग्रामस्तत्र[6] व्रजामि। तत्र धीः (? ~~धां~~) गतस्य मे हृदि क्ष्मायाः पृथिव्याः यत्तलद्वयम् अधः उपरि च पातालं भूतलं च। तत्र ये भटास्तेषाम्[7] आजेः सङ्ग्रामस्य वितर्कः दुर्दर्कः दुष्ट-परिणामो ~~भवति~~ यस्य[8]। स्वर्गे गच्छामि चेत् तत्र इति चिन्ता भवति। यत्र ~~पाता~~ पाताले[9] युद्धं पृथिव्यां वा ततो[10] निर्वृतिः[11][12] ॥४१॥

सि/ वीक्षितस्त्वम~~सि~~ मामथ गन्तुं तन्मनुष्यजगतेऽनुमनुष्व।
किं भुवः परिवृढा न विवोढुं तत्र तामुपनता विवदन्ते ॥४२॥

वीक्षितस्त्वमिति[1]। हे इन्द्र! त्वं वीक्षितोऽसि। तत् मां मनुष्यजगते[2] पृथिव्यै गन्तुम् अथ अनुमनुष्व अनुजानीहि। गत्यर्थकर्मणि- (पा॰ II.III.12) इति चतुर्थी। किं तत्र[3] पृथिव्यां भुवः परिवृढाः राजानः[4] तां दमयन्तीं विवोढुं परिणेतुं उपनताः[5] सन्तः[6] न विवदन्ते[7]। अपि तु युध्यन्त एव। ~~तु~~ ततोऽहं भुवं[8] गच्छामि[9] ॥४२॥

1 Pi स्वारसा। 2 Pi add. मन 3 Pr पृथिव्याः 4 Pr यत 5 B तत्रा 6 Pi add. वा 7 Pi भवा॰ 8 B यस्याः; Pi यस्या, and add निवृत्तिहेतुत्वात्तत्रापि गतस्य युद्धादर्शनाद्वा 9 Pr add. नागलोके 10 Pi add. मे न क्वापि न 11 Pi निवृत्तिः 12 Pi add. अनुप्रासो हेतुश्च ॥४१॥ 1 Pi वीक्षित। 2 B add. जगति; Pr ॰जगते 3 Pi om. तत्र ~~विषये अथवा तत्रेति~~ पृथिव्यां 4 Pr add. पार्थिवाः 5 Pr ॰नयत। 6 Pi add. तत्र विषये अथवा तत्रेति पृथिव्यां 7 Pr add. न विवादं कुर्वन्ति 8 Pr add. भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः (पा॰ I.III.47) इत्यात्मनेपदम्। विमतिर्मनो मतिर्विप्रतिपत्तिता विच्छित्तिं भाषन्त इत्यर्थः। विवोढुं पाठान्तरम्। छेकानुप्रासः ॥४२॥

सर्ग ५ 24

इत्युदीर्य स ययौ मुनिरुर्वी स्वर्पतिं प्रतिनिवर्त्य बलेन।
वारितोऽप्यनुजगाम स यन्तं तं कियन्त्यपि पदान्यपराणि ॥४३॥

इत्युदीर्येति। इति उदीर्य स मुनिः नारदः उर्वीं पृथिवीं ययौ। किं कृत्वा?। स्वर्पतिम् इन्द्रं बलेन तरसा प्रतिनिवर्त्य स इन्द्रः सहस्रनयनः वारितोऽपि निषिद्धोऽपि तं नारदम् अपराणि (४२ a) कियन्त्यपि पदानि अनुजगाम। किंभूतम्?। यन्तं गच्छन्तम् ॥४३॥

पर्वतेन परिपीय गभीरं नारदीयमुदितं परिनेदे।
स्वस्य कश्चिदपि पर्वतपक्षच्छेदिनि स्वयमदर्शि न पक्षः ॥४४॥

पर्वतेनेति। पर्वतेन मुनिना गभीरं [नारदीयं] नारदसम्बन्धि उदितं वचनं परिपीय श्रुत्वा परिनेदे अन्ववादि। स्वस्य आत्मनः तस्मिन्निन्द्रे कश्चिदपि पक्षः स्वमतं स्वयं न अदर्शि। किंभूते?। पर्वतस्य पक्षस्य मतस्य छेदिनि छेदनशीले। अथ च पर्वतानां गिरीणां पक्षान् छिनत्तीत्येवंविधे तद्रूपे। अथ च पर्वतो गिरिः किमपि शब्दं पीत्वा प्रतिनादं कुरुते। इन्द्रे च पक्षान्न दर्शयति ॥४४॥

पाणये बलरिपोरथ भैमी शीतकोमलकरग्रहमर्हम्।

1 P. इत्यु। 2 P, R om. पृथिवीं 3 P, R om. तरसा 4 P, R om. सहस्रनयनः 5 P, R add. बलेन 6 P om. तं नारदं 7 P add. वारितोऽप्यनुजगाम। सयन्तमिति पाठः। वारितोऽप्यनुगमाय सयन्तमिति पाठे वारितेऽपि सति अपराणि कियन्त्यपि पदानि कियत्पदमार्गं यावत् अनुगमाय सयन्तं स्वर्पतिमिति योज्यम्। जातिः ॥४३॥
1 P. पर्वतेन। 2 P, R om. नारदीयं 3 R अनुवादि 4 BR तस्मिन्निन्द्रे (?) alt. अदर्शि 5 BR स्वयं alt. किंभूते? 6 P add. आगमनप्रयोजनादिकं पर्वतपक्षच्छेदिनि यतः पर्वतस्य 7 P om. किंभूते? 8 P, R om. छेदनशीले 9 P add. अथ च पर्वतो - कुरुते here 10 P, R om. गिरीणां 11 R om. एवंविधे ... दर्शयति 12 P om. तद्रूपे 13 BR contd.

सर्ग ५ 25

भेषजं चिरन्चिताशनिवासव्यापदामुपदिदेश रतीशः ॥४५॥

प्राणये इति । अथ रतीशः बलरिपोरिन्द्रस्य प्राणये भैम्याः शीतो च कोमलश्च करग्रहः पाणिग्रहणं तदुपदिदेश । किंभूतम् ? । चिरं चितानां सञ्चितानाम् अशनिवासस्य वज्रधारणस्य व्यापदाम् अहिम उचितं भेषजम् औषधम् । वज्रेण व्रणितस्य किल शीतलं कोमलं च औषधं बध्यते ॥४५॥

नाकलोकभिषजोः सुषमाया पुष्पचापमपि चुम्बति सैव ।
वेद्मि तादृगभिषज्यदसौ तद्द्वारसङ्क्रमितवैधकविधिः ॥४६॥

नाकलोकेति । अहम् इति वेद्मि यत् नाकलोकभिषजोः अश्विनी-कुमारयोः या सुषमा शोभा सैव पुष्पचापमपि चुम्बति । यत् असौ कामः तादृक् तादृशं यथा भवति एवं अभिषज्यत् भेषजं चक्रे । किंभूतः ? । तस्याः शोभाया द्वारेण सङ्क्रमिता आत्मनि प्रवेशिता वैधकविधिः येन स तथाभूतः । यथाऽश्विनोः शोभा कामदेवे सङ्क्रान्ता तथा वैधकमपि ॥४६॥

मानुषीमनुसरत्यथ पत्यौ सर्वथावमवलम्ब्य मघोनी ।
खण्डितं निजमसूचयदुच्चैर्मानिमाननसरोरुहनत्या ॥४७॥

1 B2 few विर० 2 P. प्राण B2 om. प्राणये इति । इन्द्रस्य 3 P. करसस्य
4 B व्यापदो 5 B उपचितं 6 P. add. अनुप्रासो रूपकं च ॥४५॥
2 P. नाक 2 P. अहं .... वेद्मि ... चुम्बति । 3 P. om. यत् 4 P. add. परम् ।
5 P. om. यत् 6 P. तस्याः .... स तथाभूतः here 7 P. add. पूर्वोक्त 8 P. om.
भूतः 9 P. add. सन् । कण्ड्वादिभ्यो यक् (III.1.27) 10 P. add.
शोभाद्वारेण 11 P. add. अनुप्रासो विशेष उत्प्रेक्षा च ॥४६॥

सर्ग ५ 26

मानुषीमिति[1]। मघोनी इन्द्राणी पत्न्यौ इन्द्रे मानुषीं प्रम-यन्तीम् अनुसरति सति अथ आननसरोरुहस्य नत्या लज्जानम्रतया सर्वभावं ह्रस्वत्वम् अवलम्ब्य निजम् उच्चैरुच्चतरं मानम् अभिमानं खण्डितम् असूचयत् ज्ञापयामास। यस्य किल मानं प्रमाणं खण्ड्यते[3] स सर्वो भवति[4] ॥४७॥

यो मघोनि दिवमुच्चरमाणे रम्भया मलिनिमाऽलमलम्भि।
वर्ण एव स खलूज्ज्वलमस्याः शान्तमान्तरमभाषत भङ्ग्या ॥४८॥

यो[1] मघोनीति। मघोनि इन्द्रे दिवं स्वर्गम् उच्चरमाणे[2] [सति] उत्क्रम्य गच्छति, रम्भया अप्सरोमुख्यया अलमत्यर्थं यो मलिनिमा अलम्भि। खलु उत्प्रेक्षायाम्। स[3] वर्ण एवाऽस्या रम्भाया आन्तरं चित्तम् उज्ज्वलं शृङ्गाररसं[4] प्रधानं भङ्ग्या प्रकारविशेषेण[5] शान्तं शमैकनिष्ठम् [अभाषत[6]] आख्यत[7]। उज्ज्वलस्य हि मालिन्यम् अनुपपद्यमानम्। अर्थापत्त्या दीप्ततायाः शान्ततामाचष्टे। उदश्चरः सकर्मकात् (पा० I.iii.53) इत्यात्मनेपदम्[8] ॥४८॥

जीवितेन कृतमप्सरसां तत्प्राणमुक्तिरिह युक्तिमती नः।
इत्यनक्षरमवाचि घृताच्या दीर्घनिःश्वसितनिर्गमनेन ॥४९॥

1 P. मानुषी। 2 P. om. मानम् 3 B खण्डयति 4 P. add. सर्वभावमिति पाठे समस्ताभिलाषेण मानुषीम् अनुसरतीति सम्बन्धनीयम्। निर्वेदभावोदयः। अनुप्रासो जातिश्च ॥४७॥

1 P. यो मघो। 2 P. om. सति 3 B सवर्णो; P2 सवर्णो 4 P, P2 om. ०रस० 5 B आकार० 6 B, P, P2 om. अभाषत; edr. add. अभाषत 7 P2 आख्यात: 8 P. add. अस्यामिति वा पाठः। भावोदयोऽनुप्रास उत्प्रेक्षा च ॥४८॥

जीवितेनेति[1]। घृताच्या अप्सरोमुख्यया[2] दीर्घस्य निःश्वसितस्य निर्गमनेन कृत्वा अनन्तरं यथा भवति एवम् [इति] अवाचि उक्तम्। इतीति[3] किम्? नोऽस्माकम् अप्सरसां सर्वासामपि जीवितेन (४२b)-[न] कृतं पूर्यताम्। तत्[4] तस्मात् अस्माकं प्राणानां मुक्तिरेव युक्तिमती घटते। निःश्वासः किल प्राणवायुरेव[5] ॥४९॥

---

साधु नः पतनमेवमितः स्यादित्यभण्यत तिलोत्तमयाऽपि।
चामरस्य पतनेन कराब्जात् तद्विलोडनचलद्भुजनालात् ॥५०॥

---

साधु नः[1] पतनमिति। तिलोत्तमानाम्न्या स्वर्गस्त्रिया इत्यभण्यत। अनन्तरम्[2] अभ्यधायि। केन? कराब्जाच्चामरस्य पतनेन। किंभूतात्?[3] तस्य[4] चामरस्य रन्ध्रविलोडनेन कम्पनेन[5] चलन्[6] भुजनालो यस्य तस्मात्तथा। अन्यचित्ततया चामरसहितहस्तविलोडनेन[8]। इतीति किम्? नोऽस्माकम् अप्सरसाम् इतः[9] स्वर्गात् एवं चामरपतनवत्[10] पतनं साधु स्यात्, रुचिरं भवेत्[11] ॥५०॥

---

मेनका मनसि तापमुदीतं यात्विधित्सुरकरोदवहित्थाम्।

---

1 P. जीवि। 2 B मुख्याया 3 P. इति किम्? 4 P. om. तत् 5 P. add. अपह्नुतिरतिशयोक्तिः ~~श्लेष~~ श्लेषः ॥४९॥ 1 P. साधु। 2 P. B add. ०मेवोक्तम् 3 P. add. चामरावस्थितिदशायां 4 P. विलोलनाय वीजनाय 5 P. B om. कम्पनेन 6 P. add. उधमपरस्तात्विलोलनेन ~~॥~~ चलन् कम्पमानो वा 7 P. स तथा; and add. अथवा पतने सति तस्य ~~चामर~~ चामरस्य पतनेन रन्ध्रविलोडनेन चलन् भुजनालो यस्य तस्मात्तथा। 8 P. ०विलोलनात् 9 P. अतः 10 B चामर० 11 P. add. तद्विलोकनेति पाठे तस्य प्रस्तुतस्य ईक्षा — नो गमनस्य दर्शनेन कम्पमान भुजनालात् इति व्याख्या। तदा अवीजनदशायामेव स्वभावतो हस्तस्थचामरभ्रंशः प्रतीयमानोत्प्रेक्षा। सापह्नुतिश्च ॥५०॥

सर्ग ५ 28

तत्स्फुटं निजहृदः पुटपाके पङ्कलिप्तिमसृजद्बहिरुत्थाम् ॥५१॥

मेनकेति। मेनका मनसि उदीतं ताप पिधित्सुः आच्छादयितुमिच्छुः [सती] यदवहित्थाम् आकारनिगूहनम् अकरोत्, तत् स्फुटं निश्चितं निजस्य हृदो मनसः पुटपाकनिमित्तं बहिः उत्थां बाह्योत्थां पङ्कलिप्तिम् असृजत। यत्पुटपाकेन पच्यते तत् उपरितः कर्दमेन लिप्यते ॥५१॥

उर्वशी गुणवशीकृतविश्वा लक्षणस्तिमितभावनिभेन।
शक्रसौहृदसमापनसीमस्तम्भकार्यमपुषद्वपुषैव ॥५२॥

उर्वशीति। उर्वशी शक्रस्येन्द्रस्य सौहृदं मैत्री तस्य समापनं समाप्तिः तस्य सीमस्तम्भ आधारः तस्य कार्यं वपुषा शरीरेणैवाऽपुषत् पुष्टिं चक्रे। इन्द्रेण सहस्रनयनेन सह मैत्रीसमाप्तिसीम्नि वपुरेवाऽऽधारः। केन? लक्षणं च स्तिमितभावः निश्चलभावः तस्य निभेन व्याजेन। स्तम्भो हि निश्चलो भवति। किंभूता? गुणैः सौन्दर्यादिभिः वशीकृतं विश्वं यया सा तथा ॥५२॥

१। मेनाक। २। तापमुदीतं ३ B पिधि० ४। १२ व्यूहनम् ५ । add अव-हित्थाकारगुप्तिः अङ्कावैकृतस्य बहिः स्थानाद्बहिः स्थितत्वमवहित्थमित्येके। 6 B सत्थ ७। बाह्योत्था ८। १२ तत्र ९ । add जशिमन्योरलिस्यत्वे छन्द-स्यमिपचोरपि। व्यानशन्मेनका चाऽस्य व्योमानं लिङ्गुपे चरन्। (पा०

) इति वार्त्तिककारवचनात्। छन्दस्त्वेऽपि मेनकाशब्दस्य भाषायां प्रायः प्रयोगो दृश्यते। अनुप्रास उत्प्रेक्षा च ॥५१॥

१। उर्वशी। २। संमापनं, १२ om. समापनं ३। १२ om. पुष्टिं चक्रे ४। १२ om सहस्रनयनेन ५ B निश्चित० ६। add अनुप्रासोऽपह्नुतिश्च ॥५२॥

कापि कामपि बभाण बुभुत्सुं शृण्वति त्रिदशभर्तरि किञ्चित्।
एष कश्यपसुतामभिगन्ता पश्य कश्यपसुतः शतयज्ञः[1]॥५३॥

कापि[2] कामपीति। काऽपि कामिनी कामपि सखीं त्रिदशभर्तरि देवेन्द्रे किञ्चित् शृण्वति[3][सति] बभाण उवाच[5]। किं ब्रुताम्! बुभुत्सुं ज्ञातुमिच्छुम्। हे सखि! त्वं पश्य[6] एष कश्यपसुतः इन्द्रः शतयज्ञः कश्यपसुतां पृथिवीम् अभिगन्ता[7]। यो यज्ञान् करोति स कथं[8] भगिनीमभिगच्छति[9]॥५३॥

आलिमात्मसुभगत्वसगर्वा काऽपि शृण्वति मघोनि बभाषे।
वीक्षणेऽपि सघृणाऽसि नृणां किं यासि न त्वमपि सार्थगुणेन॥५४॥

आलिमात्मेति[1]। काऽपि कामिनी मघोनि इन्द्रे शृण्वति सति आलिं सखीं बभाषे। किं ब्रूता!! आत्मनः सुभगत्वेन सगर्वा[3]। हे सखि! त्वं[4] नृणां वीक्षणेऽपि किं सघृणाऽसि जुगुप्सायुक्ता। त्वमपि सार्थगुणेन [किं] न यासि। देवानां सार्थगुणेन[5] त्वमपि गच्छ[6]॥५४॥

अन्वयुर्द्युतिपयःपितृनाथास्तं मुदाऽथ हरितां कमितारः।
वर्त्म कर्तु पुरः परमेकस्तद्गतानुगतिको न महार्घः॥५५॥

अन्वयुर्द्युतीति[1]। द्युतिनाथोऽग्निः पयोनाथो वरुणः पितृनाथो यमः

1/2 text मन्युः 2 P. काऽपि 3 P/2 शृणुति 4 B उक्तवान् 5 P. add. किञ्चिदिन्द्रसम्बन्धिवार्ताजातम् 6 P. add. विलोक्य 7 P. add. वाक्यार्थेऽत्र कर्मेति प्रथमा। 8 P. add. मयपुत्रीं तथा कश्यपसुतः कश्यपसुतां 9 P. add. अनुप्रासविरोधौ॥५३॥
1 P. आलिं। 2 B मघोने 3 P. सगर्वाम्; and add. कर्मविशेषणम्। पाठान्तरम् 4 P/2 किं here 5 P/2 सार्थेन 6 P. add. अनुप्रासः॥५६॥ 1 P. अन्वयुः। —

ते हरितां दिशां कम्पितारो दिक्पालाः मुदाऽथ तम् इन्द्रम् अन्वयुः। पृष्ठतो-यमर्थः। पुरोऽग्रे भूय एकः कश्चित् परं केवलं वर्त्म मार्गं कर्षतु[2]। तस्य गतानुगतिकैः[3] अनुगन्ता[4] न महार्घः। सर्वः कोऽपि (८३१) समर्थः सुप्राप[5] इत्यर्थः[6]॥५५॥

प्रेषिताः पृथगथो दमयन्त्यै चित्तचौर्यचतुरा निजदूत्यः।
तद्गुरुं प्रति च तैरुपहाराः सख्यसौख्यकपटेन निगूढाः॥५६॥

प्रेषिता[1] पृथगिति। अथो[2]ऽनन्तरं तैर्देवै[5]र्दमयन्त्यै पृथक्[3] पृथक् निजदूत्यः प्रेषिताः। किंभूताः?। चित्तस्य चौर्ये मनसो हरणे चतुराः। तथा तैः (तस्याः) गुरुं पितरं प्रति च निगूढाः उपहाराः ढौकनिकाश्च प्रेषिताः। केन[4] गुप्ताः?। सख्यस्य सङ्ग्रामस्य सौख्यं तस्य कपटेन (भीमेन राज्ञा रिपुभिः सह सङ्ग्रामे क्रियमाणेऽस्माकमानन्दोऽजनि। तत उपहाराः प्रेषिताः इति व्याजात्) निगूढाः[6]॥५६॥

चित्रमत्र विबुधैरपि यत्तैः स्वर्विहाय बत भूरनुसस्रे।
द्यौर्न काचिदथवाऽस्ति निगूढा सैव सा चलति यत्र हि चित्तम्॥५७॥

चित्रमत्रेति[1]। अत्र चित्रम् आश्चर्यम्। यत् (तैः) विबुधैरपि स्वः स्वर्गं विहाय। बत खेदे। भूः पृथ्वी अनुसस्रे अनुसृता। अथवा द्यौर्नाम

2 P2 कथयितुं तं 3 B गतिकाः 4 P नु 5 P सुप्राप्य 6 P add. अर्थान्तरन्यासः अनुप्रासोऽपि॥५५॥ 1 P प्रेषिता 2 B अथा 3 P2 पृथग् om. 4 B पृष्टाः 5 P add. व्याजेन 6 P add. सख्यः सौख्येति पाठान्तरम्। अनुप्रासोऽपह्नुतिश्च॥५६॥
1 P चित्र।

सर्ग ५ 31

काचित् निरूढा नाऽस्ति। अमुकः स्वर्ग इति रूढिर्नास्ति। सा द्यौः सैव यत्र हि[4] चित्तं चलति[5]॥५७॥

शीघ्रलङ्घितपथैरथ वाहैर्लम्भिता भुवममी सुरसाराः।
वक्रितोन्नमितकन्धरबन्धाः शुश्रुवुर्ध्वनितमध्वनि दूरम्॥५८॥

शीघ्रलङ्घितेति[1]। अमी सुरसाराः अथ[2] वाहैरश्वैर्भुवं लम्भिताः। किंभूतैः[3]? शीघ्रं लङ्घितः पथा यैस्तथा। ततस्ते[4] ध्वनि दूरं ध्वनितं शुश्रुवुः। किंभूताः? वक्रितो वक्रीकृत उन्नामितश्च कन्धर[5]-बन्धो यैः ते तथा। ग्रीवया[6] तिर्यक् पश्चादवलोकितम् उच्चैश्च[7]॥५८॥

किं घनस्य जलधेरथवैवं नैव संशयितुमप्यलभन्त।
स्यन्दनं परमदूरमपश्यन्निःस्वनश्रुतिसहोपनतं ते॥५९॥

किं घनस्येति[1]। ते देवा एवं संशयितुमपि[2] न अलभन्त[3]। यत् अयं ध्वनिः किं घनस्य अथवा जलधेरयं ध्वनिरिति सन्देहं कर्तुमपि नाऽलभन्त[4]। परं केवलम् अदूरे समीपे स्यन्दनं रथं ते अपश्यन्[5]। किंभूतम्? निःस्वनस्य[6] ध्वनेः श्रुत्या श्रवणेन सह[7] उपनतम् आगतम्। रथध्वनिश्रवणेन समकालं रथोऽप्यागतः[8]॥५९॥

3 P. निरूढा 4 P. om. हि 5 B भवति; P. चलति; and add. अनुप्रास आक्षेप: पर्यायोक्ति। विबुधपदं श्लिष्टम्। ये किल विबुधा मनीषिणः ते किं स्वर्गं विहाय भुवनमनुसरन्तीति विरोधोऽपि॥५७॥ 58. 1 P. शीघ्रल [illegible] 2 P. शीघ्रं.. तथाभूतैः 3 / [illegible] P. om. किंभूतैः। 4 P. om. ततस्ते 5 B, P2 कम्बरं 6 B ग्रीवाकः; P. वधाकवग्रीवे; P2 ग्रीवा वा; edr. ग्रीवया 7 P. add अनुप्रासो जातिश्च॥५८॥ 59. 1 P. किं घन। 2 B मपि और अलभत 4 P2 नालभत 5 P2 अपश्यत् 6 P. P2 निःश्वसनस्य 7 P. om. सह 8 P. add. ससन्देह: सहोक्तिरतिशयोक्तिश्च॥५९॥

सर्ग ५ 32

सूतविक्रमदकौतुकिभावं भावबोधचतुरं तुरगाणाम् ।
तं नेत्रजनुषः फलमेते नैषधं बुबुधिरे विबुधेन्द्राः ॥ ६० ॥

सूतविक्रमदेति[1] । तमेते विबुधेन्द्रा देवा नैषधं नलं बुबुधिरे । किंभूतम् ? । सूतस्य सारथेर्विक्रमदः कौतुकिभावो यस्य तं तथा[2] । स्वयं सारथ्यकर्तारम् । तथा तुरगाणां भावबोधे चतुरम् । अश्वहृदयमन्त्रज्ञम् । तथा नेत्राणां जनुषो जन्मनः फलम् अतिसुन्दरम् । तैरभिज्ञानैर्नलं ज्ञातवन्तः[3] ॥ ६० ॥

वीक्ष्य तस्य वरुणस्तरुणत्वं यद्बभार निबिडं जडभूयम् ।
5 / नौचिती जलपतेः किमु साऽस्य प्राज्यविस्मयरसस्तिमितस्य ॥ ६१ ॥ /स्तिमि

वीक्ष्य तस्येति[1] । तस्य तरुणत्वं वीक्ष्य वरुणः यत् निबिडं जडभूयं जाड्यं बभार । अस्य जडपतेः[2] जडानां प्रभोः सा किमु न[3] औचिती । किंभूतस्य ? । प्राज्येन प्रचुरेण विस्मयरसेन स्तिमितस्य । यः किल रसेन आर्द्रो भवति स जडो भवति । वरुणश्च नलं दृष्ट्वा आश्चर्येण जडोऽभूत्[4] ॥ ६१ ॥

रूपमस्य विनिरूप्य तथातिम्लानिमाप रविवंशपतंसः ।
कीर्त्यते यदधुनाऽपि स देवः काल एव सकलेन जनेन ॥ ६२ ॥

रूपमस्येति[1] । अस्य रूपं विनिरूप्य रविवंशस्य[2] पतंसो

1 P. सूतविक्रम । 2 P. तत्तथा 3 P. add. विदधिरे इति पाठे नले नेत्रजन्मनः फलं विदधिरे इति विधेयम् । अनुप्रासोऽनुमानमतिशयोक्तिश्च ॥ ६० ॥ 1 P. वीक्ष्य तस्य । 2 B. जल० 3 B. किमुत 4 P. add. अपि च जलपतेस्तथा रसस्तिमितस्य रसेनाऽऽर्द्रस्य जलत्वमुचितमेव । अनुप्रासः समं श्लेषश्च ॥ ६१ ॥ 1 P. रूप । कज्जवः

सर्ग ५ 33

यमः तथा अतिशयेन मलिना (433b) निम्[3] आपाद्यत अधुनाऽपि स देपः सकलेन जनेन काल एव कीर्त्यते कथ्यते। कृष्णवर्णत्वात् कालः। तथा च काल इति यमस्य नाम[5] ॥६२॥

यं बभार दहनः खलु तापं रूपधेयभरमस्य विमृश्य।
तत्र भूदनलता जनिकर्त्री मा तदप्यनलतैव तु हेतुः ॥६३॥

यं[1] बभारेति। अस्य नलस्य रूपधेयस्य सौन्दर्यस्य भरं विमृश्य दहनः यं तापं[2] बभार। खलु इति मन्ये। तत्र[3] तापे अनलता[4] वह्नित्वं जनिकर्त्री जन्मकारिणी माऽभूत्[5]। न हि अग्निरात्मानं दहति, एकस्यैव कर्तृत्वकर्मत्वविरोधात्। तदपि तु पुनः अनलतैव नलाभावतैव हेतुः कारणम्। नलोऽहं न जातः। एतदेव हेतुः[6]। अथवा तत्र अनलता वह्निता जनेर्धातोः [7]कर्त्री जायमाना हेतुर्माऽभूत्। परं नलादन्यत्वमेव जनेर्धातोः कर्तृकारकं तत्र हेतुः ॥६३॥

contd. P. om. रूपमस्येति 2 B० वरस्याव० 3 P. २e.U०. S UP. mg. add. अतिश्यामता 4 P. जनस्य 5 P. add. अनुप्रासोऽतिशयोक्तिः। कालशब्दः श्लिष्टः ॥६२॥

1 P. यं बभार। 2 B तारं 3 B तत्र 4 P. अनलता वह्निता ... अनलता here 5 P. add. तापजनुषः कारणं मा भवत्वित्यर्थः। कर्त्री सम्पादयित्री जनयित्रीति यावत्। 6 P. add. इममेवार्थं भङ्ग्यन्तरेण केचन व्याचक्षते। जनीति जनेर्ण्यन्तस्यैकार्निर्देशस्तदयमर्थः। तत्र अनलता जनेर्जनयतेः कर्त्री प्रयोजिका माऽभूत्। तथाऽप्यनलतैव हेतुः ~~प्रयोजिका~~ प्रयोजिका हेतुकर्त्रीत्यर्थः। यद्यपि क्रियां कुर्वन् कर्तोच्यते। जनिरित्यत्र पक्षे कर्तृताया अभावः तथापि जनिवाच्योऽर्थो लक्षणया आक्षेपेण जनिनोच्यते। अथवा इकिस्तिपौ धातोः स्वरूप इति धातुस्वरूपं नाम धात्वर्थस्वरूपम् अक्षरव्यक्तिस्वरूपं चेति जन्यर्थोत्पत्तिलक्षणोऽर्थो प्रत्ययो जननम्। जनिरिति भावे वा प्रत्ययः। नर (31/433) नृत्तौ इतिवत् विरोधः। काव्यलिङ्गमपि व्यतिरेकोऽपि ॥ 7 P. add. अयस्य

सर्ग ५ 34

कामनीयकमधःकृतकामं काममक्षिभिरवेक्ष्य तदीयम् ।
कौशिकः स्वमखिलं परिपश्यन् मन्यते स्म खलु कौशिकमेव ॥ ६४ ॥

कामनीयकमिति[1] । कामं सत्यं कौशिको महेन्द्रः अक्षिभिस्तदीयम् अधः[2]कृतकामं[3] कामनीयकं सौन्दर्यम् अवेक्ष्य स्वम् आत्मानम् अखिलं परिपश्यन् [स्म] खलु कौशिकमेव उलूकवत् विरूपमात्मानं मन्यते स्म[4] ॥ ६४ ॥

रामणीयकगुणाद्वयवादं मूर्तमुत्थितममुं परिभाव्य ।
विस्मयाय हृदयानि वितेरुस्तेन तेषु न सुराः प्रबुभूवुः ॥ ६५ ॥

रामणीयकेति[1] । सुरा देवाः अमुं नलं मूर्तं रामणीयकगुणस्याद्वयवादं मूर्तिमन्तं सौन्दर्याद्वैतम् उत्थितं परिभाव्य हृदयानि विस्मयाय वितेरुर्ददुः । तेन कारणेन तेषु हृदयेषु सुराः [न] प्रबुभूवुः न प्रभवो जाताः । तेषां मनांसि तस्य सौन्दर्येण हृतानि[2] ॥ ६५ ॥

प्रेयरूपकमशेषनिवेशैः संवदद्भिरमराः श्रुतपूर्वैः ।
एष एव स नलः किमितीदं मन्दमन्दमितरेतरमूचुः ॥ ६६ ॥

प्रेयरूपकमिति[1] । अमरा देवा इतरेतरं परस्परं मन्दं मन्दम् [स्वम्]

1 P. कामनीयक । 2 P. add. विसर्ग । 3 B कमनी० 4 P. add. अनुप्रास उत्प्रेक्षारूपके प्रतीयन्त्व ॥ ६४ ॥
1 B P. राम । 2 B हतानि — ॥ ६५ ॥
1 B P. प्रेयरू० ; P. प्रेयरूपक ।

सर्ग ५ 35

अन्वु[2] । किं स सर्वत्र प्रसिद्धो नलः एष एवं समीपवर्ती ॥ समीपतरवर्ति त
चैतदो रूपं तदः परोक्षे विनिर्दिष्टम् ( ) इति अभिधानकाण्डे ।
एष स इति जहदजहल्लक्षणया सामानाधिकरण्यम् ॥ कैः कृत्वा ॥ या
अन्योन्यम् इति अन्वु - अशेषनिवेशैः समग्रावयवैः[4] । किं विशिष्टैः प्रेय
रूपकं संवदद्भिः[5] प्रियरूपतासिनादिभिः । किं भूतैः ॥ श्रुतपूर्वैः । यादृशा
अवयवा नलस्य श्रुताः तादृशा दृश्यन्ते[6] अतोऽयं किं नल एव[7] ॥ ६६ ॥

---

तेषु तद्विधवधूवरणार्हं भूषणं स समयः स रथाध्वा ।
तस्य कुण्डिनपुरं प्रतिसर्पन् भूपतेर्व्यवसितानि शशंसुः ॥ ६७ ॥

---

तेषु[1] तद्विधेति । एते पदार्थास्तेषु देवेषु विषये तस्य भूपते-
र्नलस्य व्यवसितानि[2] स्वयंवरगमनादीनि शशंसुः कथयामासुः । एकं,
तद्विधाया दमयन्त्या वध्वाः वरणस्यार्हं योग्यं भूषणम् । तथा स
समयः स्वयंवरलक्षणः । तथा कुण्डिनपुरं प्रतिसर्पन् स रथस्य अध्वा
मार्गश्च — एते पदार्थाः[3] ॥ ६७ ॥

---

धर्मराजसलिलेशहुताशैः प्राणतां कितमं जगतस्तैः ।
प्राप्य हृष्टचलविस्मृततापैश्चेतसा निभृतमेतदचिन्ति ॥ ६८ ॥

---

2 P. add. अत्र प्रकारार्थत्वे प्रकारे गुणवचनस्य (पा॰ VIII. i. 12) इति द्वि-
र्वचने कृते कर्मधारयवदुत्तरेषु (पा॰ VIII. i. 11) इति कर्मधारयवत्
भावे मन्दंमन्दमिति प्रयोगः । अत्र प्रकारार्थत्वे तु मन्दमन्दप्रयोगो यथा
मन्दं मन्दं नुदति पवन (मेघ पूर्वमेघ - 10) इति । अत्रानेकभागात्मकस्य नुदेः
सर्वे भागा मन्दत्वेन व्याप्तुमिष्टा इति वीप्सालक्षणोऽर्थस्तत्र च नित्य-
वीप्सयोरिति (पा॰ VIII. i. 4) इति द्विर्वचनम् । 3 B भूषः 4 P. संवदद्भिः 5 B पूर्वैः
6 P2 अतोऽयं 7 P. add. अनुमानं जातिश्च ॥ ६६ ॥ 1 P. तेषु । 2 P. B om.
कथयामासुः 3 P. add. अनुप्रासः समुच्चयश्च ॥ ६७ ॥

सर्ग ५ 36

[1]धर्मराजेति। धर्मराजो यमः सलिलेशो वरुणः हुताशोऽग्निः एतेऽप्येतत्सा निभृतं गुप्ताम् [2]एतत् अचिन्ति। किंभूतैः? । अमुं नलं प्राप्य हर्षचलविस्मृततापैः। धर्मराजत्वात् हर्षः, सलिलेशत्वात् चलः, वह्नि-(४५४०)त्वात् विस्मृततापैः [3]। किंभूतम्? । जगतः प्राणतां [4]ज्ञातम्। नलो हि जगत्प्रियः। अथ च जगतः प्राणान् प्राप्य यमो भक्षणार्थं हृष्यति [6]। सलिलं प्राणं [7]वायुं प्राप्य चलति। अग्निश्च हुतम् [8]अश्नन् प्राणं फूत्कारवायुं प्राप्य विस्मृततापो भवति [9]॥६८॥

नैव नः प्रियतमोभयथाऽसौ यद्यमुं न वृणुते वृणुते वा।
एकतो हि धिगमूमगुणज्ञामन्यतः कथमदःप्रतिलम्भः॥६९॥

नैव नः [1]प्रियतमेति। असौ प्रियतमा नोऽस्माकम् उभयथाऽपि न घटते। यदि अमुं नलं न वृणुते अथवा [2]अमुं वृणुते। हि यत एकतः अवरणपक्षे अगुणज्ञाम् अमूं दमयन्तीं धिक्। या नलं त्यजति [3]सा न गुणान् वेत्ति। [4]अन्यतोऽन्यस्मिन् नलवरणपक्षे अस्याः प्रतिलम्भो-[5]ऽदःप्रतिलम्भः कथं कुतः प्राप्तिः? । इयं धर्मराजस्य [6]हर्षधर्माधाना उक्तिः [7]॥ ॥६९॥

मां वरिष्यति तदा यदि मत्तो वेद नैयमियदस्य महत्त्वम्।
ईदृशी च कथमाकलयित्री मद्विशेषमपरान्नृपपुत्री॥७०॥

1 P. धर्म। 2 B च तत् 3 B धर्मराजः तापः+ज्ञा० ५ 4 B प्रणतां 5 P. च om. प्राप्य 6 B दुष्यति 7 P2 वायुं प्राणं 8 B P2 हुतं; edr. हुतं 9 P. add. यथासङ्ख्यम्॥६८॥

1 P. नैव। 2 B तथा 3 P2 om. सा 4 P. add. उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते। इति धिक्योगे द्वितीया। 5 P2 om. अदःप्रतिलम्भः 6 P2 हर्षस्य 7 P. add. काव्यलिङ्गम्॥६९॥

सर्ग ५ 37

[मा वरिष्यतीति[1]। इयं वरुणस्य चञ्चलरूपा उक्तिः। इयं मां सदा वरिष्यति[2]। यदि मत्तः सकाशात् इयं दधिकम् अस्य नलस्य महत्त्वं न वेद न जानाति। ईदृशी चेदनभिज्ञा इयं नृपपुत्री अपराद्-न्यस्मात् यस्मात्कस्माच्चिदपि सकाशात् मम विशेषकं धम आक-लयिष्री नास्यति[3] ॥७०॥]

नैषधे बत वृते दमयन्त्या व्रीडितो न हि बहिर्भवितास्मि।
स्वां गृहेऽपि वनितां कथमास्यं ह्रीनिमीलि खलु दर्शयिताहे ॥७१॥

[नैषधे बतेति[1]। इयं वह्नेः तापयुक्ता उक्तिः। बत खेदे। दमयन्त्या नैषधे वृते अहं व्रीडितः सन् बहिर्न भवितास्मि। किन्तु गृहे-ऽपि स्वां वनिताम् आस्यं स्वं[2] मुखं कथं दर्शयिताहे[3]। किंभूतम्? ह्रिया निमीलि[4] सङ्कुचितम्। खलु निश्चितम्। णिचश्च (पा० I.iii.74) इति कर्त्र-भिप्राये आत्मनेपदम्। अभिवादिदृशोरात्मनेपद उपसङ्ख्यानमित्यणिकर्तुः कर्मत्वं विभाषया। हृक्रोरन्यतरस्याम् (पा० I.iv.53) इति सूत्रे उपसङ्ख्या-नमिदम्[5] ॥७१॥]

इत्यवेत्य मनसाऽऽत्मविधेयं किञ्चन त्रिविबुधी बुबुधे न।
नाकनायकमपास्य तमेकं सा स्म पश्यति परस्परमास्यम् ॥७२॥

[इत्यवेत्येति[1]। सा त्रयाणां विबुधानां समाहारः त्रिवि-

1 P. मां वरि 2 P. add. इष्यति 3 P. add. काव्यलिङ्गम् ॥७०॥ 1 P. नैषधे। 2 P. स्वमुखं 3 P. sup. mg. add. दर्शयिष्यामि 4 P. add. च 5 P. add. गृहे त्वेति पाठे बहिर्व्रीडितो न भविष्यामि। नलस्य सर्वोत्कृष्टत्वाद्वरणे मम बहिर्न लज्जा। गृहे तु पुनर्वनितां कथं मुखं दर्शयिताहे। हेतुः। पाठा-न्तरे व्यतिरेकोऽपि ॥ ७१ ॥ 1 P. इत्यवे।

सर्ग ५ 38

[2]बुधी देवत्रयी मनसा इति] अवेत्य आत्मनो विधेयं कर्तव्यं किञ्चन मनसा न [बुबुधे]। तम्[3] एकं नाकनायकम्[4] इन्द्रम् अपास्य विहाय ~~स्~~ सा देवानां[5] त्रयी[6] परस्परम् आस्यं मुखं पश्यति स्म। इन्द्र[ए]वैको वक्ताऽभूत्[7]॥७२॥

---

किं विधेयमधुनेति विमुग्धं स्वानुगाननमवेक्ष्य मघवा।
शंसति स्म कपटे पटुरुच्चैर्वञ्चनं समभिलक्ष्य नलस्य ॥७३॥

---

किं विधेयमिति[1]। मघवा स्वेषाम्[2] आत्मीयानाम् अनुगानां त्रयाणामपि आननम् इति विमुग्धं वीक्ष्य शंसति स्म उवाच। इतीति[3] किम्? अधुना[4] किं विधेयमिति। किं कृत्वा? नलस्य वञ्चनं[5] समभिलक्ष्य[6]। यतः कपटे[7] पटुः छलनपरः[8]॥७३॥

---

सर्वतः कुशलवानसि कच्चित्त्वं स नैषध इति प्रतिभा नः।
स्वासनार्धसुहृदस्त्वयि रेखां वीरसेननृपतेरिव विद्मः ॥७४॥

---

सर्वत[1] इति। हे नृप! त्वं कच्चित् प्रश्ने सर्वतः[3] कुशलवानसि। नोऽस्माकम् इति प्रतिभा स्वत एव ज्ञानं वर्त्तते[4] यत् त्वं स[5] प्रसिद्धो [नैषधो] नलः। यतो वयं त्वयि वीरसेननृपतेरिव रेखां[6] सादृश्यं विद्मः[7]। किंभूतस्य?

---

2 P2 विबुधत्रयी 3 P1 om. तं 4 add. तथा प्रसिद्धं 4 P1 om. नाकनायकम् 5 B देवतानां 6 P2 त्रयाणां 7 P1 add. मोहभावोदयोऽनुप्रासः॥७२॥

1 P1 किं वि। 2 P1 P2 स्वेषाम् 3 P1 इति किम्?। 4 B अमुना 5 B P2 वचनं 6 B अभिलक्ष्य 7 P2 add. न 8 P1 add. अनुप्रासो हेतुश्च॥७३॥

1 P1 सर्व। 2 P1 कच्चित् प्रश्ने here 3 P1 add. कुशलभाक् 4 P1 add. कच्चित् कामप्रवेदने (अमर° III.iv.14)। कामप्रवेदनं स्वाभिप्रायप्रकाशनम् इति किं यथा। 5 P1 add. एव 6 P1 add. उल्लेखं 7 P1 add. रेखा स्यादल्पके छद्मन्याभोगोल्लेखयोः

contd.

सर्ग ५ 39

स्वस्य आत्मन आसनस्यार्द्धे ]सुहृद: तव पिता ममार्द्धासने मित्रम् ॥७४॥

क्व प्रयास्यसि नलेत्यलमुक्त्वा यात्रयाऽत्र शुभयाऽजनि यन्न:।
तत्त्वयैव फलसत्त्वरया त्वं नाऽध्वनोऽर्द्धमिदमागमित: किम् ॥७५॥

[1] क्व प्रयास्यसीति। हे नल! त्वं क्व प्रयास्यसि इत्युक्त्वा अलं पूर्यताम्। यतोऽत्र [2] त्वदागमने [नो]ऽस्माकं यात्रया शुभया सुमुहूर्तया न। अजनि। तत् त्वयैव सुलग्नया यात्रया फलदानाय सत्त्वरया त्वं किम् इदम् अध्वनोऽर्द्धं न आगमित:। अपि तु आनीत:। [4] अथ च 'मा गा:', 'क्व [3] यासि' इति वाच्यं न वाच्यम्, अपशकुनवाचित्वात् [5]॥७५॥

एष नैषध! स दण्डभृदेष ज्वालजालजटिल: स हुताश:।
यादसां स पतिरेष च शेषं शासितारमधिगच्छ सुराणाम् ॥७६॥

[1] एष नैषधेति। हे [2] नैषध! एष [स] प्रसिद्धो दण्डभृत् यम:। दण्डधारि [3] त्वाद्भयङ्कर:। तथा [4] एष ज्वालजालैर्जटिल: स हुताश: हुतं भक्षयतीति [6]। भीष्मता [7] च ज्वालामालितया अधृष्यत्वात्। तथा स एष यादसां पतिर्वरुण:। अयमपि यादसां दुष्टजलचराणां पतित्वा-

cont'd. योरपि ( ) [8] P. om. आत्मन [9] B ममासनार्द्ध० [10] P. add. हे तु उपमा सम्भावनमपि ॥७४॥

1 P. क्व प्रया।; P2 om. क्व प्रयास्यसीति। 2 P2 add. अस्माक त्वदागमने here 3 B यास्यति; P2 यासि 4 P2 om. अपशकुनवाचित्वात् 5 P. ०कारित्वात् and add. अनुप्रास: काव्यलिङ्गं च॥७५॥ 1 P. एषा; P2 एष नैषध इति। 2 P2 add. निषधाधिप। 3 P2 ०कारित्वात् 4 P2 om. तथा 5 P. ज्वालाजाल०; P2 ज्वालैर्जटिल: 6 P. P2 om. इति 7 P. भीमता

सर्ग ५ 40

ओमिन्द्रः। शेषं परिशिष्टं मां सुराणां देवानां[8] शासितारं पतिम्[9] अधिगच्छ जानीहि। [आत्मानमपि सुराणां[10] शासितृत्वेन रौद्रं कथयति। जहदजहल्लक्षणया[11] स एव इति पदयोः सामानाधिकरण्यम्[12]। दण्डभृदादयो वाचकाः साभिप्रायाः। यथा नलोपाख्याने – अहमिन्द्रोऽयमग्निश्च तथैवाऽयमपां पतिः। शरीरान्तकरो नृणां यमोऽयमपि पार्थिव॥ ( )॥[13] परिकरोऽलङ्कारः॥७६॥

अर्थिनो वयममी समुपेमस्त्वां नलेति फलितार्थमवेहि।
अध्वनः श्रणमपास्य च खेदं कुर्महे भवति कार्श्यनिषेधम्॥७७॥

अर्थिन[1] इत्यादि। [हे नल! वयम् अर्थिनः सन्तः किल त्वाम् अमी समुपेमः आगच्छामः इति फलितार्थं[2] तात्पर्यार्थम् अवेहि जानीहि। श्रणम् अध्वनः खेदम् अपास्य च वयं भवति त्वयि कार्श्यस्य निषेधं कुर्महे[3]]॥७७॥

ईदृशीं गिरमुदीर्य बिडौजा जोषमास न विशिष्य बभाषे।
नाऽत्र चित्रमभिधाकुशलत्वे शैशवावधिगुरुर्गुरुरस्य॥७८॥

ईदृशीमित्यादि[1]। ईदृशीं[2] गिरं वाचम्[3] उदीर्य उक्त्वा[4] बिडौजा इन्द्रो जोषमास मौनं[5] जग्राह। विशिष्य विशेषं कृत्वा [किमपि] न[6] बभाषे न

8 P1 P2 om. देवानां 9 P1 P2 om. पतिम् 10 P2 om. सुराणां शासितृत्वेन ॥ P2 जहदज° 12 P1 समाना° 13 P1 add. परिकरः अनुप्रासोऽपि॥ P2 om. परिकरोऽलङ्कारः॥ ॥७६॥
1 P1 अर्थितो। P2 om. अर्थिन इत्यादि। 2 P1 add. फलितार्थं 3 P1 add. असौ विप्रकृष्टवाचकत्वेनाऽमी दूरात् स्वर्गदेशात् त्वाम् उद्दिश्य अर्थिनो वयमागताः इत्याकूतसूचनात् परिकरः। विशेषणैर्यत् आकूतैरुक्तः परिकरस्तु सः ( )॥ इति अत्र विशेषणैरिति बहुवचनमतन्त्रम्॥७७॥ 1 P1 ईदृशी। P2 ईदृशीमिति। 2 P1 P2 बिडौजा lacuna; P2 add. इन्द्रः 3 P1 P2 om. वाचम् 4 P1 P2 om. उक्त्वा 5 P1 P2 मौनी बभूव 6 P1 P2 om. न उवाच

सर्ग ५ 41

उवाच। [अर्थित्वमेवोक्तम्। न तु दमयन्तीलक्षणम्। न च त्वरा दर्शिता।] युक्तं चैतत्।[7] अत्र[8] चित्रम् आश्चर्यं नाऽस्ति। यतोऽस्य इन्द्रस्य [शैशवावधि] [गुरुर्]बृहस्पति[9] अभिधाकुशलत्वे वचनचातुर्ये गुरुरुपाध्यायो। कथं? शैशवावधि शिशुत्वं मर्यादीकृत्य बृहस्पतिरेनं पाठयति। तस्मादभिप्रायम-प्रतिपाद्य मौनमास्थितः। तत्र नाऽऽश्चर्यम्। काव्यलिङ्गमलङ्कारः। आसेति, अस (१५०) दीप्त्यादानयोश्चेति परोक्षः[10] ॥७८॥

अर्थिनामहृषिताखिलरोमा स्वं नृपः स्फुरकदम्बकदम्बम्।
अर्चनार्थमिव तच्चरणानां स प्रणामकरणादुपनिन्ये ॥७९॥

मे/ [अर्थिना[1]मिति। स[2] नृपो नलः स्वमात्मानं तेषां देवानां चरणानाम् अर्चनार्थमिव प्रणामकरणात् उपनिन्ये। किंभूतमात्मानम्? स्फुटानां विकसितानां कदम्बकुसुमानां कदम्बं समूहम्। किंभूतः? अ-र्थिनो नाम्ना शब्देन श्रुतेनैव[3] हृषितान्यखिलानि रोमाणि यस्य स तथा। रोमाञ्चेन गात्रं कदम्बसदृशं जातम्। अतो नमस्कुर्वतः पूजा बभूव[4] ॥७९॥]

दुर्लभं दिगधिपैः किममीभिस्तादृशं कथमहो मदधीनम्।
ईदृशं मनसिकृत्य विरोधं नैषधेन समशायि चिराय ॥८०॥

[दुर्लभमिति। नैषधेन ईदृशं विरोधं मनसिकृत्य चिराय

7 P.1:2 om. इदम् 8 P.1:2 add. अर्थे 9 P. add. गुरुर्विनेता। क्व॥ 10 P. add. अस दीप्त्यादानयोश्चेत्यस्मात् लिट् इति। अनुप्रासः काव्यलिङ्गमुपमाऽपि ॥७८॥
1 P. अर्थिना।; P2 अर्थिनामिति; ed. अर्थिनामेति। 2 P2 om. स 3 P2 युते-नैवो 4 P. add. अनुप्रासो रूपकमुत्प्रेक्षाऽपह्नुतिश्च ॥७९॥
1 P. दुर्लभ।

समराधि सन्देहः कृतः। ईदृशं कीदृशमित्याह – अमीभिर्दिशाम् अधिपैः किं वस्तु दुर्लभम्[3]। अहो आश्चर्यं[4] ममाधीनं कथं यन्मयि अर्थितां कुर्वन्ति॥ इति विमृष्टम्। अनत्याधान उरसिमनसी (पा० I·iv·75) इति विभाषया कृञि गतिसंज्ञायां, ते प्राग्धातोः इति (पा० I·iv·80) इति प्राक्प्रयोगे, कुगतिप्रादयः (पा० II·ii·18) इति समासे ल्यप् आदेशः। अनत्याधानमुपश्लेषणम्। तत्र गतिसंज्ञाभावात् उरसि कृत्वा पाणिं शेते इति ल्यबभावः[5]॥८०॥]

---

जीविताविधि वनीयकमात्रैर्याच्यमानमखिलैः सुलभं यत्।
अर्थिने परिवृढाय सुराणां किं वितीर्य परितुष्यतु चेतः॥८१॥

---

[जीविताविधीति[1]। यद् जीविताविधि प्राणपर्यन्तम् अखिलैरपि वनीयकमात्रैः[2] अर्थिमात्रैर्याच्यमानं वस्तु मम पार्श्वात् सुलभम्। तत्किं श्रेष्ठं वस्तु सुराणां परिवृढाय अर्थिने इन्द्राय वितीर्य चेतः परितुष्यतु। अर्थद्वयेन[3] सेन यच्छब्दस्य उत्तरवाक्यता व्याख्येया[4]॥८१॥]

---

भीमजा च हृदि मे परमास्ते जीवितादपि धनादपि गुर्वी।
न स्वमेव मम साऽर्हति यस्याः षोडशीमपि कलां किल नोर्वी॥८२॥

---

[भीमजा[1] चेति। मम हृदि भीमजा च आस्ते। परं जीवितादपि धनादपि गुर्वी[2] गुरुतरा अधिका। अतो अदेया। किंच

---

2 P. इतीति किम्? 3 P. add. तथा तादृशं दुर्लभम् 4 P. आश्चर्यं 5 P. add. विरोधः॥८०॥

1 P. जीवि। 2 P. om. अर्थिमात्रैः 3 P. अर्थद्वय० 4 P. add. न लोका– व्यये (पा० II·iii·69) इत्यादिना षष्ठ्यभावः। चिन्ता भावोदयः॥८१॥

1 P. भीम। 2 P. P. om. गुर्वी; eds. add. गुर्वी

सर्ग 5 43

सा मम स्वमेव वित्तमेव न भवति। स्वस्वामिभावाददेयैव सा। अतः तत्र शङ्कैव नाऽस्ति। यस्याः किल उर्वी पृथ्वी षोडशीमपि कलाम् अंशं न अर्घति। न षोडशभागस्याऽपि मूल्यं लभते। मदीये च पृथ्वी स्वम्। ततोऽस्वं न देयम्।।(२)।।]

प्रीयतां कथमभीप्सितमेषां दीयतां कथमयाचितमेव।
तं धिगस्तु कलयन्नपि वाञ्छामर्थिवागवसरं सहते यः।।(३)।।

[प्रीयतामिति। एषां देवानाम् अभीप्सितम् इष्टं कथं प्रीयताम्। कथं च मया अयाचितमेव तत् दीयताम्। यतः तं पुरुषं धिक् अस्तु। स निन्द्यः। यो वाञ्छां कलयन्नपि अर्थिनां वाचः प्रार्थनाया अवसरं सहते प्रतीक्षते।।(३)।।]

प्रापितेन चटुकाकुविडम्बं लम्भितेन बहुयाचनलज्जाम्।
अर्थिना यदघमर्जति दाता तन्न लुम्पति विलम्ब्य ददानः।।(४)।।

[प्रापितेनेति। एवंविधेन अर्थिना दाता यत् अघं पापम् अर्जति। किंभूतेन? चटूनां चाटुवाक्यानां काकुवाक्यानां च विडम्बं विगोपकं प्रापितेन दैन्यं वादितेन। तथा बहु अतिशयेन याचनलज्जां लम्भितेन तत्पापं विलम्ब्य विलम्बं कृत्वा ददानः दाता न

3 P. चित्त॰ M 2 स्वत्वं 3 P. add. भीमजाप्येति पाठान्तरम्। अतिशयोक्तिरनुप्रासो विरोधोऽपि।।(२)।। 1 P. प्रीयतामित्यादि। 2 P. add. अयाचिताम् 3 P. अप्रार्थनयाम् 4 P. उभसर्वतसोः कार्या धिगित्यादिना द्वितीया। अतिशयोक्तिर्हेतुश्च।।; P2 int lecto. mg. add. धिगिति धिक्शब्दयोगे द्वितीया।।(३)।। 1 P. om. प्रापितेनेति। 2 P. बहूनां 3 P2 om. विडम्बं 4 P. यत् 5 P1 P2 om. विलम्ब्य ed. add. विलम्ब्य

सर्ग ५ 44

लुम्पति[6]। अधिकस्य सुकृतस्य का वार्त्ता[7] ॥८०॥

यत्प्रदेयमुपनीय वदान्यैर्दीयते सलिलमर्थिजनाय।
सार्थनोक्तिविकलत्वविशङ्कात्रासमूर्च्छदपमृत्युचिकित्सा॥८५॥

[[1] यत्प्रदेयमिति। यद्वदान्यैर्दातृभिः प्रदेयं वस्तु उपनीय उपढौक्यम् अर्थिजनाय सलिलं सङ्कल्पोदकं दीयते। सा अर्थनोक्तेः। अर्थ प्रार्थितस्य या विकलत्वस्य विशङ्का[2] तस्याः त्रासेन[3] मूर्च्छेन प्रवृद्धो योऽपमृत्युः अकाले मरणं तस्य चिकित्सा औषधोपचारप्रतिकारः। मूर्च्छायाम् उदकसेकः क्रियते[4] ॥८५॥]

अर्थिने न तृणवद्धनमात्रं किं तु जीवनमपि प्रतिपाद्यम्।
एवमाह कुशवज्जलदायी द्रव्यदानविधिरुक्तिविदग्धः॥८६॥

[[1] अर्थिने न तृणवदिति। द्रव्यदानस्य विधिः इतिकर्तव्यता-शास्त्रं कुशवत् जलं दापयतीत्येवंशीलः दर्भयुक्तो दापयिता सन् एव-माह इत्थं वदति। किंभूतः? उक्तिषु विदग्धः वचनभङ्गिकुशलः। इतीति किम्? अर्थिने याचकाय न केवलं धनमात्रं प्रतिपाद्यं किं तु जीवनमपि प्राणधारणमपि देयम्। कुशेन तृणं लक्ष्यते। जलेन जीवितम्। जीवन-शब्द उदकवाची च। जलदयीति वा पाठः। तदा जलं ददातीत्येवंशीलः। अन्तर्भूतकारितार्थः। परं दायीति पाठो रम्यः[2]॥८६॥]

6 R sup. lin. add. बहुप्रार्थनया किल याचको लज्जितो भवति। 7 P add. विभ्रमः॥८०॥ 1 P यत्प्रदेयमित्यादि। 2 P विशङ्कास्तस्याः 3 R औषधम् 4 P add. अतिशयोक्तिः॥८५॥
1 P om. अर्थिने न तृणवदिति। 2 P add. प्रतीयमानोत्प्रेक्षा समासोक्तिर्वा ॥८६॥

सर्ग ५ 45

पङ्कसङ्करविगर्हितमर्हं न श्रियः कमलमाश्रयणाय ।
अर्थिपाणिकमलं विमलं तद्वासवेश्म विदधीत सुधीस्तत् ॥८७॥

[पङ्कसङ्करेति[1] । श्रियो लक्ष्म्याः आश्रयणाय कमलं पद्मं न अर्हं न योग्यम् । यतः पङ्कस्य कर्दमस्य सङ्करेण विगर्हितं निन्द्यम् । पङ्कादुत्पन्नत्वात् । तत्तस्मात् सुधीर्विद्वान् अर्थिनः पाणिमेव कमलं विमलं[2] मलरहितं तस्याः श्रियो वासवेश्म विदधीत कुर्वीत[3] ॥८७॥]

याचमानजनमानसवृत्तेः पूरणाय बत जन्म न यस्य ।
तेन भूमिरतिभारवतीयं न द्रुमैर्न गिरिभिर्न समुद्रैः ॥८८॥

[याचमानेति[1] । बत खेदे । यस्य[2] पुंसो जन्म याचमानजनस्य[3] मानसवृत्तेरभिलाषस्य पूरणाय न भवति तेनैव पुरुषेण इयं भूमिः अतिभारवती । न द्रुमैर्भारवती[4] न गिरिभिर्न समुद्रैश्च[5] ॥८८॥]

मा धनानि कृपणः खलु जीवंस्तृष्णयाऽर्पयतु जातु परस्मै ।
तत्र चैष कुरुते मम चित्रं यन्नु नार्पयति तानि मृतोऽपि ॥८९॥

[मा[1] धनानीति । खलु युक्तं कृपणः अदाता जीवन् सन् जातु परस्मै धनानि माऽर्पयतु । कथं? । तृष्णया । तत्र च पुनः एष कृपणो मम चित्रम् आश्चर्यं कुरुते । यत्पुनः तानि धनानि मृतोऽपि[2]

1 P. पङ्क । 2 P. om. विमलं; ed. add. विमलं 3 P. om. कुर्वीत and add. अनुप्रासो रूपकमतिशयोक्तिः समं च ॥८७॥
1 P. याच । 2 P. याचमानस्य here 3 P. जनस्य 4 P. भारः 5 P. add. अनुप्रासोऽतिशयोक्तिः ॥८८॥ 1 P. मा धा 2 P. om. अपि ।

नाऽर्पयति । अथ च नृपस्यैव नार्पम् । तस्येदमि (पा० IV. iii. 120) त्यण् । नार्पं द्रव्यं करोति । तत्करोतीति (पा० ) त्यादिना इत् । कृपणस्य मृतस्य द्रव्यं नृपो[3] गृह्णाति । नार्पयतीति श्लेषः[4] ॥८९॥

मामभीभिरिह याचितवद्भिर्दातृजातमवमत्य जगत्याम् ।
यद्यशो मयि निवेशितमेतन्निष्क्रयोऽस्तु कतमस्तु तदीयः ॥९०॥

[मामभीभिरि[1]ति । अमीभिर्दैवैर्मयि विषये यदेतद्यशो[2] निवेशितम् । कीदृशैः[3] ? । मामेवेह याचितवद्भिः । किं कृत्वा ? । जगत्यां दातॄणां जातं समूहम् अवमत्य[4] । तदीयस्तस्य यशः निष्क्रयस्तु पुनः कतमोऽस्तु ॥९०॥]

लोक एष परलोकमुपेता हा विहाय निधने धनमेकः ।
इत्यमुं खलु तदस्य निनीषत्यर्थिबन्धुरुदयद्दयचित्तः ॥९१॥

[लोक एष[1] इति । अर्थी एव बन्धुः इति कारणात् खलु शङ्के तत् अस्य[2] लोकस्य धनम् अमुं परलोकं निनीषति । प्रापयितुमिच्छति । किंभूतम् ? । उदयद्दयं[3] चित्तं यस्य स तथा । इतीति[4] किम् ? । यतः हा कष्टम् । एष सर्वोऽपि ~~लोकः~~ लोकः निधने मरणे प्राप्ते सति[5] धनं विहाय एकः एकाकी परलोकम् उपेता गमिष्यति[6] ॥९१॥

3 P. add. हि 4 P. add. विरोधोऽपि ॥८९॥
1 P. मामभीभिरि । 2 R. यद्यशो 3 R. किं कृत्वा ... अवमत्य here 4 R. sup. lin. lecto mg. add. अवगणय्य 5 P. add. अनुप्रासः ॥९०॥
1 P. लोक । 2 R. om. अस्य लोकस्य 3 R. उदयच्चित्तं 4 P. इति किम् 5 R. om. सति 6 P. add. अनुप्रास उत्प्रेक्षा रूपकं हेतुश्च समासोक्तिरपि ॥९१॥

सर्ग ५ 47

दानपात्रमधमर्णमिहैकग्राहि कोटिगुणितं दिवि दायि।
साधुरेति सुकृतैर्यदि कर्तुं पारलौकिककुसीदमसीदत् ॥९२॥

[[1]दानपात्रमिति। दानपात्रम् अधमर्णम् ऋणग्राहकम्[2] किंभूतम्? इह लोके एकगुणग्राहि परं दिवि परलोके कोटिगुणितं दायि दास्यति। भविष्यति गम्यादय (पा० III।iii।3) इति णिन् (अकेनो-र्भविष्यदाधमर्ण्ययोः (पा० II।iii।70) इति कर्मषष्ठ्या अभावः। ततश्च यदि ईदृशं पारलौकिकं कुसीदं वृद्धिजीवनं सुकृतैः असीदत् कर्तुम् अविनश्यत् कर्तुम् एति जानाति, तदा साधुरेव एति जानाति, यतो[3] यदि इत्थो दत्ते। नाऽन्यो दाता॥९२॥]

एवमादि स विचिन्त्य मुहूर्तं तानवोचत पतिर्निषधानाम्।
अर्थिदुर्लभमवाप्य सहर्षान् याच्यमानमुखमुल्लसितश्रि ॥९३॥

[[1]एवमादीति। निषधानां पतिः मुहूर्तं[2] यावत् एवमादि विचिन्त्य तान् देवान् अवोचत। किं विशिष्टान्? याच्यमानस्य[3] नलस्य मुखम् उल्लसितश्रि, सश्रीकम् अवाप्य दृष्ट्वा सहर्षान्। किंविशिष्टम्? अर्थिभिर्दुर्लभम्। याच्यमानस्य[4] हि मुखं कलुषं भवति[5]॥९३॥]

नास्ति जन्यजनकव्यतिभेदः सत्यमन्नजनितो जनदेहः।
वीक्ष्य वः खलु तनूममृतादां दृङ्निमज्जनमुपैति सुधायाम् ॥९४॥

1। दान। 2। s.v.p. in. mg. add. याचकग्रहीतारम् 3। add. कुत्सितं कौ वा सीदन्त्यत्र कुसीदम् अर्थस्य प्रयोगः। अथ च साधुर्वणिग्जनः एकमेव वाच्यम्। अनुप्रासोऽतिशयोक्तिर्व्यतिरेकश्च ॥९२॥
1। एवमादि। 2। मुहूर्तं 3। याच० 4। याच० 5। add. भावोदयः ॥९३॥

सर्ग ५ 48

~~आस्ति~~ [नास्ति[1] जन्येति। तावत् जन्यजनकयोः कार्यकारणयोः व्यतिभेदः परस्परभेदो नास्ति। अयं[2] च जनानां देहः अन्नेनैव जनितः। नाऽन्येन कारणेन। एतत्सत्यम्। ततश्च[3] वो युष्माकं देवानाम् अमृतादाम्[4] अमृतभोजनतत्परां तनुं शरीरं वीक्ष्य खलु मन्ये[5] मम दृक् दृष्टिः सुधायां निमज्जनम् उपैति। भगवच्छरीरममृतमेव। अथवा[6] अयम् अन्नेन भोजनेन जनितो जनदेहः नास्ति। अविद्यमानो जन्यजनकयोर्व्यतिभेदो यत्र स तथा। एतत्सत्यमेव। ततश्च युष्मच्छरीरेषु दृष्टेषु ममामृतमज्जनं दृष्टिः प्राप[7]॥९४॥]

मत्तपः क्व नु तनु क्व फलं वा यूयमीक्षणपथं व्रजथेति।
ईदृशं परिणमन्ति पुनर्नः पूर्वपूरुषतपांसि जयन्ति॥९५॥

[मत्तप[1]: क्वेति। मम तपः क्व नु अतितरां तनु[2] स्वल्पं वा अथ[3] यूयं देवा ईक्षणपथं लोचनविषयं व्रजथ इति फलं क्व!। महदन्तरम्[4]। एतावन्मात्रेण तपसा महाफलम् उद्भवति। परं पुनः नोऽस्माकं पूर्वपूरुषाणां[5] तपांसि जयन्ति। किं कुर्वन्ति!। ईदृशं युष्मद्दर्शनलक्षणं फलं परिणमन्ति[6]। पूर्वजानां तपोभिरिदं जातम्[7]॥९५॥

प्रत्यतिष्ठिपदिमां खलु देवी कर्मसर्वसहनव्रतजन्म।
यूयमप्यहह पूजनमस्या यन्निजैः स्जथ पादपयोजैः॥९६॥

1। नास्ति जन्येत्यादि 2। अयं च 3। om. ततश्च 4। vvd. अमृतभोजिनो तनू विशेषणमप्येके 5। यस्मात् 6। vvd. नास्तीति निपातः। अस्तिक्षीरादिवत् बहुव्रीहिः। 7। vvd. अर्थान्तरन्यासः॥९४॥ 1। मत्तप। 2। om. तनु 3। 2 अथ च 4। vvd. अतिवैधर्म्यात्सम्बन्धो न घटते इति वैषम्यम् 5। P2 पुरुषाणां; edn. पूरुषाणां 6। vvd. सन्ति 7। vvd. ईदृशान्यपि ददतीति पाठे ~~ईदृशान्यपि फलानि प्रयच्छन्तीत्यर्थः~~। विषमोऽतिशयोक्तिश्च व्यतिरेकोपमे॥९५॥

सर्ग ५ 49

[प्रत्यतिष्ठिपदिति। खलु निश्चितम्। सर्वस्य भारादेः सहनमेव व्रतं तस्माज्जन्म यस्य तत्तथा। तादृक् कर्म सुकृतम् इमां देवीं प्रत्यतिष्ठिपत देवीत्वं चकार। अहह आश्चर्ये। पत धूयमपि हे देवाः अस्याः पृथिव्याः निजैः पादपयोजैः गगनं सृजथ। देवानां पादाः पृथिव्यां किल न लगन्ति ॥९६॥]

जीवितावधि किमप्यधिकं वा यन्मनीषितमितो नरडिम्भात्।
तेन वश्चरणमर्चतु सोऽयं ब्रूत वस्तु पुनरस्तु किमीदृक् ॥९७॥

[जीवितावधीति। जीवितावधि प्राणदानं यावत् यत् किमपि ततोऽप्यधिकं वा इतो मल्लक्षणात् नरडिम्भात् मनुष्यमात्रात् बालात् भवद्भिर्मनीषितं वाञ्छितम्। तेनाऽभिलषितेन वो युष्माकं सोऽयं मल्लक्षणो जनश्चरणम् अर्चतु। यूयं ब्रूत कथयत ईदृक् वस्तु पुनः किम् अस्तु ॥९७॥

एवमौक्तिकवति वीतविरिडके वीरसेनतनये विनयेन।
वक्रभावविषमार्थ शक्रः कार्मकैतवगुरुर्गिरमूचे ॥९८॥

[एवमुक्तवतीति। अथ शक्रः वीरसेनतनये नले विनयेन एवमुक्तवति सति गिरम् ऊचे। किंभूताम्? वक्रभावेन कौटिल्येन विषमाम्। किंभूतः? कार्मस्य कैतवे छले गुरुः। किंभूते नले? वीता विरिडका यस्य तत्र तथा ॥९८॥]

1 P. प्रत्यति। 2 P2 प्रतिष्ठिपत 3 P2 देवत्वं 4 P. हे देवाः यूयमप्यस्याः 5 P2 ecto. sup. mg. add. अर्चनं कुरुथ 6 P. किल पृथिव्यां 7 P. add. उत्प्रेक्षारूपकं च ॥९६॥ 2 P. जीवि। 2 P. add. अनुप्रासः ॥९७॥ 1 P. एव। 2 P2 वाचंभावेन 3 P. add. मुक्ता विरिडका येन। वीतेति पाठे 4 P. add. अनुप्रासो हेतुश्च ॥९८॥

सर्ग ५ 50

पाणिपीडनमहं दमयन्त्याः कामयेमहि महीमिहिकांशो!
दूत्यमत्र कुरु नः स्मरभीतिं निर्जितस्मर! चिरस्य निरस्य ॥९९॥

[पाणिपीडनेति[1]। हे महीमिहिकांशो! भूचन्द्र! वयं दमयन्त्याः पाणिपीडनमहं विवाहोत्सवं[2] कामयेमहि। त्वम् अत्र नोऽस्माकं दूत्यं कुरु। किं कृत्वा?। चिरस्य स्मरभीतिं निरस्य। हे निर्जित- [जि]स्मर![3] । दूताद्यच्च (पा० ) इति यप्रत्यये जित्वाभावात् वृद्धेरभावः[4] ॥९९॥]

आसते शतमधिक्षिति भूपास्तोयराशिरसि ते खलु कूपाः।
किं ग्रहा दिवि न जाग्रति ते ते भास्करस्य कतमस्तुलयाऽऽस्ते ॥१००॥

[आसते शतमिति[1]। हे नल! अधिक्षिति पृथिव्यां शतं भूपा आसते। त्वं तोयराशिः असि। ते खलु कूपाः राजानः। किं ग्रहाः चन्द्रादयस्ते ते बहवः प्रसिद्धा दिवि न जाग्रति न स्फुरन्ति। कः पुनः भास्करस्य तुलया[2] सदृशः कतम आस्ते[3] ॥१००॥]

विश्वदृश्वनयना वयमेव त्वद्गुणाम्बुधिमगाधमवेम।
त्वामिहैवमनिवेश्य रहस्ये निर्वृतिं न हि लभेमहि सर्वे ॥१०१॥

[विश्वदृश्वेति[1]। वयमेव तव गुणाम्बुधिम् अगाधम् अवेम[2] जानीमः। कीदृशाः[3]?। विश्वं दृष्टवन्ति विश्वदृश्वानि नयनानि

1 P. पाणि। 2 P. ॰महोत्सवं 3 P. add. निन्दितस्मर! 4 P2 om. जित्वाभावात् 5 P. add. अनुप्रासो रूपकं च ॥९९॥ 1 P. ~~विश्व~~ आसते। 2 P. तुला। 3 P. add. तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् (पा० ॥।।।। ) इति तुला-शब्दप्रयोगे प्रतिषेधात् शेषलक्षणा षष्ठ्येव। अनुप्रासो रूपकं दृष्टान्तश्च ॥१००॥
1 P. विश्व। 2 P2 अवेमि 3 P2 om. कीदृशा ------ नयनानि। ——

सर्ग ५ 51

येषां ते तथा। दृशेः क्वनिप् (पा० III. ii. ९४) ततः त्वाम् इह एकं रहस्ये गुह्यकथने आ निवेश्य सर्वे वयं[4] निर्वृतिं सन्तोषं हि निश्चितं न लभामहे[5][6] ॥१०१॥

शुद्धवंशजनितोऽपि गुणस्य स्थानतामनुभवन्नपि शक्रः।
क्षिप्नुरेनमृजुमाशु सपक्षं सायकं धनुरिवाऽजनि वक्रः॥१०२॥

[शुद्धवंशेति[1]। शक्र इन्द्रः वक्रः कौटिल्ययुक्तो अजनि। को किंवत्?। एनं नलम्[2] आशु क्षिप्नुः क्षेप्तुकामः। दमयन्ती[3] भविष्यतीति। ऋतु स्वीकारसहितं दूतत्वे प्रेरयितुकामः। किंभूतम्?। सपक्षम्। साध्यसमान- धर्माधर्मि सपक्षः ( )। यतः ऋजुं सरलं कुटिलम्। यः किल सरलः स परैः[4] क्षिप्यते। पुनः किंभूतः?। शुद्धे वंशे[5] जनितोऽपि तथा गुणस्य[6] ऐश्वर्यादेः स्थानताम् अनुभवन्नपि। किमिव?। धनुरिव। यथा धनुः सपक्षं पक्षैर्वाजैः सहितं ऋजुं[7] सायकं[8] बाणं क्षिप्नु प्रेर- यितृ सत् वक्रं भवति। तदपि शुद्धे वंशे जनितं स्यात्। तथा गुणस्य मौर्व्याः स्थानताम् अनुभवति[9]॥१०२॥]

तेन तेन वचसैव मघोनः स स्म वेद कपटं पटुरुच्चैः।
आचरत्तदुचितामथ वाणीमार्जवं हि कुटिलेषु न नीतिः॥१०३॥

4 P1 हि निश्चितं here 5 P1 लभामहे 6 P1 add. अनुप्रासो रूपकं हेतुश्च ॥१०१॥

2 P1 शुद्ध। 2 P2 आशु नलं 3 P2 om. दमयन्ती... सपक्षः। 4 P2 add. दुष्टैः 5 P1 add. अन्वये 6 P1 add. क्षान्तिऔदार्य० 7 P1 सहितं 8 P2 सायकं बाणम् ऋजुं 9 P1 add. विरोध उपमा श्लेषश्च॥१०२॥

सर्ग ५ 52

[तत तेनेति। स नलस्तेन मघोन इन्द्रस्य वञ्चसैव कपटं छलं वेद स्म जज्ञौ। अथ नलस्तस्य कपटस्य उचितां वाणीम् आचरत। हि यत: कुटिलेषु आर्जवम् ऋजुस्वभावता नीतिर्न भवति॥१०३॥]

सेयमुच्चतरता दुरितानामन्यजन्मनि मयैव कृतानाम्।
युष्मदीयमपि या महिमानं जेतुमिच्छति कथापथपारम्॥१०४॥

[सेयमुच्चतरतेति। हे देवा! सा इयं मया एव अन्यजन्मनि कृतानां दुरितानाम् उच्चतरता आधिक्यं या दुरिताधिकता युष्मदीयमपि महिमानं जेतुमिच्छति। किंभूता॥ कथापथस्य पारं वार्त्तामार्गं पारयति समाप्तिं नयति। कथाया अगोचरं युष्मदीयाऽसा यत्कर्तुं न शक्यते तद्दुरितानां फलमिति भाव:। इत्थं वा महिमजया यूयम् अर्थिनोऽहं च प्रार्थनीय इति चेत् स्यात् तदा भवतां महिमा गिर: स्यात्। तदेतदसम्बद्धत्वात् न घटते एव। एवं हि सत्यहं गुरुकृत: यूयं च लघूकृता इत्यर्थ:॥१०४॥]

वितथ चित्तमखिलस्य न कुर्यां धैर्यकार्यपरिपन्थि तु मौनम्।
ह्रीर्गिरास्तु वरमस्तु पुनर्मा स्वीकृतैव परवागपरास्ता॥१०५॥

1 P. तेन तेन। 2 P2 वञ्चस्यैव 3 P. जज्ञे 4 P. P2 आचरन् 5 P2 Ins. Lin. Arg. vdd. मायाविषु 6 P. vdd. तथा च व्रजन्ति ते मूढधिय: पराभवं भवन्ति मायाविषु येन मायिन: ( ) इत्यादि। अनुप्रासोऽर्थान्तरन्यासश्च॥१०३॥

1 P. सेय। 2 P2 सा इयं हे देवा! 3 P. बहुता 4 P. vdd. परं कुलम् अथवा कथापथं 5 P2 om. युष्मदीया... गुरुकृत: 6 P. vdd. अनुप्रासो विरोधोपि॥१०४॥

सर्ग ५ 53

[विरथ[1] चित्तमिति। नृप यद्यपि देवत्वात् अखिलजनस्य चित्तं वित्थ जानीथ। तु पुनस्तथाप्यहं मौनं न[2] कुर्याम्। किंभूतम्? धुर्यस्य मुख्यस्य कार्यस्य परिपन्थि वैरिभूतम्। चरः वरं गिरा कृत्वा ह्रीर्लज्जाऽप्यस्तु। पुनः परस्य वाक् वाणी अपरास्ता अनिराकृता सती स्वीकृतैव मा अस्तु। परेण याचिते सति मौनं क्रियते तदा तदङ्गीकृतमिव प्रतिभाति। ततो लज्जामङ्गीकृत्य वाचा[3] निराकरणीयम्[4] ॥१०५॥]

यन्मतौ विमलदर्पणिकायां सन्मुखस्थमखिलं खलु विश्वम्।
तेऽपि किं वितरथेदृशमाशां या न यस्य सदृशी वितरीतुम् ॥१०६॥

[यन्मतौ[1] विमलेति। खलु निश्चितम्[2]। येषां मतौ यन्मतौ। विमलदर्पणिकायाम् अखिलं विश्वम्। तत्त्वं[3] पाठान्तरम्। सन्मुखस्थं प्रतिबिम्बितमित्यर्थः[4]। तेऽपि ईदृशमनुचितामाशां किं वितरथ दत्थ[5]। तदेवाऽनौचित्यं दर्शयति। आ आशा यस्य[6] वितरीतुं[7] दातुं न[8] सदृशी न योग्या। अज्ञानानामेवैतदुचितम्। ननु विश्वव्यवहारदक्षनामित्यर्थः[9] ॥१०६॥]

यामि यामिह वरीतुमहो त्वं ह्रीततां नु करवाणि कथं वः।
ईदृशां न महतां बत जाता वञ्चने मम तृणस्य घृणाऽपि ॥१०७॥ द्रु

[यामि[1] यामिहेति। अहो[2] अहम् इह स्वयंवरे[3] यां वरीतुं

1 l. वित्थ चित्तम् । 2 l2 om. न 3 l1 वा 4 l2 वक्करणीयः 5 l1 add. अनुप्रास उक्तनिमित्ता विशेषोक्तिरर्थान्तरन्यासः काव्यलिङ्गं च ॥१०५॥
2 l1 यन्मतौ। 2 l1 add. वाच्यालङ्कारे वा 3 l2 om. तत्त्वं पाठान्तरम् 4 l2 प्रतिबिम्बित° 5 l1 दत्त 6 l2 तस्य 7 l1 l2 om. वितरीतुं; edr. add. वितरीतुं 8 l1 l2 om. न सदृशी; edr. add. न सदृशी 9 l1 add. अनुप्रासो रूपकं विरोधो विषमोऽपि वा ॥१०६॥ 2 l1 यामि। 2 l1 om. अहो 3 l1 add. स्थाने

सर्ग ५ 54

यामि। तस्या दूततां वो युष्माकं कथं करवाणि। बत[4] खेदे। ईदृशां प्रसिद्धानां महतां[5] वो युष्माकं मम तृणस्य नलस्य। अद्य च तृणप्रायस्य वञ्चने घृणा जुगुप्साऽपि न जाता[6]॥१०७॥]

उद्भ्रमामि[1] विरहान्मुहुरस्या मोहमेमि च मुहुर्तमहं यः।
श्रूत वः प्रभवितास्मि रहस्यं रक्षितुं स कथमीदृगवस्थः॥१०८॥

[उद्भ्रमामीति[2]। अहम् अस्या विरहात् (न्मु) मुहुः उद्भ्रमामि भ्रान्तो भवामि। ग्रथिलो भवामि। मुहुर्तं च पुनः मोहम् एमि आगच्छामि[3] यूयं श्रूत सोऽहं कथम् ईदृगवस्थः उद्भ्रान्तो मूढो वा वो युष्माकं रहस्यं दूत्यं[4] रक्षितुं प्रभवितास्मि। अपि तु न[5]॥१०८॥]

यां मनोरथमयीं हृदि कृत्वा यः श्वसिम्यथ कथं स तदग्रे।
भावगुप्तिमवलम्बितुमीशो दुर्जया हि विषया विदुषाऽपि॥१०९॥

[यां[1] मनोरथमयीमिति। अहं यां दमयन्तीं हृदि मनोरथमयीं मनःकल्पितां कृत्वा योऽहं श्वसिमि[2][3] सोऽहम् अथ पश्चात् तस्याऽग्रे भावस्य चित्तस्य गुप्तिं गोप्यरहस्यम्[4] अवलम्बितुम्[5] आश्रितुं कथम् ईशो समर्थो भवामि। हि यस्मात् विदुषाऽपि विषया दुर्जयाः[6]॥१०९॥]

4 B. 12 om. बत खेदे; edd. add. बत खेदे 5 P. om. महतां 6 P. add. अनुप्रासो रूपकं विरोधश्च॥१०७॥ 1 P2 text खलु यस्या 2 P. उद्भ्रमामि 3 P. गच्छामि M. गुह्यं 5 P. add. काव्यलिङ्गम्॥१०८॥
1 P. यां M। 2 P2 श्वसिमि 3 P. add. पाठान्तरे श्वपिमि M. गोप्यं 5 P. धारयितुं 6 P. add. न लोकाव्ययो( इत्यादिना षष्ठीप्रतिषेधः। अर्थान्तरन्यासः॥१०९॥

सर्ग ५ 55

यामिकाननुपमृध्य च माहक् तां निरीक्षितुमपि क्षमते कः।
रक्षिलक्षजयचण्डचरित्रे पुंसि विश्वसिति कुत्र कुमारी ॥११०॥

[यामिकानिति। माहक् वीरः सुभगश्च यामिकान् रक्षकान् अनुपमृध्य अहत्वा तां निरीक्षितुमपि कः क्षमते। तथा रक्षिणां लक्षस्य जयेन चण्डचरित्रः तस्मिन् माहशे पुंसि कुमारी बाला अनभिज्ञा कुत्र कस्मिन् विश्वसिति? अपितु न ॥११०॥]

४/ आदधीचि किल दातृकृतार्घं प्राणमात्रपणसीम यशो यत्।
आददे कथमहं प्रियया तत् प्राणतः शतगुणेन पणेन ॥१११॥

[आदधीचीति। यद्यशः प्राणमात्रमेव प्रणस्य मूल्यस्य सीमा यस्य तत्तथाविधं वर्तते। किंभूतम्? आदधीचि दधीचिम् ऋषिं मर्यादीकृत्य दातृभिः कृतोऽर्घो मूल्यं यस्य तत्तथा। तेन त्यागिना प्राणान् दत्त्वा यशः उपार्जितम्। तत् यशः अहं प्रियया दमयन्त्या प्राणतः शतगुणेन पणेन मूल्येन कथम् आददे कथं गृह्णामि? (तदिदं /स्मा यशो महार्घं ममाऽनेन कार्येण ॥१११॥]

२ l. यामि। २ B. चन्द्र॰ ३ l. add. कुमारीत्यत्राऽमङ्गलदाय्यश्लीलत्वं न शङ्कनीयम्। अग्निप्रेतमित्यादिवत् दोषस्य लोकेन संवीतत्वात्। तथा चोक्तं वृत्तिकारः - स्वाल्पम् असभ्यार्थान्तरम् अस्य स्मृतिहेतुश्च। अश्लीलमित्यभिधाय न गुप्तसंवृतलक्षितानीति अपवादसूत्रयत्। अप्रसिद्धलाक्षणिकलोकसंवीतासभ्यं पदं नाऽश्लीलम्। काव्यलिङ्गमर्थान्तरन्यासश्च ॥११०॥ १ l. आदधी। २ l. यतो यशः ३ B. मूल्यस्य ४ l. om. लक्ष यस्य ५ l.२ om. दधीचिम् ६ B. मर्यादा॰ ७ l. कार्यम् and add. आङो दोऽनास्यविहरण (पा॰ I. iii. 20) इत्यात्मनेपदम्। परिपूर्तिर्विषमो रूपकं च। अनुप्रासोऽपि ॥१११॥

सर्ग ५ 56

अर्थना मयि भवद्भिरिवास्यै कर्तुमर्हति मयाऽपि भवत्सु।
भीमजार्थपरयाचनवाचा यूयमेव गुरवः करणीयाः ॥११२॥

[अर्थना[1] मयीति। मयाऽपि[2] भवत्सु विषये अस्यै[3] दम-
यन्त्यर्थम् अर्थना याच्ञा कर्तुम् अर्हति योग्यो भवति।[4] भवद्भिर्मयि
विषये अर्थना कर्तुम् ~~अर्हति~~ अर्हति। अर्थनाशब्दस्य कर्तुंशब्दस्य च
भाववचनत्वात्, मया इत्यत्र अनुक्ते कर्तरि तृतीया। न लोकाव्यय(पा०
त/ II.iii.69)ति कर्तृषष्ठीप्रतिषेधात् भवद्भिरित्यत्राऽपि कर्तरि तृतीया।
अहमपि दमयन्तीं[5] भवतां पार्श्वे प्रार्थयामि। यतो मया भीमजार्थं या
परस्य पार्श्वे याचनवाक् परप्रार्थनी[6] वाणी तदर्थं यूयमेव गुरवः करणीयाः।
थ/ अहं अतिप्रियत्वात् परं न प्रार्थयामि। परं युष्मदीया वाक् मया शिक्षिता।
युष्माभिर्देवत्वात् परो न प्रार्थितः। इदानीमेवाऽरे प्रार्थितः। मम च यूयं
गुरवः। अतो न लज्जा[7] ॥११२॥]

अर्थिताः प्रथमतो दमयन्तीं यूयमन्वहमुपास्य मया यत्। /ह
ह्रीर्न चेद्व्यतिपतामपि लब्धः सा ममाऽपि सुतरां न तदस्तु ॥११३॥

[अर्थिता[1] इति। यूयं मया अन्वहम् उपास्याऽऽराध्य प्रथ-
मतो दमयन्तीं यत् ~~अर्थिता~~ अर्थिताः तत् व्यतियतां व्यतिक्रामतां
वो युष्माकं चेत् ह्रीर्लज्जा न। तत्तस्मात् ममाऽपि सुतरां[2] सा लज्जा
न अस्तु मा भवतु[3] ॥११३॥

1 P. अर्थना। 2 P. add. न 3 P. तस्यै. 4 P. add. तथा 5 P. om. भवतां 6 P.
परप्रार्थन० 7 P. add. उपमा ॥११२॥

1 P. अर्थिता। 2 P. add. नितरां 3 P. add. न गतिहिंसार्थेभ्यः (पा० I.iii.15)
इति प्रतिषेधात्। ~~कर्तरि~~ कर्तरि कर्मव्यतिहारे (पा० I.iii.14) इति प्राप्तस्याऽऽ-
त्मनेपदस्याऽभावे शतृप्रत्ययः। काव्यलिङ्गम् ॥११३॥

सर्ग ५ 57

कुण्डिनेन्द्रसुतया किल पूर्वं मां वरीतुमुररीकृतमास्ते।
व्रीडमेष्यति परं मयि दृष्टे स्वीकरिष्यति न सा खलु युष्मान्॥११४॥

[कुण्डिनेन्द्रेति[1]। किल श्रूयते[2]। कुण्डिनेन्द्रसुतया[3] पूर्वं मां वरीतुम् उररीकृतम् आस्ते। अङ्गीकार[5]: कृतोऽस्ति। परं केवलं मयि दृष्टे सा व्रीडम् एष्यति। खल्विति मन्ये[6]। युष्मान् न स्वीकरिष्यति[7]॥ ॥११४॥]

तत्प्रसीदत विधत्त न खेदं दूत्यमत्यसदृशं हि ममेदम्।
हास्यतैव सुलभा न तु साध्यं तद्विधित्सुभिरनौपयिकेन॥११५॥

[तत्प्रसीदतेति[1]। तत् यूयं प्रसीदत। खेदं न विधत्त मा कुरुत। हि यतो मम इदं दूत्यम् अतिशयेन असदृशम्। अनौपयिकेन[2] सामादिभिरुपायैर्विना तत्साध्यं विधित्सुभिर्भवद्भिर्लोकमध्ये हास्यता एव सुलभा सुप्राप्या। न तु साध्यं दमयन्तीप्राप्तिलक्षणं फलं सुलभम्। उपाय एव औपयिकम्[3]॥११५॥]

ईदृशानि गदितानि तदानीमाकलय्य स नलस्य बलारिः।
शंसति स्म किमपि स्मयमानः स्वानुगाननविलोकनलोलः॥११६॥

1 P. कुण्डिने। 2 P. add. प्रसिद्धौ सत्ये वा। 3 P. कुण्डिनेन्द्रस्य कुण्डिनेन्दोः सुतया। 4 P. उररि° 5 P. om. विसर्गः। 6 P. add. निश्चिते वा। 7 P. add. गुरोश्च हलः (पा० ३।३।१०६) इति अ विधौ गुरोः स्त्रियां बहुलविवक्षा। स्त्रियां विवक्षा यथा ईहा लज्जा। अविवक्षा यथा आतङ्कः। उभयं यथा बाधा बाधः। ऊहा ऊहः। उत्कण्ठा उत्कण्ठः। काव्यलिङ्गम्॥११४॥
1 P. तत्प्र। 2 P. add. अयुक्तेन अन्याय्येन 3 P. add. विनयादित्वात् उपायात् ह्रस्वत्वं चेति इकप्रत्ययः। काव्यलिङ्गम्॥११५॥

सर्ग ५ 58

[इहशानीति। स बल्कारिरिन्द्रः तदानीं नलस्य ईदृशानि अनभिमतानि गदितानि जल्पितानि आकलय्य मत्वा किमपि स्मयमानो हसन् शंसति स्म उवाच। किंभूतः? स्वकीयानाम् अनुगानां वरुणादीनाम् आननस्य विलोकने कौतुकी ॥११६॥]

नाभ्यधायि नृपते! भवतेदं रोहिणीरमणवंशभुवेव।
लज्जते न रसना तव वाम्यादर्थिषु स्वयमुरीकृतकाम्या ॥११७॥

[नाभ्यधायीति। हे नृपते! भवता इदं रोहिणीरमणस्य वंशे भुवा इव उत्पन्नेनैव नाभ्यधायि नोक्तम्। यतः तव रसना अर्थिषु स्वयं प्रथमम् उरीकृतकाम्या अङ्गीकृताभिलषिता भूत्वा पश्चात् वाम्यात् प्रातिकूल्यात् नु किं लज्जते। अपर्वा हे नल! त्वया रोहिणी गौस्तस्या रमणो भर्ता बलीवर्दस्तस्य वंशोद्भवेन पशुना इव किं नाभ्यधायि। यतस्तस्य रसना वाम्यात् वमनं वामः रोमन्थोद्गारस्तस्य भावस्तत्त्वम्। तस्मान्न लज्जते। प्रथमं गिलति। पश्चादुद्वमति। तथा त्वमपि प्रथममङ्गीकृत्य न कुरुषे ॥११७॥]

भङ्गुरं न वितथं न कथं वा जीवलोकमवलोकयसीमम्।
येन धर्मयशसी परिहातुं धीरहो चलति धीर तवाऽपि ॥११८॥

[भङ्गुरमिति। त्वम् इमं जीवलोकं संसारं भङ्गुरं विनश्वरं

1 P. इह। 2 P. किमपि add. सन् 3 P. add. अल्पं 4 P. add. अनुप्रास. ॥११६॥
1 P. नाभ्यधा। 2 P. add. सोमस्य 3 P. om. यतः 4 P. उरी° 5 P. अथवा
6 P. om. गो: 7 P. add. अनुप्रास उपमा हेतुश्च ॥११७॥
1 P. भङ्गु। P. om. भङ्गुरमिति।

सर्ग 5 59

वितथं[3] मिथ्याभूतं वा अनिर्वचनीयत्वात् कथं न विलोकयसि। किं न विचारयसि। अहो धीर! येन कारणेन त्वाऽपि धीर्बुद्धिर्धर्मं यशश्च[4] धर्मयशसी ते[5] परिहातुं[6] चलति[7] ॥११८॥]

कः कुलेऽजनि जगन्मुकुटे वः प्रार्थकेप्सितमपूरि न येन।
इन्दु/ इन्दुरादिरजनिष्ट कलङ्की कष्टमत्र स भवानपि मा भूत् ॥११९॥

[कः[1] कुले इति। वो युष्माकं जगतां मुकुटभूते कुले एवं को अजनि। अपि तु न कोऽपि। येन प्रार्थकस्य ईप्सितं न अपूरि। युष्माकम् आदिः पूर्वजः इन्दुः कलङ्की अजनिष्ट। कष्टं[2] भवानपि स कलङ्कयुक्तो मा भूत्। अर्थिविमुखीकरणात्[3] ॥११९॥]

रपि/ याऽपदृष्टिरिति या मुखमुद्रा याचमानमनु याच न तुष्टिः।
त्वादृशस्य सकलः स कलङ्कः शीतभासि शशकः परमङ्कः ॥१२०॥

[याऽपदृष्टिरिति[1]। या याचमानम् अनु लक्षीकृत्य अपदृष्टिर्विरुद्धा दृष्टिः क्रियते। याऽपि मुखमुद्रा मौनं क्रियते। या च अर्थिनं प्रति तुष्टिः सन्तोषो न क्रियते। स सकलोऽपि त्वादृशस्य महात्मनः कलङ्कः शीतभासि चन्द्रे परं केवलं शशक एव एकः अङ्को लाञ्छनम्[2]॥ ॥१२०॥]

2 B मिथ्याभूतं वितथं 3 I om. वा 4 B om. धर्मं यशश्च 5 B om. ते 6 B add. न 7 I, add. अनुप्रासो हेतुश्च ॥११८॥
1 I कः कुले। 2 I add. अहो 3 I add. अनुप्रासो रूपकं च ॥११९॥
1 I याऽपदृष्टिः। 2 I add. अनुप्रासः समुच्चयो व्यतिरेकश्चोपमाऽपि ॥१२०॥

सर्ग ५ 60

नाऽक्षराणि पठता किमपाठि प्रस्मृतः किमथवा पठितोऽपि।
इत्थमर्थिचयसंशयदोलाखेलनं खलु चकार नकारः ॥१२१॥

[1नाऽक्षराणीति। हे नल! 2इत्थम् अर्थिनां चयस्य 3यस्य संशय एव दोला प्रेङ्खोलस्तत्र खेलनं खलु मन्ये 4नकारश्चकार। सन्देहस्य उभयकोटिविलम्बित्वात्। किं भवता मातृकामध्ये अक्षराणि पठता नकारो 5न 6अपाठि। अथवा पठितोऽपि किं प्रस्मृतः विस्मृतः। यत् अर्थिषु निषेधं न ब्रूषे7 ॥१२१॥]

अब्रवीत्तमनलः क्व नलेदं लब्धमुज्झसि यशः शशिकल्पम्।
कल्पवृक्षपतिमर्थिनमित्थं नाऽऽप कोऽपि शतमन्युमिहान्यः ॥१२२॥

[1अब्रवीत्तमिति। अनलो वह्निस्तमब्रवीत्। हे नल! त्वम् इदं शशिकल्पं लब्धं यशः क्व उज्झसि। एनं कल्पवृक्षस्य पतिं शतमन्युं यज्वानम् इन्द्रम् 2अर्थिनं त्वत्तोऽन्यः कोऽपि न 4अत्र आप ॥१२२॥] 3इह

न व्यहन्यत कदाऽपि मुदं यः स्वःसदामुपनयन्नभिलाषः।
त्वत्पदे त्वदभिषेककतानः स त्यजत्वसमतामदमद्य ॥१२३॥

[1न व्यहन्यतेति। यः स्वःसदां देवानामभिलाषः मुदम् उप-

1 Pi नाऽक्षराणि। 2 Pi नकारो here 3 Pi om. यस्य 4 Pi add वाच्यालङ्कारे वा 5 Pi कोऽयं 6 P2 om. न 7 P2 ब्रूते 8 Pi add. अत्र प्रस्मृतिर्विस्मरणे। रुढेः ननु योगात् विप्रकृष्टस्मरणे। अनुप्रासः सन्देहो रूपकं च ॥१२१॥

च/ 1 Pi अब्रवीत्, and. com. of verse no. 122–123 after no. 127. 2 Pi अर्थिनं 3 Pi, P2 om. इह; edr. add इह 4 Pi add अनुप्रास उपमा काव्यलिङ्गं च ॥१२२॥ 1 Pi न व्यहन्यत।

नयन कश्चाऽपि न व्यहन्यत न विहतोऽभूत । कर्मकर्तरि आत्मनेपदम् । तस्याऽभिलाषस्य पदे स्थाने तव अभिषेकं कर्त्तां कुर्वतां नोऽस्माकं सोऽभिलाषः । अद्य असमतायाः मुदं गर्वं त्यजतु । त्वमेवोप्सितं पूरय यथाऽसौ समो न भवति ॥१२३॥]

अब्रवीदथ यमस्तमलङ्घ्ये वीरसेनकुलदीप! तमस्त्वाम् ।
यत्किमप्यभिबुभूषति तत्किं चन्द्रवंशवसतेः सदृशं ते ॥१२४॥

[अब्रवीदथेति । अथ यमस्तं नलम् अलङ्घ्यमनसम् अब्रवीत् । हे वीरसेनकुलस्य दीप । यत् किमपि ते औपाधिकमपि तमः त्वाम् अभिबुभूषति तत् किं चन्द्रवंशवसतेः ते तव सदृशम् ? । अपि तु नातमसा दीपो नाऽभिभूयते । चन्द्रान्वयोत्पन्नश्च । तमोऽज्ञानं वा दीपस्य हि स्वाभाविकस्तावन्न तमोऽन्वयः । चन्द्रवंशोत्पन्नस्य न कारणवशात् औपाधिकः पुनः कश्चिदयमुपाधिनिरासेन निरसनीयः । द्विधैव हि गुणान्वयो दृष्टः – यथा स्वभावादंशुषु शौक्ल्यं, पटे च कारणवशात् । स्फटिके लौहित्यं जपाकुसुमोपाधेः । अत एवाऽभिबुभूषतीति इच्छा । सन्प्रयोगः औपाधिकत्वख्यापनाय[10] ॥१२४॥

दोहनः किमपि यः कठिनानां कामधेनुरपि या पशुरेव ।
नैतयोरपि वृथाऽभवदर्थी ही विधित्सुरसि वत्स! किमेतत् ॥१२५॥

2 P2 विहतो; P1 माऽभूत 3 P1P2 om. कर्त्तां; eds. add. कर्त्तां m P1 add. अनुप्रासः पर्यायः काव्यलिङ्गं च ॥१२३॥

1 P1 अब्रवी । 2 P1 om. नलम् 3 P2 अलङ्घ्य मनसम् 4 P1 किमपीत्यौपाधिकं 5 P1 add. अपि 6 P1 add. वंशवसतेः जन्म प्रख्यन्तो वा प्राहुः । 7 P1 om. ते 8 P1 add. च 9 P1 स्फुटिके 10 P1 add. रूपकं तमःशब्दश्च ~~[illegible]~~ श्लिष्टः ॥१२४॥

[1 रोहण: किमपीति। 2 यो रोहण: कठिनानां किमपि या कामधेनुरपि पशुरेवेति। पूर्ववाक्यद्वये यच्छब्दप्रयोगात् एतयोरित्यनेनोत्तरवाक्ये तच्छब्दार्थमाह। अथवा रोहण इत्येवं पूर्ववाक्यम्। यः कठिनानां किमपीति उत्तरम्। एवं द्वितीयार्धेऽपि तदा एतयोरिति प्रकृतपरामर्शात्। तदयमर्थः- यो रोहणाचलः श्रूयते स कठिनानां वस्तूनां मध्ये किमपि अतिशयी। तथा या कामधेनुरपि सा पशुरेव। 3 यत् एतयोर्द्वयोरपि जडयोर्विषयेऽर्थी वृथा 4 नोऽभवत्। हा वत्स! किम् एतत् त्वं विधित्सुरसि ॥१२५॥]

याचितश्चिरयति क्व नु धीरः प्राणने क्षणमपि प्रतिभूः कः।
शंसति द्विनयनी हठनिद्रां प्राङ्निमेषमिषघूर्णनपूर्णाम् ॥१२६॥

[1 याचित इति। धीरो याचितः नु प्रश्ने क्व 2 चिरयति? न क्वाऽपि। यतः क्षणमपि प्राणने कः प्रतिभूः। जीवितं चञ्चलम्। इयं द्वयोर्नयनयोः समाहारः द्विनयनी हठनिद्रां मरणलक्षणां शंसति। किंभूताम्? 3 प्राक् साग्रतिति निमेषमिषेण यत् घूर्णनं तेन पूर्णाम्। निद्रायाः पूर्वं रूपं घूर्णनम् ॥१२६॥

अभ्रपुष्पमपि दित्सति शीतं सार्थिना विमुखता यदभाजि।
स्तोककस्य खलु चञ्चुपुटेन म्लानिरुल्लसति तद्घनसङ्घे ॥१२७॥

[1 अभ्रपुष्पमपीति। 2 यत् खलु स्तोककस्य चातकस्य

1. रोहण। 2. P. om. यो ... तदयमर्थः। 3. P. यत यौ न भवेत 5. ... अनुप्रासो विरोधश्च ॥१२५॥ 1. P. याचित। 2. P. om. क्व... प्रतिभूः। जी० 3. रूपं पूर्वं म P. ... अनुप्रासो हेतुरपह्नुतिश्च ॥१२६॥

1. P. अभ्रा। 2. P. om. यत खलु

सर्ग ५ 63

चञ्चुपुटेन अर्चिना[4] विमुखता अभाजि। सेति शब्दमात्रजनिता। तथा च न कुर्ले[5] ष्ठियादि( )त्यादिस्मरणम्। तथा ह्यष्टमीनवमीचतुर्दशीषु देवीतिथिषु पिष्टस्य पेषणबन्धनादि न कुर्वन्ति। तत्र हि अपभ्रंश-भाषया पीठदलेनं पीठबन्धनमित्यादिव्यवहारः। पीठस्य च देवीसम्ब-न्धत्वम्। अतः शब्दमात्रादपि दोषोऽस्त्येव। लत घनानां सङ्घे मेघ-वृन्दे म्लानिः कालिमा उल्लसति। किंभूते? शीतम् अभ्रपुष्पमपि दुष्प्रापजलं दित्सति दातुमिच्छत्यपि। अथवाऽऽकाशकुसुममपि दित्सति। वेः पक्षिणो मुखता अभाजि। अत एव स्तोककः। यो दातुमिच्छत्यपि विमुखः अतिस्वल्पः स्तोकं कमुदकं प्राप्तियोग्यं यस्य स तथा[7]॥१२७॥

अचिवानुचितमक्षरमेनं पाशपाणिरपि पाणिमुदस्य।
कीर्तिरेव भवतां भवतां प्रियदारा दाननीरझरमौक्तिकहाराः॥१२८॥

[1]अचिवानिति। पाशपाणिर्वरुणोऽपि एनं नलम् उचितम् अक्षरम् अचिवान्। किं कृत्वा? पाणिं हस्तम् उदस्य ऊर्ध्वं कृत्वा। भवतां सोमवंशोत्पन्नानां कीर्तिरेव प्रिया दाराः कलत्रम्। किंभूताः? दाननीरस्य झरः प्रवाहः स एव मौक्तिकहारः येषां ते तथोक्ताः[2]॥१२८॥

चर्मवर्म किल यस्य अभेद्यं यस्य वज्रमयमस्थि[५] च तौ चेत्
स्थायिनाविह न कर्णदधीची तन्न धर्ममवधीरय धीर!॥१२९॥

३।२ व्पुटेन म। ४। अर्पिता ५। ववे. मकुर्ले ६। ष्ट० बन्धादि
७। वदव. विरोधः श्लेषः उत्प्रेक्षा॥१२७॥
१। अचिवा। २। वदव. अविसर्गः पाठो वा। अनुप्रासो रूपकं(कं) च॥१२८॥

सर्ग ५ 64

[धर्मवर्मेति[1] यस्य कर्णस्य[2] चर्मैव त्वगेव वर्म सन्नाहं नर्मदं धर्म । तथा यस्य दधीचेर्ऋषेर्वज्रमयं[3] वज्रम् अस्थि च । किलेति
चे/ श्रूयते । एतौ तौ[4] कर्णदधीची इह नु स्थायिनौ विनश्वरौ । हे धीर ! तत[5] त्वं धर्मं न अवधारय मा अवगणय ॥१२९॥]

अद्य यावदपि येन निबद्धौ न प्रभू विचलितुं बलिविन्ध्यौ ।
आस्थिताऽवितथतागुणपाशस्त्वादृशा स विदुषा दुरपासः ॥१३०॥

[अद्य[1] यावदिति । स आस्थितस्याऽङ्गीकृतस्य अवितथता सत्यता स एव[2] गुणः तल्लक्षणः पाशः त्वादृशा विदुषा दुरपासः अपासितुं निराकर्तुमशक्यः । येन सत्यतापाशेन निबद्धौ बलिर्दानवो विन्ध्यः पर्वतश्च विचलितुं न प्रभू न समर्थौ । बलिः पाताले स्थितो
ढ़ै/ विन्ध्यश्च न वर्धते । अथवा अवितथतागुणपाशः दुरपासः आस्थितः क्रियापदमिदम् । प्रतिज्ञातवान् इत्यर्थः । तदा बलिविन्ध्याविति कर्मत्वम् । येन निबद्धौ बलिविन्ध्यौ चलितुं न प्रभू । आस्थितः सर्वः कोऽपि
[3]जन इति शेषः । पुराणेषु तथा दर्शनात् । समवप्रविभ्य (पा० I iii 22) इति सूत्रे आङः स्थः प्रतिज्ञाने इति वक्तव्यमित्यात्मनेपदमिति । अपि व्याख्यान्तरम्[4] ॥१३०॥]

प्रेयसी जितसुधांशुमुखश्रीर्या न मुञ्चति कदाचिदपि तातऽपि ।
भङ्गिसङ्गमकुरङ्गदृगर्थे कः कदर्थयति तामपि कीर्तिम् ॥१३१॥

1 P. वर्म । 2 P. किलेति श्रूयते here. 3 Rom. वज्रमयं in P. तत 5 P. मावजगण; and add. अनुप्रासो विरोधो श्लेषश्च ॥१२९॥

1 P. अद्य(द्ये) । 2 P. add. च 3 P. add. विद्वान् 4 P. add. रूपकमुपमाऽपि । गुणशब्दः श्लिष्टः ॥१३०॥

सर्ग ५ 65

[प्रेयसीति। हे नल! भङ्गी भङ्गुरः सङ्गमो यस्याः सा चासौ कुरङ्गदृक् दमयन्ती तदर्थे नामपि कीर्तिं कः कदर्थयति विनाशयति। या कीर्तिः प्रेयसी। तथा जितसुधांशुमुखश्रीर्यस्याः कीर्तेर्मुखं प्रारम्भः। या च दिगन्तगताऽपि पुरुषं न मुञ्चति। इयं कुत्सितरङ्गा दृक् यस्याः। ततश्च अप्रिया विरूपा च। संयोगा विप्रयोगान्ता ( ) इति न्यायेन अणसंयोगा ॥१३१॥]

यान्परं प्रति परेऽर्थयितारस्तेऽपि यं वयमहो स पुनस्त्वम्।
नैव नः खलु मनोरथमात्रं शूर! पूरय दिशोऽपि यशोभिः ॥१३२॥

[यान्परमिति। हे शूर! पुनः स त्वम् अहो खलु नैव केवलं नोऽस्माकं मनोरथमात्रं पूरय। किञ्च दिशोऽपि यशोभिः पूरय। यं त्वां प्रति तेऽपि वयम् अर्थयितारः। अस्मान् प्रति परं केवलं परेऽन्ये लोका अर्थयितारः। अन्येषां वयम् अभिलाषं पूरयन्तोऽपि त्वां प्रार्थयामः। तस्माद् कृत्यं कुरु ॥१३२॥]

1. प्रेयसी। 2. सङ्गो 3. om. कः 4. add. जिता सुधांशुमुखानां चन्द्रप्रभृतीनां श्रीर्यया। अथवा 5. add. व्यतिरेकविरोध उपमा। कीर्तिः प्रति-(:) नायकत्वप्रतीतेः समासोक्तिरपि ॥१३१॥

1. यान्परमिति। यान्नोऽस्मान् प्रति परं केवलं परेऽन्ये लोका अर्थयितारः ये त्वां प्रति तेऽपि वयमर्थयितारः। अहो स पुनस्त्वं नाऽन्योऽधिकतः। खलु नैव केवलं नोऽस्माकं मनोरथमात्रं पूरय। हे शूर! यशोभिर्दिशोऽपि पूरय। अन्येषां वयमभिलाषं पूरयन्तोऽपि त्वामर्थयामः। हे शूर! इत्थमसाधारणयशोलाभो यस्मात्तस्मात् कृतत्वं कुरु। अनुप्रासः॥ 2. om. यशोभिः ———— ॥१३२॥

सर्ग ५ 66

अर्थितां त्वयि गतेषु सुरेषु म्लानदानजनितोरुयशःश्रीः।
अथ पाण्डु गगनं सुरशाखी केवलेन कुसुमेन विधत्ताम् ॥१३३॥

[[1]अर्थितां त्वयीति। हे नल। अथ सुरशाखी कल्पवृक्षः केवलेन कुसुमेनैव पाण्डु गगनं विधत्ताम्। न तु कीर्त्याऽपि। किं भूता? न/ यतः म्लाना विनष्टा दानजनिता उरुर्यशःश्रीः यस्य स तथा। केषु सत्सु? सुरेषु त्वयि विषये अर्थिता गतेषु सत्सु। यदि कल्पवृक्षो दाता भवति तत्कथं देवा नलं प्रार्थयन्ते इति प्रवादात् गतकीर्तिः[3] ॥१३३॥

प्रवसते भरतार्जुनवैन्यवत्स्मृतिधृतोऽपि नल! त्वमभीष्टदः।
स्वगमनाफलतां यदि शङ्कसे तदफलं निखिलं खलु मङ्गलम् ॥१३४॥

भरतार्जुन-[3]वैन्यवत् [[1]प्रवसते इति। हे नल! त्वं [2]प्रवसते ग्रामान्तरं गच्छते पुरुषाय [4]स्मृतिं धृतोऽपि अभीष्टफलदः। त्वं यदि स्वगमनस्य अफलतां शङ्कसे तत खलु शङ्के [5]निखिलं[6] अन्यदपि शास्त्रोक्तं मङ्गलाचरणं च/ अफलम्। तस्मान्मङ्गलकरणात्[7] यथानुपपत्त्या[8] तव यात्रा[9] सफलैव। तथा च शास्त्रम् - वैन्यं पृथुं हैहयमर्जुनं च शाकुन्तलेयं भरतं नलं च। एतान्नरो यः स्मरति प्रयाणे तस्यार्थसिद्धिः पुनरागमश्च।
(  )[10] ॥१३४॥]

1 P. अर्थिता। 2 P. add. देवेषु 3 P. add. अतिशयोक्तिः परिसङ्ख्याऽपि ॥१३३॥

1 P. प्रवसत। 2 P. प्रवसति 3 P. शाकुन्तलेयहैहयपृथुवत; P2 om. भरतार्जुनवैन्यवत् 4 P. स्वकीय° 5 P. add. वाच्यालङ्कारे वा 6 P. P2 अखिलं; edn. निखिलं 7 P. ०प्रकरणात् 8 P. add. अनुमानेन च 9 P. यात्रायाः सफलैव 10 P. add. द्रुतविलम्बितं वृत्तम्। अनुप्रास उपमा च ॥१३४॥

सर्ग ५ 67

इष्टिं नः प्रति ते प्रतिश्रुतिरभूद्याधि स्वराह्लादिनी
धर्मार्थं सृज तां श्रुतिप्रतिभटीकृत्याऽन्विताख्यापदाम्।
त्वत्कीर्तिः पुनती पुनस्त्रिभुवनं शुभ्राद्वयादेशना -
द्रव्याणां शितिपीतलोहितहरिन्नामान्वयं लुम्पतु ॥१३५॥

[इष्टिं[1] नः प्रतीति। या अर्थ ते तव नोऽस्माकम् इष्टिम् अभिलाषं प्रति प्रतिश्रुतिरङ्गीकारोऽभूत। दास्यामीति। किंभूता? स्वः स्वर्गस्य आह्लादिनी। त्वं तां धर्मार्थिं प्रति श्रुत्या वेदेन सह प्रतिभटीकृत्य प्रतिमल्लां कृत्वा अन्वितं सार्थकम् आख्यापदं नाम यस्याः एवंविधां सृज। यथा वेद[3]वाक्यं सत्यमेव तथा कुरु। अङ्गीकृतस्य दाने धर्मो भवति। अथ च इष्टिं यागं प्रति या प्रतिश्रुतिः प्रत्या[4]श्रवणम् अस्तु श्रौषट् इति वाक्यं, तदपि उच्चैरुदात्तः (पा० I-ii.29), नीचैरनुदात्तः (पा० I-ii.30), समाहारः स्वरितः (पा० I-ii.31) इति पाठक्रमे प्रथमपठितेन, तथा, ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः (पा० VIII-ii.91) रित्युदात्ताधिकारपठितसूत्रविहितेन आधेन उदात्तेन स्वरेणाऽऽह्लादयति। साऽपि[5] धर्मार्थी अपूर्वार्थी सान्वया च। यतः श्रुतेः आश्रावणस्य ओं श्रावयेति अध्वर्युणा उक्तस्य वाक्यस्य समनन्तरम् आग्नीध्रेण ऋत्विजा प्रतिभटीक्रियते। तथा च कात्यायनः - इध्मसंनहनाद्यादौ श्रावयेत्याहाऽस्तु श्रौषट् इत्यग्नीत् (सर्वानु ) इत्यभिधाय एवं सर्वत्राऽऽश्रुतप्रत्याश्रुतेष्वित्याह। यद्यध्वर्युर्गाढं वदति तदाऽऽग्नीध्रोऽपि उच्चैर्वदति। यदि स उपांशुः तदा परोऽपि मन्दम् इति सादृश्यसान्वयता। पुनः[6] तव कीर्तिः त्रिभुवनं पुनती सती सर्वेषां

1  li इष्टिं नः। 2 li add. पृति 3 li देव 4 li इत्याश्रवणम् 5 li om. धर्मार्थी ..... यतः 6 li तव कीर्तिः पुनः

सर्ग ५ 68

द्रव्याणां नानाविधानां [7]शिति कृष्ण पीत लोहित हरित [8]एषां नाम्नां शब्दानाम् अन्वयम् अर्थं लुम्पतु। कस्मात्? शुभ्रस्य अद्वयस्य[9] एकस्यैव आदेशनात्। शुभ्रवर्णाद्वैतकरणात्।[10] त्वं नाम्नोऽन्वयं कुरु।[11] ते[12] तव कीर्तिः पुनर्नाम्नोऽन्वयं लुम्पतु। अत्र[13] शार्दूलविक्रीडितं वृत्तम्[14] ॥१३५॥

यं प्रासूत सहस्रपादुदभवत्पादेन खञ्जः कथं
स च्छायातनयः सुतः किल पितुः सादृश्यमन्विच्छति।
त्वत्स्योत्तरमत्र नः समजनि त्वच्चेतसां लङ्घने
साहस्रैरपि पङ्गुरङ्घ्रिभिरभिव्यक्तीभवन्भानुमान् ॥१३६॥

[यं प्रासूतेति।[1] स[2] च्छायातनयः[3] शनैश्चरः पादेन खञ्जः कथम् उदभवत् यं शनैश्चरं सहस्रसङ्ख्याः पादाः किरणाः यस्य स श्रीसूर्यः प्रासूत। किल श्रूयते। सुतः पुत्रः पितुः सादृश्यम् अन्विच्छति[4] प्राप्नोति। यस्य पितुः सहस्रं पादाः स कथं पङ्गुरित्यस्य पूर्वपक्षस्य अत्र नोऽस्माकम् उत्तरं सिद्धान्तो भानुमान् श्रीसूर्यः समजनि[6]। किं कुर्वन्? साहस्रैरपि अङ्घ्रिभिः पादैः तव तेजसां प्रतापानां लङ्घने पङ्गुः असमर्थोऽभिव्यक्तीभवन् प्रकटीभवन्। ततो युक्तम्। पङ्गोः श्रीसूर्यस्य पुत्रः शनैश्चरः पङ्गुरित्युत्तरम्[7] ॥१३६॥]

7 P. शति 8 P. om. नाम्नां 9 P. अन्वयस्य 10 P. add. यथा अप्रकृतीनामादेशनात् अस्याप्यन्वयलोपः। त्वं शुभ्राद्वयादेशनात्। कृष्णपीतादिनाम्नोऽन्वयलोपोऽस्तु 11 P. om. ते 12 P. om. अत्र 13 P. om. वृत्तम् 14 P. add. अनुप्रासः श्लेषोऽतिशयोक्तिः आशीर्व्यतिरेकश्च ॥१३५॥

1 P. यं प्रा। 2 P. स च्छाया... उदभवत् om. प्रासूत 3 P. om. सङ्ख्याः 4 P. add. अन्विष्यति 5 P. कथं स 6 P. P2 अजनि; ed. समजनि 7 P. add. अतिशयोक्तिर्विरोधोऽपि ॥१३६॥

सर्ग ५ 69

इत्याकर्ण्य क्षितीशस्त्रिदशपरिषदस्ता गिरश्चाटुगर्भा
वैदर्भीकामुकोऽपि प्रसभविनिहितं दूत्यभारं बभार।
अङ्गीकारं गतेऽस्मिन्नमरपरिवृढः सम्भृतानन्दमूचे
छे/ भूयादन्तर्धिसिद्धेरनुविहितभवच्चित्तता यत्र तत्र ॥१३७॥

[इत्याकर्ण्येति। स क्षितीशो नलः त्रिदशानां परिषदः
क्य/ सभायाः ताः चाटुवाक्यगर्भा गिरः आकर्ण्य वैदर्भीं प्रति कामुकोऽपि
स्वयं परं प्रसभं बलाद्विनिहितं दूत्यभारं बभार। अस्मिन्नले अङ्गीकारं
गते सति अमरपरिवृढो महेन्द्रः सम्भृतानन्दं यथा भवति तथा ऊचे॥
तत्र इच्छाया[2] अन्तर्धिलक्षणायाः अदृश्यतायाः सिद्धेः अनुविहितभव-
च्चित्तता भूयात्। अनुवृत्तं भवतः चित्तं यया सिद्ध्या सा तथा,
तस्या भावस्तत्ता। यत्र तवेच्छा[4] तत्र त्वम् अदृश्यो भविष्यसीति[3]
वरदानम्। [आनन्दाङ्कम्]। अत्र स्रग्धरावृत्तम्[5]॥१३७॥]

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तस्य श्रीविजयप्रशस्तिरचनाताततस्य नव्ये महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽगमत्पञ्चमः॥१३८॥

[[1]श्रीहर्षमिति। [3]तस्य श्रीहर्षस्य ~~कव~~ म[4]हाकाव्ये नव्ये

1 P1 इत्या। 2 P1 add. यत्र यत्र सर्वत्र 3 P1 add. अथवाऽन्तर्धिसिद्धेः पश्चात् छि-
कृता भवच्चित्तता इति पूर्वमन्तर्धिसिद्धिः कार्यं, पश्चाद्भवच्चित्तेच्छा /छि
कारणमिति पौर्वापर्यविपर्ययादतिशयोक्तिः। 4 P1 om. अत्र 5 P1 add.
अनुप्रास आशीर्विरोधश्च॥१३७॥ 1 P2 text add. पुरुहूतकैतवं नाम।
2 P1 श्रीहर्षम्। 3 P2 यस्य 4 P1 P2 om. महा°; edr. add महा°

सर्ग ५ 70

पञ्चमः सर्गोऽगमत् ॥ किं फूलस्य कवेः ॥ श्रीविजयप्रशस्तिरचना नाम ग्रन्थस्तस्य तातस्य पितुः । सोऽपि ग्रन्थः कृतः5 ॥१३ ता ॥

[श्रीमानालिङ्गपण्डितः स्वसमयाविर्भूतसर्वाश्रम –
श्चाण्डूपण्डितसंज्ञितं प्रसुषुवे श्रीगौरिदेवी च यम् ।
साम्राज्यं बहुदक्षिणोऽधिगतवान् यो वाजपेयक्रतौ
टीकां पञ्चमसर्गबोध – – यूतां नैषधे स व्यधात् ॥१॥

श्रीवैद्यनाथाभिधसूक्ष्मदेवीपद्मप्रसादोपचितप्रसादैः
पद्यैरुदाराकृतिभिः प्रक्लृप्तां क्वचित्क्वचित् शोधयति स्म टीकाम् ॥२॥]

इति [1]धवलक्कवास्तव्य-महापण्डित-श्रीचाण्डू-
विरचितायां नैषधदी[पिकायां [2]टीकायां
पञ्चमः सर्गः [3]समाप्तः ॥५॥

5 P. add. शार्दूलविक्रीडितम् ॥१३ ता ॥

1 P. श्रीमहाकविचाण्डू° ; H om. धवलक्क°... विरचितायां
2 P. om. टीकायां 3 P. om. समाप्तः ॥ ; H add. ग्रन्थसङ्ख्या ॥ – – – ॥
ॐ नमः शिवाय ॥ श्रीः ॥